सं. प. ग्र.-१८
अ. १५

टीकाचतुष्टयोपेतः

वृत्तरत्नाकरः

सम्पादकाः
डॉ. आर्येन्द्र शर्मा, अध्यक्षः
श्री खण्डेराव देशपाण्डे, उपाध्यक्षः
श्री द. गो. पाध्ये, संशोधनसहायकः



संस्कृतपरिषत्, उस्मानिया विश्वविद्यालय
हैदराबाद – ७
१९६९

संस्कृतपरिषद्ग्रन्थावली–१८
अ. १५

श्रीभट्टकेदारविरचितः

वृत्तरत्नाकरः

तात्पर्यटीका, सुकविहृदयानन्दिनी, छन्दोवृत्तिः, पञ्चिका
इत्याख्यटीकाचतुष्टयोपेतः

सम्पादकाः

डॉ. आर्येन्द्र शर्मा, एम्. ए., डी. फिल्.
अध्यक्षः

श्री खण्डेराव देशपाण्डे, एम्. ए., डिप्. एड्.
उपाध्यक्षः

श्री द. गो. पाध्ये, बी. ए., विद्याविलास,
काव्यशास्त्रतीर्थ, साहित्यालङ्कार.
संशोधनसहायकः



संस्कृतपरिषत्, उस्मानिया विश्वविद्यालय

हैदराबाद – ७

१९६९

सर्वेऽधिकाराः स्वायत्तीकृताः

प्रथमावृत्तिः १९६९

मूल्यम् – रूप्यकाः १२

उस्मानियाविश्वविद्यालयस्थसंस्कृतपरिषदा
प्रकाशितः

श्री व्ही. एल्. फाटक इत्येतैः लोकविजय मुद्रणालय, गौळीगुडा,
हैदराबाद इत्यत्र मुद्रितः

Sanskrit Academy Series–18
A.15

VRTTARATNAKARA

of

Sri Kedara Bhatta

with

four Commentaries

Editors

Dr. Aryendra Sharma, M. A., D. Phil.
Director

Sri Khanderao Deshpande, M. A., Dip. Ed.
Jt. Director

Sri D. G. Padhye, B. A., Vidya Vilasa,
Kavya Shastra Tirtha, Sahityalankara.
Senior Research Assistant

SANSKRIT ACADEMY,
OSMANIA UNIVERSITY, HYDERABAD–7

1969

All rights reserved

First Edition

Price Rs. [redacted]

Published by the Sanskrit Academy,
Osmania University, Hyderabad-7

Printed by Sri V. L. Phatak at the Lokavijaya
Press, Gowliguda, Hyderabad A. P.

INTRODUCTION

We are glad to present to the public a new edition of the Vrttaratnakara, the most popular work introducing the student to Sanskrit Metrics.

None of the four commentaries printed in this book is new or unpublished, but they are here, for the first time, printed together along with the text in one single volume, thus saving the reader the trouble of looking into four different books.

The Tatparya Tika of Trivikrama was edited by the Late Professor H. D. Velankar, the Sukavihrdayanandini of Sulhana by Dr. S. N. Gajendragadkar and the Chandovrtti of Somacandra by Dr. G. H. Godbole. All the three commentaries were printed in various volumes of the Journal of the University of Bombay. The fourth commentary, Pancika of Ramacandra Kavi, was published in the edition of the Vrttaratnakara printed by the Nirnaya Sagar Press of Bombay, but the edition has been out of print for a long time and hence this commentary is also included in the present publication.

We have made a few minor alterations, e. g., we have dropped most of the footnotes given in the original publications as they are not useful for a general reader. We have included in the text all the Vrttas for which one or more illustrative commentaries are available; hence a few different Vrttas of the same name occur here. The signs of Laghu and Guru and the names of the Ganas to elucidate the illustrations are given only in the last commentary to reduce the bulk of the volume. To increase the usefulness of the book, three indices are added at the end, the index of the lines of the definitions, the index of the Ganas of the Aksaravrttas and the index of the names of the Vrttas.

The idea to publish an edition of the Vrttaratnakara with the four commentaries first came from the Late Professor H. D. Velankar who also handed over the offprints of the first three commentaries for the purpose. We are grateful to the Government of Andhra Pradesh for giving financial assistance to print the work, particularly to Shri N. Ramesan, Finance Secretary, & Shri S. R. Rama Murthy, Education Secretary, for promptly sanctioning and releasing the grant. We are also thankful to Shri V. L. Phatak, the proprietor of the Lokavijaya Press, who tried his best to print the work as early as possible.

EDITORS

अनुक्रमणिका

प्रथमोऽध्यायः	– सञ्ज्ञा	१–४३
द्वितीयोऽध्यायः	– मात्रावृत्तानि	४४–१२६
तृतीयोऽध्यायः	– वर्णसमवृत्तानि	१२७–२५६
चतुर्थोऽध्यायः	– अर्धसमवर्णवृत्तानि	२५७–२७०
पञ्चमोऽध्यायः	– विषमवृत्तानि	२७१–३०४
षष्ठोऽध्यायः	– प्रत्ययविचारः	३०५–३३४
सूच्यः		३३५–३५२

श्रीः

श्रीभट्टकेदारविरचितः

वृत्तरत्नाकरः

टीकाचतुष्टयोपेतः

प्रथमोऽध्यायः

संज्ञाः

ग्रन्थप्रयोजनम्

१. सुखसन्तानसिद्ध्यर्थं नत्वा ब्रह्माच्युतार्चितम् ।
गौरीविनायकोपेतं शङ्करं लोकशङ्करम् ॥

२. [1]वेदार्थशैवशास्त्रज्ञः [2]पव्वेकोऽभूद् द्विजोत्तमः ।
तस्य पुत्रोऽस्ति केदारः शिवपादार्चने रतः ॥

३. तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम् ।
वृत्तरत्नाकरं नाम बालानां [3]सुखबुद्धये ॥

तात्पर्यटीका

केदारसूरिविहितच्छन्दोलक्षणसूत्रगः ।
प्रणम्य गुरुपादाब्जं संप्रदायो निगद्यते ॥ १ ॥
वर्णवृत्ते प्रत्ययाः षड् व्याख्याता इह सूरिभिः ।
तेष्वाद्यावन्तिमं चात्र मात्रावृत्तेष्वपि स्फुटम् ॥ २ ॥
प्रायः प्रस्तारनियमे सूत्रं लक्ष्मैतदादिकम् ।
गुर्वादिसंख्यानयनपर्यन्तमभिदध्महे ॥ ३ ॥ (युगलम्)

---

1. वेदान्तशास्त्रज्ञः – वेलादित्य निसा. 2. पटचेको निसा; पिव्वेको सु.
3. सुखसिद्धये–जयदामन्.

सपूर्वपक्षसिद्धान्तं प्रायः सूत्रं विवृण्महे ।
क्रियाकारकसम्बन्धं विषमेषु विचक्षमहे ॥ ४ ॥

आपाते यत् प्रतीयेत न तद् व्याख्यास्यते यतः ।
माहाय्यं शर्कराभक्षे न कोऽपि समपेक्षते ॥ ५ ॥

अपूर्वमिव यत् किंचिद् व्याख्यासिद्धं प्रदृश्यते ।
न भ्रमस्तत्र कर्तव्यो जयदेवादि वीक्ष्यताम् ॥ ६ ॥

शास्त्रान्तरप्रसिद्धोऽर्थः सूत्रैर्वक्तुं च शक्यते ।
यः सिद्धान्ताविरोधेन कथमस्माभिरुच्यते ॥ ७ ॥

सिंहावलोकप्रमुखा न्यायाः शास्त्रान्तरस्थिताः ।
सूत्रेष्वव्याप्त्यतिव्याप्तिहानायेह समाश्रिताः ॥ ८ ॥

सर्वव्यापिनमात्मानं कर्तुं पूज्येन यत्पथा ।
अपि नानाकुलोत्पन्नान् सचिवाञ्छ्रयते नृपः ॥ ९ ॥

(१–३)सुखसन्तानेत्यादिभिः त्रिभिः पथ्यावक्त्रैर्विहितं शास्त्रे प्रयोजनादिप्रतिपादनपरं मध्ये कुलकमिदम् । अस्यान्वयः । क्रियते । किम् । इदम् । इदमिति किम् । छन्दः । छन्दः इत्यार्यादिवृत्तलक्षणवाक्यम् । किमर्थं क्रियते । सुखसन्तानसिद्ध्यर्थम् । सुखस्य सन्तानः सुखसन्तानः । सन्ताने(नो) अनवच्छिन्नगमाहतं (?) तस्य सिद्धिः निष्पत्तिः सुखसन्तानसिद्धिः । तस्यैव सुखसन्तानसिद्ध्यर्थः । तादर्थ्यचतुर्थ्यन्तस्य अर्थशब्देन नित्यसमासः इति वाक्यं नास्ति । केचिद् व्याख्यातारः नमस्कारस्य एतत् प्रयोजनमाहुः । तदसत् । ग्रन्थारम्भे मा–कृत्य क्रियमाणनमस्कारस्य अप्रस्तुतत्वात् । किंविशिष्टं छन्दः । लक्ष्यलक्षणसंयुतम् । लक्ष्यमिह आर्याच्छन्दः । लक्षणमिह विवक्षता गणादिपरिपाटी उच्यते । लक्ष्यं च लक्षणं च लक्ष्यलक्षणे ताभ्यां संयुतं लक्ष्यलक्षणसंयुतम् । अयमभिसन्धिः । यदेव लक्ष्यवाक्यम् तदेव लक्षणवाक्यमिति । तत् किमेवंविधं छन्दः क्रियते इति चेत् । सुखबुद्धये सुखेन बुद्धिः ज्ञानं सुखबुद्धिः तस्यै । केषां सुखबुद्धये ? बालानाम् । महाकाव्यलक्षणादिशास्त्रेषु व्युत्पन्नाः प्रत्येकमधिकारिणामस्य (णःअस्य) शास्त्रस्य अग्रे वक्ष्यन्ते यतः तस्माच्छन्दस्यव्युत्पन्ना बाला इव इह बालाः तेषाम् इति । पुनः किंविशिष्टं क्रियते । वृत्तरत्नाकरम् । वृत्तानि एव रत्नानि वृत्तरत्नानि तेषामाकर इव यत् तद् वृत्तरत्नाकरम् । अत्र वृत्तरत्नाकरः इति न्याय्यः पाठः । रत्नाकरशब्दस्य अविशिष्टलिङ्गत्वात् । तर्हि कथं वृत्तरत्नाकरम् इति पदं युज्यते । क्रियाविशेषणत्वाद् इति ब्रूमः । तथा हि । कथं क्रियते । नाम इति संभावनायामव्ययम् । वृत्तरत्ना-

नामाकर इव उत्पत्तिस्थानमिव यथा संभाव्यते तथा क्रियते इत्यर्थः । न तु नामशब्दः अयमभिधानवचनः । कथं तर्हि वृत्तरत्नाकरमिव च्छन्द इत्यभिधानमिति चेद् ग्रन्थान्तरे प्रविचरितम् इदं वृत्तरत्नाकराख्यमिति वचनाद् इति स्थितम् । केन क्रियते । तेन । तेन इति केन । योऽस्ति । किंविशिष्टः । रतः । क्व । शिवपादार्चने । शिवः च शिवा शिवौ इत्येकशेषः । शिवयोः पादाः शिवपादाः तेषामर्चनं शिवपादार्चनं तत्र इति । पुनः किंविशिष्टः अस्ति । पुत्र इति । पुन्नाम्नः नरकात् त्रायते, निजवंश्यान् पुनाति इति वा पुत्रः । पुनः किंविशिष्टः । केदार इति केदारभट्टनामा । ननु तस्य व्यतीतत्वात् कथमधुनापि अस्ति इति व्यवहारः । एतत्काव्यशरीराभिप्रायेण इत्येके । तदसत् । शास्त्रकरणप्रतिज्ञाकाले तस्य असत्त्वात् । तर्हि कथमिह सिद्धान्त इति चेद्, उच्यते । तदा सता एव केदारेण आत्मना अस्ति इति यो वर्तमानव्यपदेशः प्रयोगेण उपनिबद्धः तच्छिष्योपशिष्यैः तद्वाक्यपरमश्रद्धालुभिः शिष्यपरंपरायामुपनिक्षिप्य स व्यवहियते इति न दोषः । कस्य पुत्रः । तस्य । तस्येति कस्य । योऽभूत् जातः । किंविशिष्टः । पव्वेकभट्टनामा । पुनः किंविशिष्टः । द्विजोत्तमः । द्विजश्चासौ उत्तमश्च द्विजोत्तमः । उत्तमत्वमिह ब्राह्मणत्वाभिप्रायेण । न तु द्विजानामुत्तमो द्विजोत्तम इति निर्धारणे षष्ठीसमासस्य प्रतिषेधात् । किंविशिष्टोऽभूत् । वेदार्थशैवशास्त्रज्ञः । वेदानामर्थो पूर्वमीमांसाप्रतिपादितो विधिः उत्तरमीमांसाप्रतिपादितं ज्ञानं चेति । शैवानि च तानि शास्त्राणि च शैवशास्त्राणि नैयायिकादीनि तत्प्रतिबद्धा आत्मज्ञानोपायप्रतिपादका आगमाश्च । वेदार्थौ च शैवशास्त्राणि च वेदार्थशैवशास्त्राणि तानि जानाति इति वेदार्थशैवशास्त्रज्ञः । वेदार्थज्ञानपूर्वकं शैवशास्त्रवज्ज्ञानवर्णनं मुमुक्षोः अस्य मानवधर्मशास्त्रोपदेशाभिप्रायेण । तथा हि–

[1]आत्मज्ञाननिमित्तं हि सिद्धान्तान् प्रविलोकयन् ।
केवलांश्च यदाधीते वेदबाह्यो भवेद् द्विजः ॥

किं कृत्वा क्रियते । नत्वा नमस्कृत्य । कम् शंकरमिति शिवम् । किंविशिष्टम् । लोकशंकरं लोकानां शं सुखं करोति इति लोकशंकरः तमिति । पुनः किंविशिष्टं शंकरम् । ब्रह्माच्युतार्चितम् । अनेनास्य[2] (१–३)

---

1. एष श्लोको मनुस्मृतौ न दृश्यते. 2. अग्रभागदर्शकं पत्रं नष्टम्.

सुकविहृदयानन्दिनी

[1]सश्रीकं प्रभया युतं रुचिरया प्रोद्भासितं गङ्गया
नानावक्त्रविराजितं शशिकलापीडोच्छ्रयालंकृतम् ।
आर्योपेतमुपस्थिताखिलगणस्रक्पूजितं सर्वदा
छन्दःशास्त्रमिवेश्वरस्य जयति त्रैलोक्यवन्द्यं वपुः ॥१॥

कृष्णात्रेयस्य गोत्रे समजनि पुरा दाक्षिणात्याग्रणीर्यो
[2]वेलादित्याभिधानः सुकविरभवद् भास्करस्तस्य सूनुः ।
तत्पुत्रः सुल्हणाख्यः सुललितपदां वृत्तरत्नाकराख्य-
च्छन्दोवृत्तिं स चक्रे सुकविहृदयानन्दिनीनामधेयाम् ॥२॥

शास्त्रारम्भे शास्त्रकार इष्टाधिकृतदेवतानमस्कारपूर्वं शास्त्रसम्बन्धं प्रयोजनं च श्लोकत्रयेण आह ।

(१–३) [3]वेदानामर्थाः वेदार्थाः, शिवो देवता येषां तानि शैवशास्त्राणि च तानि जानाति इति स तथोक्तः, यः पिङ्गेको नाम द्विजोऽभूत् तस्य केदारनामा शिवचरणाराधनपरः पुत्रोऽस्ति तेन केदारेणैवं वक्ष्यमाणलक्षणं छन्दः क्रियते । लक्ष्यमुदाहरणं लक्षणानि यत्यक्षरमात्रागणरचितानि ताभ्यां संयुतं लक्ष्यलक्षणसंयुतम् । किंनाम । वृत्तरत्नाकरं नाम । वृत्तानि श्रीप्रभृतीनि तान्येव रत्नानि तेषामाकर उत्पत्तिस्थानम् । किमर्थम् । सुखसिद्धये । केषाम् । बालानाम् । किं कृत्वा । नत्वा । कम् । शंकरं महादेवम् । किभूतं । लोकानां शं सुखं करोति इति तं तथोक्तम् । किमर्थम् । सुखं परं ब्रह्मानन्दात्मकं सन्तानं पुत्रपौत्रादिस्तत्रोः सिद्धिः प्राप्तिः तदर्थं नत्वा इति सम्बन्धः । त्रिभिः विशेषकोऽयम् ॥ (१–३)

छन्दोवृत्तिः

श्रीमन्तं[4] पार्श्वनाथं च नत्वा सद्गुरुचन्द्रिकाम् ।
वृत्तरत्नाकराख्यस्य टीकां (मया सौभाग्यविजयेन) लेलिख्यतेतराम् ॥१॥

---

1. श्रीकण्ठं ब 2. वैलादित्यः ब. 3. वेदानामर्थो वेदार्थः ब. 4. श्रीमन्तं नास्ति ब क इ; श्रीमन्तं-श्लोकः इति भागः नास्ति अ.

यत्पादाग्रनखांशुराजिररुणा नम्रालिके राजते
तत्कालागतसंपदः पदततिः सद्यावकं का किल ।
तं नत्वा जयमङ्गलैकवसतिं संकल्पकल्पद्रुमं
श्रीमत्पार्श्वजिनेश्वरं मदगजं मोहांहिपोन्मूलने ॥२॥

गुरोः प्रसादादधिगम्य वृत्तरत्नाकरच्छन्दस उद्यमेन
सारं मया किंचिदथास्य वृत्तिर्विधीयते मुग्धसुबोधहेतोः ॥३॥

मयात्र [1]शास्त्रान्तरदर्शनेन प्रोद्भूत[2]नव्यार्थविशेषबोधान् ।
व्याख्यायते केवलमेव [3]सूत्रं पुरातनोदाहरणावली तु ॥४॥

ग्रन्थारम्भे स्वीकृतशिष्टसमयपरिपालनातिभारो [4]ग्रन्थकारो निखिलविघ्नाचल-कुलिशाकारं अभिमतदेवतानमस्कारं [5]सुजनमनोवशीकरणधाम्नीं आत्मीयान्वयनाम्नीं प्रेक्षावत्प्रवृत्तिनिमित्तमिदम् अभिधेयादित्रयं[6] श्लोकत्रयेण क्रमेण प्रतिपादयन्नाह ।

तत्रायमाद्यः श्लोकः सुखसन्तान इति.

(१) शिवं नत्वा प्रणम्य इति । किमर्थम् । सुखसन्तानसिद्धचर्थं सुखसन्तानो निष्प्रत्यूहानन्यसामान्यशास्त्रादिनिर्माणसमुत्पन्नानन्दसन्दोहः । सिद्धिः परं पदम् । तदर्थम् । ऐहिकपारत्रिकसौख्यनिमित्तम् इत्यर्थः । तद्विशेषणैस्तन्महिमानमाविष्करोति । यथा । कथंभूतं शंकरम् । ब्रह्मा विश्वकर्ता । अच्युतः सनातनपुरुषो विष्णुः तयोरर्चितः पूजितः तं तथा । पुनः कथंभूतः । गौरी पार्वती विनायको गणाधिपतिः ताभ्यामुपेतः सहितः तं तथा । तत्सेव्यम् इत्यर्थः । पुनः कथंभूतम् । लोकशंकरं लोकः [7]सप्तभुवनात्मकः । भूलोकः, भुवो लोकः, स्वर्लोकः, महालोकः, जनलोकः, तपोलोकः, सत्यलोकः । तस्य शं सौख्यं करोति इति तं तथा । विश्वविश्वप्रसाददानक्षमम् इत्यर्थः । अनेन च यो [8]देवः सेव्यः सकललोकानुग्रहसमर्थश्च भवति स एव नमस्कारक्रियामर्हति इत्युक्तम् ॥ (१)

---

1. ० दर्शने ब. 2. ०भव्यार्थ० अ ड. 3. शास्त्रं अ ड. 4. शास्त्रकारो ब 5. स्वजन. मुद्रितः पाठः 6. च इत्यधिकम् इ. 7. सप्तभुवनात्मकः । तस्य शं. क; सप्तविधो भुवो लोकः इ. 8. देवपूजितो देवसेव्यः । सकल० क.

अथ द्वितीयः । [1]वेदार्थ इति.

(२) वेदा ऋग्यजुःसामाथर्वलक्षणास्तेषामर्थः परिज्ञानं, ते च [2]शैवशास्त्राणि च यः जानाति स एवंविधः पञ्चेकः इति नाम्ना द्विजोत्तमो द्विजातिश्रेष्ठोऽभूत् समजनिष्ट । तस्य पञ्चेकस्य [3]केदारनामा पुत्रः तनयः अस्ति इत्यत्र [4]तत्कालापेक्षया वर्तमाना इति तत्तनुजत्वेन ग्रन्थकृतात्मनः [5]कारणशुद्धिः प्रतिपादिता, यतः कारणशुद्ध्या हि कार्यशुद्धिः इति । केदारः किंविशिष्टः । शिवपादार्चने रतः हरचरणपूजातत्परः । एतेन आत्मनि पुण्यधनताभिहिता । प्रायः पुण्यधनस्य एव हि पुंसो [6]निर्विघ्नं समीहितं सिद्धिमवाप्नोति इति ॥ (२)

अथ तृतीयः । तेनेद०

(३) तेन[7] केदारेण इदं वृत्तरत्नाकरं नाम छन्द इत्यत्र अभिधानाभिधेययोरभेदोपचारात् छन्दःशास्त्रं क्रियते विधीयते । कीदृक् तत् । लक्ष्यलक्षणसंयुतम् । लक्ष्यं छन्दांसि लक्षणं तद्गणादिप्रतिपादनं, ताभ्यां संयुतं सहितं, न तु अन्यैरिव लक्षणमात्रेणैव सहितम् । अत एवाभिनवकरणेऽभिनिवेशः । किमर्थम् । सुखबुद्धये सुगमावबोधाय । केषाम् । बालानां मुग्धानां न तु प्रौढमतीनाम् इत्येतत् [8]गर्वाटोपावेशपरिहारपरं वचः । अत्र च वृत्तरत्नाकरमित्यभिधेयं सुखबुद्धये इति प्रयोजनं अभिधानाभिधेयलक्षणश्च सम्बन्धः इति त्रयम् ॥ (३)

पञ्चिका

नमस्तस्मै

भगवतेऽर्हते सम्यक्संबुद्धाय ।

प्रणम्य सर्वज्ञमनन्तसद्गुणं समस्तशास्तारमनुत्तरं मुनिम् ।
सुवृत्तरत्नाकरपञ्चिका मया विधीयते बालकबुद्धिवृद्धये ॥

तत्रादौ प्रारिप्सितग्रन्थपरिसमाप्तये निर्विघ्नेनाभिमतेष्टदेवतानमस्कारपुरःसरं शास्त्रस्य अभिधेयाभिधानसम्बन्धप्रयोजनानि प्रतिपादयन् पटचेकनाम्नो द्विजोत्तमस्या-

---

1. वेदान्त. क. 2. सर्व. क. 3. केदारःनाम इ. 4. कर्तृकालापेक्षया अ ब क. 5. कवित्वशुद्धिः इ. 6. समीहितनिर्विघ्नसिद्धिम् 7. उत्पादितेन इत्यधिकम अ. 8. गर्वावेशं क.

त्मजः सकलशास्त्रतत्त्वज्ञः केदाराभिधानो विपश्चिदिमान् श्लोकांश्चकार सुखसन्तानसिद्ध्यर्थं इत्यादीन्। अत्र प्रथमेन श्लोकेन स्तुतिपूर्वेष्टदेवतानमस्कारः प्रतिपादितः। द्वितीयेन शास्त्रगौरवोत्पादनार्थं ग्रन्थस्य कर्ता अभिहितः। तृतीयेन प्रकरणप्रकारसंज्ञापरिमाणप्रयोजनान्युक्तानि इति। अयमिह समुदायार्थः।

(१–३) अवयवार्थस्तूच्यते। शंकरं नत्वा छन्दः क्रियते इति सम्बन्धः। किंविशिष्टम् शंकरम्। लोकशंकरम्। लोकानां शं सुखं करोति इति लोकशंकरः तम्। पुनः किंविशिष्टम्। गौरीविनायकोपेतम्। गौरी पार्वती विनायको गजाननः गौरी च विनायकश्च गौरीविनायकौ ताभ्याम् उपेत सहितम्। पुनः किंविशिष्टम्। ब्रह्माच्युतार्चितम्। बृहद् अप्रमेयं शरीरमस्य इति ब्रह्मा आत्मभूः। स्वपदान् नास्ति च्युतमस्य इति अच्युतो विष्णुः। ब्रह्मा च अच्युतश्च ब्रह्माच्युतौ ताभ्यां अर्चितं पूजितम्। शिवं प्रणम्य किमर्थं विधीयते इत्याह सुखसन्तानसिद्ध्यर्थम् इति। सुखस्य सन्तानः शर्मपरंपरा तस्य सिद्धिः सुखसन्तानसिद्धिः तस्यै। इदं सुखसन्तानसिद्ध्यर्थमिति अर्थशब्देनास्वपदसमासः। अवद्यं छादयति इति छन्दः। तत् किंभूतम्। लक्ष्यलक्षणसंयुतम्। लक्ष्यते इति लक्ष्यं उदाहरणम्। लक्ष्यतेऽनेन इति लक्षणं सूत्रम्। लक्ष्यं च लक्षणं च लक्ष्यलक्षणे ताभ्यां संयुतं संयुक्तम्। पुनः किंभूतम्। वृत्तरत्नाकरं नाम। वृत्तानि श्रीस्त्रीप्रभृतीनि एव रत्नानि तेषाम् आकरम् उत्पत्तिस्थानम्। नाम इति नामधेयम्। केन क्रियत इति चेत् तदाह वेदान्त इत्यादि। वेदान्तः उत्तरमीमांसा। शिवस्य इदं शैवम् शिवा देवता अस्य इति वा शैवम्। वेदान्तः च शैवं च वेदान्तशैवे ते च ते शास्त्रे च इति वेदान्तशैवशास्त्रे, ते द्वे जानाति इति वेदान्तशैवशास्त्रज्ञः। पटचेको नाम द्विजोत्तमोऽभूत्। द्विर्जायन्ते इति द्विजाः। 'दन्तविप्राण्डजा द्विजाः' इत्यमरः। द्विजानां विप्राणामुत्तमः द्विजोत्तमः। अथवा द्विजश्च असौ उत्तमश्च इति द्विजोत्तमः। उत्तमशब्दस्य विशेषणभूतस्य परनिपातोऽभिधानात् पुरुषोत्तमवत्। तस्य पटचेकस्य पुत्रः केदारोऽस्ति। ननु ग्रन्थकर्ता केदारः स्यादिति वक्तव्यम्। कथमस्ति इति संबध्यते इति चेत्, न एवम्। तत्कृतशास्त्रस्य विद्यमानत्वात् तस्यापि वर्तमानता। वस्तुतस्तु शास्त्रकरणसमये वर्तमानमुद्दिश्य केदारोऽस्ति इत्यवादीत् इदानीमपि अस्यार्चनादीनां तदनुकथनत्वान् न दोषः। स किंभूतः। शिवपादार्चने रतः। शिवा च शिवश्च शिवौ। 'पुमान् स्त्रिया' (पा. १.२.६७) इत्येकशेषः। पार्वतीपरमेश्वरौ। तयोः पादाः चरणानि। तेषामर्चनं पूजनम्। तस्मिन् रत आसक्तः। तेन केदारेण इदं छन्दःशास्त्रं क्रियते प्रकाश्यते। किमर्थम्। बालानां सुखबुद्धये। बाला वृत्तावृत्तविवेकशून्याः। बुद्धिरवबोधः। सुखेन बुद्धिः सुखबुद्धिः तस्यै सुखबुद्धये। अत्र तादर्थ्ये चतुर्थी। तेषां बालानां सुखावबोधाय इत्यर्थः॥ (१–३)

प्रतिज्ञा

४. पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ।
मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते ।।

तात्पर्यटीका

(४) इति श्लोकेन प्रतिज्ञा । अत्र पिङ्गलग्रहणं ग्राह्यच्छन्दःशास्त्रसिद्धान्तपरिग्रहार्थम् । तेन जैनसिद्धान्ते 'वक्त्रादि विषमम्' इति यदुक्तं तद्विहाय समवृत्तेन वक्त्रलक्षणम् उदाहरिष्यते । (४)

सुकविहृदयानन्दिनी

छन्दःशब्देन किमभिधीयते इत्याह–

(४) यत् पिङ्गलनागभरतकश्यपसेतवरातमाण्डव्यप्रभृतिभिराचार्यैः छन्दःशास्त्रप्रयोक्तृभिरुक्तमभिहितं लौकिकं लोके भवं लौकिकं न वैदिकं काव्यादिषु तस्य अनुपयोगात् । द्विधा द्विप्रकारम् । कथं इत्याशंकायां मात्रावर्णविभेदेन इत्याह । मात्राभेदेन आर्यादिवृत्तभेदेन. वर्णभेदेन श्रीप्रभृतिवृत्तभेदेन इति । (४)

छन्दोवृत्तिः

[1]अथ प्रस्तुतस्वरूपमाह–

(४) पिङ्गलादिभिः पूर्वाचार्यैः यत् लौकिकं छन्दः मात्रावर्णविभेदेन[2] द्विधा द्वाभ्यां जातिवृत्तरूपाभ्यामुक्तं कथितं तत् लौकिकं छन्दः इहामुष्मिन् शास्त्र उच्यतेऽभिधीयते । अत्र वर्तमानसामीप्ये [3]वर्तमानता । लौकिकमिति पदेन वैदिकानां छन्दसामिह अभणनमुक्तम् । उपयोगाभावात् । (४)

---

1. अथ इति क. 2 द्विविधाभ्यां इ; वर्तमानः इत्यधिकम् क इ.
3. वर्तमानता नास्ति क इ.

५. षडध्यायनिबद्धस्य छन्दसोऽस्य परिस्फुटम् ।
प्रमाणमपि विज्ञेयं षट्त्रिंशदधिकं शतम् ॥

पञ्जिका

(४) इह वृत्तरत्नाकराख्ये शास्त्रे तच्छन्दः कथ्यते प्रकाश्यते । तदिति किम् । यल् लौकिकं लोके विदितं छन्दः द्विधा प्रोक्तम् । केन । मात्रावर्णविभेदेन । निमेषोन्मेषाभ्यामन्यतरेण तुलितः कालः मात्रा । तस्मिन् काले यो वर्ण उच्चार्यते स एकमात्रः ।

तथा चोक्तम्–

एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यंजनं त्वर्धमात्रकम् ॥

अत्र वर्णा अकारादयः । तेषां वर्णानां मात्राभेदेन वर्णभेदेन च द्विप्रकारेण कथितमित्यर्थः । कैः प्रोक्तम् । आचार्यैः । तैः किंभूतैः । पिङ्गलादिभिः पिङ्गलो नाम मुनिः छन्दसामादिकर्ता । आदिशब्दः अत्र प्रकारवचनः । पिङ्गलः एव आदिः येषां सैतवनागवर्धमानप्रभृतीनां ते पिङ्गलादयः । बहुव्रीहिः । तैः ॥ (४)

तात्पर्यटीका

(५) [1]षट् च तेऽध्यायाश्च षडध्यायाः । तैर्निबद्धं षडध्यायनिबद्धं तस्य इति कश्चित् गृह्णाति । तदसत् । संख्यापूर्वकस्य कर्मधारयस्य संज्ञायामेवेष्टत्वात् । तर्हि कथमत्र विग्रह इति चेद् उच्यते । षडध्यायाः निबद्धा यस्मिन् तत् षडध्यायनिबद्धं तस्य इति । एवमेतत्सदृशेषु अन्यत्रापि । अनेन वाक्येन ग्रन्थलाघवं च प्रदर्श्यते । तदिदमविकलं शास्त्रादौ प्रवृत्तये प्रतिपाद्यं व्युत्पाद्यं लोकस्य रुचिवैचित्र्यात् ॥ (५)

सुकविहृदयानन्दिनी

(५) अथ संख्यामाह । अधीयन्ते इत्यध्यायाः । ते च वक्ष्यमाणलक्षणाः संज्ञाविधानमात्रावृत्तसमवृत्तार्धवृत्तविषमवृत्तप्रत्ययलक्षणाः षडेव । तैः षड्भिर्निबद्धस्य रचितस्य अस्य छन्दःशास्त्रस्य प्रमाणं संख्या षट्त्रिंशदधिकं शतं विज्ञेयम् ॥ (५)

छन्दोवृत्तिः

(५) इदं[2] स्पष्टम् । (५)

---

1. षडध्याय इत्यादि क. 2. स्फुटम् इ.

गणाः

६. **म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।**
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥

पञ्जिका

(५) प्रमीयते अनेन इति प्रमाणम् । अस्य छन्दसः एतस्य छन्दःशास्त्रस्य प्रमाणमपि परिस्फुटं [1]सुव्यक्तं यथा स्यात् तथा विज्ञेयम् । 'क्रियाविशेषणानां कर्मत्वं एकत्वं नपुंसकत्वं च' इति वचनात् परिस्फुटशब्दस्य कर्मत्वादि सिद्धम् । अस्य किंविशिष्टस्य । षडध्यायनिबद्धस्य । अध्यायः ग्रन्थानां सन्धिः । षट् च तेऽध्यायाश्च इति षडध्यायाः । तैः निबद्धस्य निश्चितस्य । कीदृशं प्रमाणम् । शतम् । किंभूतम् । षट्त्रिंशदधिकम् । षट् च त्रिंशत् च षट्त्रिंशत्, अथवा षड्भिरधिका त्रिंशत् षट्त्रिंशत् । शाकपार्थिवादित्वान् मध्यमपदलोपी समासः । तया षट्त्रिंशता अधिकम् अतिरिक्तम् । एतेन ग्रन्थगौरवभीरूणां बालानां प्रवृत्तिः अत्र ग्रन्थकृता दर्शिता । (५)

तात्पर्यटीका

(६) अक्षरमंशो गणो धर्मो विकल्प इति पर्यायाः । ननु मात्रागणौ द्विगुरुचतुर्लघूस्तः इति कुतो दश एव इति नियमः । सत्यम् । 'सर्वगुर्म' इत्यत्र समाधास्यते इति न दोषः । गुरुलघ्वोः गणसामानाधिकरण्येन उपदेशो गणसंज्ञार्थः । आद्युपदेशयोग्ययोः अनयोः क्वचिद् वर्णगणमात्रागणान्तरोपन्यासः उभयोः उभयगणसंज्ञास्वीकारार्थः । तेन केवलयोः अनयोः क्वचिद् वर्णगणवृत्तमात्रागणवृत्तलक्षणोपदेशेन रीतिभेददोष इति स्थितम् । वक्ष्यमाणग्रन्थे पद्यस्य प्रस्तुतत्वात् 'पद्यं समस्तकं व्याप्तं' इति वाच्ये 'समस्तं वाङ्मयं व्याप्तम्' इति वचनम् अपादनियमस्य गद्यस्यापि एभिर्दशभिरक्षरैः व्याप्तमस्ति इति कथनार्थम् । इदं च व्याप्तिकथनम् 'पादैरसमं दर्शधर्मवत्' (५.१२) इति सूत्रे गद्यस्यापि गाथात्वेन व्याख्याने अप्रस्तुतस्वीकाराभिधानं नाम दूषणमग्रे परिहरिष्यते इति संप्रदायविदः आहुः ॥ (६)

सुकविहृदयानन्दिनी

(६) [2]गल इति प्रथमाक्षरग्रहणमात्रेण गुरुलघुशब्दयोः ग्रहणम् इत्याम्नायः । एभिः मयरसतजभनलगैः दशभिरक्षरैः समस्तमपि शब्दब्रह्म व्याप्तं त्रैलोक्यमिवाशेषम्[3] ॥ (६)

---

1. प्रव्यक्तं यथा स्यान् विज्ञेयम् इति पाठान्तरम्–निसा. 2. गल-आम्नायः इति भागः नास्ति ब. 3. विष्णुना इत्यधिकम् अ. ब.

७. सर्वगुर्मो मुखान्तलौ यरावन्तगलौ सतौ ।
मध्याद्यौ ज्भौ त्रिलो नोऽष्टौ भवन्त्यत्र गणास्त्रिकाः ॥

छन्दोवृत्तिः

(६) मयरसतजभना गणाः गुरुलघू च । एभिः दशभिः अक्षरैः समस्तं वाङ्मयं [1]शास्त्रजालं [2]अभिव्याप्तं विष्णुना नारायणेन त्रैलोक्यमिव जगत्त्रयमिव । इहार्थप्रधानत्वात् निर्देशस्य स्वरारवरविवक्षा नास्ति । एवं सर्वत्र मादिगणानां लक्षणं लक्षयति ॥ (६)

पञ्जिका

(६) एभिः दशभिरक्षरैः वाङ्मयं वचनमयं शास्त्रं समस्तं व्याप्तम् । कैः । म्यरस्तजभ्नगैः म् च यः च रः च स् च तः च जः च भ् च नः च गः च म्यरस्तजभ्नगाः तैः । किंभूतैः । लान्तैः लो लघुः अन्ते अवसाने येषां ते लान्ताः तैः मगण–यगण–रगण–सगण–तगण–जगण–भगण–नगण–गुरुलघुभिः । कथमिव व्याप्तम् । विष्णुना नारायणेन त्रैलोक्यमिव । त्रयो लोका एव त्रैलोक्यम् ।

यच्च किंचिज् जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥

इति ॥ (६)

तात्पर्यटीका

(७) अथ व्यवहारसौकर्याय प्रस्तुतोचितसंज्ञिनां प्रत्येकमसाधारणं लक्षणमनूद्य तेषु पूर्वाचार्योपदिष्टमादिसंज्ञाः विनियोक्तुं सूत्रमाह । सर्वेति । संज्ञिनामिह सर्वमुखादिविशेषणपदोपादानात् वर्णसमुदायानां संज्ञित्वमवगन्तव्यम् । तत्र सर्वगुर्मः इत्यत्र पूर्वसूत्राद् द्विधा इत्यनुवर्तते । तेन इत्थमन्वयो भवति । कः । वर्णसमुदायः । किंविशिष्टो द्विधाभूतः इति न्यायात् द्विवर्णः त्रिवर्णो वा । पुनः किंविशिष्टो मः । सर्वगुः सर्वस्मिन् स्थाने गुः इति गुरुः यस्मिन् इत्थंभूतः । किंविशिष्टो भवति । मः इति मगणसंज्ञो यथा ऽ ऽ इत्येकः । ऽ ऽ ऽ इति द्वितीयः । मुखान्तलौ यरौ इति । मुखे इत्यादौ, अन्तर् इति मध्ये लः इति लघुः ययोः तादृशौ वर्णसमुदायौ ये (यर)गणसंज्ञौ भवतः । यथा । ऽ ऽ इति प्रथमः । ऽ । ऽ इति द्वितीयः । अन्तगलौ सतौ इति । गश्च लश्च गलौ । अन्ते गलौ ययोः तादृशौ वर्णसमुदायौ सगणतगणसंज्ञौ भवतो यथा ।। ऽ इति

---

1. शास्त्रजातं इ. 2. अधिव्याप्तम् क.

प्रथमः । ऽऽ। इति द्वितीयः । ग्मध्याद्यौ ज्भाविति ग् मध्याद्ययोः स्थानयोः ययोः तौ तादृशौ वर्णसमुदायौ जगणभगणसंज्ञौ भवतः । यथा ।ऽ। इत्याद्यः । ऽ।। इति द्वितीयः । त्रिलो नः इति । त्रिलः इति न इति च बहुवचनान्ते पदे । त्रिधा समुदिता लः त्रिलः इति मध्यमपदलोपी समासः । अस्यायमभिसन्धिः । न्यायाद् द्विलघु-त्रिलघु-चतुर्लघवः समुदायाः न इति प्रत्येकं नगणसंज्ञा भवन्ति । यथा ।। इति प्रथमः, ।।। इति द्वितीयः, । । । । । न इति तृतीयः । तेन इह द्विगुरोः वक्ष्यमाणस्य द्विकयोः संग्रहान्मनसंज्ञाभ्यां प्राक् प्रतिज्ञा न हीयते । किं च सर्वेषामपि मादीनां शास्त्रान्तरप्रसिद्धमपि प्रयोजनमभिधीयते ।

तथा हि–

श्रीवृद्धिमृत्युभ्रमवित्तनाश-
व्याधिद्युतीरायुरतीव दीर्घम् ।
माद्याः क्रमात्ते तरिमुक्तकादौ
ददत्युपश्लोकयता प्रयुक्ताः ।।

अष्टौ भवन्त्यत्र गणास्त्रिकाः इति । त्रयो वर्णाः परिमाणं येषां ते त्रिकाः । अत्र इति सर्वगुर्वादिवाक्यलक्षितेषु एकादशसु गणेषु मध्ये अष्टौ मादयः त्रिका भवन्ति । ते च लोकप्रसिद्धा वर्णगणा इत्युच्यन्ते । शेषास्तु यथास्वरूपम् इत्यर्थः । ननु मुखान्तलौ इत्यादिवाक्यत्रये पञ्चवर्णादिसमुदायेषु अतिव्याप्तौ कथं नियमः स्यादिति चेद् अष्टौ इत्यादि वाक्यस्य आवृत्तिव्याख्यानाद् इति ब्रूमः । तथाहि अन्वयः–व्यवहारे स्वीकर्तव्यतया भवन्ति । के । मादयः । कियद्वर्णे यावद् भवन्ति । त्रिका इति । त्रिवर्णे इत्यर्थः । क्व । अष्टौ । 'अशू व्याप्तौ' (धा. पा. १२६५)। अशनमष्टिः । द्वित्रिचतुःप्रभृतिसंख्यया गणममुदितवर्णानां व्याप्तिः तस्याम् । क्व उक्तायाम् । अत्र इत्यस्मिन्नेव वाक्ये सर्वमुखान्तर् इत्यादिविशेषेण पदोपादानबलादिति स्थितम् । व्यक्तिक्रमेण त्रिकाणां मादीनामुपदेशः प्रसंगेन मध्यजातिसमुद्रप्रस्तारोदाहरणार्थो, वक्ष्यमाणलक्षणानां स्वस्वजातिप्रस्तारोऽधिकरणम् इति ज्ञापनार्थं च ।। (७)

सुकविहृदयानन्दिनी

(७) अस्मिन् छन्दःशास्त्रे सर्वे गुरवो यस्य असौ सर्वगुर्मो मगणो यथा ऽऽऽ । मुखान्तलौ यरौ । मुखमादिः, अन्तर्मध्यम् । आदौ मध्ये लघू ययोः तौ मुखान्तलौ यगणरगणौ यथा । ऽ ऽ, ऽ । ऽ । अन्तगलौ सतौ । अन्ते अवसाने गुरुलघू ययोः तौ

सगण-तगणौ यथा ।।ऽ, ऽऽ।। ग्मध्याद्यौ ज्भौ । गुरुर्मध्ये आदौ ययोः तौ जगण-भगणौ यथा ।ऽ।, ऽ।। । त्रिलो नः । त्रिलघुर्नगणो[1] यथा ।।। । एते म–य–र–स–त–ज–भ–ना अष्टौ गणाः भवन्ति वर्णगणा भवन्ति इत्यर्थः । मात्रागणानां वक्ष्यमाणसूत्रविधानात् । चतुर्गुर्वादीनामपि मगणादिसंज्ञा मा भूद् इत्याशङ्क्य आह-त्रिकाः इति त्रयः परिमाणं येषां ते त्रिकाः ।। (७)

छन्दोवृत्तिः

(७) मगणः सर्वगुरुः । तथा यगणरगणौ यथासंख्यमादिमध्यलघू[2] । एवं सगणत-गणौ[3] अन्तगुरुलघू । तथैव मध्यादिगुरुकौ जगणभगणौ । नगणस्त्रिलघुः । एवमिहाष्टौ गणाः स्युः । चतुर्गुर्वादीनां मादिसंज्ञा माऽभूत् इति नियमार्थमाह । त्रिकाः त्रयोऽवयवाः परिमाणमेषाम् इति । परिमाणे के त्रिकाः इति संक्षेपार्थः । सर्वेषां न्यासो यथा – म ऽऽऽ; य ।ऽऽ; र ऽ।ऽ; स ।।ऽ; त ऽऽ।; ज ।ऽ।; भ ऽ।।; न ।।। ।
एवं पठन्ति च ।

मस्त्रिगुरुस्त्रिलघुश्च नकारो, भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः, सोऽन्त्यगुरुः कथितोऽन्त्यलघुस्तः ।।(७.१) ।। इति ।।

पञ्जिका

(७) त्रीणि परिमाणानि येषां ते त्रिकाः । अत्र इह छन्दसि त्रिभिः त्रिभिः अक्षरैः अष्टौ गणा भवन्ति । के ते गणाः । मयरसतजभनाः । एषां प्रत्येकं लक्षणमाह– सर्वगुर्म इत्यादि । सर्वे गुरवस्त्रयो गुरुवर्णा यस्मिन् स सर्वगुः । कोऽसौ । मः मगण इति । मुखमादिः, अन्तर् अभ्यन्तरम् । तयोरादिमध्ययोः लो लघुः ययोः गणयोः तौ मुखान्तलौ । कौ तौ । यरौ यगणरगणौ । अन्ते अवसाने गलौ गुरुलघू ययोः तौ अन्त-गलौ । कौ तौ । सतौ सगणतगणौ । मध्यश्च आद्यश्च मध्याद्यौ । गौ गुरू मध्याद्यौ ययोः तौ ग्मध्याद्यौ । कौ तौ । ज्भौ जगणभगणौ । त्रयो लघवो यस्मिन् सः त्रिलः । कोऽसौ ।

नः नगण इति । तथा चोक्तम्–

मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।

---

1. भवति इत्यधिकम् ब. 2. ०लघू च इ. 3. ०गणौ च क.

मात्रागणा :–

८. ज्ञेयाः [1]सर्वान्तिमध्यादिगुरवोऽत्र चतुष्कलाः ।
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः ॥

जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥

उर्वीं मस्त्रिगुरुः श्रियं वितनुते नश्च त्रिलो जीवितं
रोऽग्निर्मध्यलघुः क्षतिं सपवनो देशभ्रमं प्रान्तगः ।
यो वार्यादिलघुर्भृतिं दिनमणिर्मध्ये गुरुर्जो रुजां
धत्ते तोऽन्तलघुः क्षयं मुरुमुखे भस्तारकेशो यशः ॥

इति. (७)

आदिमध्यावसानेषु यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ॥

ते यथा–	तगणः ऽ ऽ ।	सगणः । । ऽ
यगणः । ऽ ऽ	भगणः ऽ । ।	मगणः ऽ ऽ ऽ
रगणः ऽ । ऽ	जगणः । ऽ ।	नगणः । । ।

तात्पर्यटीका

(८) चतुर्लघेने लघुः चतुर्लघुः नलघुकौ नलघ्विति च तत्पुरुषेतरेतरयोगसमाहारैर्व्यवहारो लक्ष्यलक्षणसंयुतत्वनिर्वाहाय । वैतालीयादिषु गुरुलौ चेति द्विकलौ[2] –

(८)

सुकविहृदयानन्दिनी

(८) आर्याप्रभृतिमात्रावृत्तेषु चतुष्कलाः पञ्चगणा ज्ञेयाः । कथं सर्वान्तिमध्यादिगुरवः सर्वे [3]चादिश्च मध्यं च अन्तश्च सर्वादिमध्यान्तास्तेषु गुरवो येषां ते चतुर्भिः लघुभिरुपेताः सहिता वेदितव्याः । आदिशब्देन गीतिजातिमात्रासमकादयो गृह्यन्ते सम्यक् स्थिताः संस्थिताः । [4]"पद्मं नितरां विभाति वारिणि वरतनु" ऽ ऽ । । ऽ । ऽ। ऽ । । । । । इति । (८)

---

1. सर्वादिमध्यान्तगुरवो निसा. 2. अग्रभागो नास्ति(ना) 3. आदिश्च मध्यं च नास्ति अ. 4. पद्मं-वरतनु नास्ति ब.

गुरुलघुलक्षणम्:

९. सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।
वा पादान्ते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको लृजुः ॥

छन्दोवृत्तिः

(८) अत्रार्यादिषु मात्राछन्दःसु च चतुःकलाः चतुर्मात्राः पञ्चगणाः ज्ञेयाः। कीदृशाः[1]। सर्वान्तिमध्यादिगुरवः, सर्वगुरुः अन्तगुरुः, मध्यगुरुः आदिगुरवः चतुर्लघूपेताः सचतुर्लघवः संस्थिताः पूर्वाचार्यैः प्रतिष्ठिताः न तु स्वबुद्ध्या कल्पिताः इति। यदुक्तम्–

आर्यादिषु पञ्चगणाः चतुष्कलाः भजसगुरुयुगचतुर्लाः ॥८.१॥

इति। सर्वेषां स्थापना यथा–

भ ऽ।।	स।।ऽ	चतुर्लाः।।।।
ज।ऽ।	गुरुयुग ऽ ऽ	

पञ्चिका

(८) इदानीमार्यादीनां गणानां नामान्याचष्टे। अत्र अस्मिश्छन्दःशास्त्रे पथ्यार्यादिषु वृत्तेषु संस्थिताः गणाः चतुष्कला ज्ञेया ज्ञातव्याः। चतस्रः कलाः मात्राः येषां ते तथोक्ताः। किंभूताः। सर्वादिमध्यान्तगुरवः। सर्वश्च आदिश्च मध्यश्च अन्तश्च सर्वादिमध्यान्ताः। 'द्वन्द्वात्परं श्रूयमाणः शब्दः प्रत्येकमभिसंबध्यते' इति न्यायात् गुरुशब्दः प्रत्येकमभिसंबध्यते। सर्वस्मिन् आदौ मध्ये अन्ते च गुरवः गुरुवर्णाः येषां ते तथोक्ताः। पुनः किंभूताः। चतुर्लघूपेताः। चत्वारश्च ते लघवः च इति चतुर्लघवः तैः उपेताः समेताः॥ (८)

तात्पर्यटीका

(९) –त्रयो जीवति जीवितः सः इत्यादि। उपजातिरियम्। तथा–

एदोर्दिहि पदान्ते ल्वा प्राकृते वचने मतः।
उंहुहं चेत्यपभ्रंशे मध्येऽप्येदौच्च कादिगम् ॥९.१॥

इदमस्योदाहरणम्—

जे तीएँ तिक्खचलचक्खुतिहायदिठ्ठा
ते कामचंदमहुपंचमभारणिज्जा।

---

1. ते इत्यधिकम् ब क इ.

जेसं पुणो निवडिदा सयला वि दिठ्ठी
वट्टंति ते तिलजलंजलिदाणजोग्गा ॥९.२॥ (क. म. २.५)
(वसन्ततिलकासमवृत्तमिदम् ।)

सहि ताओं ताओं चित्ते तावं जणअंति तस्स लीलाओ ।
जहि दिठ्ठेवहुवरवं तस्स रयी (गई ?) केरिसी होई ॥९.३॥

इत्यादि । आर्या इयम् । पादान्त इति केवलमात्रिकार्थोऽयमारम्भः । असौ मात्रिकः पादान्तगुरुर्वा इत्यन्वयः । वात्र व्यवस्थावाची । तेन गुरुः यत्र तत्र पक्षे लघुर्न स्यात् । यथा अत्र उपजातिसूत्रे (३.३१) चतुर्थे चरणे । तथा यत्र लघुस्तत्र पक्षे न गुरुः । यथात्रैव समानिकायाम् (३.१७)॥

सुकविहृदयानन्दिनी

(९) [1]गुरुलघुपरिज्ञानार्थमाह—सहानुस्वारेण वर्तते इति सानुस्वारः विसर्गान्तः सविसर्गः दीर्घो द्विमात्रयुक्तपरः संयोगपरो[2] भवति। चकाराद् व्यंजनान्तोऽपि गृह्यते [3]परिमिताक्षरमात्रागणरचितो वक्ष्यमाणलक्षणो वृत्तस्य चतुर्थांशः पादः, तस्यान्ते वर्तमानः लघुरपि विभाषया गुरुः स्यात् । स च [4]कविसमयव्यवहारात् द्वितीयचतुर्थयोः एव पादयोः अन्ते वेदितव्यः । यथा––

प्रायः समासन्नपराभवानां धियो विपर्यस्ततमा भवन्ति ।
असंभवो हेममयस्य जन्तोस्तथापि रामो लुलुभे मृगाय ॥३॥

इति । तथा च.

श्रियः पतिः श्रीमति (शासितुं जगज्जगन्निवासो वसुदेवसद्मनि) । (शि. १.१) इत्यादि । स च प्रस्तारे वक्रः स्थाप्यः । लघुलक्षणमाह––'ज्ञेयोऽन्यो मात्रिको लघुः' इति । अनुस्वारादिरहितोऽन्यो मात्रिकः एकमात्रो वर्णो लघुर्भवति स च प्रस्तारे ऋजुः । (९)

छन्दोवृत्तिः

(९) यः सानुस्वारोऽनुस्वारसहितो गुरुर्भवति विसर्गान्तो दीर्घो भवति । स गुरुः युक्तपरो भवति संयोगाक्षरसहितः वा पादान्ते वर्तमानो ह्रस्वोऽपि गुरुसंज्ञो ज्ञेयः ।

---

1. अथ गुरोर्लघोश्च लक्षणमुदीरयन्नाह ग. 2. यो इत्यधिकम् ब. 3. ङ गण-परिचितो अ. 4. कविसमये व्यवहारात ब.

तु पुनरर्थे । असौ पुनर्गुरुः प्रस्तारे वक्रमास्थाप्यते । अत्र वा इति व्यवस्थितविभाषायाम् । तेन 'जौ समानिका गलौ च' (३.१७) इत्यादौ अपवादः कृतः । तत्र पादान्ते लो गुरुसंज्ञो न भवति वंशस्थादौ च पादान्ते लघोर्गुरुत्वं न भवति इति । यदाह—

वंशस्थकादिचरणान्तनिवेशितस्य
गत्वं लघोर्न हि तथा श्रुतिशर्मदायि ।
श्रोतुर्वसन्ततिलकादि पदान्तवर्ति
लोर्गत्वमत्र विहितं विबुधैर्यथा तत् ॥ (हेम. छन्दः ९.१)

एवं [1]मात्राछन्दःस्वपि ज्ञेयम् । एवमुक्तप्रकाराद् अन्यो वर्णः लघुर्ज्ञेयः । स च प्रस्तारे ऋजुः सरलः प्रस्थाप्यते । मात्रिक इति लघुः एकमात्रो भवति । अत एव न्यायाद् गुरोः द्विमात्रता । उक्तं च—'स द्विमात्रः' (१.९) इति । यत्तु 'प्राकृते ईंहिउंहुंहंकाराणां' (सि. है. ४.८.४११) नित्यं तथा एकारौकारयोः वा पादान्ते लत्वं [2]वदन्ति अपभ्रंशे वा पादान्तयोः अपि वर्णस्यैकारौकारयोः उच्चारणवशात् लाघवं वदन्ति तदेतदत्र व्यवस्थितविभाषास्मरणादवगतम् ॥ (९)

पञ्जिका

(९) अनुस्वारेण सह वर्तते इति सानुस्वारः । विसर्गो विसर्जनीयोऽन्ते यस्य स विसर्गान्त इति व्यधिकरणोऽयं बहुव्रीहिः । इह ह्रस्वादन्यो दीर्घः । युक्तपरः युक्तं संयुक्तमक्षरं परे यस्य स युक्तपरः । यः सानुस्वारो भवति, यो विसर्गान्तो भवति, यः युक्तपरश्च भवति असौ ग् द्विमात्रो गुरुः स्यात् । अत्र विसर्जनीयग्रहणेन जिह्वामूलीयोपध्मानीययोरपि ग्रहणम् । तदादेशत्वात् यो जिह्वामूलीयो भवति, य उपध्मानीयान्तो भवति, सोऽपि गुरुः स्यात् । किंभूतः । वक्रः प्रस्तारेखा वक्राकृतिः । उक्तं च—'गुरुं प्रस्तारकरणे वक्रं कृत्वा तु विन्यसेद्' इति । वा पादान्ते तु । असौ पादान्ते तु वा विकल्पेन । गुरुर्ज्ञेयो ज्ञातव्यः । मात्रा परिमाणमस्य इति मात्रिकः । अन्यो गुरुवर्णाद् इतरो मात्रिक एकमात्रो ल् लघुवर्णः ऋजुरवक्रा प्रस्तारेखा अवक्रो वेदितव्यः । उक्तं च 'लघुवर्णमृजुं सम्यग् विदधीत विचक्षणः' इति ।

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा ॥ (९)

---

1. अन्यच्छन्दःस्वपि ह. 2. भवति इ.

गुरुत्वापवादः :

१०. [1]पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः ।
पुरःस्थितेन तेन स्याल्लघुतापि क्वचिद् गुरोः ॥

तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ग्राम्यजनो मिष्टमश्नाति ॥ (१०.१)

तात्पर्यटीका

(१०) क्वचिद इति आर्याविषमपादान्ते परसंयोगापेक्षयैव लघ्वगुरुत्वस्येदं लक्षणानुपघाताय । आर्यायामेव इति नियमादन्यजात्यां नाङ्गीकुर्यात् । इदमस्योदाहरणम् ।

तरुणं सर्षपशाकं पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ग्राम्यजनो मिष्टमश्नाति ॥

अत्र रि इत्यस्य संयोगे परे गुरुत्वे पञ्चकलो गणः स्याद् इत्यार्यालक्षणविरोधः ॥(१०)

सुकविहृदयानन्दिनी

(१०) 'विभक्त्यन्तं पदम्' (पा. १.१.४१४)। तस्य पदस्यादौ वर्तमानो यो वर्णः तस्य संयोगः स इह शास्त्रे क्रमसंज्ञकः ज्ञेयः । तेन क्रमसंज्ञकेन पुरोवर्तिना प्राक् पदान्ते वर्तमानस्य प्राप्तगुरुभावस्यापि लघुता स्यात् । क्वचिल् लक्ष्यानुरोधेन । ननु क एष क्रमो नाम संयोगः । उच्यते । पूर्वाचार्याणां पिङ्गलनागप्रभृतीनां कालिदासादीनां च कवीनां समयपरिगृहीतः संयोगः क्रमसंयोगः । तत्र संयोगेन यथा । तरुणं सर्षपशाकम् इति । ह्र संयोगे यथा--

तव हि ह्रियापहृियो मम हरीरभूच्छशिग्रहेऽपि[2] ध्रुवं विधृता ततः ।
बहुलभ्रामरमेचकतामसं मम प्रिये क्व समेष्यति तत्पुनः ॥

तथा—

निर्द्रव्यो हि ह्रियमेति हरीपरिगतः इत्यादि मयैव ते हृते ।

---

1. पदादाविह जदा. सु. 2. हृतं न धृता ततः छ. वृ.

यथा—

स्नेहाद् गेहाद् भुजगतनयालोककौतूहलेन
स्थूलोत्तुङ्गस्तनभरलसन्मध्यभङ्गानपेक्षाः ।
पौरा नार्यस्तरुणनयनानन्दमुत्पादयन्त्यो
धावन्ति स्म द्रुतमपहि[1]यः स्रंसमानोत्तरीयाः ॥

[3]बोधप्रदीपे यथा—

यज्ञे येषां प्रतिपदमियं मण्डिता भूतधात्री
निर्जित्यैतद् भुवनवलयं यैः प्रदत्तं द्विजेभ्यः ।
तेऽप्येतस्मिन् गुरुभवह[1]दे बुद्बुदस्तम्बलीलां
धृत्वा धृत्वा सपदि विलयं भूभुजः [2]संप्रयाताः ॥

शिशुपालवधे (१०.६०) यथा—

[3]प्राप्य नाभिह[1]दमज्जनमाशु प्रस्थितं निवसनग्रहणाय ।

इति ।

असंयोगे यथा—

शशिमुखि भ्रमरोऽयं पद्मबुद्ध्याननं ते ।
समभिलषति पातुं व्यक्तवल्ली[4]प्रसूनः ॥

इति ।

तथा च—

भ्रमति भ्रमरनारी कानने विप्रयुक्ता
वरतनुकुसुमेषु व्योमगङ्गाम्बुजेषु ।
त्रिदशकरिकटेषु स्वर्वधूकुन्तलेषु
स्थितशयितविबुद्धप्रीत कस्ते भ्रमोऽयम् ॥
भ्रमसि भ्रमर येन त्वं मुधा केतकेषु ।

इत्यादि ।

पदादौ इति किम् । अन्यत्र मा भूत् ।

---

1. इति । इत्यधिकम् अ. 2. संप्रयामा ब. 3. प्राप्त० मुद्रितम् 4. प्रसूनम् मुद्रितम्.

भ्रसंयोगेन यथा—

असमग्रविलोकितेन किं ते दयितं पश्य वरोरु निर्विशङ्का ।
न हि जातु कुशाग्रपीतमम्भः सुचिरेणापि करोत्यपेततृष्णम् ॥

इति ।

ह्रसंयोगेन यथा—

आजह्रुस्तच्चरणौ पृथिव्याम् ।

इति ।

रतेरपि [1]ह्रीपदमादधानम् ।

इति ।

तथा च—

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे । (मे. १.३४)

तथा च—

[2]भ्रसंयोगे यथा—

कुन्दावदातैर्भवतो यशोभिः शुभ्रीकृतं किं परमारवीर ।
अद्यापि यद् बिभ्रति कालिमानमरातिनारीवदनोत्पलानि ॥

इत्यादि ।

क्वचिद् इति किम् । सर्वत्र मा भूत् ।

भ्रसंयोगेन यथा—

मही पादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ॥

इति ।

भ्रसंयोगेन यथा—

तत्र भ्रमत्येष मुधा षडङ्घ्रिः ।

इति ।

केचित् पादादौ इति मन्यन्ते तदसंगतम् । [3]सूत्रोदाहरणयोर्घटनाभावात् । तथाहि—'तरुणं सर्षपशाकम्' इति उदाहरणमार्यया प्रदर्शितम् । आर्यायां च पादव्यवस्था नास्ति । पूर्वार्धोत्तरार्धग्रहणात् । पूर्वार्धोत्तरार्धम् इत्यार्यालक्षणं कुर्वाणो ग्रन्थकार एवं ज्ञापयति [4]तावदार्यायां पादव्यवस्था नास्ति । [5]पैङ्गलीयसूत्रपाठाच् च । स्वरार्धं चार्या-र्धम् (छ. शा. ४.१४) इति । तस्मात् पदादौ इति पाठः श्रेयान् इत्यलं प्रसङ्गेन ॥ (१०)

---

1. ह्रीपदमादधानाम् व.　2. भ्रसंयोगेन ब.　3. तत्रोदाहरणयोः ब.
4. यावत् ब.　5. पैङ्गलीयपाठाच् व.

छन्दोवृत्तिः

(१०) वाक्यार्थः स्पष्टः[1]। भावार्थस्तु युक्तपरश्च इति वचनात् यल् लघोः गुरुत्वं प्राप्तं तदत्र पादादिसंयोगे निषिध्यते इति एतदुदाजिहीर्षुराह–तरुणं इति।

अत्र तृतीयपादान्तगतवर्णस्य चतुर्थपादादिगतेन [2]संयुक्तवर्णेन गुरुत्वं न भवति। पुनरिह कुत्रचिद् ग्रहणं लक्ष्यानुरोधार्थम्। तेन ह्रादिसंयोगे च।

यथा—

तव हि यापहियो मम ह्रीरभूत् शशिग्रहेऽपि हृतं न धृता ततः।
[3]बकुलश्यामरमेचकतामसं, मम प्रिये क्व समेष्यति तत्पुनः॥ (हे. ७.२)

तथा—

[4]धनं प्रदानेन श्रुतेन कर्मणा।

इत्यादि।

तथा—

लीलासिताब्जमुत दर्पणमातपत्रम्
किं दन्तपत्रमथ किं शुकमौलिरत्नम्।
किं चामरं तिलकबिन्दुरयेन्दुविम्ब-
मेतद्दिवो निह्नुतदीप्ति मुदे न कस्य॥ (हे. ७.४)

प्राकृते यथा

जह ण्हाउं ओइण्णे अब्भुत्तमुल्लसियमसुअद्धंतं।
तहयण ण्हाओ सि तुमं सच्छे गोलानईतूहे॥ (हे. ७.६)

अद्धंतं पर्यन्तं अब्भुत्तमभिषिक्तं तूहं तीर्थम्।

तथा—

बोद्रहद्रहंमि पडिया।
कुवलयखित्तद्रहि पंकय पङ्कबहोड्डि
कुवलयखित्तद्रहि विवाडिहि धल्लि ससहरुबुड्डु।
तहि निम्मवि करनणाहर, मुहलीला वइहिं॥

---

1. एव इत्यधिकम् इ. 2. संयोगवर्णेन व. 3. बकुलश्यामरसेवकनामसंगमाभिधेये क्व समेष्यति मत्पुनः ब. 4. धनप्रदानेन क.

११. अब्धिभूतरसादीनां ज्ञेयाः [1]संज्ञास्तु लोकतः ।
ज्ञेयः पादश्चतुर्थांशो, यतिर्विच्छेदसंज्ञिता[2] ॥

इत्यादि ।

एष्वतीव्रप्रयत्नत्वं संयोगस्य गुरुत्वाभावे हेतुः। तीव्रप्रयत्नत्वे तु भवत्येव गुरुः।

यथा—

बर्हभारेषु केशान् (मे. २.११०) इति । (१०)

पञ्जिका

(१०) पादादौ इति—

पद्यस्य चतुर्थोंऽशः पादः तस्यादिः पादादिः । इह शास्त्रे पादादौ वर्णस्य अक्षरजातेः संयोगः क्रमसंज्ञितो भवति इत्यध्याहार्यम । यत्र क्रियापदं नास्ति तत्र अस्ति भवति इत्यध्याहार्यम् इति हि वृद्धाः । क्रम एव संज्ञा क्रमसंज्ञा । सा संजाता अस्य इति तारकादित्वात् इतच्प्रत्ययः । परस्मिन् स्थितः परस्थितः । परस्थितेन तेन क्रमाख्येन हेतुभूतेन पूर्वस्थितस्य गुरोः वर्णस्यापि क्वचित् कुत्रचित् लघुता लघुत्वं स्यात् ।

एतस्योदाहरणमाह—तरुणम् इति । सुन्दरि हे कान्ते, ग्राम्यजनः अल्पव्ययेन ईषद्धनव्ययेन मिष्टमश्नाति मधुरं भुङ्क्ते । किं तन्मिष्टम् । सर्षपशाकम् । सर्षपस्य शाकं सर्षपशाकम् । किंभूतम् । तरुणं कोमलम् नवौदनं नवं च तत् ओदनं च इति विशेषणसमासः । नूतनशाल्यम् । पिच्छिलानि च दधीनि । पिच्छिलानि इति दध्नो विशेषणम् । पिच्छिलानि सरसानि इत्यर्थः । सुन्दरि ग्राम्यजन इत्यत्र ग्राम्य इत्यस्मिन् क्रमसंज्ञिते परे गुरुभूतस्य इकारस्य लघुत्वं भवति इति सुन्दरि इत्यत्र चतुर्मात्र एव गणो जायते इत्यर्थः ॥ (१०)

तात्पर्यटीका

(११) अब्धि इति । अब्धयः समुद्रपर्यायाः वेदाश्चत्वार इति चतुर्णां संज्ञा । भूतानि इन्द्रियाणि बाणपर्यायाः पञ्च इति पञ्चानां संज्ञा । रसाः ऋतवः गुहकानि गुहवक्त्राणि षट् इति षण्णां संज्ञा । आदिग्रहणान् मुनयः अश्वाः स्वराः अमाः सप्त इति सप्तानां संज्ञा । वसवः अष्टौ इति अष्टानाम् । रन्ध्राणि ग्रहा नव इति नवानाम् । दिक्पर्यायाः

---

1. संख्याः निसा. 2. संज्ञकः निसा.

दश इति दशानाम् । रुद्रा एकादश इत्येकादशानाम् । अर्कपर्यायाः द्वादशेति द्वादशानाम् । विश्वे त्रयोदश इति त्रयोदशानाम् । गुणाः अग्निपर्यायाः त्रय इति त्रयाणाम् । एवमन्यदपि लोकादूह्यम् ।

यथा—

छदमात्रं द्विखण्डेषु वृत्तेष्वर्धं निगद्यते ।
अध्यपेतं व्यपेतं वा पद्ये पादद्वयं बुधैः ॥

इत्यादि ।

ज्ञेयः पादश्चतुर्थोंऽश इति पादोंऽघ्रिः चरणचतुष्टयपूरकोऽवयवः । तत्तुल्यत्वेन चतुर्थः । आर्यादिषु तथा दर्शनात् । चतुर्थ इत्यपि प्रायिकमेव । गाथासु (१.१२) तृतीयादेरपि पादव्यवहाराङ्गीकरणात् । यतिर्विच्छेदसंज्ञिका इति । यतिर्विरतिर्विरामोऽवसानमवसितिर्विच्छेदच्छित् खं पदनियम इति पर्यायाः । पादान्तयतिर्भवति इति लोकादङ्गीक्रियते । पादमध्ये तु क्वचिदेव इति तत्तद्वाक्यविशेषविधानसामर्थ्यात् । सा च यतिः कीदृशे प्रदेशे भवति इति चेद्, उच्यते ।

पदान्ते विरतिर्ज्ञेया यतिरर्धान्तगोचरा ।
पदान्तमात्रे पादान्ते पादमध्ये च योजिता ॥

विभक्त्यन्तं हि पदं (पा. १.४.१४), तस्यान्तः पदान्तः तत्र विरामविशिष्टे यतिः कर्तव्या या अर्धान्ते प्राप्ता इति वाक्यार्थः । अर्धान्ते विरतौ यत्युदाहरणं प्रसिद्धम् ।

अस्य व्यतिरेकोदाहरणं यथा—

दूरीकृतासि वचसा हृदयस्थितेन
किंपाकपक्वफलचारुतरेण कर्णे ॥
जेषस्य किं तेन ज[1] ॥

पृथ्वीयं पादमध्ये वसुयतिः पादान्ते पुनर्ग्रहयतिः इति ।
अथ पदान्तयतिविधानव्यतिरेकस्य क्वचिद् व्यभिचारः ।

पतद्यद्विदयं मध्ये पदस्याप्युररीकृतम् ।
यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥

पादमध्ये पदमध्ये यत्युदाहरणं यथा—

पर्याप्तं तप्तचामीकरकटकतटे श्लिष्टशीतेतरांशौ ।

इत्यादि । चामीकरम् इत्येकपदम् । पादमध्ये मुनियतिः स्रग्धरा इयम् ।

---

1. अग्रभागो नष्टः ।

अस्य व्यतिरेको यथा—

एतासां राजति सुमनसां दाम कण्ठावलम्बि ।

तथा—

कुरङ्गाक्षीणां गण्डतलफलके स्वेदविसरः ।
पादमध्ये रसयतिः शिखरिणी इयम् ।

तथा—

स्त्रीणां सगीतविधिमयमादित्यवश्यो नृपेन्द्रः ।

मन्दाक्रान्ता । अस्य अपवादः ।

अपरस्यैकवर्णत्वे प्रत्ययान्ते तथा परैः ।

उररीकृता इत्यनुषङ्गः । उदाहरणम्—

स्कन्धे विन्ध्याद्रिबुद्ध्या निकषति महिषस्याहितोऽसूनहार्षीत् ।

इति । स्रग्धरा इयम् । महिषशब्दाद् यतिरिह ।

अथ पदयोः सन्धौ पदमध्ययतौ विशेषः प्रतिपाद्यते ।

पूर्वान्तिवत्स्वरः सन्धौ परस्यादिः स्वरात् परः ॥
परादिवर्णसंबद्धं व्यञ्जनं तु परादिवत् ।
प्राक् पदान्तस्थितं साधु व्यवहारेषु दृश्यताम् ॥

पूर्वान्तिवत्स्वरस्य उदाहरणं यथा—

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुम् ।

इत्यादि । स्रग्धरा इयं पादमुनियतिः ।

परादिवर्णसंबद्धस्य व्यञ्जनस्य उदाहरणं यथा—

सद्यः स्विद्यन्नयमविरतोत्कम्पलोलाङ्गुलीकः ।

तथा—

इत्याद्युक्त्वोपकेतून् प्रकृतिमवयवान् प्रापयत्येव देवी ।

इत्यादि । स्रग्धरा इयम् ।

कार्याकार्याण्ययमविकलान्यागमेनैव पश्यन् ।

इत्यादि ।

नमस्करोम्यहं देवावग्नाविष्णू प्रगे प्रगे ॥

इत्यादि च ।

अथ पदान्तेऽपि प्राप्तायाः क्वचित् प्रतिषेधः कथ्यते । यथा—

तथा प्राक्पदसंबद्धाश्चादयः प्राक्पदान्तवत् ।
ये परेणैव संबद्धाः प्रादयस्ते परादिवत् ॥

प्राक्पदसंबद्धाश्चादयो यथा—

स्वादु स्वच्छं च सलिलमिदं कस्य न प्रीतये स्यात् ।

इत्यादि ।

परपदसंबद्धाः प्रादयः परादिवत् यथा—

दुःखं मे प्रक्षिपति हृदये दुःसहस्तद्वियोगः ।

इत्यादि । मन्दाक्रान्ता इयम् ।

प्रादीनां परसंबद्धत्वव्यावृत्तिः यथा—

प्रयाति तरुणीं प्रति प्रतिकलं मनः कामिनाम् ।

इत्यादि । पादमध्ये वसुगतिः ॥ (११)

सुकविहृदयानन्दिनी

(११) अथ संज्ञामाह—

अब्धि इति । लोकोपचारादब्ध्यादीनां संज्ञा ज्ञातव्याः । तद् यथा— चत्वारः अब्धिवेदाः । पञ्च (महाभूत)शरेन्द्रियाणि । षट् रसर्तवः । सप्त स्वरर्षयः । अष्टौ वसवः । नव (निधिनन्द)रन्ध्राणि । दश दिशः । एकादश रुद्राः । द्वादश आदित्याः । त्रयोदश विश्वेदेवाः । चतुर्दश भुवनानि । पञ्चदश तिथयः । [1]षोडश नृपाः । इत्यादि ।

पादलक्षणमाह—

'ज्ञेयः पादश्चतुर्थांशः' इति । वक्ष्यमाणलक्षणस्य वृत्तस्य चतुर्थोंऽशः भागः[2] **पादसंज्ञको भवेत् ।**

अथ यतिमाह—

'यतिर्विच्छेदसंज्ञिता' इति ।

[3]यतिः विरामादिराचार्यपारंपर्यागता संज्ञा इयम् अब्ध्याद्यवच्छिन्नाक्षरेषु कर्तव्या । अब्ध्यादिशब्दाः साङ्काः कृत्वा यतिः इत्यनेन सह संबध्यते इत्ययमर्थः शिष्यति ।

तत्राहुराचार्याः हलायुधाः (मृ. सं. पृ. १००)

यतिः सर्वत्र पादान्ते श्लोकार्धे तु विशेषतः ।
समुद्रादिपदान्ते च व्यक्ताव्यक्त[4]विभक्तिके ॥

---

1. षोडश नृपाः नास्ति ब. 2. पादसंज्ञो ज्ञेयः ब. 3. यमनं यतिः इत्यधिकम् ब.
4. वविभक्तव इत्यधिकम् अ.

[1]क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत् ।
यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥
पूर्वान्तवत्स्वरः सन्धौ क्वचिदेव परादिवत्
द्रष्टव्यो यतिचिन्तायां यणादेशः परादिवत् ॥

यतिः सर्वत्र पादान्ते यथा—

श्रियः श्रियं कपोलौ तु संपूर्णेन्दुसमप्रभौ ।
प्रतिबिम्बं हरेर्यत्र कस्तूरीतिलकायते ॥

इत्यादि ।

न तु एवं यथा—

नमस्तस्मै महादेवाय शशाङ्कार्धधारिणे ॥

इति ।

श्लोकार्धे तु विशेषः । यथा—

राजसेवां विनास्माकं गुणो निष्फलतामगात् ।
अन्तःपुरपुरन्ध्रीणामनर्थमिव मण्डनम् ॥

इत्यत्र 'अगाद्' इत्यन्त्यव्यञ्जनमस्य अन्तःपुरेण इत्यकारेण सह सन्धिर्न भवति ।

समासेऽपि न त्वेवं यथा—

सुरासुरशिरोरत्नस्फुरत्किरणमञ्जरी–
पिञ्जरीकृतपादाब्जद्वन्द्वं वन्दामहे शिवम् ॥

इति ।

समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके व्यक्तविभक्तिके प्रकटविभक्तिके अव्यक्तविभक्तिके समासान्तविभक्तिके । तयोरुदाहरणं यथा—

[2]यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु ॥ (मे. १.१)

इति ।

[3]व्यक्ताव्यक्तविभक्तिके इति यतिः सर्वत्र पादान्ते इत्यनेन सह संबध्यते ।

विश्रीकृतजगत्कालं कण्ठेकालं नमाम्यहम् ।
महाकालं कलाशेषशशिलेखाशिखामणिम् ॥

अपि च ।

नमस्तुङ्गशिरश्चुम्बि चन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥

---

1. क्वचित्तु––समासान्तविभक्तिके इति नास्ति अ. 2. संपूर्णश्लोकः दत्तः ब.
3. व्यक्ताव्यक्तविभक्तिके नास्ति ब.

क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत् ।
यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥

यथा—

पर्याप्तं तप्तचामीकरकटकतटे श्लिष्टशीतेतरांशौ ।

इति ।

समुद्रादीति किं, पदमध्ये यतिः पादान्ते मा भूत् । यथा—

प्रणमत भवबन्धक्लेशनाशाय नारा-
यणचरणसरोजद्वन्द्वमानन्दहेतुम् ।

इति ।

पूर्वोत्तरभागयोरेकाक्षरत्वे तु पदमध्ये यतिर्दुष्यति । यथा—

एतस्यां गण्डतलममलं गाहते चन्द्रकक्षाम् ।

इति ।

एतासां राजते सुमनसां दाम कण्ठावलम्बि ।

इति ।

सन्तापं मे जनयति नितम्बोऽयमिन्दीवराक्ष्याः ।

इति ।

पूर्वान्तवत्स्वरः सन्धौ क्वचिदेव परादिवत् । अस्यार्थः—योऽयं पूर्वपरयोरेकादेशः स्वरः सन्धौ विधीयते स क्वचित् पूर्वान्तवद् भवति क्वचित् परस्यादिवत् । पूर्वान्तवद् यथा—

स्यादस्थानोपगतयमुनासंगमेवाभिरामा ॥

तथा—

जम्भारातीव कुम्भोद्भवमिव दधतः [1]सान्द्रसिन्दूररेणुम् ॥

परादिवद्भावो यथा ममैव व्यायोगे—

यस्यारातिविदारितस्य सहसैवाभूद्विभिन्नं रणे
वामाङ्गं कलकिङ्किणीफलकवन्निस्त्रिंशवद्दक्षिणम् ।
एकं घातनिपातदक्षमितरद् घातप्रतीकारकृद्
धन्यः पश्यति युद्धमानमितरत्स्वाङ्गं विमानस्थितः ॥

इत्यादि ।

आद्यादेशः परादिवद्यथा—

---

1. सिन्दूरसान्द्ररेणुम् इति मुद्रितम्, व.

सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान् परिवर्तमानः ॥

इति ।

[1]आदिशब्दात्—

विततघनतुषारक्षोदशुभ्रांशुवर्त्मस्वविरल ।

इत्यादि ।

नित्य प्राक्पदसम्बद्धाश्चादयः [2]प्राक्पदान्तवत् स्युः । तेभ्यःपूर्वा यतिर्न कर्तव्या इत्यर्थः ।

स्वादु स्वच्छं च सलिलमिह प्रीतये कस्य न स्याद् ।

इति ।

परेण नित्यसंबद्धाः प्रादयश्च परादिवत् । तेभ्यः परा यतिः न कर्तव्या [3]इत्यर्थः । यथा—

दुःखं मे प्रक्षिपति हृदये दुःसहस्तद्वियोगः । (११)

इत्यादि सर्वमूह्यम् ॥

छन्दोवृत्तिः

(११). अब्धि(४), भूत(५), रस(६) आदीनां संख्या[4]व्यवहृतिः लोकतो वृद्धव्यवहारात् ज्ञेया । तेषामानन्त्यात् नात्र वक्तुं शक्यते इति भावः । एतद्विषयमाह—

ज्ञेयः पादश्चतुर्थांशः । यमनं यतिर्विरामः । सा च विच्छेदसंज्ञा विश्रामाख्या ज्ञेया । सा च तृतीयान्तेषु अब्ध्यादिनिर्देशेषु [5]उपतिष्ठति अब्ध्यादयश्च सापेक्षत्वाद् यतिरित्यनेन इति संबध्यन्ते । अब्ध्यादिविच्छिन्नैरक्षरैः यतिः क्रियते इत्यर्थः । अत्र लोकतः इति अनुवर्तते । तेन यतेः अपि व्यवहृतिर्लोकतो ज्ञेया । तद् यथा—

यतिः सर्वत्र पादान्ते श्लोकार्धे तु विशेषतः ।

अब्धिकादि पदान्ते च लुप्तालुप्तविभक्तिके ॥

तत्र यतिः सर्वत्र पादान्ते यथा—

शाश्वतानन्दरूपाय तमःस्तोमैकभास्वते ।

सर्वज्ञाय नमस्तस्मै कस्मैचित् परमात्मने ॥

न पुनरेवं यथा—

नमस्तस्मै महादेवाय शशाङ्कार्धधारिणे ।

---

1. आदेशशब्दवत् ब. 2. पदादौ च स्युः अ. 3. भवति इत्यधिकम् ब.
4. संख्यावाचकानां संज्ञा ब. इ. 5 अवतिष्ठते क.

श्लोकार्धे तु विशेषतः इत्यत्र सन्धिकार्याभावः स्पष्टविभक्तिकत्वं[1] विशेषो यथा—

नमस्यामि सदोद्भूतमिन्धनीकृतमन्मथम् ।
ईश्वराख्यं परं ज्योतिरज्ञानतिमिरापहम् ॥

अत्र ईश्वर इत्यस्य पूर्वमकारेण सन्धिर्न कर्तव्यः ।

स्पष्टविभक्तिकत्वं चात्रैवं यथा—

सुरासुरशिरोरत्नस्फुरत्किरणमञ्जरी-
[2]पिञ्जरीकृतपादाब्जं द्वन्द्व [3]वन्दामहे शिवम् ॥

अव्ध्यादिचिह्नपादान्ते लुप्तालुप्तविभक्तिके यथा—

कश्चित् कान्ताविरहगुरुणा स्वाधिकारात्[4] प्रमत्तः ।

तथा

यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु । (मे. १.१)

इत्यादि ।

लुप्तालुप्तविभक्तिके इति यतिः सर्वत्र पादान्ते इत्यनेनापि संबध्यते—

यथा—

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
[5]त्रैलोक्यभवनारम्भमूलस्तम्भाय शम्भवे ॥

इति ।

यथा—

वशीकृतजगत्कालं कण्ठेकालं नमाम्यहम् ॥

क्वचित्तु पदमध्येऽपि [6]पयोध्यादौ यतिर्भवेत् ।
यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥

यथा—

पर्याप्तं तप्तचामीकरकटकतटे श्लिष्टशीतेरांशौ ॥

इति ।

तथा—

[7]कूजत्कोयष्टिकोलाहलमुखरभुवः प्रान्तकान्तारदेशाः ॥

इति ।

---

1. च इत्यधिकम् क. इ. 2. ० पादाब्जद्वन्द्वं क. 3. वन्दावहे मुद्रितम् 4. स्वाधिकारप्रमत्तः क. 5. त्रैलोक्यान्तर्गतारम्भ० अ, त्रैलोक्यनगरा० ब. क. 6. पयोमध्यादौ इ. 7. कूजत्कोदण्ड० क.

तथा—

हासो [1]हस्ताग्रसंवाहनमपि तुलिताद्रीन्द्रसारद्विषोऽस्य ।

इति ।

वैरिञ्चानां तथोच्चारितचतुरऋचां चाननानां चतुर्णाम् ।

इति ।

[2]खड्गे पानीयमाल्हादयति हि महिषं पक्षपाती पृषत्कः ।

इति ।

[3]पयोध्यादौ इति किम् । पदमध्ये यतिः पादान्ते मा भूत् । यथा—

प्रणमत भवबन्धक्लेशनाशाय नारा-
यणचरणसरोजद्वन्द्वमानन्दहेतुम् ।

इति ।

पूर्वोत्तरभागयोरेकाक्षरत्वे तु पदमध्ये यतिर्दुष्यति । यथा—

[4]एतासां गण्डतलममलं गाहते चन्द्रकान्तिम् ।
[5]एतासां राजति सुमनसां दाम कण्ठावलम्बि ।

इति ।

पूर्वान्तिवत् स्वरः सन्धौ क्वचिदेव परादिवत् ।

योऽयं पूर्वपरयोरेकादेशः स्वरः सन्धौ विधीयते स क्वचित् पूर्वस्य अन्तवद् भवति क्वचित् परस्यादिवद् उभयोरादेशत्वात् ।

यथा—

पित्रोः पुत्रः पितुश्च मातुश्च भवति ।

तत्र पूर्वान्तवद्भावो यथा—

[6]स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ।
जम्भारातीभकुम्भोद्भवमिव दधतः ।

इति ।

परादिवद्भावो यथा—

स्कन्धे विन्ध्याद्रिबुद्ध्या निकषति महिषस्याहितोऽसूनहार्षीत् ॥

अत्र हि स्वरस्य परादिवद्भावे व्यञ्जनमपि तद्भक्तत्वात् आदिवद् भवति ।

---

1. हस्तो अ. 2. खडगे नास्ति क. 3. पयोमध्याऽ इ. 4. एतस्याः क. इ. 5. एतस्याः इ. 6. ० संगमेनाभिरामा क.

यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ इत्यन्तादिवद्भावविधावपि संबध्यते। तेन—

अस्या [1]वक्त्राब्जमविजितपूर्णेन्दुशोभं विभाति ॥

[2]एवंविधा यतिर्न भवति।

द्रष्टव्यो यतिचिन्तायां याद्यादेशः परादिवत् ॥

यथा—

आच्छिन्नप्रसराणि नाथ भवतः पातालकुक्षौ यशां-
स्यद्यापि क्षपयन्ति कोकिलकुलच्छायासपत्नं तमः।
[3]अत्यासन्ननिषण्णपत्रगवधूगीतोत्सवप्रक्रमे
पत्युर्भोगभृतां ददन्ति किमपि प्रीतिं मुहुः श्रोत्रयोः ॥

तथा—

[4]विततघनतुषारक्षीरशुभ्रासु दूर्वा-
स्वविरलपदमालां श्यामलामुल्लिखन्तः।
नित्यं प्राक्पदसंबद्धारचादयः प्राक्पदान्तवत्।

चादिभ्यः पूर्वं यतिर्न कर्तव्या' इत्यर्थः। यथा—

स्वादु स्वच्छं च सलिलमिदं प्रीतये कस्य न स्यात्।

इति।

'नित्यं प्राक्पदसंबद्धा' इति किम्। अन्येषां पूर्वान्तवद्भावो मा भूत्।

यथा—

मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे। (मे. १.३८)

इति।

[6]परेण नित्यसंबद्धाः प्रादयश्च परादिवत्।

[7]प्रादिभ्यः परा यतिर्न भवति' इत्यर्थः। यथा—

दुःखं मे [8]प्रक्षिपति हृदये दुःसहस्तद्वियोगः।

परेण नित्यसंबद्धा इति किम्। अन्येभ्यः [9]परापि यतिर्यथा स्यात्। यथा—

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ॥

---

1. ङ शोभां क. 2. इत्येवं ङ क. 3. नास्ति ब. इ. 4. व्क्षोदशुभ्रासु ब. क. इ. 5. भवति इत्यधिकम् ब. 6. पूर्वेण ब. 7. प्रादिभ्यश्च इ. 8. निक्षिपति इ. 9. अपि नित्यसंबद्धेभ्यः इत्यधिकम् क.

अयं च चादीनां प्रादीनां चैकाक्षरत्वेन एकाक्षराणामेव पदान्तयतौ अन्तादिवद्भाव इष्यते। [1]न तु अनेकाक्षराणां पदमध्ये यतौ। तत्र हि पदमध्येऽपि चामीकरादिषु यतेरभ्युपगमात्।

तत्र चादीनां यथा--

प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम्। (मे. २.२४)

इति।

प्रादीनां यथा--

दूरारूढप्रमोदं हसितमिव परिस्पष्टमासां सखीभिः॥
इत्यादिश्लोकतो ज्ञेया यतिः [2]कर्णसुखावहा।
अनुक्तयतिकेऽप्येवं कार्या श्रुतिसुखा यतिः॥

यदाह--

अबद्धार्थाऽपि मधुरा मनो हरति भारती।
तमोनिचयसंकाशा मत्तनादेव कोकिला॥११.३५॥

इति।

छन्दसश्चतुर्थो भागः पादसंज्ञो ज्ञेयः। अत्रार्थवशात् पाददयं वैपरीत्येन व्याख्यातं न दोषाय। पादं प्रतिपाद्य पादविशेषान् आह। (११)

पञ्चिका

(११) लोकः शास्त्रकारः। अथवा लोक्यते ज्ञायते शब्दार्थसम्बन्धोऽस्मिन् इत्यधिकरणसाधनेन तद्व्यवहारो वा लोकः। तस्माल् लोकव्यवहारात्। अब्धिभूतरसादीनां संख्यागणनास्तु ज्ञेयाः ज्ञातव्याः बुद्धिमद्भिरिति शेषः। तद् यथा- अब्धयः चत्वारः। भूतानि पञ्च। रसाः षट्। आदिशब्दात् स्वराः सप्त, वसवोऽष्टौ, ग्रहा नव इत्यादीनां ग्रहणम्। चतुर्णां पूरणः चतुर्थः पद्यस्य प्रथमो द्वितीयः तृतीयः च पादः क्रमेण अप्युत्क्रमेण वा चतुर्थो भवति। तेनापि चतुर्णां पूरणत्वात् वृत्तस्य चतुर्थो भागः पादः ज्ञेयः वेदितव्यः। यमनं यतिः विरामः जिह्वेष्टविश्रामस्थानम् इति यावत्। यदुक्तं काव्यादर्शे (३.१५३) 'श्लोकेषु विश्रामस्थानं पदच्छेदं यतिं विदुः' इति।

पिङ्गलेन तु-- अधातुनामभेदेन विरामो विरतिर्यतिः।

स्वरसन्ध्याप्तसौन्दर्यात्तद्भेदेऽपीष्यते क्वचित्॥ (छ. शा. पृ. १००)

इति।

---

1. न चकारादयोऽव्ययाः पदस्यान्ते वर्तमानाः यत्यर्थम्। प्रादयस्तु पदस्यादौ स्थिताःयतये भवन्ति। अन्यथा त्वनेकाक्षराणामपि च परिप्रभृतीनां इत्यधिकम् क.
2. श्रुतिꣳ त्र. क.

अत्र अधातुनामभेदेनेति धातूनां वा नाम्नां वा प्रातिपदिकानां वा अभेदेन यतिः स्यात् । तद् यथा--

शोभां पुष्यत्यधिकमधिकम्

इत्यत्र

मन्दाक्रान्ता जलधिषडगैर्भौ नतौ ताद् गुरू चेत् (वृ. र. ३.१७.५) ।

इति चतुर्भिरक्षरैर्यतेर्भावित्वात् । पुष्यति इत्यस्मिन् पदे प्रत्ययवशाद् भिन्नेऽपि पुष इति धातोरभेदात् न दोषः ।

स्पर्शक्लिष्टामसमितनखेनासकृत् सारयन्तीम् ।

इत्यत्र मन्दाक्रान्ते दशभिरक्षरैः यतेर्भावात् असमितनखेन इति पदे प्रत्ययवशाद् भिन्नेऽपि नखशब्दाभेदात् न दोषः ।

मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेतः (मे. १.३) ।

इत्यत्र अपिशब्दे भिन्नेऽपि पूर्वरूपेण स्वरसन्धिवशात् सौन्दर्यमस्ति इति इष्यत एव । केचित् कवयो यतिभङ्गदोषमदोषमाहुः । दृश्यते महाकविप्रयोगे । यथा अनर्घराघवनामनाटके (३.४१) —

याच्ञादैन्यपराञ्चि यस्य कलहायन्ते मिथस्त्वं वृणु
त्वं वृण्वित्यभितो मुखानि स दशग्रीवः कथं कथ्यताम् ।

इत्यत्र

सूर्याश्वैर्मसजाः सताः सगुरवः शार्दूलविक्रीडितम् (वृ. र. ३.१९.२) ।

इति श्लोकाभिः वर्णैर्यतेर्भवितव्यत्वात् कलहाय इति धातोर्भेदेऽपि अदोषं विदधाति ।

यावच्छृङ्गारसारस्वतमिह जयदेवस्य विष्वग् वचांसि ।

इति च गीतगोविन्दाख्ये काव्ये । अत्र जयदेव इति नाम्नि यतिभङ्गेऽपि न दोषः ।

कविवरादिभिर्मुदं यास्यति

इत्यादिष्वपि नास्ति दोषः । विच्छेद इति संज्ञा यस्य स विच्छेदसंज्ञकः । स्वार्थे कः । 'धातोनामर्थप्रयोगे' इति वचनात् समासेन एव उक्तत्वाद् इति शब्दस्य अप्रयोगः ॥

स्थानभेदौ

१२. युक् समं विषमं चायुक् स्थानं सद्भिर्निगद्यते ।

वृत्तभेदाः

सममर्धसमं वृत्तं विषमं च [1]त्रिधा मतम् ॥

तात्पर्यटीका

(१२) सुगमम् । अथ सिंहावलोकादिहोक्तादयो वर्तन्ते । समम् इति सुगमम् ॥ (१२)

सुकविहृदयानन्दिनी

(१२) प्रथमतृतीयादिकं स्थानम् अयुग् विषमं, द्वितीयचतुर्थादिकं स्थानं युक् समम् इति ।

अथ वृत्तभेदानाह—

[2]छन्दसि वर्तते' इति वृत्तं वक्ष्यमाणलक्षणं त्रिधा भवति । समम्, अर्धसमं, विषमं च इति[3] ।

तत्र [4]समसर्वावयवत्वात् समं श्रीप्रभृति (वृ. र. ३.१.१) । अर्धसमम् उपचित्रादि (वृ. र. ४.४.१) । विषमं पदचतुरूध्वादि (वृ. र. ५.१५) ॥ (१२)

छन्दोवृत्तिः

(१२) सद्भिः बुधैः समं स्थानं द्वितीयचतुर्थलक्षणः पादो युग् इत्यभिधीयते । तथा विषमं स्थानं प्रथमतृतीयलक्षणः पादोऽयुग् इत्याख्यायते । छन्दः तावद् द्वेधा । वृत्तं जातिः च । तत्र वर्णच्छन्दांसि वृत्तम् । तत् च स्थिरगुरुलघ्वक्षरविन्यासम् । पाटनसंयोगयोरभावात् । मात्राछन्दांसि च जातिः । इत्युभयं प्रसिद्धम् । यदाह—

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।

अतो वृत्तं त्रिविधमुपदिशन्नाह—सममर्धसमम् इति ।
वृत्तं समम्, अर्धसमम्, तथा अन्यद् विषमम् च इति त्रेधा भवति । जातेस्तु भेदा न भवन्ति ॥ (१२)

---

1. तथापरम् निसा. 2. एतद्वाक्यं नास्ति अ. ब. 3. वक्ष्यमाणलक्षणं वृत्तं त्रिधा भवति इत्यधिकम् ब. 4. समपूर्व० अ. 5. उपदर्शयन् ब.

समवृत्तम्

१३. अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः ।
तच् छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥

पञ्जिका

(१२) सद्भिः पण्डितैः समं स्थानं युग् इति निगद्यते कथ्यते । किं तत् । द्वितीय-चतुर्थादि । विषमं स्थानं युग् इति निगद्यते । किं तत् । प्रथमतृतीयादि । तथा सद्भिः वृत्तं पद्यं त्रिधा मतं कीर्तितम् । तद् यथा– समं वृत्तम्, अर्धसमं वृत्तम्, विषमं वृत्तं च इति ॥ (१२)

तात्पर्यटीका

(१३) उक्तादीनां मध्ये कस्याश्चिदेकस्या जातेः सर्वगुरुचरणं चतुर्गुणं संस्थाप्य समुद्र-प्रस्तारे यस्य छन्दसः एकलक्षणलक्षिताः चत्वारः पादाः तत् समवृत्तम् ॥ (१३)

मुकविहृदयानन्दिनी

(१३) एतेषां लक्षणं प्रत्येकमाह– अङ्घ्रय इति । यस्य वृत्तस्य चत्वारोऽपि पादाः समलक्षणभाजः भवन्ति तद्वृत्तं समं छन्दोविद्भिः आचक्ष्यते ॥ (१३)

छन्दोवृत्तिः

(१३) अथ समं व्याचिकीर्षुराह– अङ्घ्रयः इति । यस्य [1]चत्वारः अङ्घ्रयः तुल्यलक्षणाः तत्समं वृत्तम् ॥ (१३)

पञ्जिका

(१३) छन्दःशास्त्रतत्त्वज्ञाः छन्दःशास्त्रनिपुणाः तद् वृत्तं समं प्रचक्षते भाषन्ते । तदिति किम् । यस्य वृत्तस्य चत्वारः अङ्घ्रयः तुल्यलक्षणलक्षिताः तुल्यं समानं च तल्लक्षणं च इति कर्मधारयः तेन तुल्यलक्षणलक्षिताः इति ॥ (१३)

---

1. पादाश्चत्वारः क.

अर्धसमवृत्तम्

१४. प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत्
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते ॥

तात्पर्यटीका

(१४) प्रथमाङ्घ्रि इति । द्विविधमर्धसमम् । तस्मिन्नेव प्रस्तारे यस्य प्रथमतृतीयचरणौ तुल्यौ द्वितीयचतुर्थचरणौ तुल्यौ तदेकमर्धसमं वृत्तम् यथा वक्ष्यमाणमुपचित्रम् (वृ. र. ३.४३) । तथा भिन्नजातिद्वयोत्पन्ने समुद्रे प्रस्तारे यदीदृशं तद् द्वितीयमर्धसमम् यथा वक्ष्यमाणं द्रुतमध्यादि (वृ. र. ४.२), तथा ग्रन्थान्तरोक्तं विलसितलीलादि च ॥
(हे. ३.१८) (१४)

सुकविहृदयानन्दिनी

(१४) अथार्धसममाह । प्रथमाङ्घ्रि इति । यस्य वृत्तस्य प्रथमतृतीयपादौ तुल्यलक्षणौ भवतः, द्वितीयचतुर्थौ च तद् वृत्तम् अर्धसममुच्यते ॥ (१४)

छन्दोवृत्तिः

(१४) [1]अथार्धसममाह प्रथमाङ्घ्रि इति । यस्य तृतीयः पादः प्रथमतुल्यः, चतुर्थो द्वितीयतुल्यः तदर्धसमं [2]वृत्तम् ॥ (१४)

पञ्चिका

(१४)प्रथमाङ्घ्रि इति– त्रयाणां पूरणः तृतीयः । यस्य वृत्तस्य प्रथमाङ्घ्रिसमः आदिपादसदृशः तृतीयश्चरणः भवेत् तृतीयः पादः स्यात् । द्वयोः पूरणः द्वितीयः । यस्य वृत्तस्य द्वितीयपादः तुर्यवत् चतुर्थपादवद् भवेत् । तद् वृत्तमर्धसममुच्यते । कथ्यते मुनिभिः इति शेषः ॥ (१४)

---

1. अथार्धसममभिधित्सुराह ब. 2. वृत्तम् नास्ति अ. ब. ड. इ.

विषमवृत्तम्

१५. यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥

तात्पर्यटीका

(१५) यस्य पाद इति । एतद् द्विविधम् । तत्र एकजातिसमुत्पन्नमत्युक्तादिषु एव भवति नोक्तायाम् । असंभवात् । तत्र उदाहरणम् यथा--

विषमवृत्तनखं नृहरिं स्तुवे
प्रह्लादभक्त्या परितुष्टमानसम् ।
सुरारिलोकोर्जितदुष्टदानवं
हन्तुं लोके कल्पितभीमविग्रहम् ॥

नानाजातिसमुत्पन्नं वक्ष्यमाणं पदचतुरूर्ध्वम् उद्गतादि च (वृ. र. ५.६) । तत् तु प्रादेशिकमेव । विषमाक्षरपादया चतुश्चरणया गाथया हन व्याप्तित्वात् (?) । यास्तु समवृत्तादीन्युत्पद्यन्ते ता वर्णवृत्तजातयः कथमुत्पद्यन्ते इत्यपेक्षायामाह ॥ (१५)

सुकविहृदयानन्दिनी

(१५) यस्य वृत्तस्य चतुर्ष्वपि पादेषु भिन्नमन्यादृशं परस्परं [1]लक्षणं भवति तद् विषमम् इत्याहुराचार्याः ॥ (१५)

छन्दोवृत्तिः

(१५) [2]यस्य चत्वारोऽपि पादाः असदृशलक्षणास्तद् विषमं [3]वृत्तम् ॥ (१५)

पञ्चिका

(१५) छन्दःशास्त्रविशारदाः छन्दःशास्त्रप्रवीणा तद् वृत्तं विषममाहुः विषमं ब्रुवते । तद् इति किम् । यस्य वृत्तस्य पादचतुष्केऽपि चतुर्षु अपि पादेषु परस्परम् अन्योन्यम् भिन्नं लक्ष्म अन्यदन्यल्लक्षणं भवति । चत्वारि परिमाणान्यस्य इति चतुष्कम् । 'संख्याया अतिशदन्तायाः कन्' (पा. ५.१.२२) इति कन् प्रत्ययः ॥ (१५)

---

1. विलक्षणम् इत्यधिकम् ब. क. 2. अथ विषमम् इत्यधिकम् क. 3. विसदृशम् इत्यधिकम् क.

वृत्तपादनियमः

१६. आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्धितैः ।
पृथक् छन्दो भवेत् पादैर्यावत् षड्विंशतिं [1]गतम् ॥

तात्पर्यटीका

(१६) प्रथमजातौ एकाक्षरः पादो द्वितीयजातौ द्व्यक्षरः पादः इत्येकैकाक्षरवृद्ध्या कल्पनीयः । इह छन्द इति जातिः । तच्छन्दः कियदवधिकं भवेद इत्यपेक्षायामाह— यावत् षड्विंशतिम् इति । गतम इति ज्ञातं प्रसिद्धं भवेद् इत्यर्थः । अनेन सप्तविंशत्यक्षरात् पादाद आरभ्यैकैकाक्षरवर्धितैः पादैः पृथक् पृथङ् मालावृत्तजातयोऽपि केषांचित् प्रसिद्धाः सन्ति इत्युच्यते ॥ (१६)

मुकविहृदयानन्दिनी

(१६) अथ वृत्तानां पादनियममाह—

एकाक्षरात् पादाद एकैकाक्षरवृदध्या पादैः छन्दः स्यात् । किं यावत् । षड्विंशत्यक्षराम् उत्कृतिं यावत् ॥ (१६)

छन्दोवृत्तिः

(१६) इदानीं वक्ष्यमाणवर्णछन्दसां क्रममाह—

एकाक्षरात् पादादारभ्य एकैकाक्षरेण वर्धमानैः पादैः पृथक् पृथक् छन्दो ज्ञेयम् । एकैकेन [2]एकाक्षरादिपादेन एकैकं छन्दो लक्ष्यलक्षण[3]संकलितं वक्ष्यति इत्यर्थः । पादाक्षरनियतिमाह । यावत् षड्विंशतिं गतम् इति । षड्विंशत्यक्षरं पादं यावद् इत्यर्थः ॥ (१६)

पञ्चिका

(१६) एकमक्षरं यस्य पादस्य स एकाक्षरपादः । तस्मात् पादादारभ्य यावत् षड्विंशतिं गतम् यावत् षडविंशत्यक्षरान्वितं भवति तावत् । पृथक् प्रत्येकं छन्दो भवेत् । कैः ? पादैः । किंभूतैः ? एकैकाक्षरवर्धितैः एकं चैकं च एकैकम् । तच्च तदक्षरं च इति एकैकाक्षरम् । तेन वर्धितैः वृद्धि गतैः इति ॥ (१६)

---

1. गतैः ज. 2. एकाक्षरादिना क. 3. संकुलितं क.

दण्डकक्रमनियमः, गाथानियमः

१७. तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः ।
शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ॥

तात्पर्यटीका

(१७) तत्र सप्तविंशत्यक्षराद् दण्डकादारभ्य प्रतिचरणमेकैकाक्षरवर्धितैः इति त्रिकैः वर्णगणैः मादिभिरेव वृद्धिः कर्तव्या । 'प्रतिचरणविवृद्धरेफाः स्युः' (३.२७.१२) इत्यत्र तथा दर्शितत्वात् । कियदवधिका इति चेत् । एकोनसहस्रतमं वर्णं यावत् । तेन अन्तिम-दण्डकस्य चरणे त्रयस्त्रिंशदधिकं शतत्रयं त्रिकं वर्णगणानां भवति । कुत इदम् इति चेत् । अविशेषोक्तौ 'आसहस्रात् तु दण्डकाः' इति स्मृत्यन्तरात् । शेषं गाथा इति । स्वीकृतस्य मध्ये उपयुक्तादन्यच्छेषम् । अत्युक्तादीनामेकजातिसमुत्पन्ने चतुश्चरणे प्रस्तारे समार्धसमविषमोपजातिभ्यः यदवशिष्टं छन्दस्तच्छेषम् । यच्छेषं ता गाथाः भवन्ति । इदमस्य उदाहरणम् ।

शशधरद्युति कल्मषनाशनं जयति पुण्यसहस्रविवर्धनम् ।
सुरासुराराधिततीर्थसंकुलं योगीश्वरासेवितमम्बु जाह्नवम् ॥

त्रिभिः षड्भिश्चरणैश्चोपलक्षिता इति । इहोपलक्षितग्रहणं व्याप्त्यर्थम् । तेन उपजात्यां नानाजातिषु च त्रिचरणे षट्चरणे वा प्रस्तारे वा यदुत्पद्यते वृत्तजातं ता गाथा भवन्ति । एकजात्यां त्रिचरणे यथा—

प्रयाति तरुणीं प्रति प्रतिकलं मनः कामिनां ।
यथैव विधृताग्रह हरिपदाम्बुजे चेत् तथा ।
सुरासुरदुरासदं झटिति याति मोक्षं जनः ॥

पृथ्वीसंज्ञा गाथा इयम् । एवं नानाजातिषु त्रिचरणे समभ्यूह्यम् । एकजात्यां षट्चरण-प्रस्तारे यथा—

दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान ।
सुप्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश ॥ (म. भा. उ. ३३.१०१)

इत्यादि । पथ्यावक्त्रगाथेयम् । एवं नानाजातिषु षट्चरणे समभ्यूह्यम् । प्रसङ्गादत्र गाथानामभिधाननिर्णयोऽपि । यथा—

वर्णवृत्तेषु यन्नाम जातेर्व्यक्तेरपि स्मृतम् ।
तल्लक्ष्मदर्शने गाथां तन्नामानं विनिर्दिशेत् ॥

पादप्रस्तारसरणिः सर्वप्रस्तारपद्धतिः ।
इति भेदभवं छन्दः सूत्रव्याख्यासु लौकिके ॥
षष्ठे प्रस्तारसूत्रादौ पादे इत्यभिदर्शनात् ।
पादप्रस्तारमाश्रित्य लोके व्याख्या प्रवर्तते ॥
प्रस्तारनष्टविज्ञाने सार्यादीनि समुज्झति ।
अल्पोपकारिकेत्येवमत्रास्माभिः समुच्यते ॥
समार्यादिषु वृत्तेषु सर्ववृत्तस्य लक्षणात् ।
सर्वप्रस्तारसरणीरहस्या सांप्रदायिका ॥
समादिलक्ष्मसूत्राणां तामाश्रित्य कृता मया ।
व्याख्या सा साधुभिर्युक्ता न युक्ता वेति चिन्त्यताम् ॥ (१७)

सुकविहृदयानन्दिनी

(१७) इदानीं छन्दसां क्रमं निरूपयन् अथ दण्डकक्रममाह—

षड्विंशत्यक्षरोत्कृतिजातेरूर्ध्वं चण्डवृष्टिप्रभृतयो दण्डकाः भवन्ति। शेषम् इति प्रकरणं तच् च शास्त्रान्तरेभ्योऽवगन्तव्यम् । ग्रन्थगौरवभयात् केदारेणात्र नोक्तम् । गाथाः त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः । शेषं जातिप्रकारेण अनन्तरं [1]त्रिपद्यश्चतुष्पद्यः गाथाः स्युः ॥ (१७)

छन्दोवृत्तिः

(१७) अथ दण्डकक्रममाह—तदूर्ध्वम् इति । तस्मात् षड्विंशत्यक्षरात् पादात् परं [2]चण्डवृष्ट्यादिकाः दण्डकाः परिकीर्तिता वक्तव्याः इत्यर्थः । अथ शेषम् इति । शेषं वक्ष्यमाणछन्दोभ्यः यदन्यत् त्रिभिः षड्भिः वा चरणैः भवति तद् गाथा इत्युपलक्षिता धातूनामनेकार्थत्वात् प्रतिपादिता इत्यर्थः ॥ (१७)

पञ्जिका

(१७) चण्डवृष्टिरेव आदिः येषामर्णार्णवप्रभृतीनां ते चण्डवृष्ट्यादयः । ते च ते दण्डकाश्चेति चण्डवृष्ट्यादिदण्डकाः । दण्डकाः वृत्तविशेषाः । तदूर्ध्वं षड्विंशत्यक्षरपादाद् उपरि परिकीर्तिताः कथिताः । शेषं यथोक्तसामान्यविशेषलक्षणादन्यत् छन्दो गाथा नाम । ताः किंभूताः । त्रिभिश्चरणैः त्रिभिः पादैः षड्भिः पादैः उपलक्षिताः चिह्निताः स्युः । गाथा इति पदं बहुवचनान्तमपि शेषम् इत्यनेन समानाधिकरणमेव । यथा वेदाः प्रमाणम् स्मृतयः प्रमाणम् ॥ (१७)

1. प्रकरणानन्तरम् इत्यधिकम् ब. 2. चण्डवृष्टिप्रमुखाः अ. क.

छन्दोजातयः

१८. उक्तात्युक्ता तथा मध्या प्रतिष्ठा[1] सुप्रतिष्ठिता ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥

१९. त्रिष्टुप् च जगती चैव तथातिजगती मता ।
शक्वरी सातिपूर्वा स्यादष्टच्यत्यष्टी ततः स्मृते ॥

२०. धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ।
विकृतिः सङ्कृतिश्चैव तथातिकृतिरुत्कृतिः ॥

२१. इत्युक्ताश्छन्दसां संज्ञाः क्रमशो वच्मि साम्प्रतम् ।
लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वकम् ॥

इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकराख्ये छन्दसि प्रथमः सञ्ज्ञाध्यायः ॥

तात्पर्यटीका

(१८–२१) समवृत्ताद्युत्पत्तिस्थानभूतानामेकाक्षरादीनां षड्विंशतेः जातीनां व्यवहारार्थं क्रमशः कानि कानि नामानि भवन्ति इत्यपेक्षायामाह–– उक्ता इति । सर्ववृत्तानाम् इति मात्रावृत्तानां वर्णवृत्तानां च । मात्रावर्णविभेदेन इति प्रतिज्ञावचनादेव लक्षणकरणस्य मात्रावृत्तपूर्वकत्वे सिद्धे मात्रावृत्तानुपूर्वकम् इति वचनमितः पूर्वग्रन्थोक्तप्रतिज्ञावचनानां क्वचित् क्वचिद् व्यभिचारित्वसूचनार्थम् । अत एव लक्ष्यलक्षणसंयुतमित्यादौ प्रायिकमित्युक्तमेव । ननु कोऽत्र अधिकारी इति चेदुच्यते । कीर्त्यादिकामः सर्गबन्धदशरूपकादि चिकीर्षुः महाकविः, स्ववचनरचनाचातुर्यं प्रकटयन् विशिष्टच्छन्दसामुपन्यासेन जल्पकथायां प्रवृत्तो वावदूकः, संगीतं कर्तुकामः भारतिकः, तद्विचारयितारः सभ्यसभापतय इति स्थितम् ॥ (१८–२१)

इति श्रीरघुसूरिसूनुत्रिविक्रमसूरिविरचितायां वृत्तरत्नाकरच्छन्दःसूत्रतात्पर्यटीकायां प्रथमः सञ्ज्ञाऽध्यायः समाप्तः ॥

सुकविहृदयानन्दिनी

(१८–२१) एकाक्षरा उक्ता, द्व्यक्षरा अत्युक्ता, त्र्यक्षरा मध्या, चतुरक्षरा प्रतिष्ठा, पञ्चाक्षरा सुप्रतिष्ठा, षडक्षरा गायत्री, सप्ताक्षरा उष्णिक्, अष्टाक्षरा अनुष्टुप्,

---

1. प्रतिष्ठान्या सुपूर्विका सुकवि.

नवाक्षरा बृहती, दशाक्षरा पङ्क्तिः, एकादशाक्षरा त्रिष्टुप, द्वादशाक्षरा जगती, त्रयोदशाक्षरा अतिजगती, चतुर्दशाक्षरा शक्वरी, पञ्चदशाक्षरा अतिशक्वरी, षोडशाक्षरा अष्टिः, सप्तदशाक्षरा अत्यष्टिः, अष्टादशाक्षरा धृतिः, एकोनविंशत्यक्षरा अतिधृतिः, विंशत्यक्षरा कृतिः, एकविंशत्यक्षरा प्रकृतिः, द्वाविंशत्यक्षरा आकृतिः, त्रयोविंशत्यक्षरा विकृतिः, चतुर्विंशत्यक्षरा संकृतिः, पञ्चविंशत्यक्षरा अभिकृतिः, षड्विंशत्यक्षरा उत्कृतिः । इति छन्दसां संज्ञाः उक्ताः ।

अधुना सर्वेषां वृत्तानां लक्षणमभिधास्यामि । लक्ष्यते ज्ञायते अनेन इति लक्षणं सूत्रम् । परं मात्रावृत्तानुपूर्वकम् । मात्रावृत्तानि आर्याप्रभृतीनि प्रथममुक्त्वा इत्यर्थः ॥ (१८–२१)

इति सुल्हण विरचितायां सुकविहृदयानन्दिन्यां वृत्तरत्नाकरछन्दोवृत्तौ संज्ञाध्यायः प्रथमः ॥

छन्दोवृत्तिः

(१८–२ १) अथैकाक्षरादिषड्विंशत्यक्षरान्तानां छन्दसां जातीराह—

अत्र मण्डूकप्लुतिन्यायेन आरभ्य एकाक्षरादारभ्य इत्यनुवर्तते । [1]तेनैकाक्षरपादा उक्ता नाम भेदसंग्रहात्मिका जातिः । एवमेकैकाक्षरवृद्धपादाः अत्युक्तादयः । तत्र द्व्यक्षरा अत्युक्ता जातिः । त्र्यक्षरा मध्या । चतुराक्षरा प्रतिष्ठा । पञ्चाक्षरा सुप्रतिष्ठा । षडक्षरा गायत्री । सप्ताक्षरा उष्णिक् । अष्टाक्षरा अनुष्टुप् । नवाक्षरा बृहती । दशाक्षरा पङ्क्तिः । एकादशाक्षरा त्रिष्टुप् । द्वादशाक्षरा जगती । त्रयोदशाक्षरा अतिजगती । शक्वरी (१४)। अतिशक्वरी (१५)। अष्टिः (१६)। अत्यष्टिः (१७)। धृतिः (१८)। अतिधृतिः (१९)। कृतिः (२०)। प्रकृतिः (२१)। आकृतिः (२२)। विकृतिः (२३)। संकृतिः (२४)। अतिकृतिः (२५)। उत्कृतिः (२६)। जातिरिति सर्वत्र संबध्यते । (१८–२०)

अथ संज्ञानिर्देशमुपसंहरन्नाह—

इत्युक्ता— (२१)

स्पष्टम् ।

सद्वृत्तरत्नाकरनामधेय–
शास्त्रस्य वृत्तौ क्रमरूपकोऽयम् ।
अध्याय आद्योऽजनि सोमचन्द्र–
विनिर्मितायां ललिताक्षरायाम् ॥
इति प्रथमः सज्ञाध्यायः ॥

---

1. ततः क.

पञ्चिका

(१८–२१) अधुना तान्येव षड्विंशतिछन्दांसि गणयित्वा दर्शयन्नाह– उक्ता, अत्युक्ता, मध्या, प्रतिष्ठा, सुप्रतिष्ठा, गायत्री, उष्णिक् अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती, अतिजगती, शक्वरी, अतिशक्वरी, अष्टी, अत्यष्टी, धृतिः, अतिधृतिः, कृतिः, प्रकृतिः, आकृतिः विकृतिः, सङ्कृतिः, अतिकृतिः, उत्कृतिः चेति षडविंशतिः । (१८–२०)

इति उक्तप्रकारेण छन्दसां संज्ञा छन्दोनामानि उक्ताः गदिताः सूत्रकारेण इति शेषः । मात्रावृत्तानाम् आर्यावैतालीयप्रभृतीनाम् । अनुपूर्वं क्रमो यस्मिन वचने इति विग्रहः । स्वार्थे कः । मात्रावृत्तानुपूर्वकं यथा स्यात् । सर्वेषां वृत्तानां लक्षणं सूत्रं क्रमशः क्रमेण सांप्रतमिदानीं वच्मि वदामि ॥ (२१)

इति श्रीशाक्यमुनेर्भगवतः परमोपासकेन गौडदेशवास्तव्येन श्रीबौद्धागमचक्रवर्तिना भूसुरेण आचार्येण विरचितायां वृत्तरत्नाकरपञ्चिकायां संज्ञाप्रतिपादनो नाम प्रथमोऽध्यायः ॥

द्वितीयोऽध्यायः

मात्रावृत्तानि

आर्याप्रकरणम्

२२. लक्ष्मैतत्सप्तगणा गोपेता भवति नेह विषमे जः ।
षष्ठोऽयं च नलघु वा प्रथमेऽर्धे नियतमार्यायाः ॥

तात्पर्यटीका

(२२) अथ मात्रावृत्तानि लक्षयितुं द्वितीयमध्यायमुपक्रामति । तत्र सप्तपञ्चाशन्मात्रिकमार्याख्यं छन्दः प्रथमम् । अल्पपरिमाणत्वात् । गीतिप्रभृतिकमतःपरम् । तदाश्रितत्वात् । ततो वर्णवृत्तमपि वृत्ताख्यं यथात्र वर्ण्यते तथाग्रे समाधास्यते । ततः चतुःषष्टिमात्रिकं मात्रासमकम् । त[1]

लक्ष्मैतद् इति । प्रत्येकं चतुष्कलमात्रागणसंख्यानियमः क्रियते गोपेता इति । गेन एव उपेता गोपेता इत्यवधारणादार्यादलद्वयमपि प्रत्येकं गुर्वन्तमेव सदा भवति इति नियम्यते । दलद्वयेऽपि क्रमवृद्धिः सर्वगुर्वाद्यैश्चतुष्कलैः पञ्चभिर्मात्रागणैः प्रत्येकं पूर्वपूर्वविकल्पहतेरधोऽधः प्रस्तारः कार्य इति क्वचिदतिव्याप्तौ नियमः क्रियते । नेह भवति विषमे जः इति । तेन विषमे गणस्थाने जगणं विना चत्वारो गणविकल्पाः स्युः, समे गणस्थाने पञ्चापि स्युरिति । षष्ठोऽयमित्यादि । अयमिति जगणः । न(ल)घु वा इति । वा व्यवस्थार्थः । आर्यादलद्वयप्रस्तारः प्रथमार्धे षष्ठजगणपक्षे यदा निष्ठां गतः तदा जगणमपनीय प्रक्रियालाघवार्थं तत्र नलघु स्थापयेत् इति वाक्यार्थः ॥ (२२)

सुकविहृदयानन्दिनी

(२२) अथ मात्रावृत्ताध्यायो द्वितीय आरभ्यते । मात्रावृत्तानुपूर्वकमित्युक्तत्वात् । लक्ष्मैतत् इति । आर्याया एतल् लक्ष्म लक्षणं सप्त चतुष्कला गणा गुरुणा उपेता युक्ता भवन्ति । सामान्येन अभिधाय विशेषमाह— भवति नेह विषमे जः इति । इह आर्यालक्षणे विषमे स्थाने प्रथमतृतीयादौ जो जगणो न भवति । षष्ठः अयं च जकारो नियमेन

---

1. अग्रभागो नष्टः ता.

पदनियमः

२३. षष्ठे द्वितीयलात्परके न्ले मुखलाच्च स[1]यतिपदनियमः ।
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥

भवति । नलघु वा नगणयुक्तो लघुर्वा नियतं निश्चितम् इति । चरमेऽर्धे द्वितीयेऽर्धे षष्ठो लघुरेव इति नियमः ॥ (२२)

छन्दोवृत्तिः

(२२) यदुक्तं मात्रावर्णविभेदेन इत्यतः प्रथमं मात्राछन्दोव्याख्यानावसरः । तत्रादौ एव आर्याप्रकरणम् । लक्ष्मैतद् इति । पञ्चार्यादिषु संस्थिता [2]इत्यादिवचनात् । अत्र चतुष्कलगणानां विषयः तेन चतुष्कलाः सप्तगणाः गोपेताः सगुरवः आर्यायाः आद्ये दले भवन्ति । [3]एतन्नियतं लक्षणम् । अत्रापवादः । [4]इहार्यायां विषमे प्रथमतृतीयपञ्चमसप्तमरूपे गणे जगणो न भवति तथाद्येऽर्धे[5] षष्ठो अयं जगणोऽथवा नलघुर्भवति[6] । नगणेन [7]सहितं लघु [8]नलघु तद् भवति ॥ (२२)

पञ्चिका

(२२) अथेदानीमार्यादिवृत्तानां लक्ष्यलक्षणान्याचष्टे । आर्यायाः आर्यावृत्तस्य प्रथमेऽर्धे पूर्वपादद्वये एतन्नियतं लक्ष्म इदं निश्चितं चिह्नम् । एतद् इति किम्। सप्त गणाः गणाः सप्त स्युः । किंविशिष्टाः । गोपेताः गेन गुरुणा उपेताः । अन्ते गुरुसहिताः इत्यर्थः । भवति नेह विषमे जः । इह आर्यायां विषमे प्रथमतृतीयपञ्चमसप्तमे स्थाने जो न भवति जगणो न स्यात् । षष्ठोऽयं न लघु वा। षष्णां पूरणः षष्ठः । अयं जगण एव वा षष्ठो भवति । षष्ठे स्थाने न अन्यो गण इति । चकारोऽयं वार्थे । वाशब्दोऽत्र समुच्चये । अव्ययानामनेकार्थत्वात् । नश्च लघुश्च नलघु । समाहारद्वन्द्वे नपुंसकम् । चतुर्लघुगणः इत्यर्थः ॥ (२२)

तात्पर्यटीका

(२३) षष्ठे इति । षष्ठे न्ले द्वितीयलात् पूर्वः पदनियमः कार्यः इति । परके इति सप्तमके न्ले इति । पदनियमस्तस्मिन्नेव मुखलात् पूर्वः कर्तव्यः । यदि इति नलघुसंभावनायाम् । चरम इत्यादि । चरमे अन्तिमे इत्यन्तिमेऽर्धे पञ्चमके न्ले, तस्मादिति

---

1. यदि पद[0] सुकवि. 2. इतिवचनात क. 3. नियतलक्षणम् ब. 4. इहार्यायाः क. 5. अत्र इत्यधिकम् अ. 6. इति इत्यधिकम् क. 7. सहितेन क. 8. नलघु नास्ति इ.

मुखात् पूर्वः पदनियमो भवति । चरमेऽर्धे षष्ठे स्थाने विशेषवचनाज् जगणनलघुप्राप्तौ अतिव्याप्तिमाशङ्क्य नियमं कर्तुमाह इहेत्यादि । इहेत्यन्तिमेऽर्धे षष्ठो गणो लघुरेव स्यात् । अनया धिया कण्ठोक्त्या नियमविशेषमभिधाय स्वरूपेण विपुलापथ्ययोर्मिश्रणे जघनपथ्या नाम भेदः शास्त्रान्तरप्रसिद्धो वक्ष्यमाणचपलाभेदन्यायेनेह निरूपितः सूच्यते । अर्थस्य सूचनात् सूत्रमित्यन्वर्थाश्रयणात् । तदुक्तम्—

त्रिच आद्यऋघ्रिदलयोः पथ्याद्येऽर्धे तु पूर्वपथ्या सा ।
अपरार्धे परपथ्या विपुला स्यादन्यथाऽघ्रियुगे ॥

इति छन्दःशेखरे ।

आर्याप्रस्तारसूत्राणि पदशो वर्णितानि मे ।
सुखज्ञानाय शिष्याणां समुद्ररचनोच्यते ॥

तत्रेयं रचना । सर्वगुर्वार्याप्रस्तारे प्रथमार्धे प्रथमतो द्विगुरवः पञ्चगणाः षष्ठो जगणः सप्तमो द्विगुरुस्ततो गुरुः । एवंविधं ततोऽनन्तरमेव द्वितीयार्धं स्थाप्यते । अस्मिन् षष्ठे स्थाने लघुरेव इति विशेषः । ईदृशी सर्वगुर्वार्यासमुद्रे प्रथमा व्यक्तिः स्यात् । तथा चास्याः शास्त्रान्तरे दत्तमुदाहरणम् । यथा—

अङ्गुल्योपाङ्गुल्यः सर्वाः सम्यक् प्रतिष्ठिता भूमौ ।
प्रागावर्ता नाभिः कन्यानामादिरार्याणाम् ॥

इति । लघुं न्यस्य गुरोरधः इति वचनादेतस्याः प्रथमगुरोरधस्तादन्तर्गुवादयो लघूपलक्षिताः क्रमेण चत्वारोऽपि गणाः अधोऽधो न्यासं लभन्ते । तत्र विषमे जगणप्रतिषेधात त्रय एवेह । तदग्रेसरासु पङ्क्तिषु यथोपरि तथा शेषम् इति प्रस्तार्यम् आद्वितीयार्धात । ततो गुरोः । ततो द्वितीयपङ्क्त्याद्यस्य सर्वगुरोरधस्तादन्तगुरुलघुगणन्यासः । तस्य पश्चादूने दद्याद गुरून एव इति सर्वगुरुन्यासः । अग्रे यथोपरि तथा शेषम् इति भूयः कुर्यादमुं विधिमिति वचनादाद्यसर्वगुरोः अधस्ताल्लघुगणत्रयन्यासः तिर्यक्पङ्क्तित्रयेऽप्यग्रे यथोपरि । ततो द्वितीयपङ्क्तौ अन्तगुरोरधस्ताज् जगणन्यासः । लघुगणन्यासस्य आसमाप्तत्वात । शेषं यथोपरि । जगणात् प्रागूने द्विगुरुस्तन्मादधः प्राग्वल् लघुगणत्रयम । शेषं यथोपरि । ततो द्वितीयपङ्क्तौ चतुर्थजगणादधस्तादादिगुरुः । ऊने प्राग्वद् यथोपरि तथा शेषम् । तत आद्यपङ्क्तौ सर्वगुरोरधस्ताल् लघुगणत्रयं यथोपरि तथा शेषम् । ततश्चतुर्थादादिगुरोरधस्तान् नलवुः यथोपरि तथा शेषम् । . . . . . [1]दधस्ताल्

1. कानिचिदक्षराणि नष्टानि ता.

लघुगणत्रयं यथोपरि तथा शेषम् । ततः तृतीयपङ्क्तौ सर्वगुरोरधस्ताज् जगणं विना यथाक्रमं यथावृत्ति लघुगणन्यासः । प्राग्वत् प्राग् यत्र यो गणो गुरुर्लघुर्वा यथा नियमितः तत्र स एव न्यसनीयो यावत् सर्वलघ्वार्या भवति ।

४ ५ ४ ५ ४ २ ४ १
ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ।ऽ। ऽऽ ऽ अर्धम् ।

४ ५ ४ ५ ४ १ ४ १
ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ । ऽऽ ऽ समुद्रप्रस्तारार्थं सर्वगुर्वार्यायाः प्रस्तारः । षष्ठजगणपक्षे विकल्पानामुत्तरोत्तरघाते लब्धा आर्याव्यक्तिसंख्या ४०९६०००० । षष्ठनलघुपक्षेऽपि तावत्येव । अनयोर्मेलापके सर्वराशिसंख्या ८१९२०००० ।

अस्योपसंहार :—

कोट्यष्टौ प्रयुतं चैकं लक्षाणि नव वारिधौ ।
अयुते चेति जनिताः पथ्याभेदा महर्षिणा ॥
तावन्तो विपुलाभेदा मिश्रपथ्याद्वयस्य च ।
प्रत्येकमेव तावन्तो जायन्ते पूयसन्निधौ ॥ (२३)

सुकविहृदयानन्दिनी

(२३) एवमुभयोरप्यर्धयोः लक्षणमभिधाय पदनियममाह— षष्ठे द्वितीयलाद् इति । षष्ठे गणे सर्वलघौ द्वितीयलात् पदनियमः । लघ्वक्षरादारभ्य पदं भवति । सप्तमश्चेत् सर्वलघुर्गणो भवति तदा प्रथमस्थानलघ्वक्षरादारभ्य पदम् । चरमेऽर्धे पञ्चमके द्वितीयेऽर्धे पञ्चमे सर्वलघौ गणे तस्मात् पूर्वोक्तात् प्रथमाक्षरादारभ्य पदनियमो भवति इति । अत्रार्थग्रहणात् पादव्यवस्था न अस्ति इति । एतच् च प्रथमाध्याय एव पादौ इति सूत्रे प्रपञ्चितमस्ति ।

क्रमेणोदाहरणे यथा—

वन्दारुदेववृन्दैरहमहमिकया सदैव या वन्द्या ।
स्वर्गापवर्गदात्री तामार्यां सततं नौमि ॥

[1]यत्युदाहरणं यथा—

यस्याङ्गना सुवेषा कोकिलनादश्च मलयगिरिपवनः ।
एकैकमस्त्रकृत्यं करोति स जयति मनोजन्मा ॥ (२३)

छन्दोवृत्तिः

अथ यतिमाह—

(२३) षष्ठे इति । षष्ठे गणे न्ले सति द्वितीयलात् [2]प्रारभ्य यदि पदनियमो भवति [3]षष्ठन्लगणस्य प्रथमे ले यतिरित्यर्थः । तथा परके सप्तमे न्ले[4] मुखलात् पदनियमो भवति । षष्ठगणान्ते यतिर्भवति इत्यर्थः । चरमेऽर्धे द्वितीये दले पञ्चमके गणे न्ले सति तस्माद् मुखलात् पदनियमो भवति । चतुर्थगणान्ते यतिरित्यर्थः । इह द्वितीयार्धे षष्ठो गणो ल एक एव लघुर्भवति । अत्रार्धग्रहणात् पादव्यवस्था नास्ति । तेन 'द्वीपादन्यस्मादपि' (रत्ना. १.५) इत्यादौ गणत्रयस्यान्ते गुरुत्वं न भवति । अत्र 'ज्ञेयाः सर्वान्तिमध्यादिगुरवः' [5]इत्यादि वचनात् उक्तयुक्तेश्च पूर्वार्धे प्रथमे गणे चत्वारो विकल्पाः, तथा द्वितीये पञ्च, तृतीये चत्वारः, चतुर्थे पञ्च, पञ्चमे चत्वारः, षष्ठे द्वौ, सप्तमे चत्वारः, अष्टमे गुरुरेक एव । अन्योऽन्यताडनायां द्वादशसहस्राणि अष्टौ शतानि । एवं परार्धेऽपि । नवरं षष्ठे लघुनि एकस्मिन्नेक एव विकल्पः । तत्र अन्योऽन्यताडनायां षट्सहस्राणि चत्वारि शतानि । उभयदलविकल्पताडनायामष्टौ कोटयः एकोनविंशतिलक्षाः विंशतिसहस्राणि आर्याभेदसंख्या ।

यदाह—

जगणविहीना विषमे चत्वारः पञ्च युजि चतुर्मात्राः ।
द्वौ षष्ठाविति च गणास्तथाङ्कितः प्रथमदलसंख्या ॥
एवमपरार्धसंख्या षष्ठे स्याल् लघुनि चैकस्मिन् ।
आर्यासंख्योभयदलसंख्यापाताद् विनिर्दिष्टा ॥

उदाहरणानि—

उपदिश्यते तव हितं यदि वाञ्छसि कुशलमात्मनो नित्यम् ।
मा यातु दुर्जनजने आर्याचरितं प्रपद्यस्व ॥
आर्यैव संस्कृतेतरभाषासु गाथेति कथ्यते ।

---

1. यत्युदाहरणं नास्ति ब. 2. आरभ्य क. 3. षष्ठे ब. 4. सति इत्यधिकम् ब. 5. इति वचनात् इ.

तत्र प्राकृते यथा—

कलसभवतवस्सिचुलुअपूरणमेत्ते वि मुणियमज्झाण ।
जलहीण कहं सरिसा सया अगाहा महप्पाणा ॥ (हे. छं. ४.१.४)
(कलशभवतपस्विचुलुकपूरणमात्रेऽपि मुनिमहात्मनाम् ।
जलधीनां कथं सदृशा सदा अगाधा महात्मानः ॥)

पैशाचिके यथा—

पणमध पनयपकुप्पिदगोलीचलनग्गलग्गपतिबिंबं । (हे. छं. ४.१.५)
तससु नखतप्पनेसुं एकातसतनुधलं लुद्दं ॥
(प्रणमत प्रणयकुपितगौरीचरणाग्रलग्नप्रतिबिम्बम् ।
दशसु नखदर्पणेषु एकादशतनुधरं रुद्रम् ॥)

एवमन्यभाषास्वपि उदाहार्यम् । यत्युदाहरणं तु सूत्रमेव ।

अत्र यथा—

नाथ त्वयाश्रितोऽसौ वर्ण्यः शैलोऽप्यभूत् कविजनस्य ।
वृषवाहनस्य वृषभः किं [1]स्याद् वन्द्यो न भक्तानाम् ॥

इति ।

इति कश्चित् पृच्छति, इयमार्या कतिथी इति । तदास्य गणान् संस्थाप्य तदधश्चतुःपञ्चादिकान् अङ्कान् विकल्पसंख्यान् यथासंभवं लिखेत् । ततो गणितक्रमेण आद्यमन्त्येन हत्वा दृष्टविकल्पाद् [2]अधःस्थितान् शेषान् विकल्पान् राशेः प्रपात्य शेषया संख्यया पुनः पुनर्यथाद्यं हन्यात । भूयो भूयो दृष्टविकल्पात् शेषविकल्पान् पातयेत् यावदाद्यो गणः । ततः शेषसंख्यामेतावतिथीमार्याम् इति निर्दिशेत् । यथा— अन्ते न्यस्तस्यार्धगणस्याविकल्पत्वादेकमङ्कमधो निधाय सप्तमगणस्य चतुर्विकल्पत्वात् चतुर्भिर्हन्यात् जातानि चत्वारि । इह दृष्टः सर्वगुरुः तस्य शेषानन्तगुर्वादिगुरुसर्वलघून् त्रीन् तस्माद् राशेः पातयेत् । [3]शेषमेकम् । षष्ठश्चाविकल्पः पञ्चमे चतुर्भिर्हते तत्रापि पातयेत् त्रिषु त्यक्तेषु शेषमेकम् । चतुर्थे पञ्चभिर्हते शेषेषु चतुर्षु त्यक्तेषु शेषमेकम् । तृतीये चतुर्भिर्हते शेषद्वये त्यक्ते शेषं द्वे । द्वितीये पञ्चभिर्हते द्वये त्यक्ते शेषा अष्टौ । प्रथमे चतुर्भिर्हतेषु द्वये त्यक्ते त्रिंशत् । पूर्वार्धान्त्यगणश्चाविकल्पः सप्तमे चतुर्भिर्हतेषु

---

1. साध्यं यत्र इ. 2. अधःस्थितात् इ. 3. एकमेकम् इ.

द्वये त्यक्ते शतमष्टादशाधिकम् । षष्ठे द्वाभ्यां हतेषु एकस्मिन् त्यक्ते द्वे शते पञ्चत्रिंशदधिके । पञ्चमे चतुर्भिर्हतेषु त्रिषु त्यक्तेषु नवशतानि सप्तत्रिंशदधिकानि । चतुर्थे पञ्चभिर्हतेषु चतुर्षु त्यक्तेषु षट्चत्वारिंशत् शतानि एकाशीत्यधिकानि । तृतीये चतुर्भिर्हतेषु त्रिषु त्यक्तेषु अष्टादशसहस्राणि सप्तशतानि एकविंशत्यधिकानि । द्वितीये पञ्चभिर्हते द्वये त्यक्ते त्रिनवतिसहस्राणि षट्शतानि त्र्यधिकानि । प्रथमे चतुर्भिहतेषु त्रिषु त्यक्तेषु त्रयो लक्षाः चतुःसप्ततिसहस्राणि चत्वारि शतानि नवोत्तराणि (३७४४०९) एतावतिथीयमिति निर्दिशेत् ।

यदाह—

गणानुद्दिष्टगाथायाः संस्थाप्य तदधो लिखेत् ।
चतुःपञ्चादिकां सङ्ख्यां स्थानस्थानोचितां ततः ॥

हत्वा हत्वाद्यमन्त्येन चोपरिस्थगणादधः ।
पृथग्धृतगणेभ्योऽथ गणसङ्ख्यां विकल्पयेत् ॥

हत्वोद्धार्योचिता तावत् यावदाद्याङ्कसंभवः ।
तत्संख्यामुद्दिशेद् गाथामुद्दिष्टप्रत्यये बुधः ॥

एवमुत्तरत्रापि उद्दिष्टं ज्ञेयम् । यथा स्वविकल्पं ज्ञेयम् । यदा तु त्रयो लक्षाश्चतुः-सप्ततिसहस्राणि चत्वारिंशतानि नवोत्तराणि इत्येतावत्संख्या आर्या नष्टा कीदृशी सा इति पृच्छति । तदा तस्याः अङ्के स्थापिते यत्र तु गणविकल्पा वावशेषस्तत्र तत्संख्यो गणो देयः परं लब्धं सैकं न क्रियते । अन्यत् पूर्ववत् । यथा प्रथमगणचतुर्विकल्प इति चतुर्भिर्नष्टाङ्केऽहते लब्धं त्रिनवतिसहस्राणि षट्शतानि द्व्युत्तराणि शेषमेकमिति । एत-द्विकल्पेषु प्रथमं सर्वगुरुं न्यसेत् । तस्याः अङ्के स्थापिते गणविकल्पैर्हते यद् राशिशेषं तत्संख्यो गणो देयः । ततः लब्धं सैकं कृत्वा पुनः पुनरुत्तरगणविकल्पैः हते शेषसंख्यो गणो देयः । यत्र तु गणविकल्पः एतद्विकल्पेषु प्रथमं सर्वगुरुं न्यसेत् । लब्धे सैके द्वितीयो गणः पञ्चविकल्पः इति पञ्चभिर्भक्ते लब्धं अष्टादशसस्राणि सप्तशतानि विंशत्यधि-कानि । शेषं त्रीणि इति तद्गणविकल्पेषु तृतीयं मध्यगुरुं न्यसेत् । लब्धे सैके तृतीयः चतुर्विकल्प इति चतुर्भिर्भक्ते लब्धं षट्चत्वारिंशत्शतानि अशीत्यधिकानि । शेषमेकम् इति तद्विकल्पेषु एकं प्रथमं सर्वगुरुं न्यसेत् ।

लब्धे सैके चतुर्थे गणे पञ्चविकल्पा इति पञ्चभिर्भक्ते लब्धं नवशतानि षट्त्रिंशदधिकानि शेषमेकमिति । तद्विकल्पेषु प्रथमं सर्वगुरुं न्यस्येत् । लब्धे पञ्चमस्य

चतुर्विकल्पत्वात् चतुभिर्भक्ते लब्धं द्वे शते चतुस्त्रिंशदधिके। शेषमेकमिति प्रथमं विकल्पं सर्वगुरुं न्यसेत्। लब्धे सैके षष्ठस्य द्विविकल्पत्वात् द्वाभ्यां भक्ते लब्धं शतं सप्तदशोत्तरम्। शेषमेकमिति तद्विकल्पयोः प्रथमं मध्यगुरुं न्यसेत्। लब्धे सैके सप्तगणस्य चतुर्विकल्पत्वात् चतुर्भिर्भक्ते लब्धमेकोनत्रिंशत्। अन्ते नित्यविन्यासं गुरुं न्यसेत्। ततः सप्तमगणाल्लब्धे सैकेऽपरार्धादिगणस्य चतुर्विकल्पत्वाच् चतुर्भिर्भक्ते लब्धं सप्त। शेषं द्वे इति द्वितीयं विकल्पमन्त्यगुरुं न्यसेत्। लब्धे सैके द्वितीयगणस्य पञ्चविकल्पत्वात् पञ्चभिर्भक्ते लब्धमेकम्। शेषं त्रीणि तृतीयविकल्पं मध्यगुरुं न्यसेत्। लब्धे सैके तृतीयस्य चतुर्विकल्पत्वात् चतुभिर्भक्ते लब्धं शून्यम्। शेषं द्वे इति द्वितीयविकल्पमन्त्यगुरुं न्यसेत्। लब्धे सैके चतुर्थस्य पञ्चविकल्पत्वात् पञ्चभिर्भक्ते लब्धं शून्यम्। शेषमेकमिति प्रथमं विकल्पं सर्वगुरुं न्यसेत्। लब्धे सैके पञ्चमस्य चतुर्विकल्पत्वाच् चतुर्भिर्भक्ते लब्धं शून्यम्। शेषमेकमिति प्रथमविकल्पं सर्वगुरुं न्यसेत्। [1]षष्ठो नित्यविन्यासो लघुरेव। ततो लब्धे सैके सप्तमस्य चतुर्विकल्पत्वात् चतुर्भिर्भक्ते लब्धं शून्यम्। शेषमेकमिति प्रथमविकल्पं सर्वगुरुं न्यसेत्। अन्ते नित्यविन्यासो गुरुरेव इति सिद्धा नष्टा आर्या ॥

यदाह—

नष्टाङ्के [2]प्रथमे भक्ते गणाङ्कैश्चतुरादिकैः।
शेषसङ्ख्यो गणो देयो लब्धं कुर्यात् सरूपकम् ॥
पुनर्भजेत् पुनर्लब्धं सरूपं शेषसङ्ख्यया।
गणान् दद्याद् [3]गते शेषे गाथायाः प्राक् गणक्रमः ॥

एवमुत्तरत्रापि नष्टविधिर्ज्ञेयः। अत्र मात्राछन्दःप्रस्तावे यदार्याप्रस्तारादिप्रकाशनं तल्लघुकर्मार्थं प्रत्ययार्थं च ॥ (२३)

पञ्चिका

(२३) न् च लश्च न्लम् इति समाहारोऽयं द्वन्द्वः। षष्ठे गणे न्ले नगणलघुके सति। द्वितीयलात् द्वितीयलघुतः सकारात् पूर्वम्। यतिपदनियमो भवति, यतिपदस्य नियमः यतिपदनियमः। द्वितीयलादिति दिग्योगलक्षणे पञ्चमी। तेन षष्ठो गणश्चतुर्लघुर्भवति। तदा तस्य चतुर्लघोर्गणस्य द्वितीयं लघुसकारं परित्यज्य लघुना चकारेण पूर्वपदसमाप्तिर्भवति। परके इति षष्ठापेक्षया परत्वम्। परके परस्मिन् सप्तमे गणे च न्ले नलघुके गति मुखलात् स यतिपदनियमः। मुखलात् प्रथमाल्लघुतः पकारात् स यतिपदनियमः।

---

1. षष्ठे क. 2. प्रथमं क. 3. गणे ब. क.

आर्याविशेषकाः

२४. त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः ।
पथ्येति नाम तस्याश्छन्दोविद्भिः समाख्यातम् ॥

मुखलादिति दिग्योगलक्षणे पञ्चमीत्वाच् चतुर्णां लघूनां मध्ये प्रथमलघुं परित्यज्य पूर्वस्य षष्ठगणस्यान्ते तिकार एव यतिः स्यादित्यर्थः । एतत्सर्वं पूर्वार्धस्य लक्षणमुक्तम् । चरमेऽर्धे अपरार्धे । पञ्चमके पञ्चगे गणे न्ले नलघौ सति तस्मान् मुखलात् प्रथमलघोः दिकारात् पूर्वस्य चतुर्थगणस्यान्ते सकार एव यतिपदनियमः स्यात् । इह भवति षष्ठो लः । इह पश्चिमे दले लः लघुरेक एव षष्ठो गणो भवति । तद्यथा—

भ भ म भ म ज स ग
ऽ।। ऽ।। ऽ ऽ ऽ।। ऽ ऽ। ऽ।।। ऽ ऽ
देवपराक्रमबाहु-र्बाहुजचूडाग्रमण्डितपदाब्जः ।

भ भ म म स ल म ग
ऽ ।। ऽ।। ऽऽ ऽऽ ।। ऽ। ऽ ऽऽ
श्री घन शासन वृद्ध्यै गोत्रं तरणे-र-लञ्चक्रे ॥

भ भ म म म नल नल ग
ऽ।। ऽ।। ऽऽ ऽ ऽ ऽऽ।।।।।। ।। ऽ
रूपविनिर्जितकामः श्रीमान् सर्वज्ञचरणदृढ भजनः ।

भ भ म ज नल ल म ग
ऽ।। ऽ।। ऽऽ। ऽ।।।। ।। ऽ ऽऽ
वीरपराक्रमबाहुश्चिरस्यमवति हि महीं धर्मैः ॥ (२३)

तात्पर्यटीका

(२४) अंशका इह गणाः । शेषं सुगमम् । पूर्वार्धे पथ्या उत्तरार्धे विपुला मुखपथ्या । पूर्वार्धे विपुला । उत्तरार्धे पथ्या या सा जघनपथ्या ॥ (२४)

सुकविहृदयानन्दिनी

(२४) यस्याः आर्याया आद्येषु त्रिषु त्रिष्वंशकेषु गणेषु पादो विरामो भवति, सा पथ्या नाम। यथा—

उज्झितनेपथ्यालकमुज्झिततिलकाञ्जनं यदेणाक्ष्याः।
तस्याः स्मरामि विरहप्रारम्भे वदनमतिरम्यम् ॥ (२४)

छन्दोवृत्तिः

(२४) अथ आर्याविशेषानाह— यस्या द्वयोरपि दलयोराद्येषु त्रिषु गणेषु यतिर्दृश्यते, तस्याः पथ्या इति नाम बुधैरुक्तम्। यथोदाहरणम्—

नेपथ्यानि निरस्यति संत्रस्यति मत्तकोकिलानादात्।
निन्दति चेन्दुमयूखांस्त्वद्विरहे नः सखी सुभग ॥ (२४)

पञ्जिका

(२४) [1]छन्दांसि विन्दन्तीति छन्दोविदः। तैश्छन्दोविद्भिराचार्यैः तस्याः नाम पथ्या इति समाख्यातम् पथ्या इति कथितम्। तस्याः इति कस्याः। यस्या आर्याया दलयोर्द्वयोः पूर्वार्धपरार्धयोः आद्येषु प्रथमेषु त्रिष्वंशकेषु त्रिषु भागेषु पादो दृश्यते त्रिभिस्त्रिभिर्गणैः प्रथमः पादः तृतीयः पादश्च भवति। तद्यथा—

स ज म म म ज म ग
ISS I SISS SS SSI S ISSS
मतिमान् स धर्मवेत्ता नेता लोकस्य यः समस्तस्य।

भ भ म ज म ल म ग
SIISII SS ISISSI SSS
भूपपराक्रमबाहुः सदैष संपाति दोषज्ञान् ॥ (२४)

---

1 आर्याभेदाः छन्दःशास्त्रानुसारम्—

एकैव भवति पथ्या विपुलास्तिस्रस्ततश्चतस्रस्ताः।
चपला भेदैस्तिभिरपि भिन्ना इति षोडशार्याः स्युः ॥

गीतिचतुष्टयमित्थं प्रत्येकं षौडशप्रकारं स्यात्।
साकल्येनार्याणामशीतिरेव भेदाः स्युः ॥

तयोरर्थः । एका पथ्या तिस्रो विपुलाः मिलिता एताश्चतस्रो जाताः । पुनरेताश्चपलाभेदत्रयैः प्रत्येकं विशेषिताः सत्यो द्वादश आर्या जायन्ते । एताश्च सर्वा मिलित्वा षोडशार्या भवन्ति । एवं गीतिरुपगीतिरुद्गीतिरार्यागीतिः च एताश्च पूर्वोक्तषोडशभेदैर्विभिन्नाः सत्यः प्रत्येकं षोडशप्रकारा आर्या जायन्ते । सर्वश्चैताः पञ्च षोडशसङ्ख्यात्मिका आर्या मिलित्वा अशीतिरुपजायन्ते । पुनरेता अशीतिरार्याः सुखबोधार्थम् क्रमेण नामोल्लेखनेनापि विन्यस्यन्ते । यथा—

१. पथ्यार्या । २. आदिविपुलार्या । ३. अन्तविपुलार्या । ४. उभयविपुलार्या । ५. मुखचपला पथ्यार्या । ६. मुखचपलादिविपुलार्या । ७. मुखचपलान्तविपुलार्या । ८. मुखचपलोभयविपुलार्या । ९. जघनचपलापथ्यार्या । १०. जघनचपलादिविपुलार्या । ११. जघनचपलान्तविपुलार्या । १२. जघनचपलोभयविपुलार्या । १३. महाचपलापथ्यार्या । १४. महाचपलादिविपुलार्या । १५. महाचपलान्तविपुलार्या । १६. महाचपलोभयविपुलार्या । १७. गीतिपथ्यार्या । १८. गीत्यादिविपुलार्या । १९. गीत्यन्तविपुलार्या । २०. गीत्युभयविपुलार्या । २१. मुखचपलागीतिपथ्यार्या । २२. मुखचपलागीत्यादिविपुलार्या । २३. मुखचपलागीत्यन्तविपुलार्या । २४. मुखचपलागीत्युभयविपुलार्या । २५. जघनचपलागीतिपथ्यार्या । २६. जघनचपलागीत्यादिविपुलार्या । २७. जघनचपलागीत्यन्तविपुलार्या । २८. जघनचपलागीत्युभयविपुलार्या । २९. महाचपलागीतिपथ्यार्या । ३०. महाचपलागीत्यादिविपुलार्या । ३१. महाचपलागीत्यन्तविपुलार्या । ३२. महाचपलागीत्युभयविपुलार्या । ३३. उपगीतिपथ्यार्या । ३४. उपगीत्यादिविपुलार्या । ३५. उपगीत्यन्तविपुलार्या । ३६. उपगीत्युभयविपुलार्या । ३७. मुखचपलोपगीतिपथ्यार्या । ३८. मुखचपलोपगीत्यादिविपुलार्या । ३९. मुखचपलोपगीत्यन्तविपुलार्या । ४०. मुखचपलोपगीत्युभयविपुलार्या । ४१. जघनचपलोपगीतिपथ्यार्या । ४२. जघनचपलोपगीत्यादिविपुलार्या । ४३. जघनचपलोपगीत्यन्तविपुलार्या । ४४. जघनचपलोपगीत्युभयविपुलार्या । ४५. महाचपलोपगीतिपथ्यार्या । ४६. महाचपलोपगीत्यादिविपुलार्या । ४७. महाचपलोपगीत्यन्तविपुलार्या । ४८. महाचपलोपगीत्युभयविपुलार्या । ४९. उद्गीतिपथ्यार्या । ५०. उद्गीत्यादिविपुलार्या । ५१. उद्गीत्यन्तविपुलार्या । ५२. उद्गीत्युभयविपुलार्या । ५३. मुखचपलोद्गीतिपथ्यार्या । ५४. मुखचपलोद्गीत्यादिविपुलार्या । ५५. मुखचपलोद्गीत्यन्तविपुलार्या । ५६. मुखचपलोदगीत्युभयविपुलार्या । ५७. जघनचपलोद्गीतिपथ्यार्या । ५८. जघनचपलोद्गीत्यादिविपुलार्या । ५९. जघनचपलोद्गीत्यन्तविपुलार्या । ६०. जघनचपलोद्गीत्युभयविपुलार्या । ६१ महाचपलोद्गीतिपथ्यार्या । ६२. महाचपलोद्गीत्यादिविपुलार्या । ६३. महाचपलोद्गीत्यन्तविपुलार्या । ६४. महाचपलोद्गीत्युभयविपुलार्या ।

२५. [1]संलङ्घ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ।
यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ॥

तात्पर्यटीका

(२५) शकलयोरिति सिद्धे द्वयोरिति विशेषणं विशेषनियमार्थम् । तेन एकस्मिन् दले विपुलालक्ष्मदर्शने विपुलाभिधानपूर्वकं मुखचपलादिवन् नाम न स्यात् । अत एव पूर्वत्र मुखपथ्या इत्याद्युक्तम् । शेषं सुगमम् । आर्यादलद्वये गणनियमेन अन्तर्वर्तिनं जातिविशेषं नाम्ना निर्देष्टुमाह । (२५)

सुकविहृदयानन्दिनी

(२५) यस्याः आर्यायाः आद्यगणत्रयमतिक्रम्य द्वयोरप्यर्धयोः पादे विरामो भवति सा विपुला नाम । यथा--

मम खलु न याति नयनयुगमचलमनिमेषि पश्यतस्तृप्तिम् ।
त्रस्तमृगशिशुदृशस्तन्वङ्ग्याः जघनस्थलीं विपुलाम् ॥

सामान्येन विधानमेतत् । आद्यन्तोभयभेदपूर्वकत्वात् त्रिधा भवति ।

६५. आर्यागीतिपथ्यार्या । ६६. आर्यागीत्यादिविपुलार्या । ६७. आर्यागीत्यन्तविपुलार्या । ६८. आर्यागीत्युभयविपुलार्या । ६९. मुखचपलार्यागीतिपथ्यार्या । ७०. मुखचपलार्यागीत्यादिविपुलार्या । ७१. मुखचपलार्यागीत्यन्तविपुलार्या । ७२. मुखचपलार्यागीत्युभयविपुलार्या । ७३. जघनचपलार्यागीतिपथ्यार्या । ७४. जघनचपलार्यागीत्यादिविपुलार्या । ७५. जघनचपलार्यागीत्यन्तविपुलार्या । ७६. जघनचपलार्यागीत्युभयविपुलार्या । ७७. महाचपलार्यागीतिपथ्यार्या । ७८. महाचपलार्यागीत्यादिविपुलार्या । ७९. महाचपलार्यागीत्यन्तविपुलार्या । ८०. महाचपलार्यागीत्युभयविपुलार्या ।

एतासामुदाहरणानि नामानुकूलमूह्यानि । अप्रसिद्धिहेतोर्न तानि ग्रन्थेऽस्मिन् प्रदर्शितानि । अत्र मुखजघनशब्दयोः क्रमेण पूर्वमुत्तरमर्थः । यथा शरीरस्य मुखं पूर्वं जघनं चोत्तरमतो अत्रापि छन्दःशास्त्रे आर्यापूर्वोत्तरार्धयोः मुखजघनत्वकल्पना । विपुलचपलशब्दयोरपि पूर्वोक्तलक्षणातिक्रमरूपोऽर्थः । यथा वैपुल्यचापल्ययोर्न नियमस्तिष्ठति नियमातिक्रम एव भवति । अतोऽत्रापि तयोः पूर्वोक्तलक्षणातिक्रमरूपार्थो व्यवहारः । आर्योदाहरणेषु तु मुखजघनादिशब्दानां पक्षे प्रकृतार्थोऽपि परिगृह्यते ॥

1. उल्लङ्घ्य निसा.

तत्रादिविपुला यथा—

प्रमदानां जयति कटाक्षोऽयं निशितस्फुरत्स्मरशराभः ।
हृदयस्थितानुरागप्रकटनपटुतां दधत् स्वैरम् ॥

अन्त्यविपुला यथा—

प्रीतिं कस्य न जनयति [1]कुर्वन्ती केशबन्धनं नारी ।
दर्शितभुजयुगमूलालङ्कृतिभूतार्द्रनखपङ्क्तिः ॥

उभयविपुलोदाहरणं पूर्ववदेवोदाहृतम् इति ॥ (२५)

छन्दोवृत्तिः

(२५) यस्या आद्यं गणत्रयमतिक्रम्य द्वयोरपि दलयोर्यतिर्भवति तां विपुलाम् इति पिङ्गलनागो वक्ति । सा चपलावत् मुखजघनभेदभिन्ना भवति । यथादिमेऽर्धे मुखविपुला, पश्चिमेऽर्धे जघनविपुला इति । [2]यदाह— 'विपुलाद्यन्तसर्वभेदात् त्रिधा' इति । तत्र मूलोदाहरणं सूत्रमेव ।

भेदोदाहरणानि यथा—

मुखविपुलाः [3]पर्यन्ते तु लघीयांसो भवन्ति नीचानाम् ।
वर्षासु ग्रामाणां प्रवाहवेगा इव स्नेहाः ॥

नाभीनिम्ना कुचतटतुङ्गा जघनविपुलाथ मध्यकृशा ।
भ्रूकुटिलाशयसरला च मानसं हरति सा बाला ॥

शस्त्राभ्यासे रतिवल्लभस्य मन्ये खलूरिका रम्या ।
तव कमलदलाक्षि नितम्बभूमिरेषा महाविपुला ॥ (२५)

पञ्चिका

(२५) पिङ्गलनागः शेषः तां विपुलामिति समाख्याति, विपुला इति ब्रूते । तामिति कां च । यस्या आर्यायाः शकलयोर्द्वयोः पूर्वार्धपरार्धयोः आदिमं गणत्रयमुल्लङ्घ्य आदिभूतान् त्रीन् गणान् लघयित्वा चतुर्थे गणार्धे दिममित्यत्र पादो भवति ।

---

1. कुर्वती क. 2. भागे कृते आह क. 3. पर्यन्तेषु ब.

चपला

२६. उभयार्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः ।
चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ॥

तद्यथा—

नल भ स ज स ज स ग
। । । । ऽ । । । । ऽ । ऽ । । । ऽ । ऽ । । । ऽ ऽ
विजयिपराक्रमभुजभूमिपं भजति वैरिवीरकमलेऽयम् ।

म ज स भ भ ल स ग
ऽ ऽ । ऽ । । । ऽ ऽ । । ऽ । । । । । ऽ ऽ
तेषां च नीतिवनिताभिः सह सङ्गमयति स दृष्ट्वा ॥ (२५)

तात्पर्यटीका

(२६) उभयीनाम् इति पथ्याव्यक्तीनां वार्धे उभयार्धे तयोरुभयोर्द्वयोः । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । अस्यान्वयः । भवतः । कौ । जकारौ । किंविशिष्टौ । द्वितीयतुर्यौ । द्वयोः पूरणः द्वितीयः । चतुर्णां पूरणस्तुर्यः । चतुरः पूरणे । यदीयौ चपला पथ्या । पुनः किं विशिष्टौ । गमध्यगौ गयोर्मध्यगौ गमध्यगौ इति । शेषं सुगमम् । चपलासर्वगुरुप्रस्तारः ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ ऽ अर्धम् । ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ । ऽ ऽ ऽ, समुद्रप्रस्तारे शुद्धचपलाभेदाः ५१२ । पथ्यादिमिश्रमुखचपला भेदाः प्रत्येकं २०४२८८ । अत्रानयनसंप्रदायः । चपलाप्रथमार्धभेदाः ३२० । पथ्याद्वितीयार्धविकल्पान् गुणयेत् । तत्र जाता सङ्ख्या २०४८०० । अस्याः सङ्ख्यायाः शुद्धचपलाभेदैर्न्यूनत्वे सति यच्छेषं सा सङ्ख्या लभ्यते । एवं पथ्यादिमिश्रजघनचपलाभेदा ऊह्याः । यथा २०४२८८ । एवं विपुलामिश्रत्वेऽपि । अस्योपसंहारः ।

सूर्येषवस्तु शुद्धाया भिदोऽष्टाष्टद्विवार्धयः ।
विंशतिश्च तथा वक्त्रचपलाभिदः स्मृताः ॥ (२६)

सुकविहृदयानन्दिनी

(२६) यस्या आर्याया उभयोरर्धयोर्जगणौ द्वितीयतुर्यौ द्वितीयचतुर्थौ गमध्यगौ। गमध्यगाविति वदता सूत्रकृता गणनियम उक्तः। तथाहि— प्रथमो गणोऽन्तगुरुरेव। तृतीयगणो द्विगुरुरेव। पञ्चमश्चादिगुरुरेव इति निश्चयः। शेषं यथाप्रोक्तं सा आर्या चपला नाम।

यथा—

चपलाक्षि मौनमुद्रां त्यजेति सम्भाषिता मया सुतनुः।
सञ्जातरोषहर्षा बभूव रत्युत्सुका तन्वी॥ (२६)

छन्दोवृत्तिः

(२६) यस्याः द्वयोर्दलयोः [1]द्वितीयतुर्यौ जगणौ [2]गुर्वोः मध्यगतौ स्यातां तस्याः चपला इति नाम अहीन्द्रेणोक्तम्। अस्याश्च पूर्वार्धे प्रथमे गणे द्वौ विकल्पौ द्वितीये एकः, तृतीयेऽपि एकः, चतुर्थेऽपि एकः, पञ्चमे द्वौ, षष्ठेऽपि च द्वौ, सप्तमे चत्वारः, अष्टमे गुरुरेव, अन्योन्यताडनायां द्वात्रिंशत्। अपरार्धे षष्ठस्य लघोरेकत्वात् षोडशैव। उभयार्धविकल्पताडनायां पञ्चशतानि द्वादशोत्तराणि चपलाविकल्पाः। सा चैकविधपथ्यात्रिविधविपुलाभेदाच् चतुर्धा। तत्र पथ्याचपलोदाहरणं सूत्रमेव। विपुलाचपला यथा—

युगपत्प्रफुल्लकङ्केलिमल्लिकाविपुलचम्पकान् दृष्ट्वा।
जाता मधूत्सवे षट्पदावलीयं महाचपला॥

एवं मुखविपुलाचपला जघनविपुलाचपले[3]वोदाहार्या॥ (२६)

पञ्जिका

(२६) नागराजेन शेषेण तस्या नाम चपला इति प्रकीर्तितं कथितम्। तस्या इति कस्याः। यस्या आर्यायाः उभयार्धयोः द्वयोः शकलयोः द्वितीयतुर्यौ द्वितीयचतुर्थौ जकारौ जगणौ स्याताम्। किंविशिष्टौ इति चेत्। गमध्यगौ गयोर्मध्यं गमध्यं गमध्यं गच्छतः इति गमध्यगौ। द्वयोर्गुर्वोर्मध्यगतौ। पूर्वापरयोः द्विगुरुगणयोर्वा सगणभगणयोर्वा

---

1. द्वितीयचतुर्थौ ब. क. 2. गुरुमध्य० क. 3. चपला चोदाहार्या अ.

मुखचपला

२७. आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ।
शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ॥

मध्यस्थितौ इत्यर्थः । तद् यथा—

स ज म ज म ज म ग
॥ऽ ।ऽ।ऽऽ।ऽ।ऽ ऽ ।ऽ।ऽऽ ऽ
सुमते त्रिसिंहलेश प्रवीरलक्ष्मीः सुखं समायाति ।

स ज म ज म ल म ग
।।ऽ। ऽ। ऽ ऽ।ऽ।ऽऽ।ऽ ऽ ऽ
रिपुरक्तपिच्छिले ते कृपाणधारापथे चित्रम् ॥ (२६)

तात्पर्यटीका

(२७) इति सुगमम् । मुखचपलाप्रस्तारः—

ऽऽ ।ऽ। ऽऽ ।ऽ। ऽऽ ।ऽ। ऽऽ ऽ **अर्धम्** ।

ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ । ऽऽ ऽ (२७)

सुकविहृदयानन्दिनी

(२७) यस्या आर्यायाः आद्यं दलमर्धं समस्तमपि चपलाया लक्षणं भजेत श्रयेत शेषे उत्तरार्धे पूर्वोक्तलक्षणा पथ्याचिह्ना सा मुखचपला नाम ।

या स्यात् स्थिराचिताङ्गी लघुस्तनी पिङ्गलाक्षियुगला च ।
मुखचपला परुषाकृतिरतिदीर्घकृशा परित्याज्या ॥ (२७)

छन्दोवृत्तिः

(२७) यस्या (आर्यायाः) आद्यमर्धं चपलायाः लक्ष्माश्रयति शेषे द्वितीयेऽर्धे [1]पूर्वजलक्ष्मा सा मुखचपला उक्ता मुनिना काश्यपेन। अस्यां च चपलापूर्वार्धविकल्पैर्द्वात्रिंशता आर्यापरार्धचतुःषष्टिशत (६४००) विकल्पानां ताडने द्वौ लक्षौ अष्टचत्वारिंशच्छतानि विकल्पा भवन्ति। एषापि चपलावत् पथ्यादिभेदभिन्ना चतुर्धा। तत्र पथ्यामुखचपलोदाहरणं सूत्रमेव। अथवा इदम्—

एकोऽपि बालचूतः शिखोदगमैरभिनवैर्दहति पान्थम्।
एतत् पुनरधिकं सखि कलकण्ठी तत्र मुखचपला॥

विपुलामुखचपलोदाहरणं तु स्वयमूह्यम्।

मुखविपुलापूर्विका मुखचपला यथा—

मृदु वाच्य एष नैणाक्षि वल्लभस्ते शठोऽन्यविवशमनाः।
तर्जय परुषैर्वचनैर्मुखचपलानामयं विषयः॥

जघनविपुलापूर्विका मुखचपला यथा—

दयितस्तवानुनीतो मया सखि त्वां किलानुनेष्यति सः।
तं पादानतमालोक्य मा कटु ब्रूहि मुखचपले॥　　(२७)

पञ्जिका

(२७) मुनिना पिङ्गलमुनिना सा मुखचपला उदिता मुखचपलेति प्रोक्ता। सा का। यस्याः आर्यायाः आद्यं दलं प्रथमार्धं तत्र चपलागतं समस्तं लक्ष्म भजेत। चपलायाः पूर्वार्धे कथितं गुरुद्वयमध्यगतं द्वितीयचतुर्थपादगतं सर्वं लक्षणं भजेत। शेषे अन्यत्र परार्धे पूर्वजलक्ष्मा पथ्यार्याजातलक्षणं स्यात्। लक्ष्म इत्यपि पुस्तकान्तरे पाठः। तदा द्विगुरुगणत्वं न युज्यते। तद् यथा—

म　ज　म　ज　म　ज　म　ग
ऽ S I　S I S　S I S I　S S I S I S S S
लङ्केश भूमिजास्ते समीक्ष्य[2] त्रस्ता भुजेऽसिसर्प ते।

---

1. आर्योत्तरार्धलक्ष्मा क. इ.

2. तीव्रप्रयत्नोच्चारणेनाऽत्र लघुत्वमिति कण्ठाभरणः। यदुक्तम्—
यदा तीव्रप्रयत्नेन संयोगादेरगौरवम्। न च्छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरयः॥

इति।

जघनचपला

२८. प्राक्प्रतिपादितमर्धे प्रथमे प्रथमेतरे तु चपलायाः ।
लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ।।

म भ म नल म ल म ग
S s S I I S S I I I I S S I S s S
त्यक्त्वा राज्यमरातिर्वसति वनेष्वेव तच्चित्रम् ।। (२७)

तात्पर्यटीका

(२८) सुगममेतत् । पथ्या १, मुखपथ्या १, जघनपथ्या १, विपुला चेति शुद्धा भेदाः ४ । एते चपलाभेदत्रयेण योजिताः १२ । सर्वसंकलनायां १६ ।

जघनचपलाप्रस्तारः—

S S S S S S S S S S I S I S S s अर्धम् ।

S S I S I S S I S I S S I S S S (२८)

सुकविहृदयानन्दिनी

(२८) या आर्या प्रथमेऽर्धे प्राक् प्रतिपादितं पूर्वमुक्तं लक्षणमाश्रयेत । प्रथमेतरे उत्तरार्धे पुनश्चपलाया लक्षणं सा जघनचपला उक्ता । विशुद्धधीभिरमलबुद्धिभिः ।

यथा—

कुञ्चितलोचनयुगलं समदनमोदसुन्दरालापम् ।
सुरतं स्मरासि तस्या मृगीदृशो जघनचपलायाः ।। (२८)

इत्यार्याप्रकरणम् ।

छन्दोवृत्तिः

(२८) [1]या प्राक्प्रतिपादितमार्याद्यदलगतं लक्ष्म प्रथमेऽर्धे [2]भजति, द्वितीये तु चपलालक्षणमाश्रयति सा उक्ता जघनचपला इति । अत्रापि चपलावत् अपरार्धविकल्पैः षोडशभिरार्यापूर्वार्धविकल्पानां अष्टशताधिकद्वादशसहस्रसङ्ख्यानां ताडने द्वे लक्षे अष्टचत्वारिंशच्छतानि विकल्पा भवन्ति । एषा अपि पूर्ववत् चतुर्धा । तत्र प्रथमोदाहरणं सूत्रम्[3] ।

विपुलापूर्विका जघनचपला यथा--

कस्य कृते कृतपुण्यस्य दृष्टिरियमनिमिषा त्वया ध्रियते ।
यासीत् पुरा कुरङ्गाक्षि नित्यमत्यन्तचपलैव ॥

पथ्यापूर्विका जघनचपला यथा--

तस्या नितान्तचपलान्नेत्रविलासान् विलोक्य बालायाः ।
को वर्णयेदमुग्धः कुरङ्गिकादृष्टिललितानि ॥

जघनविपुलापूर्विका जघनचपला यथा--

उद्दाममारुताहतध्वजघनचपलानि जीवितव्यानि ।
जानन् जनः कथं नाम जातुचित् प्रीयते[4] तत्र ॥

एवं मुखचपलोपूर्विका जघनचपलोदाहार्या । एवं पथ्यादिभिर्भेदैः गाथाऽपि उदाहार्या । एवं पथ्यादिभेदेनैकेन विपुलाभेदैः त्रिभिः चपलाभेदैः द्वादशभिः षोडशभेदा आर्याप्रकरणे॥
(२८)

पञ्जिका

(२८) विशुद्धा निर्मला धीर्बुद्धिर्येषां ते विशुद्धधियः । तैः विशुद्धधीभिः पण्डितैः जघनचपला उक्ता जघनचपला इत्यभिहिता । सा का । या प्रथमेऽर्धे पूर्वस्मिन् दले प्राक्प्रतिपादितं लक्ष्म पूर्वमुदितं पथ्यार्यालक्षणं भजेत् । प्रथमेतरे तु प्रथमादन्यत्र द्वितीये

---

1. यतः क. 2. भवति क. 3. एव इत्यधिकम् इ. 4. प्रीतये इ.

गीतिप्रकरणम्

२९. आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ।
दलयोः कृतयतिशोभां तां गीतिं नीतवान् भुजङ्गेशः ॥

च पुनः चपलायाः लक्षणमाश्रयेत । अत्र सा इत्युक्ते अर्थाद् यतिर्लभ्यते यत्तदोः नित्यसम्बन्धात् । तद् यथा—

भ भ म स स ज म ग
S I ISII SS II SII SIS ISS
नाथ पराक्रमबाहो तव धामशुचिर्विभात्ययं पूर्वम् ।

म ज म ज म ल नल ग
SS I S I SS ISISS IIIIS
वैरिव्रजाङ्गनानां समेधतेऽयं नयनसलिलैः । (२८)

इत्यार्याप्रकरणम् ॥

तात्पर्यटीका

इति चतुष्टयं सुगमम् । एतासां प्रस्तारे व्यतिभेदाः पथ्यादिभेदाः यतिभेदाश्च पूर्ववद् व्याख्येयाः । अत एव उद्गीतावुपलक्षणार्थं 'तद्वद् यत्यंशभेदसंयुक्ता' इत्युक्तम् । आर्यागीतावष्टमो गणः सर्वगुरुरेव इत्यस्य मतम् । गुर्वन्तो द्विकल्पः इत्यन्ये ।

तदुक्तं जयदेवेन (४.१४)—

गुर्वन्ताष्टमगणभागार्यापूर्वार्धसदृशशकलद्वितया ।
आर्यैरार्यागीतिर्गीता सद्गीतकीर्त्ति (गीति) भिर्गीतिविधौ ॥

इति श्रीरघुसूनिसूनुश्रीविक्रमसूरिविरचितायां वृत्तरत्नाकरछन्दःसूत्रतात्पर्यटीकायाम् आर्यागीतिप्रकरणे समाप्ते ॥ (२९–३२)

सुकविहृदयानन्दिनी

(२९) आर्यायाः प्रथमेऽर्धे यदुक्तं लक्षणं तद् यदि द्वयोरप्यर्धयोर्भवति तां गीतिम् इति गीतवान् भुजङ्गेशः पिङ्गलनागः । यथा—

रोमाञ्चं जनयन्ती सुखयन्ती नेत्रयोर्युगं यूनाम् ।
सद्यो मनांसि मदयति गीतिः स्त्रीणां मदेन मत्तानाम् ॥ (२९)

छन्दोवृत्तिः

(२९) यदि आर्याप्रथमदलोक्तं लक्षणं द्वयोरप्यर्धयोः स्यात् तदा गीतिः भवति इति समासार्थः । सा चैकः पथ्यायास्त्रयः विपुलायाः द्वादश चपलायाः विकल्पा इति षोडशधा । अत्र पूर्वार्धे द्वादशसहस्राणि अष्टौ शतानि विकल्पाः । अपरार्धेऽपि तावन्त्यो-ऽन्योन्यताडनायां षोडशकोटयोऽष्टत्रिंशल्लक्षाः चत्वारिंशत्सहस्राणि विकल्पाः पथ्यागीतौ भवन्ति । विपुलागीतावपि [1]त एव । एवं चपलागीतिष्वपि यथायथं पूर्वापरार्धविकल्प-ताडने या सङ्ख्या भवति सा स्वयमूह्या । एवमुपगीत्यादिष्वपि ज्ञातव्यम् । तत्र पथ्या-गीत्युदाहरणं सूत्रमेव ।

विपुलागीतिर्यथा—

मत्तद्विरेफ पुंस्कोकिल वैतालिक महाविपुलगीत्या ।
क्रियते निर्भरमुन्निद्र एष यूनां मनस्सु मनसिशयः ॥

पथ्याचपलागीतिः यथा—

यावल्लुनामि चूताङ्कुरान् पुरोऽस्या मधु व्यपहनोमि ।
तावद् बभूव गीतिः पिकाङ्गनानां प्रमोदचपलानाम् ॥

विपुलाचपलागीतिर्यथा—

कष्टां जनस्त्वदालोकनादपि क्षणमिमां दशां लभते ।
विपुलां तनोषि दीर्घाक्षि गीतिमेतां कुतो महाचपले ॥

एवं शेषभेदेषु द्वादशस्वपि उदाहार्यम् ॥ (२९)

---

1. तावन्तः ब.

३०. **आर्याद्वितीयके[1]ऽर्धे यद्गदितं लक्षणं तत् स्यात् ।**
यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥

पञ्जिका

(२९) इदानीं गीतादिलक्ष्यलक्षणं वक्तुमारभते । भुजङ्गानां सर्पाणामीशो भुजङ्गेशः तां गीतिं गीतवान् उक्तवान् । किंविशिष्टाम् । कृतयतिशोभाम् । यतेः शोभा, यतिशोभा, कृता यतिशोभा यत्र सा तथोक्ता ताम् । 'ताम्' इति काम् ? आर्याप्रथमदलोक्तं आर्यापूर्वार्धे प्रतिपादितं लक्षणं यस्याः उभयोर्दलयोः पूर्वार्धपरार्धयोः यदि कथमपि भवेत् चेत् केनापि प्रकारेण स्यात् । यत्तदोर्नित्यसम्बन्धात् यस्या इति लभ्यते ।

तद् यथा--

नल भ म भ म ज म ग
। । । ।ऽ। । ऽ ऽ ऽ । । ऽ ऽ । ऽ । ऽ ऽ ऽ
जयिनि पराक्रमबाहौ जीवति जीवन्ति सन्ततं ते ते ।

स नल स म म ज म ग
। । ऽ । । । । । ऽ ऽ ऽ ऽ ऽ । ऽ । ऽ ऽ ऽ
बलिकर्णबधिरविमुखास्तेषां कार्यस्य विद्यमानत्वात् ॥ (२९)

तात्पर्यटीका

(३०) ६३तमे पृष्ठे पूर्वमेव दत्ता ॥ (३०)

सुकविहृदयानन्दिनी

(३०) आर्याद्वितीयकेऽर्धे यल्लक्षणमुक्तं तद् यदि द्वयोरप्यर्धयोर्भवति तामुपगीतिम् इति पिङ्गलो मुनिर्ब्रूते । यथा--

शारदचन्द्रोद्द्योते पायं पायं मधु स्वैरम् ।
पौरस्त्रीभिरभीष्टा क्रियते सोत्कण्ठमुपगीतिः[2] ॥ (३०)

1. अंशे मा. 2. विपुलोपगीति पथ्याचपलोपगीति इत्यनयोः उदाहरणानि दत्तानि ब.

छन्दोवृत्तिः

(३०) यद्यार्याद्वितीयदलोक्तं [1]लक्ष्म द्वयोरपि[2] दलयोर्भवति मुनिस्तामुपगीतिं वदति ॥ इयमपि पूर्ववत् षोडशभेदा । तत्र पथ्योपगीत्युदाहरणं सूत्रमेव ।

विपुलोपगीतिर्यथा--

संप्रति शिलीमुखाः पश्य महाविपुलोपगीतिरवैः ।
सौख्यप्रसुप्तिकाः [3]पङ्कजिनीः प्रीत्योपतिष्ठन्ते ॥

पथ्याचपलोपगीतिर्यथा--

उपगीतिगन्धरूपादि याति चेतो महाचपलम् ।
तेभ्यो [4]निवर्तयैतत् समीहसे चेत् परां सिद्धिम् ॥

विपुलाचपलो[5]पगीतिर्यथा—

चूताङ्कुराः स्मरास्त्राणि चापलात् कोकिलैर्लीढाः ।
विपुलोपगीतयोऽस्त्राणि तेनिरे तेन तैस्तस्य ॥

एवं शेषभेदेषु द्वादशस्वप्युदा[6]हार्यम् ॥ (३०)

पञ्चिका

(३०) मुनिः पिङ्गलो नाम मुनिः तामुपगीतिं ब्रूते वदति । ताम् इति काम् । आर्या-द्वितीयकेऽर्धे आर्याया द्वितीये शकले यल्लक्षणं गदितं प्रोक्तम् । तद् अस्याः उभयोरपि दलयोः यदि स्यात् पूर्वोत्तरार्धयोरपि चेद् भवति । यथा—

नल भ म भ म ल म ग
। । । ।ऽ। । ऽ ऽ ऽ। । ऽ ऽ। ऽ ऽ ऽ
व्रजति पराक्रमबाहौ वाहखुरोद्धूतधूलीभिः ।

स ज म म म ल म ग
। । ऽ। ऽ। ऽऽ ऽऽ ऽ ऽ । ऽ ऽ ऽ
स्थगितेऽथ सप्तसप्तौ निद्रान्त्यब्जानि मध्याह्ने ॥ (३०)

---

1. लक्ष्म नास्ति क. 2. उभयोः इत्यधिकम् क. 3. पङ्कजिनीप्री अ. 4. निवर्तते यत्समीहते अ. 5. चपला नास्ति अ. ब. 6. हार्या ब.

३१. आर्याशकलद्वितयं व्यत्ययरचितं भवेद् यस्याः ।
सोद्गीतिः किल कथिता तद्वद्यत्यंशभेदसंयुक्ता ॥

तात्पर्यटीका

(३१) पूर्वमेव उक्ता । (३१)

सुकविहृदयानन्दिनी

(३१) यस्या आर्याया उत्तरार्धलक्षणं पूर्वार्धे भवति पूर्वार्धलक्षणमुत्तरार्धे सा उद्गीतिः ।

यथा—

मण्डपनगरवधूनामुद्गीतिं चेत् समह्लाराम् ।
आकर्णयति स नूनं दूरादभ्येति चन्द्रहरिणोऽपि ॥ (३१)

छन्दोवृत्तिः

(३१) [1]अस्या [2]आर्यायाः दलद्वयं पूर्वापरार्धरूपं वैपरीत्यरचितं भवति सोद्गीतिरिति कथिता । पूर्ववद्भेदसहिता तेनेयमपि पूर्ववत् षोडशधा । तत्र सूत्रं पथ्योद्गीत्युदाहरणम् ।

विपुलोद्गीतिर्यथा—

विपुलोद्गीतिः [3]कल[4]कोकिलारवैः पल्लवाताम्रा ।
मत्तेव पुरस्तरुपङ्क्तिरियं मधुपरिचयादितो भाति ॥

पथ्याचपलोद्गीतिः यथा—

[5]चपले प्रयातु मानादयं वराकः किमाह्वयसि ।
प्रतिभूरमुष्य भूयः समागमे भाविनी पिकोद्गीतिः ॥

विपुलाचपलोद्गीतिः [6]यथा—

बाला कुतोऽपि सारङ्गिकेव सा विपुलचपलाक्षी ।
श्रुत्वा तवाभिधोद्गीतिमाशु निस्पन्दिनी चिरं भवति ॥

1. यस्याः ब. क. 2. आर्याद्वय ० ब. 3. किल अ, कलः क. 4. कोकिलरवैः ब. 5. चपले नास्ति ब. 6. यथा नास्ति ब.

३२. **आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधने युक्तम् ।**
इतरत्तद्वन्निखिलं यदीयमुदितैवमार्यागीतिः ॥

इति गीतिप्रकरणम्

एवं शेषेषु द्वादशस्वपि भेदेषूदाहार्यम् । तत्रार्यासङ्ग्रहः-

एकैव भवति पथ्या तिस्रो विपुलास्ततश्चतस्रस्ताः ।
चपलाभेदैस्त्रिभिरपि[1] भिन्ना इति षोडशार्याः स्युः ॥

गीतीनां त्रयमित्थं प्रत्येकं षोडशप्रकारं स्यात् ।
साकल्येनार्याणाममी विकल्पाश्चतुःषष्टिः ॥

आर्यागीतेस्त्वाधिकाक्षरत्वात् आर्याभेदेषु न प्रवेशः ॥ (३१)

पञ्चिका

(३१) किल निश्चयेन सा उद्गीतिः गदिता कथिता शेषेण इति शेषः । किंविशिष्टा । तद्वत् यत्यंशभेदसंयुक्ता । यतिः पदविच्छेदः अंशो गणः यतिश्च अंशश्च यत्यंशौ । तयोर्भेदः यत्यंशभेदः तेन संयुक्ता । तद्वत् इति इवार्थे वतिप्रत्ययः । शेषं तद्वत् । वत् प्रत्यय इव इत्यर्थः । सा का । आर्याशकलद्वितयम् आर्यायाः पूर्वार्धपरार्धद्वयम् । यस्याः व्यत्ययरचितं विपर्यासेन व्युत्क्रमेण कृतं भवेत् । तद्यथा--

भ भ म भ म ल म ग
ऽ।।ऽ।।ऽऽऽ।।ऽऽ।ऽऽऽ
वन्द्यपराक्रमबाहोर्वारणवारा बभुर्बद्धाः ।

भ भ म ज म ज म ग
ऽ।।ऽ।।ऽऽ।ऽ।ऽऽ।ऽ।ऽऽ ऽ
वैरिजनाश्रयदानात् कृतापराधा इवाद्रयस्तुङ्गाः ॥ (३१)

तात्पर्यटीका

(३२) ६३तमे पृष्ठे दत्ता ॥ (३२)

---

1. संभिन्ना ब. इ.

सुकविहृदयानन्दिनी

(३२) यद्यार्यायाः पूर्वार्धमुत्तरार्धं च एकेन गुरुणाधिकेन निधने अवसाने युक्तं भवति तदार्यागीतिः । यथा—

स्त्रीणां हर्षवतीनां सशिरःकम्पं स्तुवन्ति विगतविकल्पाः ।
अप्यार्यागीतिमिमामनेकलयसुन्दरामाकर्ण्य ॥

स्कन्धकमि[1]त्येके । (३२)

इति गीतिप्रकरणम् ।

छन्दोवृत्तिः

(३२) यदार्यापूर्वार्धमेकेन गुरुणा प्रान्ते युक्तं भवति । कोऽर्थः । आर्यापूर्वार्धे[2]ऽष्टमगुरोः स्थाने चतुर्मात्रो गणः स्यात् । [3]इतरत्तद्वन्निखिलमिति द्वितीयं दलमपि पूर्ववदार्यार्धमिव गुरुणाधिकं द्वितीयदलमपि [4]अष्टगणकं भवति इत्यर्थः । [5]तदा[5] इयमार्यागीतिरुक्ता । अत्राप्यार्यापूर्वार्धविकल्पानामष्टगणविकल्प[6]पञ्चकेन ताडने जाता[7]श्चतुःषष्टिःसहस्राः पूर्वार्धे । एतावन्तोऽपरार्धेऽपि । अन्योन्य[8]ताडने जातानि [9]चत्वारिंशदर्बुदानि नवकोटयः षष्टि[10]र्लक्षाः । इयं स्कन्धकमित्यन्ये । यथा—

तुह रिउरायपुरेसुं तरुणीजणलालिअम्मि किंकेल्लिवणे ।
संपइ अरण्णमहिसाणं खंधकंडूअणं पयट्टेइ दढं ॥ (हे. ४.१३.१)

(तव रिपुराजपुरेषु तरुणीजनलालिते कंकेल्लिवने ।
सांप्रतमरण्यमहिषाणां स्कन्धकण्डूयनं प्रवर्तते दृढम् ॥)

यत्र उपगीत्युद्गीत्यार्याणां दलद्वितयेषु अष्टमगुरोः स्थाने चतुर्मात्रे गणे कृते सति उपस्कन्धकम्, उत्स्कन्धकम्, अवस्कन्धकम् इति भेदा भवन्ति । यथा उपस्कन्धकम्—

उअ खंधाहइत्तुट्टंतबाहुदंडो वि को वि सुहडओ ।
एसो सहि परजोहं पहरइ [illegible]ाएण दट्ठाहरओ ॥ (हे. ४.१४.१)

---

1. °त्यन्ये यथा इत्यधिकम् अ. 2. अष्टमगणस्थाने इ. 3. इतरदिति द्वितीयं ब, इतरस्तद्वद् द्वितीयं इ. 4. अष्टम ° 5. तदीयम् अ. इ., तदेवम् इ. 6. पञ्चमकेन अ. ड. 7. षष्टिसहस्राः इ. 8. ताडनायां ब. क. 9. चत्वारि अर्बुदः इ. 10. °लक्षाणि अ. ब. क.

(पश्य स्कन्धाहतित्रुटद्बाहुदण्डोऽपि कोऽपि सुभटकः ।
एष सखि परयोधं प्रहरति प्रायेण दष्टाधरकः ॥)

उपस्कन्धकं यथा—

जा बलडप्फरेणं निवाण [1]उक्खंधया आसि पुरा ।
सा तुह सासणभारं ताण [2]वहंताण [3]संपयं [4]कह वि गया ॥ (हे. ४.१५.१)

(या बलदर्पेण नृपाणामूर्ध्वस्कन्धतासीत् पूर्वम ।
सा तवाज्ञाभारं तेषां वहतां सांप्रतं कुत्रापि गता ॥)

अवस्कन्धकं यथा—

पवणपहल्लिरपल्लवधयवडमुल्लसिअकोइलाबंदिरवं ।
ओ खंधावारं चिअ पेच्छ वणं रइवइनरिंदस्स ॥ (हे. ४.१६.१)

(पवनप्रधूर्णितपल्लवध्वजपटमुल्लसितकोकिलाबन्दिरवम् ।
भो स्कन्धावारमिव पश्य वनं रतिपतिनरेन्द्रस्य ॥)

तथा गाथायाः पूर्वार्धेऽन्तगुरोः पूर्वं चतुष्कलगणद्वयवृद्ध्या गाथकादयश्च सप्त-**भेदाः स्युः** । यदाह—

गाहामुहदलअंतिमगुरुपच्छा दुण्ह दुण्ह च गणाणं ।
वुढ्ढीइ [5]कमा गाहो उग्गाहविग्गाहअवगाहा ॥
संगाहो उपगाहो य गाहिणीति ।

(गाथामुखदलान्तिमगुरुपथ्यादुष्टदुष्टचगणानाम् ।
वृद्ध्यै क्रमा गाथा उदगाथा विगाथा अवगाथा ॥
सङ्गाथा उपगाथा च गाथिनीति ।)

तदनया रीत्या बहुभेदसम्भवान्नोक्तम् । न हि सर्वभेदा वक्तुं शक्यन्ते इति । **आर्यादिषु** पिङ्गलादिनामग्रहणं पादपूरणार्थम् । न तु कस्मिंश्चिद्विशेषार्थे । एवमुत्तरत्रापि वा तु हेतुप्रभृतीनाम् ॥

इति गीतिप्रकरणम् । (३२)

---

1. उखंधकं पुरा इ. 2. वहंताण नास्ति इ. 3. संपइ इ. 4. कहं ब. क. 5. थुमागा ° अ. ड.

वैतालीयम्

३३. **षड्विषमेऽष्टौ समे कला[1]स्ताश्च समे स्युर्नो निरन्तराः ।**
न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः ॥

पञ्चिका

(३२) इयमार्यागीतिः उदिता कथिता मुनिना इति शेषः । इयमिति का । **आर्या-** पूर्वार्धम् आर्यायाः प्रथमदलम् अधिकेन अतिरिक्तेन एकेन गुरुणा निधनेऽन्ते यदि युक्तं भवेत् । तदा यदीयं पूर्वार्धं स्यात् इत्यध्याहार्यं योजना कर्तव्या । यस्याः इदम् **यदीयम्** । यदीयमितरत् निखिलं दलं सर्वमपरार्धम् तद्वत् पूर्वार्धवत् भवति । तद्यथा—

भ भ म म म ज स गग
ऽ।।ऽ।।ऽऽ ऽऽऽ ऽ।ऽ।।।ऽ ऽऽ
एष पराक्रमबाहुः सर्वेभ्यः सर्वमेव सततं दत्ते ।

स म म ज स ज भ् गग
।।ऽऽऽ ऽऽ।ऽ।।।ऽ। ऽ।ऽ ।। ऽऽ
इति यद्गीतं तत्तन्नवान्ययुवतेश्च वक्षसः श्रमदानात् ॥

इति गीतिप्रकरणम् । (३२)

तात्पर्यटीका

(३३) पथ्यामूत्रादिह पाद इत्यनुवर्तते । वैतालीये मात्रावृत्ते विषमे पादे **षट् कलाः** ततो रलौ गुरुश्च इति । ता इति षट् कलाः समे चरणे निरन्तराः न स्युः **इति केवल-** लघुरूपा एव न भवन्ति इत्यर्थः । तेन पादप्रस्तारपक्षे समपादे चतुर्गुरुप्रस्तारे **अष्टमी** पञ्चदशी षोडशी च व्यक्तिर्हेया स्यात् निरन्तरषट्कलवत्त्वात् । अत एव **समचरणे** त्रयोदशैव विकल्पाः । अत एव वैतालीयप्रकरणे प्रायेण पादप्रस्तारस्यैवोपयोग **इति । न** समात्र इति । अत्र वैतालीयचरणेषु समा इति द्वितीया चतुर्थी षष्ठी वा कला **पराश्रिता**

---

1. षट् च निसा.

तृतीयादिकामाश्रित्य गुरुं न जनयति इत्यर्थः । शेषं सुगमम् । तत्र समुद्रार्थं सर्वगुरु-वैतालीयं यथा—

S SS S I S I S; S S SS S I S I S;
S S S S I S I S; S S S S S I S I S।

प्रस्तारविधौ आद्यात्लघुं न्यस्य गुरोरधः इति लघुद्वयं क्रियते । अन्यत् सर्वं समानम् । चरणविकल्पोत्तरोत्तरवधे लब्धा व्यक्तयः १०८१६ । अस्योपसंहारः—

षोडशाभ्यधिकानाहुः शतान्यष्टौ तथायुतम् ।
वैतालीयव्यक्तयः स्युर्वक्ष्यमाणत्रयस्य च ॥

औपच्छन्दसिक-आपातलिकयोः प्रस्तारादि वैतालीयवत् । अथावृत्तिव्याख्या । षडित्यादि । विषमे वैतालीये अष्टौ कलाः, ततो रलौ गुरुश्च इति चरणचतुष्टये नियम्यते । शेषोऽनियमः प्रकृतिवदित्यावृत्तिख्याख्यानाद् विषमवैतालीयसमवैतालीयाभिधाने मात्रावृत्तजातीनामभेदेन शास्त्रान्तरसम्मते इह व्याख्याय एकचरणलक्षणोत्पन्नचरणचतुष्टयस्वरूपयोः वक्ष्यमाणयोः अपरान्तिकाचारुहासिन्योरिहापि तथोपलक्षितत्वात् ।

तदुक्तं छन्दःशेखरेण—

वेतालीयसमक्रमैः कृता स्यादपरेयं दक्षिणान्तिका ।
विषमैस्तु मतोत्तरान्तिका ।
महाकविप्रयुक्तो यो जयदेवादिदर्शितः ।
उदाहरणमार्गोऽसौ मयात्र प्रतिदर्श्यते ॥

विषमवैतालीयोदाहरणं यथा—

बिम्बयुगं भानुचन्द्रयोरस्तोदयभूधरानुगम् ।
गगनयुवत्या इवेक्ष्यते कुङ्कुमरक्तं स्तनद्वयम् ॥

समवैतालीयोदाहरणं यथा—

उदयाग्रस्थितभानुरश्मयो रजनीध्वान्तविनाशकारिणः ।
सततं विक्रमभोगशोभिनो भूयासुस्तव भूतिहेतवः ॥ (३३)

सुकविहृदयानन्दिनी

(३३) सिंहावलोकितन्यायेन ततीययुक् दक्षिणान्तिका इत्यादिसूत्रपठितः पादशब्दोऽत्र द्रष्टव्यः पैङ्गलीयसूत्रपादशब्दोपादानात् ।

[1]यथा[2]—

'वैतालीयं द्विःस्वरा[3] अयुक्पादे युग्वसवोऽन्तेर्ल्गाः' (छं. शा. ४.३२) इति । यत्र विषमे पादे प्रथमे तृतीये षट् कला मात्रा भवन्ति, [4]समे पादे द्वितीये चतुर्थे अष्टौ कला भवन्ति, अन्तेऽवसाने रगणो लघुगुरू च भवतः तद्वृत्तं वैतालीयं नाम । उपसर्गेण [5]यथाकथंचित् प्राप्ते गुरुलघुभावेऽपवादमाह—न समात्र पराश्रिता कला इति । समा द्वितीयचतुर्थादिका कला पराश्रिता तृतीयपञ्चमाश्रिता न भवति । समे पादे द्वितीय-चतुर्थे निर्गतमन्तरं व्यवधानं यासां ता निरन्तरा अन्तररहिता लघवो न भवेयुः इत्यर्थः ।

यथा—

प्रलपत्यनिशं निरर्गला सुपरित्यक्तविभूषणांशुका ।
विरहे तव सा वराङ्गना वैतालीयमुवाह विभ्रमम् ॥ (३३)

छन्दोवृत्तिः

(३३) अथ वैतालीयमारभ्यते—

विषमे आद्यतृतीयरूपे पादे षट् कलाः । समे द्वितीयचतुर्थरूपे पादे अष्टकलाः । उभयोरन्ते [6]रगणलघुगुरवो भवन्ति तत् वैतालीयं छन्दः । [7]अत्रापवादमाह । समे पादे षट् कलाः षड् लघवो निरन्तरा न भवन्ति । तथा च[8] वैतालीये सर्वपादेषु समाः कलाः समो लः पराश्रितो न भवति । समा लघुकला परया कलया सह गुरुर्न भवति इत्यर्थः । अत्र विषमे पादे अष्टौ विकल्पा यथा—

SSS IISS SIIS IIIIS SSII IISII SIIII IIIIII;

समे पादे त्रयोदश यथा—

SSSS IISSS SIISS IIIISS SSIIS IISIIS SIIIIS SSSII
IISSII SIISII IIIISII IISIIII SSIIII;

---

1. अथ वैतालीयमारभ्यते इत्यधिकम् ब. 2. सूत्रे इत्यधिकम् ब. 3. युक्तादे अ, युक्पादे ब. 4. समे—भवन्ति नास्ति अ. 5. यथा क्वचित् अ. 6. रलगुरवः क. 7. अथ इ. 8. अत्र इत्यधिकम क.

ततोऽष्टभिस्त्रयोदशगुणिता जातं चतुरुत्तरं शतं वैतालीयपूर्वार्धे भेदा भवन्ति। उत्तरार्धेऽपि तावन्त एव। अन्योन्य[1]ताडनायां जातानि दशसहस्राण्यष्टौ शतानि षोडशाधिकानि। यथा उदाहरणम्

अथवा भवदीयवैरिणाम्
अटवीकोटरचारिणां नृप।
प्रतिभाति तृषान्धचेतसां
वैतालीयरसः सुधोपमः॥ (३३)

पञ्जिका

(३३) सम्प्रति वैतालीयादिलक्ष्यलक्षणं वक्तुमारभ्यते। अत्र अस्मिन् वैतालीये विषमेऽयुक्पादे प्रथमे तृतीये च षट् कलाः स्युः षण्मात्राः भवन्ति। समे युक्पादे द्वितीये चतुर्थे च अष्टौ कलाः स्युः अष्टौ मात्रा भवन्ति। अन्ते अवसाने रलौ गुरुः रगणलघुर्गुरुश्च स्यात्। विषमपादे षण्णां कलानामन्ते समपादे अष्टानां कलानामन्ते रगणः लघुर्गुरुरेकश्च स्यात् इत्यर्थः। समे समपादे षट् च कलाः षण्मात्राश्च निरन्तरा अव्यवधानाः नो स्युः न भवेयुः। क्रमेण षड् लघवो न तिष्ठन्ति। किन्तु गुरुणा सहैव तिष्ठन्ति इत्यर्थः। अत्र समा कला समस्थानस्थिता मात्रा पराश्रिता न स्यात् विषमस्थानस्थितां मात्रामाश्रिता न भवति। द्वितीयो लघुस्तृतीयेन लघुना चतुर्थो लघुः पञ्चमेन लघुना षष्ठो लघुः सप्तमेन लघुना एकीभूय गुरुरूपेण न तिष्ठन्ति इत्यर्थः।

तद्यथा—

नल र ल ग र ल ग
S I I I I S I S I S S I I S S S I S I S
तिष्ठति नवरत्ननायके तेन कृतार्थाः पण्डिता नराः।

र ल ग र ल ग
I I S I I S I S I S S S S I I S I S I S
अमरद्रुमकोटिभिश्च किं ताभिर्वा किमु कामधेनुभिः॥ (३३)

---

1. °ताडने क.

औपच्छन्दसिकम्

३४. पर्यन्ते यौ तथैव शेषमौपच्छन्दसिकं सुधीभिरुक्तम् ॥

तात्पर्यटीका

(३४) इति सुगमम्। इहातिदेशबलात् पूर्ववज्जातिद्वयं दर्शनीयम्। तत्र विषमौपच्छन्दसिकस्योदाहरणं यथा—

प्रमदाः परिवर्तिताञ्जनेत्राः सरुषः स्फुरितोष्ठबन्धुजीवाः।
परिवर्त्य शिरो मनाग् जगन्ति भ्रमिताऽगुलयश्चिरं जयन्ति ॥

समौपच्छन्दसिकोदाहरणं यथा—

संत्रासस्खलितेक्षणोत्पलाभिर्देवानां क्षणमीक्षितोऽङ्गनाभिः।
योऽरक्षच्चमरं महेन्द्रभीतेः श्रीवीरः स भवाद् भवन्तमव्यात् ॥ (३४)

सुकविहृदयानन्दिनी

(३४) षण्णामष्टानां च कलानां पर्यन्ते यौ रगणयगणौ भवतः शेषं पूर्ववत् तदा वैतालीयमेव औपच्छन्दसिकं नाम। यथा—

बहुविप्रियकारकं परोक्षे
प्रत्यक्षे बहुचाटुकारदक्षम्।
शठवित्तमिमं द्रुतं वयस्ये
औपच्छन्दसिकं विमुञ्च कान्तम् ॥

छन्दोवृत्तिः

(३४) विषमे षट् मात्राः, समेऽष्टौ ततो रगणयगणौ चेद् भवतः शेषं सर्वं वैतालीयसमं तदा औपछन्दसिकं नाम छन्दः। [1]यथोदाहरणम्—

कीर्तिस्तव वल्लभा त्रिलोकीमखिलां पर्यटतीति यत् प्रवृद्धाः।
कवयः [2]कथयन्ति सत्यमेतन्नौपछन्दसिका भवन्ति सन्तः ॥ (३४)

1. तथोदाहरणम् इ. 2. प्रवदन्ति इ.

आपातलिका—

३५. **आपातलिका कथितेयं ।**
भाद्गुरुकावथ पूर्ववदन्यत् ॥

पञ्चिका

(३४) छन्दसां समीपमुपच्छन्द इत्यव्ययीभावः । तत्र भवम् औपच्छन्दसिकम् । सुधीभिः पण्डितैः औपच्छन्दसिकमुक्तं कथितम् । अस्य लक्षणमाह पर्यन्ते यौ इति । पर्यन्ते विषमपादस्य च समपादस्य च पर्यवसाने यौ रगणयगणौ । तथैवेति यथा वैतालीयवृत्ते विषमपादे षट् कलाः समपादे अष्टौ कलाः भवन्ति । तथैवात्र शेषम् अन्यल्लक्षणं भवति इत्यर्थः । शेषमित्यत्र षकारस्य गुरुत्वं पादान्तादेव सिद्धम् । इदमर्धम् एतद् द्विरावृत्य पद्यं कर्तव्यम् । तद्यथा—

मात्रा ६ र य मा. ८ र य
। । ऽ ऽ ऽ । ऽ । ऽ ऽ । । । । ऽ । । ऽ । ऽ । ऽ ऽ
विविधं यः पुण्यकर्मकर्ता सुमतिपराक्रमबाहुभूमिभर्ता ।

मा. ६ र य मा. ८ र य
ऽ ऽ ऽ ऽ । ऽ । ऽ ऽ ऽ । । ऽ । ऽ । ऽ ऽ
दुःखत्रैषः करोति संदृक् कारुणिकः कविवल्लभो महात्मा ॥ (३४)

तात्पर्यटीका

(३५) इति सुगमम् । अत्राप्यतिदेशात् पूर्ववत् । विषमापातलिकोदाहरणं यथा—

यच्छत वित्तं तदनित्यं धर्मो मृतमप्यनुयाति ।
गुणितां भजतास्थिरमायुर्न गुणाश्चलतामुपयान्ति ॥

आपातलिकोदाहरणम् यथा—

चन्द्राभास्याः पङ्कजनेत्र्यः पीनपयोधरभारनताङ्ग्यः ।
कुर्युः पुरुषं कामपरीतं लीलावत्यः कं न तरुण्यः ॥ (३५)

सुकविहृदयानन्दिनी

(३५) यदा षड् विषमेऽष्टौ समे कला इत्यादि सर्वं पूर्ववद् भवति विशेषोक्तौ भगणात् परौ गौ गुरू भवतः तदा वैतालीयमेव आपातलिका नाम—

[1]नरनाथ भवन्तमरीणां
नाशकरं प्रसमीक्ष्य पुरस्तात् ।
रिपवो जहति स्म भयार्ता
आपातलिकां सङ्गरभूमिम् ॥

आपातलिका अस्थिरा इत्यर्थः । उक्तं च पिङ्गलवृत्तौ श्रीभट्टहलायुधेन—

पिङ्गलकेशी कपिलाक्षी वाचाटा विकटोन्नतदन्ती ।
आपातलिका [2]पुनरेका नृपतिकुलेषु भाग्यमुपैति ॥ (३५)

छन्दोवृत्तिः

(३५) विषमे षट् मात्राः समेऽष्टौ भगणो गुरुद्वयं च चेद् भवति । शेषं पूर्ववत् तदा आपातलिका नाम छन्दः । यथा—

आपातलिका बत सम्पत् क्षणिकं [3]जीवितमप्य[4]सुभाजाम् ।
इति मत्वा निश्चयपूर्वं शाश्वतिकार्थे यत्नमुपाध्वम् ॥

आपातलिका अस्थिरा ॥ (३५)

पञ्चिका

(३५) अथ अनन्तरम् इयमापातलिका कथिता सुधीभिरिति शेषः । एतस्या लक्षणमाह भाद्गुरुकौ इति । विषमपादे च भात् भगणात् परतः गुरुकौ गुरुद्वयं स्यात् पूर्व-

---

1. एष श्लोकः नास्ति ब. 2. युवतिरेषा ब. 3. प्राणित ० अ. ब. ड.
4. असुभाजौ अ.

दक्षिणान्तिका

३६. **तृतीययुग् दक्षिणान्तिका ।**
समस्तपादेषु द्वितीयलः ॥

वदन्यत् अन्यत् शेषं लक्षणं पूर्ववत् वैतालीयवत् इत्यर्थः । इदमप्यर्धम् । एतदपि द्विरावृत्य पद्यं कर्तव्यम् । तद्यथा--

मा. ६ भ ग ग मा. ८ भ ग ग
ऽ ऽ । ।ऽ।। ऽऽऽ ऽऽऽ ऽ।। ऽ ऽ
श्रीमान् स पराक्रमबाहुर्भास्वद्वर्णो बद्धिसतां यम् ।

मा. ६ भ ग ग मा. ८ भ ग ग
।।।। ऽ ऽ। ।ऽऽ।। ऽ ।। ऽ ऽ। ।ऽऽ
गुणनिवहा यस्य मुनीनामपिवाग्विषयं नैव वहन्ति ॥ (३५)

तात्पर्यटीका

(३६) गोयूथनामा अत्र अधिकारः । वैतालीयऔपच्छन्दसिकआपातलिकानां **सर्वचरणेषु** द्वितीयतृतीयलघ्वोर्गुरुः क्रियते । प्रस्तारे शेषं पूर्ववत् । **तेन वैतालीयदक्षिणान्तिका** औपच्छन्दसिकदक्षिणान्तिका आपातलिकादक्षिणान्तिका **चेति** जातित्रयमुत्पद्यते । अत्र द्वितीयतृतीयाभ्यां मध्यमगुरुनिष्पत्तिभङ्ग्या लक्ष(क्ष्य) **लक्षणप्रतिज्ञां निर्व्यूह्य** जगणं लक्षयति । उदीच्यवृत्त्यादिष्वप्येवम् । तत्र **वैतालीयदक्षिणान्तिकोदाहरणमिदं सूत्रमेव** । औपच्छन्दसिकदक्षिणान्तिकोदाहरणं यथा--

स्तुवे हरिं लोकपूजिताङ्घ्रिं रमामुखालोकैः प्रहृष्टचित्तम् ।
फणीशशय्यानिवेशिताङ्गं सिताब्जमाला भूषणेन युक्तम् ॥

आपातलिकादक्षिणान्तिकोदाहरणं यथा--

जयन्ति शम्भोर्नयनानि रवीन्दुवह्नी-मयानि ।
हिमाद्रिजादर्शनहर्षे प्रफुल्लराजीवैः सदृशानि ॥

एतासां सर्वगुरुप्रस्तारः[1]:--

एतासां चरणविकल्पोत्तरबधे प्रत्येकं लग्ना व्यक्तयः ६७६ ॥ (३६)

---

1. अग्रभागः नष्टः ता.

सुकविहृदयानन्दिनी

(३६) वैतालीयमेव सर्वेष्वपि पादेषु द्वितीयो लघुः तृतीयेन सह युक्तो भवति न समाश्र पराश्रिता कला इति बाधित्वा तदा दक्षिणान्तिका नाम। यथा—

ववौ मरुद्दक्षिणान्तिको
वियोगिनीप्रणापहारकः।
प्रकम्पिताशोकचम्पको
वसन्त एषोऽन[1]ङगबान्धवः॥ (३६)

छन्दोवृत्तिः

(३६) वैतालीये सर्वेषु पादेषु द्वितीयलः तृतीययुग् भवति। आद्यात्लघोः परो गुरुश्चेद् भवति इत्यर्थः। तदा दक्षिणान्तिका नाम छन्दः। यथा उदाहरणम्—

तुषारसम्भारवेदना-
भियैव हैमवतीं त्यजन् दिशम्।
मयूखबानेष सम्प्रति
प्रयाति सरणिं दक्षिणान्तिकाम्॥

एवमौपच्छन्दसिकापातालिकयोरुदाहार्यम्। अत्र भेदत्रयेऽपि प्रत्येकं प्रथमे पादे विकल्पौ द्वौ। द्वितीये चत्वारः। ततोऽन्योन्यताडनायामष्टौ पूर्वार्धेऽपरार्धेऽपि तावन्तः। अन्योऽन्याहतौ चतुःषष्टिभेदाः। अस्यां भेदत्रयस्योत्तरेषु छन्दःसु: वैतालीयादेरिव भेदघटना। नान्येष्विति रहस्यम्॥ (३६)

पञ्चिका

(३६) तृतीयमात्राश्रितद्वितीयमात्रं वैतालीयवृत्तमेव दक्षिणान्तिका भवति इति दर्शयन्नाह तृतीययुग् इति। दक्षिणान्तिका इयं दक्षिणान्तिका स्यात्। अस्या लक्षणमाह। समस्तपादेषु चतुर्षु चरणेषु द्वितीयलः द्वितीयो लघुः तृतीययुक् स्यात्। तृतीयेन लघुना एकीभूय गुरुरूपेण तिष्ठति इत्यर्थः। एतत्पद्यार्धं पुनरीदृशेनार्धेन पद्यं स्यात्। तद्यथा—

---

1. अङगबोधकः अ.

३७. **उदीच्यवृत्तिर्द्वितीयलः सक्तोऽन्त्येन भवेदयुग्मयोः ॥**

मा. ६ र ल ग मा. ८ र ल ग
। ऽ । ऽ ऽ । ऽ । ऽ । ऽ । ऽ ऽ ऽ । ऽ । ऽ
महीभुजां श्रेष्ठइत्यसौ निगद्यते तैर्नीतिवेदिभिः ।

मा. ६ र ल ग मा. ८ र ल ग
। ऽ । ऽ ऽ । ऽ । ऽ । ऽ ऽ ऽ । ऽ । ऽ
श्रुतेन शीलेन संयतैस्तथैव लङ्कालोचनो नृपः ॥ (३६)

तात्पर्यटीका

(३७) [1]एतासां चरणविकल्पोत्तरवधे प्रत्येकं लब्धा व्यक्तयः ६७६ ॥ (३७)

सुकविहृदयानन्दिनी

(३७) अयुग्मयोः प्रथमतृतीययोः पादयोः द्वितीयो लघुरग्रिमेण **तृतीयेन लघुना सह** युज्यते तदा वैतालीयमेव उदीच्यवृत्तिः नाम । यथा—

गिरं मनोज्ञां पिकाङ्गना मुदिता स्वित् स्वयमुद्गिरत्यसौ ।
[2]उदीच्यवृत्तिर्दिवाकरः सहकारोऽपि मञ्जरीम् ॥

छन्दोवृत्तिः

(३७) विषमपादयोः [3]द्वितीयलोऽग्रेण युतश्चेद् भवति तदा **उदीच्यवृत्तिः नाम छन्दः ।** समयोस्तुः पादयोः वैतालीयादिवत् । एषोऽपि **वैतालीयादिभेदात् त्रिधा । तत्र वैता**लीयोदीच्यवृत्तिर्यथा—

विवस्वतोदीच्यवृत्तिना मरुता [4]दक्षिणवृत्तिना तथा ।
जनोऽयमिह जायते मधौ युगपत्तापतुषारभाजनम् ॥

आपातलिकोदीच्यवृत्तिर्यथा—

विनम्रसुररत्नकिरीटरश्मिविमिश्रितपादनखांशुः ।
अगाधकरुणारससिन्धुः पातु स वश्चरमो जिननाथः ॥

1. इतः पूर्वं कश्चन भागो नष्टः 2. उदीच्यवृत्तौ दिवाकरे फ. 3. द्वितीयो लो क. 4. दक्षिणवर्तिना ब. इ.

३८. **पूर्वेण युतोऽथ पञ्चमः ।**
प्राच्यवृत्तिरुदितैव युग्मयोः ॥

एवमौपच्छन्दसिकोदीच्यवृत्तिरुदाहार्या । यथा---

भवद्गुणकथाश्रुतेरमर्षाद् दशनैरोष्ठमखण्डयन नृपा ये ।
महीश युधि चेटचिह्नमेते विदधत्यङ्गुलिखण्डनं त्वदग्रे ॥

अत्रापि द्वौ विषमपादविकल्पौ समपादविकल्पैः त्रयोदशभिराहतौ षड्विंशतिः पूर्वार्धे भेदाः । अपरार्धेऽपि तावन्तो[1]ऽन्योन्याहतौ जातानि षट् शतानि षट् सप्तत्यधिकानि ॥ (३७)

पञ्चिका

(३७) इयमुदीच्यवृत्तिर्नाम । एतस्या लक्षणमाह--- अयुग्मयोः प्रथमतृतीयपादयोः द्वितीयलः द्वितीयो लघुः अग्रेण अभिमुखस्थेन तृतीयेन लघुना सक्तो भवेत् सक्तः स्यात् । इदमप्येकमर्धम् । पुनरेवंभूतेनार्धेन श्लोकः कार्यः । तद्यथा---

मा. ६ र ल ग मा. ८ र ल ग
। ऽ । ऽ ऽ । ऽ । ऽ । । । । ऽ । । ऽ । ऽ । ऽ
गुणाः प्रकुर्वन्ति दूततां जगति पराक्रमबाहुभूपतेः ।

मा. ६ र ल ग मा. ८ र ल ग
। ऽ । ऽ ऽ । ऽ । ऽ ऽ ऽ ऽ । । ऽ । ऽ । ऽ
कथं समायान्ति तत्र चेन् नानाद्वीपनिवासिनो जनाः ॥ (३७)

तात्पर्यटीका

(३८) तथा वैतालीयादीनां तिसृणामपि जातीनां युग्मचरणे चतुर्थलघुना पञ्चमः संयुज्य यदि गुरुमारभते, शेषं पूर्ववत् तदा पूर्ववत् प्राच्यवृत्तित्रयं भवति । वैतालीय-

---

1. अन्योन्यताडनया क.

प्राच्यवृत्तेरुदाहरणं सूत्रमेव । **औपच्छन्दसिकप्राच्यवृत्तेरुदाहरणं यथा**—

प्रणतावनिपालमौलिमालापूजिताङ्घ्रिकमलद्वयावनीश ।
तव शशिकिरणावदातमेतत् शुक्लयत्यतितरां यशो दशाशाः ॥

वाषातलिकाप्राच्यवृत्तेरुदाहरणं यथा—

दिवसकरो लोहितबिम्ब उदयभूधरशिरोमणिरेषः ।
प्रविहृतदोषो दिवि भाति स्पृष्टपद्मिनीकः करजालैः ॥

एतासां जातीनां सर्वगुरुप्रस्तारः । यथा—

एतासां चरणविकल्पोत्तरवधे प्रत्येकं लब्धा व्यक्तयः १०२४ ॥ (३८)

सुकविहृदयानन्दिनी

(३८) ल इत्यनुवर्तते । समपादयोः द्वितीयचतुर्थयोः पञ्चमो लघुः पूर्वेण लघुना चतुर्थेन सह युक्तो यदा स्यात् तदा प्राच्यवृत्तिर्नाम वैतालीयं भवति । यथा—

स्वगणैरनुरञ्जितप्रजः प्राच्यवृत्तिपरिपालने रतः ।
रणभूमिषु भीमविक्रमो विन्ध्यवर्मनृपतिर्जयत्यसौ ॥ (३८)

छन्दोवृत्तिः

(३८) समपादयोश्चतुर्थेन लेन लघुना पञ्चमो लश्चेद् युक्तो भवति । तिसृभ्यो मात्राभ्यः परो गुरुर्यदा स्यात् इत्यर्थः । तदा प्राच्यवृत्तिर्नाम छन्दः । विषमयोस्तु वैतालीयादिवत् । सा च पूर्ववत् त्रेधा ।

तत्र वैतालीयप्राच्यवृत्तिर्यथा—

भुवने दधदेकवीरतां त्यागधर्मकरुणापराक्रमैः ।
नृपसिंह पटच्चरीं निजप्राच्यवृत्तिमकरोः पुनर्नवाम् ॥

औपच्छन्दसिकप्राच्यवृत्तिर्यथा—

उदयाचलवप्रभागवल्गत्सप्तसप्तितुरगाङ्घ्रिताडनोत्था ।
नवपल्लवपाटला पुरस्ताद् धातुधूलिपटलीव भाति सन्ध्या ॥

३९. यदा समावोजयुग्मकौ पूर्वयोर्भवति तत् प्रवृत्तकम् ॥

एवमापातलिका प्राच्यवृत्तिरपि। अत्र चत्वारो विकल्पा यथा। ते च विषमपाद-विकल्पैरष्टभि[1]राहता द्वात्रिंशत् पूर्वार्धविकल्पा उत्तरार्धेऽपि तावन्तोऽन्योन्यताडनायां [2]दशशतानि चतुर्विंशत्यधिकानि। इयमुपापातलिका इत्येके ॥ (३८)

पल्लिका

(३८) अथ अनन्तरं प्राच्यवृत्तिरुदिता नाम्ना प्राच्यवृत्तिः कथिता। कविभिरिति शेषः। अस्या लक्षणमाह—युग्मयोरेव द्वितीयचतुर्थयोः पादयोः पञ्चमो लघुः पूर्वेण चतुर्थेन लघुना युतः युक्तः स्यात्। इदमप्यर्धम्। तद्यथा—

मा. ६ र लग मा. ८ र लग
। । ऽ । । ऽ । ऽ । । ऽ । ऽ । । ऽ । ऽ । ऽ
अयं न किमेषणं पुरा श्रीपराक्रमभुजो महीपतिः।

मा. ६ र लग मा. ८ र लग
ऽ ऽ ऽ ऽ । ऽ । ऽ । ऽ । । । ऽ । ऽ । ऽ
ध्यात्वैवं तेऽथ याचका विस्मृतान्न वदतीति चाब्रुवन् ॥ (३८)

तात्पर्यटीका

(३९) पूर्वयोरिति उदीच्यवृत्तिप्राच्यवृत्त्योर्वैतालीयादीनां तिसृणामपि जातीनां विषमे चरणे उदीच्यवृत्तिलक्षणं समे चरणे प्राच्यवृत्तिलक्षणं यदा भवति तदा पूर्ववत् प्रवृत्तकम् नामजातित्रयं भवति। तत्र वैतालीयप्रवृत्तकस्योदाहरणमिदं सूत्रमेव। औपच्छन्दसिक-प्रवृत्तकोदाहरणं यथा—

प्रसीद सुतनु प्रभञ्जनोऽयं कुटजकेतकशिलीन्ध्रगन्धवाही।
प्रभातसमये प्रवाति मन्दं गजमदेन सुरभीकृतः समन्तात् ॥

---

1. °राहत्य ब. 2. द्वादश° ब.

आपातलिकाप्रवृत्तकोदाहरणं यथा—

इमे प्रदीपा गतभासो भूतिचापलमिवोपदिशन्ति ।
निहत्य तिमिरं करजालैर्नो विभान्ति निघ्ने क्षणदायाः ॥

एतासां जातीनां सर्वगुरुप्रस्तारः। एतासां चरणविकल्पोत्तरोत्तरवधे प्रत्येकं लब्धा व्यक्तयः ६४ ॥ (३९)

सुकविहृदयानन्दिनी

(३९) पूर्वोक्तयोरुदीच्यवृत्तिप्राच्यवृत्त्योः समौ सदृशौ ओजयुग्मकौ विषमसमौ पादौ यदा भवतस्तदा वैतालीयमेव प्रवृत्तकं स्यात् । यथा—

प्रवृत्तकान्तेन्दुरश्मिभिर्व्याप्तमम्बरमिदं विलोक्यताम् ।
गृहाण ताम्बूलमुत्तमं कोपमाशु विजहीहि कोपने ॥ (३९)

छन्दोवृत्तिः

(३९) यदा ओजयुग्मकौ विषमसमौ[1] पूर्वयोरुदीच्यवृत्तिप्राच्यवृत्त्योः समौ तुल्यौ भवतः। विषमे पादे द्वितीयोऽन्त्येन युतः [2]समपादे चतुर्थो लः पञ्चमेन युतो भवति इत्यर्थः। तदा प्रवृत्तकं नाम छन्दः । इदमपि पूर्ववत् त्रेधा । तत्र वैतालीयप्रवृत्तकं यथा—

प्रवृत्तकरिविद्रवं रथभ्रष्टनष्टसुभटं विवाजि च ।
द्विषां बलमजायत त्वयि क्षमापते क्षणमधिज्यधन्वनि ॥ (हे. ३.५८.१)

औपच्छन्दसिकप्रवृत्तकं यथा—

[3]पुरो दिनपतेरमुष्य सद्यः पश्य संप्रति कठोरपादपातैः ।
स्फुटन्ति कमलाकराः समन्तात् शीर्यते च सहसा तमिस्रराशिः ॥

---

1. पादौ इत्यधिकम् ब. 2. समे पादे ब. 3. पुरा ब.

४०. अस्य युग्मरचिताऽपरान्तिका ॥

आपातलिकाप्रवृत्तकं यथा--

भवच्चरणयोः प्रणयित्वं यान्ययुः क्षितिभृतां न शिरांसि ।
[1]क्षणाद्दृदृशिरे युधि तानि क्षु गृध्रचरणप्रणयीनि ॥

अत्र पूर्वोक्तविषमसमपादविकल्पानामन्योऽन्यताडने [2]यथा सङ्ख्या स्यात् सा स्वयं ज्ञेया । अत्रा[3]द्यपादविकल्पयोः द्वितीयपादविकल्पाः चत्वारः आहृताः अष्टौ [4]पूर्वार्धविकल्पाः, एवमुत्तरार्धेऽपि विकल्पाः । अन्योन्यताडनायां चतुःषष्टिः विकल्पाः । एवमपरान्तिकाभेदेष्वपि[5] ॥　　(३९)

पञ्जिका

(३९) यदा पूर्वयोः उदीच्यवृत्तिप्राच्यवृत्त्योः ओजयुग्मकौ विषमसमपादौ समौ सदृशौ स्याताम् इति शेषः । तत् तदा प्रवृत्तकं भवति प्रवृत्तकं नाम स्यात् । अस्याः प्रथमतृतीयपादौ उदीच्यवृत्तेःप्रथमतृतीयपादाभ्यां समौ द्वितीयचतुर्थपादौ प्राच्यवृत्ते-र्द्वितीयचतुर्थपादाभ्यां समौ इत्यर्थः । तद्यथा—

मा. ६　र　ल ग　मा. ८　र　ल ग
।ऽ।ऽ ऽ।ऽ।ऽ　ऽ।ऽ।।।ऽ।ऽ।ऽ
ब्रवीति यः सर्वदिग्गतान् सत्पराक्रमभुजस्य सद्गुणान् ।

मा. ६　र　ल ग　मा. ८　र　ल ग
। ऽ। ऽ ऽ। ऽ । ऽ ऽ। ऽ। । ।ऽ। ऽ। ऽ
स कम्बुनाम्बूदधेः सुधीः सर्वमत्रपरिमातुमीश्वरः ॥　　(३९)

तात्पर्यटीका

(४०) वैतालीयादिजातित्रयोत्पन्नस्य प्रवृत्तकस्य समचरणलक्षणेन यस्याश्चरणचतुष्टयं क्रियते सा अपरान्तिका नाम त्रिविधा जातिर्भवति । तत्र वैतालीयप्रवृत्तकापरान्तिकोदा-

1. तत् इत्यधिकम् ब. २. या इ. ३. आद्य नास्ति क. ड. इ. 4. पूर्वार्ध नास्ति अ. 5. ज्ञेयम् इत्यधिकम् ब.

हरणमिदं सूत्रमेव । औपच्छन्दसिकप्रवृत्तकापरान्तिकोदाहरणं यथा—

हरिपदाम्बुजं सिद्धसेव्यमानं हृदि धृतं जनयति सर्वदा मुनीन्द्रैः ।
सुरनदीजवनपावितत्रिलोकं पारिजातकुसुमार्चितं सुरेशैः ॥

आपातलिकाप्रवृत्तकापरान्तिकोदाहरणं यथा—

नौमि विष्णुमहमीप्सितसिद्धयै यो जगत्सु निवसन्न हि लक्ष्यो ।
वेदवाक्यविदुषामधिगम्यः सदसदादितनुहानिविशुद्धः ॥

एतासां जातीनां सर्वगुरुप्रस्तारः । तत्र चरणविकल्पोत्तरोत्तरवधे प्रत्येकं लब्धा व्यक्तयः २५६ ॥ (४०)

मुकविहृदयानन्दिनी

(४०) अस्य प्रवृत्तकस्य [1]समपादयुक्तैर्लक्षणैश्च चतुर्भिः[2]पादैर्युक्ता [3]अपरान्तिका नाम यथा—

[4]तुङ्गपीवरघनस्तना लसच्चारुकुण्डलवती मृगेक्षणा ।
पूर्णचन्द्रवदनापरान्तिका चित्तमुन्मदयतीयमङ्गना ॥ (४०)

छन्दोवृत्तिः

(४०) अस्य वैतालीयादिछन्दोवृन्दस्य युग्मरचिता समपादैर्जनिता अपरान्तिका । सा च वैतालीयौपच्छन्दसिकापातलिकाप्रवृत्तीनां भेदात् षोढा । अत्र वैतालीयापरान्तिका यथा—

दधतीं दुग्धपयोधिविभ्रमं लवणाब्धेरिह रोधसि स्थितः ।
श्रीसिद्धाधिपकीर्तिमुच्चकैस्तव गायन्त्यपरान्तिकाः स्त्रियः ॥

औपच्छन्दसिकापरान्तिका यथा—

श्रीचौलुक्य किमद्भुतं पपात व्योम्नो यत्त्वयि दिव्यपुष्पवृष्टिः ।
प्राक्तस्मिन्नरिकुम्भिकुम्भभेदात् कीर्णा मौक्तिकपङ्क्तयस्त्वया हि ॥

---

1. समपादलक्षणयुक्तैश्च अ 2. पदैः अ. 3. अपरा नाम अ. 4. °स्तनीं ब.

आपातलिकापरान्तिका यथा—

तरुणीवेषा दीपितकामा विकसज्जातीपुष्पसुगन्धिः ।
उन्नतपीनपयोधरभारा प्रावृट् तनुते कस्य न हर्षम् ॥

वैतालीयप्राच्यवृत्त्यपरान्तिका यथा—

आगतोऽसि धूर्तापरान्तिकान् न ह्यलीकवाचामिहास्पदम् ।
जतुरसोऽयमक्ष्णोस्तथाधरे कज्जलं च यत्ते विलोक्यते ॥

औपच्छन्दसिकप्राच्यवृत्त्यपरान्तिका यथा—

केवलस्य न गिरेर्यदङ्घ्रिपद्माङ्गुष्ठपीडनवशाच्छिरः सुमेरोः ।
कम्पितं दिविषदां च विस्मितानां पातु पश्चिमजिनः स वो[1]ऽद्भुतश्रीः ॥

आपातलिकाप्राच्यवृत्त्यपरान्तिका यथा—

सुभग हे [2]सरभसं सविलासैः प्रतिमुहुस्तरललोचनपातैः ।
सङ्गमोत्सवविधौ तव सत्यं हारमर्पयति पङ्कजनेत्रा ॥　　(४०)

पञ्चिका

(४०) अस्य प्रवृत्तकस्य युग्मरचिता युग्मपादेन समपादेन कृता अपरान्तिका नाम। अयमेकः पादः। सदृशैस्त्रिभिः पादैः पद्यं भवति। तद्यथा—

मा. ८　र　ल ग　मा. ८　र　ल ग
ऽ । ऽ । ऽ । ऽ । ऽ । ऽ　ऽ । ऽ । । । ऽ । ऽ । ऽ
श्रीपराक्रमभुजस्य भूभुजः स्वःपतेश्च भविताऽत्र को गुरुः ।

मा. ८　र　ल ग　मा. ८　र　ल ग
ऽ । ऽ । । । ऽ । ऽ । ऽ । ऽ । । । ऽ । ऽ । ऽ
वेधसेति तुलितौ च तौ तयोर्योत्रभिल्लघुतयोर्ध्वमाययौ ॥　　(४०)

---

1. [0]अद्भुतः क. ड. इ　2. सरसं अ. ड.

४१. अयुग्भवा चारुहासिनी ॥

इति वैतालीयप्रकरणम् ।

तात्पर्यटीका

(४१) अस्य इत्यनुषङ्गः । वैतालीयादिजातित्रयोत्पन्नस्य प्रवृत्तकस्य विषमचरणलक्षणेन यस्याश्चरणचतुष्टयं क्रियते सा पूर्ववच् चारुहासिनी नाम त्रिविधा जातिर्भवति । अत्र वैतालीयप्रवृत्तकचारुहासिन्युदाहरणमिदं सूत्रमेव । औपच्छन्दसिकप्रवृत्तकचारुहासिन्युदाहरणं यथा—

हिरण्यकशिपोरुरो विभिद्य नखाङ्कुरैर्दीप्ततीक्ष्णवक्त्रैः ।
सुरेश्वरैः पूजितो महात्मा ददातु सौख्यं महीस्थितानाम् ॥

आपातलिकाप्रवृत्तकचारुहासिन्युदाहरणं यथा—

प्रशान्तचित्तः समदर्शी रिपौ सुहृदि यो हरिभक्तः ।
न कामनासंयुतचेताः स मोक्षमपि याति गृहस्थः ॥

एतासां जातीनां सर्वगुरुप्रस्तारः ।

एतासां चरणविकल्पोत्तरोत्तरवधे प्रत्येकं लब्धा व्यक्तयः १६ । वैतालीयोत्पन्नाः सर्वप्रसिद्धा जातयस्तेन सह सङ्कलनायां २१ । तद्यथा वैतालीयम् १, औपच्छन्दसिकम् १, आपातलिका १, दक्षिणान्तिका ३, उदीच्यवृत्तिः ३, प्राच्यवृत्तिः ३, प्रवृत्तकम् ३, अपरान्तिका ३, चारुहासिनी ३ ।

वैतालीयसमुत्पन्ना जातीनामेकविंशतिः ।
नोदाहृता प्रतिव्यक्ति ग्रन्थगौरवभीतितः ॥

आवृत्तिव्याख्यापक्षे वैतालीयजाती २, औपच्छन्दसिकजाती २, आपातलिकाजाती २, इति षट् । एतासां दक्षिणान्तिकाः ६, उदीच्यवृत्तयः ६, प्राच्यवृत्तयः ६, प्रवृत्तकानि ६, अपरान्तिकाः ६, चारुहासिन्यः ६, एवं द्वाचत्वारिंशत् ४२ । पूर्वसङ्ख्यया मिश्रत्वे सर्वसङ्ख्या ६३ ॥

इति श्रीरघुसूरिसुनुश्रीत्रिविक्रमसूरिविरचितायां तात्पर्यटीकायां वैतालीयप्रकरणं समाप्तम् ॥ (४१)

सुकविहृदयानन्दिनी

(४१) प्रवृत्तकस्यैव विषमपादलक्षणयुक्तैश्चतुर्भिः पादैः रचिता चारुहासिनी नाम । यथा—

न कस्य चेतः समन्मथं करोति सा सुन्दराकृतिः ।
विचित्रवाक्योक्तिपण्डिता विलासिनी चारुहासिनी ॥

इति वैतालीयप्रकरणम् । (४१)

छन्दोवृत्तिः

(४१) अस्य वैतालीयादेः विषमपाद[1]जनिता चारुहासिनी नाम छन्दः । एषाऽपि वैतालीयौपच्छन्दसिकापातलिकातदुदीच्यवृत्तीनां भेदात् षोढा । तत्र वैतालीयचारुहासिनी यथा—

यदि सा बत चारुहासिनी किमु चन्द्रिकयानया ततः ।
यदि सा च विलोललोचना किमु नीलसरोजिनीवनैः ॥

औपच्छन्दसिकाचारुहासिनी यथा—

ततिरिह गगने न तारकाणां प्रतिदिशमुदिता विभाति किन्तु ।
सरभसमुपसर्पतः सुधांशोः [2]कीर्णः कुसुमाञ्जली रजन्या ॥

आपातलिकाचारुहासिनी यथा—

भाति सुवदने तव भाले नवमलयजचित्रकलेखा ।
पद्मं जित्वा नयनाभ्यामुत्क्षिप्तेवेह पताका ॥

---

1. °जाता क. 2. कीर्णा ब.

औपच्छन्दसिकोदीच्यवृत्तिचारुहासिनी यथा—

विदग्धयूनां पतद्भिरेभिः स्खलद्गतिरिवायतैः कटाक्षैः।
इयं सुजघनातिमन्दमन्दं सखे वितनुते पदप्रपञ्चम् ॥

आपातलिकोदीच्यवृत्तिचारुहासिनी यथा—

विशालवंशादपि जातः सदा प्रकटयन्नतिमेकाम्।
धनुःसदृशतां कलय त्वं गुणाधिरोहोऽभिमतश्चेत् ॥

[1]एवमापातलिकाचारुहासिनीवैतालीयोदीच्यवृत्तिचारुहासिन्योरुदाहार्यम्। वैतालीय[2]प्रकरणं [3]सप्तविंशतिः ॥ (४१)

इति वैतालीयप्रकरणम्।

पञ्जिका

(४१) इहापि अस्येति सम्बन्धः। अस्य प्रवृत्तकस्य अयुग्भवा विषमपादेन जाता चारुहासिनी नाम स्यात्। अयमप्येकः पादः। एतच्चतुरावृत्त्य श्लोकः कर्तव्यः। दक्षिणान्तिकादयश्चतस्रो वैतालीयसदृशाः। विशेषस्तु यतिरेव। तद्यथा—

मा. ६ र ल ग मा. ६ र ल ग
। ऽ। ऽ ऽ। ऽ। ऽ। ऽ। ऽ ऽ। ऽ। ऽ
त्रिसिंहलाधीश्वरे धरां प्रशासति प्रीतिशालिनीम्।

मा. ६ र ल ग मा. ६ र ल ग
। ऽ। ऽ ऽ। ऽ। ऽ। ऽ। ऽ ऽ। ऽ। ऽ
विमार्गगामित्वमच्युतेः प्रजासु नासीत् सतीषु वै ॥ (४१)

इति वैतालीयप्रकरणम्।

---

1. एवं चैताः ब. 2. °वृत्तप्रकरणम् ब. 3. सप्तविंशतिप्रमाणम् क.

वक्त्रम्

४२. वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि स्यातम् ॥

तात्पर्यटीका

(४२) इत्यनेनाष्टाक्षरोऽस्य चरणो लब्धः । तस्य स–[1] । अथ चरणविकल्पोत्तरोत्तरवधे प्रत्येकं लब्धा व्यवतयः ३३१७७६ । अस्योपसंहार :—

रसाश्वतुरगाश्चन्द्रवह्निहव्यभुजो भिदः ।
वक्त्रादीनां चतुर्णां स्युः पृथङ् मात्रासमस्य च ॥ (४२)

सुकविहृदयानन्दिनी

(४२) पाद इत्यनुवर्तते । अनुष्टुभ्यष्टाक्षरायां जातौ पादस्य चतुर्थाक्षराद्यो यगणो भवति तदा वक्त्रं नाम [2]वृत्तं ख्यातं कथितम् । [3]अब्धिरिति निर्विशेषणत्वेना[4]द्याक्षरात् सर्वेषां गणानां प्राप्तौ निषेधमाह—नाद्यान्नसौ स्याताम् इति । पादस्याद्यात् प्रथमाक्षरात् नगणसगणौ न भवतः । यथा—

आपाण्डुगण्डमाकर्णविशालनयनं सुभ्रु ।
विरहे चारुसर्वाङ्ग्यास्तस्याः स्मराम्यहं वक्त्रम् ॥ (४२)

छन्दोवृत्तिः

(४२) अथ वक्त्रव्याख्यानावसरः ।

अनुष्टुभि अष्टाक्षरायां जातौ पादस्याद्यात् प्रथमाक्षरात् [5]परौ नगणसगणौ न [6]स्याताम् । अन्ये तु षड् गणा यथेच्छं भवन्ति । तथाब्धेश्चतुर्थाक्षरात् परो यगणो भवति । [7]तदा वक्त्रं नाम छन्दः आख्यातम् । यथा—

तस्यास्त्रस्तकुरङ्गाक्ष्या वक्त्रेण त्वं पराभूतः ।
हिमांशो क्षीयसे युक्तं लज्जसे [8]तु न किं वृद्ध्या ॥

---

1. अग्रभागो नष्टः ता. 2. छन्दः ब. 3. अब्धे[0] ब· 4. आद्यादक्षरात् ब. 5. परात् ब. 6. भवतः क. 7. तच्छन्दः क. 8. ननु किं ब.

४३. युजोर्जेन सरिद्गुः पथ्यावक्त्रं प्रकीर्तितम् ॥

एवमन्यदप्युदाहार्यम् । अत्राद्यपादस्य प्रथमे स्थाने ग्लौ इति द्वौ विकल्पौ, द्वितीये नसवर्जनात् शेषगणाः षट्, तृतीये एक एव यः, चतुर्थे ग्लाविति द्वौ, अन्योन्याघाते चतुर्विंशतिः प्रतिपादम् चतुर्विंशतेः सद्भावादन्योन्याभासे जातास्त्रयो लक्षाः एकत्रिंशत्सहस्राः सप्तशतानि षट् सप्तत्यधिकानि (३३१७७६) । एषैव सङ्ख्या प्रत्येकं विपुलाभेदेष्वपि ज्ञेया ॥ (४२)

पञ्जिका

(४२) अधुना वक्त्रादिलक्ष्यलक्षणं वक्तुमुपक्रमते । अनुष्टुभीति निर्धारणे सप्तमी । अनुष्टुभि अनुष्टुब्मध्ये । वक्त्रं ख्यातं वक्त्रमिति नाम्ना प्रसिद्धम् । अस्य लक्षणमाह । आद्यात् प्रथमाक्षरात् परौ नसौ नगणसगणौ न स्याताम् न भवेताम् । अब्धेरिति दिग्योगलक्षणे पञ्चमीयम् । तेन अब्धेश्चतुर्भ्योऽक्षरेभ्यः परतः यः यगणः स्यात् । इदमप्यर्धम् । एतत् त्रिरावृत्त्य पद्यं कर्तव्यम् । एवमन्यत्रापि । तद्यथा—

ल	भ	य	ग	ग	म	य	ग
।ऽ।	।ऽ	ऽऽ	ऽऽ	ऽऽ।	ऽ	ऽऽ	

पराक्रमभुजो राजा शास्त्राम्भोधेर्गतः पारम् ।

ग	र	य	ग	ग	त	य	ग
ऽऽ।	ऽ।	ऽऽ	ऽ	ऽऽ	ऽ।	ऽ	ऽऽ

गच्छन्तु तत्सकाशं भो श्रोतुं धर्मकथां लोकाः ॥ (४२)

तात्पर्यटीका

(४३) अथ वक्त्रप्रसङ्गकेन तदाश्रितं जात्यन्तरं सनामधेयमभिधातुकाम आह— युजोर्जेनेति । सुगमम् ॥ (४३)

४४. [1]औजयोर्जेन वारिधेस्तदेव विपरीतादि ॥

सुकविहृदयानन्दिनी

(४३) युजोः समपादयोः चतुर्थादक्षरात् जेन जगणेन परेण वक्त्रमेव पथ्या इति कथितम् । यथा--

त्वद्दन्तिदन्तभग्नोरुशाखाः पथ्यायता द्रुमाः ।
कथयन्तीव भग्नानां दिग्जयं तव भूपते ॥ (४३)

छन्दोवृत्तिः

(४३) युजोः समयोः पादयोः सरिद्भर्तु[2]स्तुर्याक्षरात् परतो [3]जगणेन पथ्यावक्त्रं[4] भवति । यथा--

आलानितगजस्कन्धघृष्टाः पथ्यायतद्रुमाः ।
अद्यापि कथयन्त्येते राजेन्द्र तव दिग्जयम् ॥ (४३)

पञ्जिका

(४३) पथ्यावक्त्रं प्रकीर्तितम् एतद् पथ्यावक्त्रमिति नाम्ना कथितम् । विद्वद्भिरिति शेषः । एतस्य लक्षणमाह । युजोः युक्पादयोः सरिद्भर्तुः समुद्रात् चतुर्भ्योऽक्षरेभ्यः परेण जेन जगणेन सहितं लक्षितं वा स्यात् । तद्यथा--

ल भ य ग ग भ ज ग
। ऽ । । । ऽ ऽऽ ऽ ऽ । । । ऽ । ऽ
पराक्रमभुजो भूपः सर्वायुधविशारदः ।

ल य य ग ग म ज ग
। । ऽ ऽ । ऽ ऽ ऽ ऽ ऽ ऽ । ऽ । ऽ
मतिमान्नीतिमान् वा मी लक्ष्मीवान् पुण्यलक्षणः ॥ (४३)

तात्पर्यटीका

(४४) सुगमम् । (४४)

---

1. अयुजोः पं. 2. वर्णचतुष्टयात् जेन जगणेन पथ्यावक्त्रं भवति इ. 3. जेन जगणेन ब.
4. छन्दः प्रकीर्तितम् इत्यधिकम् ब.

४५. **चपलावक्त्रमयुजोर्नकारश्चेत् पयोराशेः ॥**

सुकविहृदयानन्दिनी

(४४) विपरीतपथ्या इत्यर्थः । युक्पादे यगण एव कर्तव्यः । यथा—

विपरीतान्यपि प्रियः कुर्वाणो मुदमाधत्ते ।
अनुकूलस्त्वसौ सदा तेन प्राणाधिको नूनम् ॥ (४४)

छन्दोवृत्तिः

(४४) अयुजोः [1]विषमपादयोः वारिधेस्तुर्यादक्षरात् [2]परतो जगणेन तदेव पथ्यावक्त्रं विपरीतादि भवति । विपरीतपथ्यावक्त्रमित्यर्थः । युक्पादयो[3]र्यगण एव अवतिष्ठते । यथा—

विपरीतानि रे शठ करिष्यसि किमन्त्यस्मात् ।
दुकूलं प्रच्छदीकृतं तस्या धत्से ममार्थं यत् ॥ (४४)

पञ्चिका

(४४) विपरीतशब्द आदिर्यस्य तद् विपरीतादि । तदेव पथ्यावक्त्रम् । अयुजो अयुक्पादयोः वारिधेः समुद्रात् परेण जेन जगणेन सहितं विपरीतपथ्यावक्त्रं नाम स्यात् । लक्षथा—

य त ज ग ल भ य ग
ऽ ऽ ऽ। । ऽ। ऽ। ऽ।।। ऽ ऽ
इन्द्रः पालयितुं दिवं पराक्रमभुजो भूमिम् ।

ग र ज ग ग म य ग
ऽ ऽ। ऽ। ऽ। ऽ ऽ ऽ ऽ। ऽ ऽ ऽ
जागर्ति तेन दानवा दुष्टाश्चानेन दम्यन्ते ॥ (४४)

तात्पर्यटीका

(४५) विकल्पा व्यक्तयश्चास्य प्रत्येकं पूर्ववत् ॥ (४५)

1. विषमयोः पादयोः क. 2. परो क. 3. र्य एव क.

४६. यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता ॥

सुकविहृदयानन्दिनी

(४५) यद्ययुजोर्विषमपादयोः चतुर्थादक्षरात् नगणो भवेत् वक्त्रमेव चपला भवति । युक्पादयोः य एव । यथा—

चपलापाङ्गनयने पक्वबिम्बोष्ठि चन्द्रास्ये ।
स्याधीनं भज दयितं तारुण्यमस्थिरं यस्मात् ॥ (४५)

छन्दोवृत्तिः

(४५) विषमयोः पादयोः तुर्यादक्षरात् परतो नगणेन चपलावक्त्रं भवति । यथा—

वीक्षितोऽप्येष तिलकश्चपलाक्षि त्वया सद्यः ।
दधाति नव्यमुकुलै रोमाञ्चकञ्चुकं मन्ये ॥ (४५)

पञ्जिका

(४५) अयुजोः अयुक्पादयोः पयोराशेः चतुर्भ्योऽक्षरेभ्यः नकारश्चेत् यदि नगणः स्यात् तदा चपलावक्त्रम् इति नाम । तद्यथा—

ल य न ग ग स य ग
। । ऽ ऽ । । । ऽ ऽ । । ऽ । ऽ ऽ ऽ
गुणिनः सन्ति बहवः स्वार्थपरायणाः किं तैः ।

ग र न ग ग म य ग
ऽ ऽ । ऽ । । । ऽ ऽ ऽ ऽ ऽ । ऽ ऽ ऽ
एकः पराक्रमभुजस्त्रीर्ल्लोकान् स्वं च संपाति ॥ (४५)

तात्पर्यटीका

(४६) यस्यां वक्त्राश्रितायां जातौ समे पादे सप्तमे स्थाने लघुर्भवति सा युग्मविपुलाभिधाना जातिः स्यात् । सप्तमो ल इत्युपलक्षणमन्धेः परतः तगणादीनां चतुर्णां वर्ण-

गणानाम् । तेनास्यां समे पादे अब्धेः परतश्चत्वारो विकल्पा भवन्ति । लक्ष्यलक्षणसूत्रेऽस्मिन् समे पादे अब्धेः परतो जगणं दर्शयता जगणस्थितिपक्षे पथ्यावक्त्रेण सहास्या नामविकल्पश्चाङ्गीकृत इति । तत्र सर्वगुरुयुग्मविपुला यथा—

चरणविकल्पोत्तरोत्तरवधे लब्धा व्यक्तयः ३०८४१६ ॥ (४६)

सुकविहृदयानन्दिनी

(४६) युक्पादे द्वितीयचतुर्थे लघुः सप्तमो यस्यां सा युग्मविपुला नाम। ननु पथ्यालक्षणसाम्यात् पुनरुक्तमेतत । नैवम् विपुलाधिकारस्य इदानीमारभ्यमाणत्वात् विनानुत्पत्तिः । पथ्यालक्षणं तु अयुक्पादेऽवश्यमेव व्यक्तं जगणेन भवितव्यम् । अत्र तु नियमः । यथा—

अहो कस्यापि धन्यस्य महाकुलप्रसूतया ।
प्रीतिः स्वकान्तया सार्धं विपुला जायते गृहे ॥ (४६)

छन्दोवृत्तिः

(४६) यस्यामनुष्टुभि युग्मे [1]समपादे सप्तमो लो लघुर्भवति सा विपुला मता । अत्र युग्म इति नाम कवेः सहचरस्तस्यामन्त्रणम् । अन्यत्रापि [2]वदादिपददर्शनयात्रामन्त्रणं [3]नादृष्टम् । न चेयं पथ्यावक्त्रेण गतार्था । विपुलावर्गस्य इदानीमारभ्यमाणत्वात् विपुलां विना तस्य चानुपपत्तेः । अत्र युक्पादयोः सप्तमेन लघुना अवश्यमेव भाव्यम् । ओजपादयोस्तु [4]भादिभिर्यगणस्यापवादं वक्ष्यति पथ्यावक्त्रे [5]तु यगण [6]एक एवावतिष्ठते ॥ (४६)

पञ्चिका

(४६) सा युग्मविपुला मता युग्मविपुला इति संमता पिङ्गलेन इति शेषः । सा का । युग्मे द्वितीये चतुर्थे च पादे यस्यां सप्तमो लः लघुर्भवति । तथा चोक्तम्—

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
गुरु षष्ठं तु पादानां शेषास्त्वनियमाः स्मृताः ॥

---

1. समे पादे ब, युग्मपाद्योः क. 2. वदादि नास्ति अ. क. 3. न दृष्टं ब. क. 4. लादिभिः ब. 5. तु नास्ति ब. 6. एक नास्ति क.

४७. सैतवस्याखिलेष्वपि ॥

इति । तद्यथा—

ल र य ग ग ज ज ग
।ऽ ।ऽ।ऽ ऽऽ ऽ ।ऽ ।।ऽ ।ऽ
कलिङ्गदेशसञ्जाता भूमिपालकुलोद्भवा ।

ल म य ग ल भ ज ग
।ऽऽऽ। ऽऽ ऽ ।ऽ।।।ऽ ।ऽ
सुनेत्रा नाम देवी सा पराक्रमभुजं प्रसूः ॥ (४६)

तात्पर्यटीका

(४७) सैतवस्याचार्यस्य मतेन युग्मविपुलायाः अखिलेषु चतुर्ष्वपि चरणेषु सप्तमो लः स्यात् । सप्तमो लः इति जगणस्योपलक्षणम् । तभनानां विशेषलक्षणेनाघ्रातत्वात् ॥ (४७)

सुकविहृदयानन्दिनी

(४७) सैतवस्य आचार्यस्य मतेन चतुर्ष्वपि पादेषु सप्तमो लघुः कर्तव्यः । यथा—

अहो धन्यस्य कस्यचित् सुकवेर्जायते मतिः ।
नूनं ययाधिक्रियते सैतवं काव्यमुत्तमम् ॥ (४७)

छन्दोवृत्तिः

(४७) सैतवस्याचार्यस्य मते चतुर्ष्वपि पादेषु सप्तमो लघुश्चेत् तदा विपुला । यथा—

विपुलेऽप्यम्बुधौ [1]कृतं वर्त्म रामेण सैतवम् ।
चित्रमेतदिहाथ वा किमसाध्यं महात्मनाम् ॥

पञ्जिका

(४७) सैतवस्य सैतवाचार्यस्य मते अखिलेष्वपि चतुर्ष्वपि पादेषु सप्तमो लः लघुर्भवति । विपुला सा इति योज्यम् । तद्यथा—

1. नूनं अ.

४८. भेनाब्धितो भाद्विपुला ॥

ग	त	ज	ग	ल	य		ज	ग							
ऽ	ऽ	ऽ	॥	ऽ	।ऽ	।	।ऽ	ऽ	।	ऽ	।ऽ	।	ऽ		

धर्माशोकनृपान्वये जयमालो महीपतिः ।

ग	व	ज	ग	ल	भ		ज	ग							
ऽ	।	ऽऽ	।	ऽ	।	ऽ	।।।	ऽ	।	ऽ					

तस्य पुत्रः प्रजाश्रिये पराक्रमभुजोऽभवत् ॥ (४७)

तात्पर्यटीका

(४८) अखिलेषु चरणेषु अब्धेः परतो भेन युक्ता या सा इत्यन्वयः । सहयोगे तृतीया । भाद्विपुला इति भविपुला इत्यर्थः । अनेन प्रकरणशेषमपि व्याख्यातम् ॥ (४८)

सुकविहृदयानन्दिनी

(४८) भेनेत्यस्य इति निवृत्तम् । चपलावक्त्रमयुजोः नकारश्चेत् पयोराशेः इत्यनुवर्तते । यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता इति सर्वमनुवर्तनीयम् । अयुक्पादयोः [1]प्रथमतृतीययोः चतुर्थाक्षरात् परतो यगणं बाधित्वा भगणश्चेत् भवति तदा भेनोपलक्षिता भविपुला स्यात् भविपुला इत्यर्थः । यथा—

विशालाक्षी कामगजकुम्भाभविपुलस्तनी ।
मध्यक्षामा हंसगतिः कस्य न स्याद्रतिप्रदा ॥

अयुजोः इति जातिपक्षे त्रयोरपि पादयोर्ग्रहणम् । व्यक्तिपक्षे पुनरेकस्य । एकपक्षे पुनः प्रथमस्य तृतीयस्य वा । [2]तथाहुर्महाकवयः ।

वटे वटे वैश्रवणश्चत्वरे चत्वरे शिवम् । इति ।
यस्य प्रभावाद् भुवनं शाश्वते पथि तिष्ठति । इति ॥

उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता इत्यादि महाकविप्रयोगः ॥ (४८)

---

1. प्रथमतृतीयरूपयोः तुर्यात् ब. 2. तथाहि महाकवीनां प्रयोगाः ।

छन्दोवृत्तिः

(४८) अयुजोर्नकारश्चेत् इत्यस्मादयुजोः इत्यनुवर्तते । अयुजोः विषमपादयोः तुर्याद्-क्षरात् परतो यगणं बाधित्वा भगणेन भविपुला भवति। अयुजोः इति [1]उत्तरत्र भेदेष्वपि अनुवर्तते । यदाह—

ओजे तुर्यान्नतभरमसैर्नविपुलादयः ।
आस्वोजे त्र्यस्तुर्यो गुरुर्युजि षड्भ्यो लघुर्धुवः ॥

इति । उदाहरणम्—

इयं सखे चन्द्रमुखी स्मितज्योत्स्ना[2]वभासिनी ।
इन्दीवराक्षी हृदयं दन्दहीति तथापि मे ॥

अयुजोः इति जातिपक्षे द्वयोरपि पादयोर्ग्रहणम् । व्यक्तिपक्षे पुनरे[3]कस्य प्रथमस्य तृतीयस्य वा । तथा च महाकवीनां प्रयोगः ।

यस्य प्रभावाद् भुवनं शाश्वते पथि तिष्ठति ।
देवः स जयति श्रीमान् दण्डधारो महीपतिः ॥

तथा—

मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ॥

एवं सर्वभेदेष्वपि [4]जातिव्यक्तिव्यवहारो ज्ञेयः ॥ (४८)

पञ्जिका

(४८) अब्धितः समुद्रात् चतुर्भ्योऽक्षरेभ्यः परेण भेन भगणेन भाद्विपुला भकारात् परा विपुला भविपुला नाम स्यात् । तद्यथा—

ल त भ ग ल म भ ग
। ऽ ऽ । ऽ । । ऽ । ऽ ऽ ऽ । । ऽ
विषादी कपालकरः सदा रोगान्न त्यजति ।

ग र भ ग ल भ भ न
ऽ ऽ । ऽ ऽ । । ऽ । ऽ । । ऽ । । ऽ
शम्भूपमः शत्रुगणः पराक्रमबाहुपतेः ॥ (४८)

---

1. उत्तरभेदेष्वपि क. 2. °विलासिनी क. 3. एकस्य नास्ति ब. 4. जाति-व्यवहारो क.

४९. **इत्थमन्या रश्चतुर्थात् ॥**

तात्पर्यटीका

(४९) अग्रे द्रष्टव्या ॥

सुकविहृदयानन्दिनी

(४९) इत्थं पूर्वोक्तप्रकारेण अयुग्मपादयोश्चतुर्थादक्षरात् परतो रगणो भवति [1]तदा रविपुला स्यात् । यथा—

तथा जितः शत्रुवर्गो राजन् बाहुबलेन ते ।
(यथा) [2]सहान्तःपुरोऽसौ ततार विपुलां नदीम् ॥

व्यक्तिपक्षे प्रथमपादे यथा—

महाकविं कालिदासं वन्दे वाग्देवतागुरुम् ।
यज्ज्ञाने विषया भान्ति [3]दर्पणे प्रतिबिम्बवत् ॥

तृतीयपादे यथा—

कामनीभिः सह प्रीतिः कस्य नाम न रोचते ।
यदि न स्याद् वारिवीचिचञ्चलं हतजीवितम् ॥

इति ॥ (४९)

छन्दोवृत्तिः

(४९) चेच्चतुर्थादक्षरात् [4]परो रगणः[5]तदान्या भवति रविपुला इत्यर्थः । यथा—

वधूभिः पीनस्तनीभिस्तूलीभिः कुङ्कुमेन च ।
कालागुरुधूपधूमैर्हेमन्ते जयति स्मरः ॥ (४९)

पञ्जिका

(४९) चतुर्थात् वर्णात् परेण भगणेन यथा भविपुलाऽभूत् इत्थमनेन प्रकारेण चतुर्थात् परो रः रगणश्चेत्, तदा अन्या रविपुला नाम स्यात् । तद्यथा—

---

1. तदान्या रविपुला इत्यर्थः ब. 2. सान्तःपुरो ब. 3. दर्पणप्रति[0] क.
4. परतः ब. 5. स्यात् इत्यधिकम् इ.

५०. नोऽम्बुधेश्चेन् नविपुला ॥

म य र ल ग भ र ग
ऽ । ऽ ऽ ऽ। ऽ । ऽ ऽ ।[c] । ऽ । ऽ ऽ
नास्ति वक्तुं यन्न वेत्सि देहीति च याचके यम् ।

ग म र ग ल म र ल
ऽ ऽ ऽ ऽ ऽ । ऽ ऽ । ऽ । । ऽ । ऽ ।
सर्वज्ञोऽसि त्वं न तस्मात् पराक्रमबाहुदेव ॥ (४९)

तात्पर्यटीका

(५०) अग्रे द्रष्टव्या ॥ (५०)

सुकविहृदयानन्दिनी

(५०) अयुक्पादयो: [1]चतुर्थादक्षराच्चेन् नगणो भवति तदा नविपुला स्यात् । यथा--

लीलया येन विपुला दंष्ट्राग्रेणोद्धृता मही ।
बिभ्रता सौकरमपि वपुर्वन्दामि तं हरिम् ॥

अत्रैव भारविकविर्यथा—

युयुत्सुनेव कवचं किमामुक्तमिदं त्वया ।
तपस्विनो हि वसने [2]केवलाजिनवल्कले ॥ (कि. ११.१५)

व्यक्तिपक्षे प्रथमपादे यथा—

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ॥ (र. १.२३) [3]इति ।

तृतीयपादे यथा--

तव मन्त्रकृतो मन्त्रैर्दूरात् संशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥ इत्यादि ॥ (५०)

---

1. तुर्यादक्षरात् ब. 2. कम्बला[0] ब. 3. इत्यादि मुद्रितः पाठः ।

५१. तोऽब्धेस्तत्पूर्वान्या भवेत् ॥

छन्दोवृत्तिः

(५०) तुर्यादक्षराच्चेन्नगणो भवति तदा नविपुला । यथा--

पश्यन्ति देव चरणद्वयं ये तव भक्तितः ।
तेषां भवन्ति विपुलाः सद्यः कल्याणसम्पदः ॥ (५०)

(५०) अम्बुधेः चतुर्भ्यो वर्णेभ्यः परः नश्चेत् नगणश्चेत् तदा नविपुला नाम भवति । तद्यथा--

ल य नगण ग ल म न ग
।।ऽऽ। ।।ऽ।ऽऽऽ।।।ऽ
उपकाराय विदुषामसाधूनामपकृते ।

ग र न ग ल य न ग
ऽऽ ।ऽ।।।ऽ ।।ऽ.ऽ ।।।ऽ
जीयात् पराक्रमभुजो नरनाथो निरुपमः ॥ (५०)

तात्पर्यटीका

(५१) इति त्रयं व्याख्यातं स्थालीपुलाकन्यायेन । ननु वर्णवृत्तानि वक्त्राणि मात्रावृत्तप्रस्तावे किमिति लक्षितानि इति न वाच्यम् । यतः संकीर्णवृत्ताध्यायो अयं, वक्त्राणि च अनुष्टुप्समवृत्तादौ संकीर्यन्त इति न विरोधः । तथाहि— समवृत्तं प्रमाणिका सैतवमते युग्मविपुलाऽपि भवति । तथा काश्चिद् वक्त्रव्यक्तयोऽनुष्टुभः समवृत्तानि, काश्चिदर्धसमवृत्तानि काश्चिद् गाथाश्च भवन्ति । तर्हि एतदध्यायान्ते वक्त्राण्युपदिश्यन्ताम्, किमिति वैतालीयप्रकरणानन्तरमित्यपि न वाच्यम् । यतो वैतालीयं प्रतिपादं प्रादमध्ये नियतत्रिकवर्णगणव्यक्तम्, इदमपि तथैव इति सादृश्यादनयोरानन्तर्यमेवोदितम् इति स्थितम् ।

इति तात्पर्यटीकायां वक्त्रप्रकरणं समाप्तम् ॥ (५१)

सुकविहृदयानन्दिनी

(५१) अयुक्पादयोश्चतुर्थादक्षरात् चेत्तगणो भवति तदा तपूर्वा [1]तविपुला इत्यर्थः । यथा—

तृष्णेयं रे तात श्रियं संचितां विपुलां हरेत् ।
विहाय तस्मात् तां भव सुखी वैराग्यसम्पदा ॥

व्यक्तिपक्षे प्रथमपादे यथा—

वन्दे कविं श्रीभारविं लोकसंतमसच्छिदम ।
दिवा दीपा इवाभान्ति यस्याग्रे कवयोऽपरे ॥

तृतीयपादे यथा—

लोकवत् प्रतिकर्तव्यो लौकिकार्थः परीक्षकैः ।
लोकव्यवहारं प्रति सदृशौ बालपण्डितौ ॥

अन्येति ग्रहणात् मगणसगणविपुलापि बोद्धव्या । यथा ममैव छन्दसि अम्बुधेर्नतभरमसाजे लघुविपुला भवेत् । यथा—

सर्वातिरिक्तं सौभाग्यं बिभ्रति चारुलोचनाः ।
स्त्रीलोकसृष्टिः सौम्येव निःसाम्यस्य तु वेधसः ॥

व्यक्तिपक्षे प्रथमपादे यथा—

मनोऽभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः । (र. १.३९) इति ।
अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिः । (र. १.९३) इति ।

तृतीयपादे यथा—

अदूरवर्तिनीं सिद्धिं राजन् विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥ (र. १.८८)

गविपुला यथा—

क्षणविध्वंसिनि काये का चिन्ता मरणे रणे । इत्यादि ।

गणैषामपि विपुलाभेदानां चतुर्थो वर्णः प्रायेण गुरुर्भवति इत्याम्नायः ।

इति वक्त्रप्रकरणम् ॥ (५१)

---

1. अन्या इत्यधिकम् ब. फ.

छन्दोवृत्तिः

(५१) अम्बुधेः तुर्यादक्षरात् परतश्चेत् तगणो भवति तदा तविपुला[1] । यथा—

पादेनाहता येन सा जातीलुब्धेन मल्लिका ।
अलेस्तस्य दैवादहो बदर्यपि सुदुर्लभा ॥

संकीर्णाश्च विपुला दृश्यन्ते । यथा—

क्वचित् काले प्रसरता क्वचिदापत्य [2]निघ्नता ।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां बलम् ॥

एवमन्येऽप्यूह्याः । वक्त्रप्रकरणं नवभिः ॥

इति वक्त्रप्रकरणम् (५१)

पञ्चिका

(५१) अब्धेः चतुर्भ्यो वर्णेभ्यः परः तः तगणश्चेत् तदा तत्पूर्वान्या भवेत् । स तकारः पूर्वो यस्याः सा तत्पूर्वा तविपुला नाम स्यात् । तद्यथा—

ल भ त ग ल ज त ग
। ऽ । । ऽ ऽ । ऽ । । ऽ । ऽ ऽ । ऽ
पराक्रमबाहो प्रभो प्रबिभर्ति ते सर्वदा ।

ग स त ग ग ज त ग
ऽ । । ऽ ऽ ऽ । ऽ ऽ । ऽ । ऽ ऽ । ऽ
कीर्तिलतेयं प्राणिनां क्लेशहानये सत्फलम् ॥ (५१)

इति वक्त्र (अनुष्टुप्) प्रकरणम् ॥

---

1. भवति इत्यधिकम् क. 2. विघ्नता ब.

मात्रासमप्रकरणम्—

५२. द्विकगुणितवसुलघुरचलधृतिरिह ॥

तात्पर्यटीका

(५२) द्विकेन गुणिताः वसुलघवो यस्यां सा तथोक्ता। षोडशलघुचरणा इत्यर्थः। द्विकगुणितवसुलघुत्वं च मात्रासमकादौ प्रतिचरणं षोडशमात्रत्वनियमाय अग्रे अधिक्रियते ॥ (५२)

सुकविहृदयानन्दिनी

(५२) द्वाभ्यां गुणिता वसवोऽष्टा लघवः इत्यर्थः। षोडशभिः लघुभिः अचलधृतिः नाम। यथा—

इतरजनहितमितरमृजुतरमतिमनवरतमवनितिलकमिव सपदि।
स्वयमपि जलनिधिजननिरभिलषति पुरुषवरमचलधृति विभविनमिह ॥

गीत्यार्या इति पिङ्गलः ॥ (५२)

छन्दोवृत्तिः

(५२) यत्र द्विकगुणिता अष्टौ लघवो वर्णा भवन्ति सा अचलधृतिः इति छन्दः। यथा—

विलुलितचिकुरमधरनिहितदशनमविरलपुलकनिचितकुचयुगमपि।
रतिरसरभसमणित[1]मुखरितमिह विलसति तव सखि सुरतमचलधृति ॥

यदिदं वर्णछन्दोऽपि प्रकीर्णकेष्वभिहितं तदुत्तरत्र द्विकगुणितवस्तु इति अधिकारार्थम्। तेन [2]मात्रासमपादेषु षोडशमात्रा अधिक्रियन्ते ॥ (५२)

पञ्जिका

(५२) साम्प्रतं षोडशमात्रादिलक्ष्यलक्षणमुपन्यस्यते। द्वे परिमाणे अस्य इति द्विकम्। द्वियथा स्यात् तथा गुणिताः वसुलघवः अष्टौ लघुवर्णाः यस्याः सा तथोक्ता इति क्रियाविशेषणेनापि गमकत्वात् समासः। षोडशलघुका इत्यर्थः। अचलधृतिः इति नाम्ना

---

1. °मुखरितगृहमिह ब. 2. मात्रासमकादिषु ब.

५३. **मात्रासमकं नवमो हल्गोऽन्यः ॥**

अचलधृतिः स्यात् । तद्यथा—

इह भवति भवति महति धरणिभृति वृजिननिकरनुजि घनदसमधनिनि ।
सुरगुरुसदृशगिरिसुविशदमनसि सति कुशलमनुदिनमुचितमुदयतु ॥ (५२)

तात्पर्यटीका

(५३) मात्रासमकं नाम मात्रावृत्तजातिर्भवति यदि षोडशमात्रः चरणो भवति । नवमी मात्रा लघुरूपेण तिष्ठेत् । अनेन प्रस्तारे तृतीयो गणोऽन्तगुरुरेव स्यात् इति नियम्यते । पुनः किंविशिष्टं मात्रासमकं भवति । गन्तम् इति गोऽन्ते यस्य तदित्थंभूतम् । अनेन अस्य चरणान्ते द्विगुरुः अन्तगुरुः वा गणः प्रस्तार्य इति । इह मण्डूकप्लुत्या 'नेह भवति विषमे ज.' इत्यनुवर्तते । तच्च प्रतिचरणं प्रथमे गणस्थाने निविशते न तृतीये । वानवासिकायामत्रास्य स्वीकारात् । अनेन प्रथमो गणः चतुर्विकल्पः इष्टः । तदुक्तम्—

सात्रासमकादिषु राजकला वदने जगणः परिहरणीयः ।
गान्तगणस्थितिरेव पदान्ते कथिता दक्षैः छन्दःशास्त्रे ॥

इति । प्रस्तारार्थं सर्वगुरुमात्रासमकं यथा—

एवमपरमपि चरणत्रयं कुर्यात् । मात्रासमकचरणविकल्पोत्तरोत्तरवधे लब्धा व्यक्तयः ३२१२७६ ॥ (५३)

सुकविहृदयानन्दिनी

(५३) द्विकगुणितवसु[1]लघुः इति अनुवर्तते । यदा अचलधृतिरेव [2]गुर्वन्ता भवति नवमश्च लघुरेव तदा मात्रासमकं नाम[3] । प्राक्सूत्रात् लघुः इति अनुवर्तमानेऽपि नवमो-लिति वदता सूत्रकारेण अन्येषां च लघूनां मिश्रीभावोऽनुज्ञातः तस्मात् न[4] पराश्रिता कला इति अनुवर्तनीयम् । अत्रैव सूत्रे [5]लक्ष्यलक्षणसत्त्वात् । यथा—

धूलीधूसरकृततनुशोभः प्रकटितनूतनदशनद्वन्द्वः ।
प्रमुदितवदनो जटिलशिरस्कः खेलति मात्रासमकं बालः ॥ (५३)

---

1. लघुरित्यस्यानुवर्तनात् ब. 2. गुर्वन्त ब. 3. छन्दो भवति इत्यधिकम् ब. 4. समात्र इत्यधिकम् ब. 5. लक्ष्यलक्षणत्वात् अ, लक्षणत्वात् बः

५४. **जो न्लावथाम्बुधेर्विश्लोकः** ॥

छन्दोवृत्तिः

(५३) अत्र षोडशमात्रा अधिक्रियन्ते । ताभिश्चतुकलाश्चत्वारो मणा ज्ञेयाः । [1]तेषु नवमी मात्रा लघुश्चेत् तदा गुर्वन्तं मात्रासमकं नाम छन्दो भवति । एषु चित्रान्तेषु आद्यो गणः जगणः न भवति इत्युपदेशः । तेन आद्ये गणे चत्वारो विकल्पा यथा– ऽऽ, ।।ऽ, ऽ।, ।।।, द्वितीये त्रयः– ऽऽ, ।।ऽ, ऽ।, मध्यगुरुसर्वलघुविकल्पौ तु विश्लोकेन आघ्रातत्वात् न भवतः । तृतीये [2]एकः–।।ऽ । नवमो लः इति वचनात् [3]आदिगुरुसर्वगुरू न स्याताम् । मध्यगुरुसर्वलघू तु वानवासिकालक्षणेन अपोदितौ । चतुर्थे द्वौ– ऽऽ, ।।ऽ, गन्तत्वाभिधानात् अन्यविकल्पाभावः । अन्योन्याघाते प्रतिपादं चतुर्विंशतिभेदाः चतसृणां चतुर्विंशतिनामन्योऽन्याभ्यासे जातं तिस्रो लक्षा एकत्रिंशत्सहस्राः सप्ततशतानि षट्सप्तत्यधिकानि (३३१७७६) । उदाहरणम्—

अद्यापि सधुः शिशुरेवायं नो सज्जशरः कुसुमास्त्रोऽपि ।
मात्रासमुपाश्रयधीरास्वभावी क्षणतः प्रणतः सोऽपि ॥ (५३)

पञ्चिका

(५३) नवानां पूरणः नवमः । नवमो वर्णः लः लघुश्चेत गो गुरुः अन्त्यश्चेत् तदा नाम्ना मात्रासमकं स्यात् । गान्त्यः इति अस्मिन् प्रकरणे सर्वत्र वर्तते । तद्यथा—

गम्भीरतयाम्बुनिधिर्वचसा वाचस्पतिरुष्णकरो महसा ।
नीत्या कविरेष गुरुत्वात् स्यात् मेरुश्च पराक्रमबाहुनृपः ॥ (५३)

तात्पर्यटीका

(५४) मन्तमित्या प्रकरणसमाप्तेः अधिक्रियते । नश्च लश्च न्लौ इति इतरेतरयोगः; मात्राम्बुधेः परस्ताद् यदि जगगो न्लौ वा स्यातां तदा विश्लोकः स्यात् । प्रस्तारः— ऽऽ, ।ऽ।, ऽऽ, ऽऽ । ईदृगपरमपि चरणत्रयं भवति । तत्र चरणे विकल्पोत्तरोत्तरवधे लब्धा व्यक्तयः ५३०८४१६ ॥ (५४)

1. तेषां ब. 2. तु इत्यधिकम् इ. 3. आदिगुरुसर्वलघू क. इ.

५५. **तद्युगलाद् वानवासिका स्यात् ॥**

सुकविहृदयानन्दिनी

(५४) अम्बुधेर्लघुचतुष्टयात् परतो जगगोऽथवा न्लौ नगणलघू यदि तदा मात्रासमकमेव विश्लोको नाम । यथा--

मुञ्चति तृणमिव विगतकल्पः पुत्रं प्रियमपि विश्लोकं यः ।
संग्रामभुवि जितारिसमूहः क्षोणीमिमां स साक्षाद् दीव्यात् ॥ (५४)

छन्दोवृत्तिः

(५४) यस्य पादेऽम्बुधेः [1]मात्राचतुष्टयात् जो न्लौ वा भवतः स विश्लोकः । अत्र आद्यगणविकल्पाः पूर्ववत् । द्वितीये द्वौ । तृतीयेऽपि द्वौ । मध्यगुर्वन्तगुरुसर्वलघुभेदत्रयं तु[2] चित्रायामपोदितं, चतुर्थे गुर्वन्तं गणद्वयमेव । एवमन्योन्याभ्यासे द्वात्रिंशद् भेदाः । एवं [3]पादचतुष्कविकल्पाः । अन्योन्याभ्यासे या संख्या सा स्वयं ज्ञेया । उदाहरणम्--

यस्य न कुलमपि [4]यो विश्लोकः स्फुरति च मनसि न यस्य विवेकः ।
येन न गुणविषये निहिता धीर्जीवन्नपि स पुमानवसन्नः ॥ (५४)

पञ्चिका

(५४) अब्धेः चतसृभ्यः मात्राभ्यः परो जः जगणश्चेत् न्लौ नगणलघू च स्याताम् तदा विश्लोको नाम भवति । अथशब्दोऽत्र विकल्पवचनः अथवा इत्यर्थः । उक्तं च 'विकल्पानन्तरारम्भप्रश्नादौ मङ्गलेऽप्यथ' इति । तद्यथा--

येनाभवत् कृतार्था पृथिवी पितरौ च येन कृतकृत्यौ तौ ।
येन च कविनिवहाः सुखिनः स्युः स श्रीपराक्रमभुजो जयतात् ॥ (५४)

तात्पर्यटीका

(५५) नास्ति ॥ (५५)

1. मात्राचतुष्कात् ब. क. 2. चित्रवात्रादितम् क. 3. पादविकल्पानाम् ब. 4. तु किमपि इ.

५६. बाणाष्टनवसु यदि लः [1]चित्रम् ॥

सुकविहृदयानन्दिनी

(५५) तद्युगलादम्बुधियुगलात् लघ्वष्टकात् परतो जगणो नलघु वा यदा भवतः तदा वानवासिका भवेत् । यथा—

कुङ्कुमपङ्कानुलिप्तगात्रा [2]मध्ये क्षामा विपुलनितम्बा ।
अस्माकं वानवासिका स्त्री चेतःप्रीतिं सपदि विधत्ते ॥

छन्दोवृत्तिः

(५५) यत्र तद्युगलात अम्बुधियुगलात् मात्राष्टकात् [3]जगणो न्लौ वा भवतः सा वानवासिका स्यात् । अत्राद्ये गणे चत्वारो विकल्पाः । द्वितीये त्रयः । तृतीये द्वौ । चतुर्थेऽपि द्वौ । अन्योन्यताडने प्रतिपादमष्टचत्वारिंशत् । अन्योन्याभासे सङ्ख्या पूर्ववत् स्यात् । यथा—

सौरभपाण्डिममहिमविशेषान्नागरखण्डाधिकप्रमोदम् ।
दधदधुना भूप गीयते ते चारुयशो [4]वानवासिकाभिः ॥ (५५)

पञ्जिका

(५५) तस्य अम्बुधेः युगलं तद्युगलम् । तद्युगलात् अम्बुधिद्वितयात् अष्टाभ्यः मात्राभ्यः परो जगणः चेत्, अथवा नगणलघू वा यदि भवेताम्, तदा नाम्ना वानवासिका स्यात् । तद्यथा—

व्यालकुलान्ते प्रयाति खड्गो मुष्टिबिलान्निर्गतो बहिः स्यात् ।
वीर समीरात् समिति समत्तु प्रोक्तधरावान् पराक्रमभुजः ॥ (५५)

तात्पर्यटीका

(५६) सुगमम् । प्रस्तारः ऽऽ, ।ऽ।, ऽऽऽ; एवमपरमपि चरणत्रयं भवति । चरणविकल्पपरस्परवधे लब्धा व्यक्तयः ५३०८४१६ ।

1. चित्रा अ. ब. 2. मध्यक्षामा फ. 3. जो ब. 4. वानवासिभिः इ.

५७. [1]अष्टाभ्योऽथ गलावुपचित्रा ॥

परस्परमसंकीर्णो मात्रासमकजातिषु ।
चतुष्कलैर्गणैद x x प्रस्तारोऽत्र दर्शितः ॥ (५६)

सुकविहृदयानन्दिनी

(५६) पञ्चमोऽष्टमो नवमो यदि चेत् लघुर्भवति तदा चित्रा नाम[2] । यथा—

दृष्ट्वा तव रिपुनगरे शून्ये चित्राणि धवलगृहभित्तीनाम् ।
यान्ति द्रुततरमिभयूथानि त्रासं नरवर जनताबुद्ध्या ॥ (५६)

छन्दोवृत्तिः

(५६) यदि पञ्चमोऽष्टमो नवमो लो भवति तदा चित्रा नाम [3]छन्दः । अत्राद्ये गणे चत्वारो विकल्पाः । द्वितीये द्वौ । तृतीये त्रयः । चतुर्थे द्वौ । अन्योन्याभ्यासे प्रतिपाद-मष्टचत्वारिंशद् भेदाः । प्राग्वद् अन्योन्याभ्यासे सङ्ख्या ज्ञेया । उदाहरणम्—

नित्यं प्रतिगृहमपि विस्फूर्जद्विद्रुममरकतकनकमयूखैः ।
चित्रा नृप तव पुरि भवति द्यौः प्रकटितबहुविधसुरधन्वेव ॥ (५६)

पञ्जिका

(५६) बाणाः पञ्च । बाणश्च अष्टौ च नव च बाणाष्टनव । तेषु पञ्चमाष्टनवसु स्थानेषु यदि लः लघुः स्यात् तदा चित्रा नाम भवति । तद्यथा—

रामाजनमनसि मनोभूर्यो वैवस्वतो भवति संग्रामे ।
याचकजने त्रिदशशाखी स्यान् नैकः पराक्रमभुज त्वमतः ॥ (५६)

तात्पर्यटीका

(५७) नास्ति ॥ (५७)

---

1. अब्धियुगाद भश्चेदुपचित्रा ड. उपचित्रा नवमे परयुक्ते निसा. 2. छन्दः इत्यधिकम् ब. 3. छन्दः नास्ति क.

५८. यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितम् ।
अनियतवृत्तपरिमाणसहितं प्रथितं जगत्सु पादाकुलितम् ॥

सुकविहृदयानन्दिनी

(५७) लघ्वष्टकाद् यदा गुरुलघू भवतः तदा उपचित्रा नाम ।

मानं मानिनि मुञ्च भज त्वं कान्तं यावदितीरितमाल्या ।
तावद् व्योम बभूव पुरस्तान्नक्षत्रैरुपचित्रितमेतद् ॥ (५७)

छन्दोवृत्तिः

(५७) अष्टाभ्यः मात्राभ्यः चेत् गुर्वाद्यौ गणौ भवतः तदा उपचित्रा नाम छन्दो भवति । अत्र तृतीये गणे द्वौ विकल्पौ । अन्यगणविकल्पा मात्रासमकवत् । अन्योन्यताडने प्रतिपादं अष्टचत्वारिंशद् भेदाः । प्राग्वद् अन्योन्याभासे त्रिपञ्चाशल्लक्षाः चतुरशीति-शतानि षोडशोत्तराणि (५३०८४१६) । उदाहरणम्—

शङ्खक्षोदरुचा तव कीर्त्या लोकानां च त्वय्यनुरागैः ।
कृष्णैश्चापयशोभिर्द्विषतां दिशि दिशि जाता भूरुपचित्रा ॥ (५७)

पञ्चिका

(५७) अब्धियुगात् समुद्रद्वयात् अष्टाभ्यः मात्राभ्यः परो भः चेत् यदि भगणः स्यात् तदा उपचित्रा नाम स्यात् । तद्यथा—

श्रीनवरत्नाधीश्वरलङ्कानायक देव पराक्रमबाहो ।
मानमतङ्गजदानविनोद दीनजनानामदीनसखस्त्वम् ॥ (५७)

तात्पर्यटीका

(५८) प्रथितं प्रख्यातम् । किं तत् । पादाकुलकं नाम वृत्तम् । कथं भूतम् । कलितं संयुतम् । कैः । मात्रासमादिपादैः । मात्रासमादिः आदौ येषां ते यथोक्ताः । ते च पादाश्च तैः । कथं भूतैः पादैः । अतीत कृतविविधलक्ष्मयुतैः । अतीतैः कृतानि अतीतकृतानि । अतीतानि इह सूत्राणि । तानि च तानि विविधलक्ष्माणि

च अतीतकृतविविधलक्षमाणि । तैः युतास्तैः । पुनः कथंभूतम् । यत्र अनियतवृत्त-परिमाणसहितम् । अनियतं च तद्वृत्तपरिमाणं च तेन सहितं तत्तथोक्तम् । वृत्तपरि-माणमिह पादे वर्णसंख्या उच्यते । क्व प्रथितम् । जगत्सु इत्यन्वयः । पादौ च पादौ, पादश्च पादश्च पादश्च, पादश्च पादश्च पादश्च पादश्च एकशेषेण ते पादाः । तेन मात्रासमकानां चतुर्णां पादानां द्विशः, त्रिशः, चतुःशश्च योगेन पृथक् पृथक् पादाकुल-कजातयो जायन्ते । तत्र द्विशः उत्पत्तौ—

चतुष्किकेयं द्विपरिग्रहेण चतुर्षु वर्णेष्वपि चेष्टितेषु ।
पुनस्तथैकान्तरितेषु बाह्ये द्वितीयलेखावलयेन वार्धे ॥

षडेव युग्मान्यथ जातयस्तु चतुर्दश स्युः प्रतियुग्ममेषु ।
आद्येन हीनेन चतुर्थजातैः प्रस्तारयन्त्रेण यथास्थितेन ॥

गलोस्तु मात्रासमकादिसञ्ज्ञाः प्रकल्प्य जानीहि गुरोः प्रस्तारान् ॥

इति । चतुष्किकाप्रस्तारयन्त्रम् । मा वि त्रि वा ।

मामामामा	मामाविमा	मामामावि	मामाविवि
विमामामा	विमाविमा	विमामावि	विमाविवि
माविमामा	माविविमा	माविमावि	माविविवि
विविमामा	विविविमा	विविमावि	विविविवि

त्रिसङ्ग्रहेण प्रभिदश्चतस्रः प्रत्येकमांसामृतवस्त्रिकाणि ।
तथाहि पूर्वापरमध्ययोगाद् बाधादिमेन त्रितयं सहान्यत् ॥

तद्वैपरीत्ये त्रितयं षड (षडेव) मैक्ये चतुर्विंशतिका त्रिकाणाम् ।
चतुष्पदी (भेदन) कल्पसूत्रं प्रत्येकमेषां गदतः शृणुष्वम् ॥

द्विरादिवर्णा विहिते व्यपेत x x x नीत्या खलु तिस्र एव ।
द्वितीयकेऽर्धे चरमे तथैका षडेवमैक्ये चतुरब्धिचन्द्राः ॥

तत्र त्रिसंग्रहचतुष्किका यथा— मा वि चि वा ।

चतुष्किकोत्पन्नाः त्रिकव्यक्तयः चतस्रो यथा— माविवा १, विवाचि २, वाचिमा ३, चिमावि ४ । आद्यत्रिकस्य षोढा कल्पना यथा– माविमा १, विमावा २, मावावि ३ । वैपरीत्ये वाविमा १, वामावि २, विवामा ३ । एवमन्येषामपि त्रिकाणाम । सर्वसङ्ख्या (२४) । आद्यत्रिकस्य चतुष्पदीभेदकल्पनोदाहरणं यथा— मामाविवा १, माविमावा २, माविवामा ३ । माविविमा १, माविवावि २, माविवावा ३ इति षट् । सर्वैक्ये १४४ ।

चतुर्ग्रहेण (प्र) भिदश्चतस्रः प्रत्येकमासामृतवः प्रभेदाः ।
आसंभवादक्षरयोर्विवर्ताः द्वितीयकान्त्याक्षरयोगवर्जम् ॥

भवन्ति पञ्च प्रकृतोऽत्र षष्ठः सर्वैक्यमुक्तं श्रुतयोऽश्विनौ च ।
अमुं प्रकारं चतु(र)र्धवृत्ते वर्णाङ्कविन्यासवशेन कुर्यात् ॥

चतुष्किका यथा— मा वि चि वा ।

चतुष्किकोत्पन्नाः चतुष्कव्यक्तयो यथा— माविवाचि १, विवाचिमा २, वाचिमावि ३, चिमाविवा ४ । आद्यचतुष्कस्य षोढा कल्पना यथा— माविवाचि १, विमावाचि २. मावाचिवि ३, माविचिवा ४, विचिवामा ५, वाचिमावि ६ । द्वितीयचतुष्कस्य यथा— विवाचिमा १, वाविचिमा २, विचिवामा ३, चिमावावि ४, मावाविचि ५, चिवाविमा ६ । तृतीयचतुष्कस्य यथा– वाचिमावि १, चिवामावि २, वामाविचि ३, वाचिविमा ४, चिविमावा ५, माविवाचि ६ । चतुर्थचतुष्कस्य यथा– चिमाविवा १, माचिविवा २, चिविवामा ३, चिमावावि ४, मावाविचि ५, विवाचिमा ६ । एवं चतुर्विंशतिः ।

अनया रीत्या चरणवर्णाङ्कविपर्ययविन्यासवशेन पदचतुरूध्वेंऽपि प्रस्तारार्थं चतुर्विंशतिजातयः प्रकल्पनीयाः इति । तथैवाग्रे व्याख्यास्यते । तत्र द्विगो विश्लोकचित्राभ्यां कल्पितं पादाकुलकं यथा—

नखमुखविलिखितदितितनयोरःपरिपतदसृगरुणीकृतगात्रः ।
हिमधरगिरिरिव गैरिकरक्तो नरहरिरहरहरवतु स युष्मान् ॥

जातित्रयोत्पन्नस्य पादाकुलस्येदं सूत्रमेवोदाहरणम् । जातिचतुष्टयोत्पन्नस्य यथा—

देवो देयात् सुखमस्मभ्यं निजभुजविदलितदैत्यानीकः ।
लक्ष्मीकान्तः सरसिजनेत्रो नीलाम्बुजसमरुचिरच्छायः ॥[1]

विकल्पा यत्र यावन्तो न्यायसिद्धाः स्वरूपतः ।
आर्यादीनां स्थानभेदात् तानत्राहं निदर्शये ॥

आर्याविषमस्थाने विकल्पप्रस्तारः ऽऽ, ।।ऽ, ऽ।।, ।।।।, समस्थानगणस्य– ऽऽ, ।।ऽ, ।ऽ।, ऽ।।, ।।।। । चपलाप्रथमस्य ऽ।।, ऽऽ । तृतीयस्य– ऽऽ । चतुर्थस्य ऽऽ, ऽ।। । शेपमार्यावत् । मुखचपलाजघनचपले अप्ये (वमू) ह्ये । अनेन गीतिप्रकरणमपि व्याख्यातम् । वैतालीयगणस्य– ऽ, ।। । अनेन दक्षिणान्तिकापूर्वग्रन्थो व्याख्यातः । दक्षिणान्तिकादिषु जगणादन्यत्रैवमेव । वक्त्रप्रथमगणस्य– ऽ, । । द्वितीयगणस्य– ऽऽऽ, ।ऽऽ, ऽ।ऽ, ऽऽ।, ।ऽ।, ऽ।। । चतुर्थगणस्य ऽ, । । एवं पथ्यावक्त्रादिषु युग्मविपुलायाः समपादयोः तृतीयस्य– ऽऽ।, ।ऽ।, ऽऽ।, ।।।। । सैतवस्य मते सर्वत्रैवम् । शेषजातिषु वक्त्रवत् । मात्रासमकादीनां चतुर्णां प्रथमस्य– ऽऽ, ।।ऽ, ऽ।।, ।।।। । मात्रासमके द्वितीयस्य–ऽऽ, ।।ऽ, ऽ।। । चतुर्थस्य चतुर्ष्वपि– ऽऽ, ।।ऽ । विश्लोकतृतीयस्य– ऽऽ, ऽ।। । वानवासिकाद्वितीयस्य– ऽऽ, ।।ऽ, ऽ।। । चित्राद्वितीयस्य– ।ऽ।, ।।।। । चित्रातृतीयस्य– ।।ऽ, ।ऽ।, ।।।। ॥ (५८)

सुकविहृदयानन्दिनी

(५८) अतीतं [1]प्रागुक्तं यल्लक्ष्म लक्षणं तेन युतैः सहितैः मात्रासमकविश्लोकवानवासिकाचित्रोपचित्राणां पादैः चरणैः कलितं [2]युक्तं [3]अनियतवृत्तपरिमाणसहितं अनियतमर्यादं वृत्तानां परिमाणं तेन सहितम् । [4]कोऽर्थः । मात्रासमकादीनां पञ्चानामपि पादैः यैः कैश्चिदपि चतुर्भिः पादाकुलकम् इति कथितम् । अत्र मात्रासमकविश्लोकवानवासिकाचित्रोपचित्राणाम् उदाहरणं यथा—

दक्षिणमारुतचलिताशोके कोकिलकलरवमुदिते लोके ।
मुग्धे मन्मथसुहृदि वसन्ते पादाकुलकं याति पतिस्ते ॥

---

1. प्राक्कृतं विविधमनेकप्रकारम् ब. 2. रचितं इत्यधिकम् ब. 3. इत्यर्थः । तत्पादाकुलकं नाम छन्दः जगत्सु प्रसिद्धम् । किंभूतम् इत्यधिकम् ब. 4. द्विकं त्रिकं चतुष्कं संयोगादनेकभिन्नम् इत्यधिकम् ब.

तथा विश्लोकोपचित्रादिपादैर्यथा—

वाताहतदलपङ्कजनेत्रे असितदुकूलाच्छादितगात्रे ।
कथय सखि त्वं क्व नु व्यक्तं पादाकुलकं गच्छसि नक्तम् ॥

एवमन्येऽपि महाकविप्रयोगा यथा—

चत्वरमण्डपतरुमूलानि सन्ति च सलिलाद्यनुकूलानि ।
क्वचिदपि न भवति [1]भिक्षाहानिस्तत् किं क्रियते मानग्लानिः ॥ (५८)

इति । [2]अन्ते यमकमित्याम्नायः ॥

छन्दोवृत्तिः

(५८) यत् पूर्वोक्तैः मात्रासमादीनां पादैः कलितं रचितं भवति तत् पादाकुलकम् । तत् चानियतम् इति द्विकत्रिकचतुष्कसंयोगादनेकभेदभिन्नम् । तत्र द्विकसंयोगे मात्रासमकस्य त्रिभिः पादैः उपचित्रायाश्च एकेन पादाकुलकम् । यथा—

शशधरपादाकुलके गगने कोकिलनादै [3]र्मुखरे च वने ।
मदने च जगज्जयनैकाग्रे पान्थ कथं गन्ता [4]तदिहाग्रे ॥

त्रिकसंयोगे मात्रासमकस्य पादद्वयेन उपचित्राया एकेन विश्लोकस्य एकेन यथा—

जयिनि दिगन्ताद् भवति प्राप्ते पौरस्त्रीणां त्वरितं नृपते ।
विचरति सद्यः पादाकुलकं मलयानिल इव भृङ्गीकुलकम् ॥

चतुष्कसंयोगे मात्रासमकोपचित्राविश्लोकचित्रापादैर्यथा—

[5]वन्दितपादाकुलकैर्द्युसदामनुपममहिमश्रीधाम सदा ।
सा वो वितरतु शिवमाकल्पं भारत्यनुदिनमसमनल्पम् ॥

---

1. भक्षाहानिः अ. 2. पादाकुलके इत्यधिकम् ब. 3. मुखरेब. 4. तद्विहाय इ. 5. वदन्ति अ.

सूत्रं च चतुष्कसंयोगात् उदाहरणम् । एवं भाषान्तरेष्वपि यथा—

चंदुज्जोओ चंदणलेवो कुवलयसिज्जा कमलुक्खेवो ।
दाहिणमारुयओ कप्पूरं अहियं विरहे डहइ सरीरं ॥

एवमनेकधापि उदाहार्यं मात्रासमादिप्रकरणं षड्भिः ॥ (५८)

पञ्चिका

(५८) यदिति । जगत्सु छन्दश्शिष्टिषु तत् पादाकुलकं नाम प्रथितं ख्यातम् । किं-भूतम् । अनियतवृत्तपरिमाणसहितम् । वृत्तस्य परिमाणं वृत्तपरिमाणम्, अनियतम् अनिश्चितं च तद्वृत्तं च इति अनियतवृत्तपरिमाणम् । तेन सहितम् । तत् किम् । तैः **कीदृशैः** । अतीतकृतविविधलक्ष्मयुतैः । अतीते भूते कृतम् तच्च तद्विविधलक्ष्म **नानाप्रकारलक्षणं** च इति कर्मधारयः तेन युतैः संयुक्तैः । अत्र वृत्ते प्रथमः पादः **मात्रासमकस्य** स्यात् लघोर्नवमत्वाद् गुरोः पादान्तत्वात् । अथवा चित्रायाः **प्रथमः** पादः स्यात् पञ्चमाष्टमनवमस्थानेषु लघोः स्थितत्वाद गुरोरन्तत्वात् च । द्वितीयः पादः **विश्लोकस्य** स्यात् मात्रायाः चतुष्टयात् परतो जगणस्य सम्भवत्वाद् गुर्वन्तत्वाच्च । **तृतीयः** पादो वानवासिकायाः स्यात्, मात्राष्टकात् जगणस्य विद्यमानत्वात् **अन्ते** गुरुत्वाच्च । चतुर्थः पादोऽपि विश्लोकस्य स्यात् मात्राचतुष्टयात् परतो जगणस्य संभवत्वादन्ते गुरुत्वात् च । एवं मात्रासमकादीनां पञ्चानां मध्ये यथासम्भवं चतुर्भिः **त्रिभिर्द्वाभ्यां** वा पादाभ्यां मिश्रितं वृत्तं पादाकुलकम् इति लोकेषु प्रसिद्धम् ।

ल ल ल ग
विद्वत्कुमुदवनविबोधविधुर् चित्रा

ल
दशबलशासनसरोजमधुलिट् । मात्रासमकम्

ज ग
। ऽ । ऽ
सङ्गीतशास्त्रसाहित्यगुरुः विश्लोकः

भ ग
ऽ । । ऽ
भाति पराक्रमबाहुमहीन्द्रः ॥ उपचित्रा (५८)

गुरुलघुप्रमाणम्—

५९. वृत्तस्य ला विना वर्णैर्गा वर्णा गुरुभिस्तथा ।
गुरवो लैर्दले नित्यं प्रमाणमिति निश्चितम् ॥

इति मात्रासमप्रकरणम् ।

तात्पर्यटीका

(५९) वृत्तमिह वर्णराशेरुपलक्षणम् । तेन पादस्यार्धस्य पद्यस्य गद्यस्य वा इत्यर्थः । ल इति मात्राः । वर्णाः स्वराः सस्वरव्यञ्जनानि वा । अयमत्र वाक्यार्थः । किंचिद्-वृत्तमुद्दिश्य कश्चिद् यदा पृच्छति अस्मिन् मनसि वर्तमाने वृत्ते कति गुरवः सन्ति इत्युक्ते तं प्रति वाच्यं वृत्तस्य लघुराशिः इति मात्राराशिः क्रियताम् । ततः तद्वर्णसंख्या अपनीयताम् । ततो यावत्यो मात्रा अवशिष्टाः तावत्य. त्वद्वृत्ते गुरवः सन्ति इत्युत्तरं दद्यात् । वर्णाः गुरुभिस्तथा इति । अथ यद्येवं पृच्छति अस्मदवृत्ते कति वर्णाः सन्ति इति तदैवं वाच्यम् । वृत्तमात्राराशेः गुरवोऽपनीयन्ताम् । ततो याव-यो मात्रा अवशिष्टा भवन्ति तावन्तो वर्णाः सन्ति इति उत्तरं दद्यात् । गुरुसंख्यानयनार्थं प्रकारान्तरं वक्त्र-माह गुरव इत्यादि । पूर्ववद् गुरुसङ्ख्याप्रश्ने सति वृत्तमात्राराशेः मूललघुसङ्ख्यापनयने सति अवशिष्टसङ्ख्यां दलयेत । तत्र एकदलसङ्ख्यातुल्या गुरवः सन्ति इत्युत्तरं वाच्यं स्यात् । द्विगुणगुरुसङ्ख्यापनयने लघवोऽप्यागच्छन्ति इति पूर्ववत् सूत्रविपर्ययात् व्याख्येयम् ।

अक्षरपिण्डं द्विगुणं मात्रागणशोधितं तु यच्छेषम् ।
तल्लघ्विति निर्दिष्टं पिङ्गलजयदेवभरताद्यैः ॥

इह गुरुवर्णलघुसङ्ख्यानयनोपदेशः आर्यादीनां छन्दोजातीनामुपदेशाघाटविज्ञा-नार्थः । अत एव अतः परं पदचतुरुध्वोंपदेशादधिकं यदुपदेक्ष्यते तद्व्यक्तिरूपं तत्र समुद्रप्रस्तारोपदेशः इति सिद्धान्तः ॥ (५९)

सुकविहृदयानन्दिनी

(५९) [1]अधुना गुरुलघुप्रमाणमाह— वृत्तस्य यस्य कस्यचित् लः कलाः मात्राः वर्णैरक्षरै-र्विना गा गुरवो भवन्ति । वर्णा. गुरुभिः तथा लः कलाः मात्राः गुरुभिर्विना वर्णा भवन्ति ।

---

1. इदानीं छन्दसां गुर्वक्षरवर्णपरिज्ञानार्थमाह ब.

गुरवो लैर्दले नित्यं ता एव कला लैर्लघुभिर्विना दले अर्धे कृते सति गुरवो भवन्ति। यथा अस्मिन्नेव वृत्ते एकपञ्चाशत् कलाः वर्णैः द्वात्रिंशद्भिः विना एकोनविंशतिः गुरवो भवन्ति। पुनस्ता एव मात्रा एकोनविंशत्या गुरुभिर्विना वर्णा द्वात्रिंशत् भवन्ति। पुनः ताः कला एकपञ्चाशत् त्रयोदशभिर्लघुभिर्विना अष्टत्रिंशत् भवन्ति। ततो दले अर्धे कृते सति एकोनविंशतिः गुरवो भवन्ति इति प्रमाणं नियतं वृत्तस्य इति ॥ (५९)

छन्दोवृत्तिः

(५९) अथेदानीं छन्दसां गुर्वक्षरवर्णपरिज्ञानार्थमाह-- यस्य कस्यापि वृत्तस्य मात्राछन्दसो वा यावन्तो लो लघवो भवन्ति ते वृत्तस्य वर्णैः विना गा गुरवो भवन्ति। तत्र मात्राछन्दसि यथा--

जयति विजितान्यतेजाः सुरासुराधीशसेवितः श्रीमान्।
विमलस्त्रासविरहितस्त्रिलोकचिन्तामणिर्वीरः ॥

कश्चित् [1]पृच्छति। अस्यामष्टात्रिंशदक्षरायामार्यायां कति गुरवः इति। तदा सप्तपञ्चाशीति आर्यामात्रासङ्ख्यायामष्टात्रिंशद्वर्णसङ्ख्यामपनीयात्रावशिष्यन्त एकोनविंशतिः ते च गुरवोऽत्र। यदा तु इति पृच्छति अस्यामेकोनविंशतिगुरुवर्णायामार्यायां कति वर्णाः सन्ति तदा सप्तपञ्चाशत्मात्राभ्यः एकोनविंशतिगुरुसङ्ख्यामपनीयात्रावशिष्टाष्टात्रिंशत्। सा च वर्णसङ्ख्या ज्ञेया। वर्णछन्दसि यथा सूत्रस्यैव [2]श्लोकमात्रागणनया एकपञ्चाशत् लघवः। तेभ्यो द्वात्रिंशद् वर्णाः पात्यन्ते। अत्रावशिष्टा एकोनविंशतिः। सा च गुरुसङ्ख्या ज्ञेया। एवं [3]गुरुकथने वर्णसङ्ख्या भवति। अथ भेदान्तरमाह-- गुरवः इति। यदि यत्र त्रयोदश लघवः स्युः तत्र कति गुरवः इति पृच्छति तदा एकपञ्चाशन्मात्राभ्यः त्रयोदशसु पातितेषु शेषा अष्टात्रिंशत्। ततो दलेऽर्धे कृते सति एकोनविंशतिः गुरवो वाच्या इति। एवमनया रीत्या प्रमाणं [4]वृत्तगुरुवृत्तवर्णविज्ञानं निश्चितं निर्णीतं ज्ञेयम् इति यावत् ॥

इति मात्रासमप्रकरणम्। (५९)

पञ्चिका

(५९) वृत्तस्य पथ्यार्यादेः लाः लघवः मात्राः वर्णैर्विना अक्षराणि त्यक्त्वा गाः इति गुरवः इति प्रमाणम् नित्यमनवरतम् निश्चितं निर्णीतम्। ते एव लाः गुरुभिः विना

---

1. प्रश्नयति क. 2. श्लोके मात्रा ब. 3. गुरुवर्णकथने ब्र. 4. वृत्तगुरुवर्णज्ञानम् ब. क.

द्विपात् प्रकरणम्

६०. शिखिगुणितदशलघुरचितमपगतलघुयुगलमपरमिदमखिलम् ।
सगुरु शकलयुगलकमपि सुपरिघटितललितपद[1]निचिति भवति शिखा ।।

गुरूणि त्यक्त्वा वर्णा इति अक्षराणि इति प्रमाणं निश्चितम् । तथा तद्वत् त एव लाः लैर्विना लघूनि त्यक्त्वा दले अर्धे कृते गुरवः इति गुरूणि इति प्रमाणं निश्चितम् । आर्यापथ्यार्ययोः मात्राः सप्तपञ्चाशद् भवन्ति । एवं विपुलाचपलात्रयाणाम् । गीतेः षष्टिमात्राः, उपगीतेः चतुःपञ्चाशत, आर्यागीतेः चतुष्षष्टिः । अथ कदाचित् कश्चित् पथ्याचरणद्वयं भवेत् तत्र अक्षराणि एतावन्ति, तत्र गुरवः तु कति इति यद्यपृच्छत् । तेनैव उक्तानि अक्षराणि यावन्ति, तावतीष्वेव मात्रासु पथ्यायाः सप्तपञ्चाशतः मात्राभ्यः तावतीषु सतीषु अवशिष्टा मात्रा यावत्यो भवन्ति तावत्य एव गुरवः इति वक्तव्याः । अथ गुरवः इयत्यः, कतिवर्णा इति पृष्टवान् । तदा तेनोक्ता एव यावन्तः तावतीष्वेव मात्रासु सप्तपञ्चाशतो मात्राभ्यः अपनीतासु परिशिष्टमात्रासङ्ख्यायाः वर्णा वाच्याः । अथवा लघवः एतावन्तः, कियन्तः गुरवः इति यः पृच्छति स्म । तदा तेनोक्तलघुसङ्ख्यायाः मात्रासु सप्तपञ्चाशतो मात्राभ्यः अपनीतासु अर्धीकृतासु च ततः परिशिष्टमात्रासङ्ख्यायाः गुरवो वाच्याः । एवं गीतादिषु अपि यथासम्भवं बोद्धव्यम् ।।

इति षोडशमात्रासमप्रकरणम् । (५९)

तात्पर्यटीका

(५०) अस्यान्वयः । भवति । का । शिखा । किं भवति । शकलयुगलकम् । कथंभूतम् । सुपरि इत्यादि । सुष्ठु परिघटिता ललिता पदनिचितिः यस्मिन् तदित्थंभूतम् । पुनः किंविशिष्टम् । सगुरु गुर्वन्तम् इत्यर्थः । पुनः किंविशिष्टम् । शिखीत्यादि । शिखिनस्त्रयः शिखिगुणिता दश लघवो रचिता यस्मिन् तदित्थंभूतम् । पुनः किंविशिष्टम् । अपगतेत्यादि । अपगतं लघुयुगलं यस्मात् । तयोर्मध्ये अपरे शकले इदं पूर्वोक्तं लक्षणं सकलं भवति इत्यन्वयः ।। (६०)

सुकविहृदयानन्दिनी

(६०) शिखिभिः त्रिभिः गुणितैः दशभिः लघुभिः रचितं कृतम् । तच्च तदपगतलघुयुगलं च तथोक्तम् । अष्टाविंशतिलघुकं इत्यर्थः । अपरं द्वितीयमिदमर्धमखिलं संपूर्ण

---

1. °विचिति निसा.

त्रिशल्लघुकम् इत्यर्थः । शकलयुगलमपि अर्धद्वयमपि सगुरु सह गुरुणा वर्तत इति सगुरु-र्यदा भवति तदा शिखा नाम भवति । सुपरिघटितानि ललितपदानि तेषां निचितिः रचनाविशेषो यत्र क्रियाविशेषणे तत् तथोक्तम् । यथा--

मलयपवनचलितसुविकचविचिकिलमलिरधिवसति मुदितमनाः ।
सुरभिनमयमुदितपिकयुवतिरपि परिमलबहुलबकुलतरुशिखम् ॥

चलिका इति वक्तव्ये छन्दोभङ्गभयात् शिखा इत्युक्तमेकार्थत्वान्न दोषः ॥ (६०)

छन्दोवृत्तिः

(६०) शिखिगुणितैः त्रिभिः गुणितैः दशभिः लघुभिः रचितं लघुयुग्मरहितं एकदल-मपरमिदं समस्तं तथा दलयुगलमपि गुरुसहितं यस्यामेतल्लक्ष्यं भवति सा सुपरिरचित-मधुरपदपङ्क्तिः शिखा नाम छन्दो भवति इति वाक्यार्थः । भावार्थस्तु प्रथमे दलेऽष्टा-विंशतिः लघवोऽन्ते गुरुः द्वितीये त्रिंशल्लघवोऽन्त्यगुरुः एवं दलद्वयपरिकलिता शिखा स्यात् इति । अत्र उदाहरणं सूत्रम् ॥ (६०)

पञ्चिका

(६०) इदानीं शिखादिलक्ष्यलक्षणमालक्ष्यते । भवति शिखा इदं शिखा इति नाम स्यात् । अस्य लक्षणमाह । इदं प्रथमचरणम् । शिखिगुणितदशलघुरचितम् दश च ते लघवश्च इति दशलघवः शिखिभिः त्रिभिः गुणिताः शिखिगुणिताः शिखिगुणिताश्च ते दशलघवश्च इति कर्मधारयः तैः रचितम् । किंविशिष्टम् । अपगतलघुयुगलम् अपगतं निर्गतं लघुयुगलं लघुद्वयं यस्मात् तत् तथोक्तम् । अपरं शिखायाः द्वितीयचरणम् अखिलं समस्तम् । प्रथमचरणं च लघुद्वयवर्जितं भवति इत्यर्थः । शकलयुगलकमपि सगुरु गुरु-सहितम् । शिखाया अयुक् चरणे अष्टाविंशतिः लघवः अन्ते गुरुः एकश्च । युक्चरणे त्रिंशल्लघवः अन्ते गुरुरेकश्च इति विज्ञेयम् । किंविशिष्टम् । सुपरिघटितललितपद-वितति सुपरिघटिता सम्यग्रचिता ललिता मनोहरा पदवितिः पदानां पङ्क्तिः यत्र शकलयुगल इति विग्रहः कार्यः । इदमर्धम् । एतद्विरावृत्य श्लोकः कर्तव्यः । तद्यथा--

असुरसुरनरमुनिवरफणिपतिकृतनति जिनचरणसरसिरुहं
प्रतिदिनयजनजनितसुकृतनिहतदुरितनिकरममृतमधुरवचनम् ।

कुसुमपुरनगरवरविरचितपदमपगतभवभयचयमलिनं
जयिनमवनिपतिमिममवतु हरिरिह नरकछिदुरगरिपुकृतगमनः ॥ (६०)

६१. विनिमयविहितशकलयुगललघुललितपदवितति रचितगुणनिचया ।
श्रुतिसुखकृदियमपि जगति जशिर उपगतवति ञि सति भवति खजा ।।

तात्पर्यटीका

(६१) विनिमयो व्यत्ययः । विनिमयेन विहितं तच्च तत् शकलयुगलं च तस्य लघवः तैः ललिता पदवितितिः । तया विरचितो गुणनिचयो यस्यां सा तथैवोक्ता । का भवति । खजा । कस्मिन् सति । ञि इति अकारे । कथंभूते । जशिर उपगतवति । जस्य शिरः तदुपगतवान् तस्मिन् । एतेन खजा इत्यभिधानमुक्तं भवति । श्रुतेः सुखकृत् श्रुतिसुखकृत् । ईदृशी का भवति । इयमिति खञ्जा । अपिशब्दात् शिखा । क्व । जगति इति लोके इत्यन्वयः । प्रस्तुतत्वात् शिखादलयुगलद्वयं यस्या भवति विपर्ययेण सा खञ्जा भवति । इह शेषपदनिचयो लक्ष्यलक्षणसंयुतत्वप्रतिज्ञानिर्वाहार्थः । एवमन्यत्रापि ।। (६१)

सुकविहृदयानन्दिनी

(६१) [1]सैव शिखा विनिमयेन व्यत्यासेन विहितं शकलयुगमर्धद्वयं ललितपदवितत्या-रचितगणनिचया यदा भवति तदा खजा नाम । [2]क्व सति । ञि च । वर्गीयपञ्चमे जस्य च वर्गीयतृतीयस्य शिर ऊर्ध्वविभागः तस्मिन् उपगतवति सति । कोऽर्थः । खञ्जा इत्यर्थः । यथा--

[3]किल ससलिलसलिलधरलवमुदितशिखिकुलविरचितकलकलनिकरे ।
सुपरिहृतनिजयुवतिरिह नभसि हतपथिक कथमसि गमनमनाः ।।

एकगुरुणि छन्दसि खञ्जाशब्दस्य प्रवेशयितुमशक्यत्वात् नाम नोक्तम् ।। (६१)

छन्दोवृत्तिः

(६१) शिखालक्षणे व्यत्ययरचिते खञ्जा नाम छन्दो भवति इति समासार्थः । अत्रोदाहरणं सूत्रमेव । श्रीहेमचन्द्रसूरयस्तु (३.२८) इदं छन्दोद्वयं पादचतुष्ककलितं वदन्ति ।

---

1. शैव अ, सेव ब. 2. क्व सति नास्ति अ. 3. स सलिलधरल व मुद्रितं सुखं विरचितं ब. फ.

यथा— प्रसृमरमरिनरपतिबलतिमिरनिकरमतनुमपि गुरुगिरिगुहा-
तरुगहनविकटकुहरशरणमिममखिलमिह सभरसभयदिनमुखे ।
परममहिमनिलयशशधरकुलगगनदिनकरपरपटिमजुषः
किरणततय इव विदधति चिरतरमवनिपतितिलक तव वरविशिखाः ॥

प्रमुदितसमदपरभृतकलरणितमविकलमिह [1]शशधरकिरणवितताय:
विकसितसरसिरुहविपिनमलिकुलविरुतमुखरितकुसुममितलताः ।
कुरबकबकुलविकचिलविलसदविरलपरिमलसुरभिमलयपवनो
विरहविधुरयुवतिहृदयतपनमिदमखिलमपि [2]नवमधुसमये ॥

खञ्जा इति शब्दस्य छन्दसि न प्रवेशः ॥ (६१)

पञ्चिका

(६१) जस्य शिरः जशिरः । खजा इत्यत्र जकारस्य मूर्धम् जि ञकारे उपगतवति सति खजा नाम भवति नाम्ना खञ्जा इति स्यात् । अपिशब्दोऽत्र समुच्चये । जगति लोके न केवलं शिखा श्रुतिसुखकृत् श्रवणसुखकारिणी इयं खञ्जा अपि श्रुतिसुखकृद् भवति । इयं कीदृशी । विनिमयविहितशकलयुगललघुललितपदवितति विरचितगुण-निचया । शकलयोः पादयोः युगलं शकलयुगलम् । शकलयुगलस्य लघवः शकलयुगल-लघवः । विनिमयेन विपर्यासेन परिवर्तेन विहिता रचिता शकलयुगललघवो यस्यां पदवित्यां सा विनिमयविहितशकलयुगललघुः । विततिः परम्परा । पदानां विततिः पदवितिः । ललिता मनोज्ञा चासौ पदवितिश्च इति कर्मधारयः । विनिमयविहित-शकलयुगललघुश्चासौ ललितपदवितिश्च इति पुनः कर्मधारयः । गणस्य निचयः समूहो गणनिचयः । विनिमयविहितशकलयुगललघुललितपदवितया रचितः कृतो गणनिचयो यस्यां सा तथोक्ता । शिखायाः समचरणं विषमं विषमं च समं कृत्वा विहिता इत्यर्थः । शिखाखञ्जे दण्डकभेदौ । अत्र तु दर्शितं मात्रासमकप्रस्तावात् । इदमप्यर्धमिति ज्ञेयम् । पुनरीदृशेनार्धेन पद्यं स्यात् । तद्यथा—

समरशिरसि समुपगतगजसमजतरलतरतुरगगण तनुमथन
समखशयनमरिनृपतिजनहृदयभुवि दधति तव विषमविशिखाः ।
भयचकितनिजयुवतितनयपरिजनगुरुषु गदितवचनकृततमसि
क्षितिपतितिलक सकलनरनयनकुमुदशिशिरकिरण मगधपते ॥ (६१)

1. शशधरकरवितताय: क. 2. तव मधु० क.

६२. [1]अष्टावर्धे गा द्वयभ्यस्ता यस्याः सानङ्गक्रीडोक्ता ।
दलमपरमपि वसुगुणितसलिलनिधिलघुकविरचितपदवितति भवति ॥

तात्पर्यटीका

(६२) द्वाभ्यामभ्यस्ताः इति गुणिताः यस्मात् छन्दोव्यक्तेः अष्टौ गुरवो द्विगुणिताः सन्तः प्रथमार्धं भवति इति शेषः । दलमेवंविधमपरमपि भवति । कथंभूतम् । वसुगुणितेत्यादि । वसुभिर्गुणिताः सलिलनिधिभिर्मिताः ते च ते लघुकाश्च तैः विरचिता पदविततिर्यस्मिन् तदित्थंभूतम् । ईदृशं दलद्वयं यस्या भवति सा अनङ्गक्रीडा नाम उक्ता कथिता ॥ (६२)

सुकविहृदयानन्दिनी

(६२) द्वाभ्यां गुणिता अष्टौ गुरवः यस्याः सा षोडशगुरुः प्रथमेऽर्धे । अपरमप्यर्धं वसुभिरष्टभिर्गुणिताः सलिलनिधिलघवो द्वात्रिंशत्सङ्ख्याः । तैः रचितपदवितिः अनङ्गक्रीडा नाम । यथा--

त्यक्त्वाऽनङ्गक्रीडां मुक्तक्रीडां शत्रुक्षोणीपालाः ।
सुविषमवनभुवि विदधति भयमिह नरवरतिलक सुविजितरिपुनिवह ॥

सौम्या इत्येके ॥ (६२)

छन्दोवृत्तिः

(६२) अर्धे अष्टौ गा द्वयभ्यस्ता द्विकगुणिताः पूर्वार्धे षोडश गुरवः इत्यर्थः । अपरदलमपि वसुगुणितसलिलनिधिलघुकं भवति । अपरार्धे द्वात्रिंशल्लघवः इत्यर्थः ॥ (६२)

पञ्जिका

(६२) साऽनङ्गक्रीडा उक्ता अनङ्गक्रीडा इत्यभिहिता । सा का । यस्याः अर्धे पादद्वये अष्टौ गाः अष्टौ गुरवः द्वयभ्यस्ताः द्विगुणिताः षोडशगुरुकाः इत्यर्थः । इदमप्यर्धम् । पुनरीदृशेन अर्धेन पद्यं भवति । तद्यथा--

गर्जद्वैरिव्यूहध्वंसी त्रासाद् हिर्हिर्ज्ञातो गर्वः ।
लङ्कालङ्कारोऽयं राजा लब्धः पूर्णैः सङ्ख्यावद्भिः ॥ (६२)

---

1. इदमेवार्धं पञ्जिकाकारमते लक्षणमनङ्गक्रीडायाः । अपरार्धं तु अतिरुचिरायाः ।

६३. त्रिगुणनवलघुरवसिति गुरुरिति दलयुगकृततनुरतिरुचिरा ॥

इति द्विपात्प्रकरणम् ॥

इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकराख्ये छन्दसि सममात्राख्यो द्वितीयोऽध्यायः ।

तात्पर्यटीका

(६३) त्रिगुणा नवलघवो यस्यां सा तथोक्ता । अवसितिरवसानम् । तस्यां गुरुर्यस्याः सा तथोक्ता । इति ईदृशं तच्च दलयुगं च तेन कृता तनुः शरीरं यस्याः सा तथोक्ता अतिरुचिरा नाम मात्रावृत्तव्यक्तिर्भवति । इति मात्रावृत्तप्रकरणम् । संकीर्णवृत्ताध्याय इति । संकीर्यन्ते प्रकरणान्तरोक्तवृत्तलक्षणम् आश्रित्य सञ्ज्ञान्तरसंकरं भजन्ते इति संकीर्णानि । तानि च तानि वृत्तानि च संकीर्णवृत्तानि तेषामध्याय इति । संकीर्णत्वं तु संज्ञानां वैतालीयादारभ्य अर्धसमप्रकरणमभिव्याप्य द्रष्टव्यम् । यतोऽर्धसमाध्यायान्ते वदन्त्य[0] (४.१२) इति वक्ष्यति ।

अधुना संप्रदर्श्यते यानि मात्रासमकादीनि समाक्षरत्वे समलक्षणचरणानि तानि समवृत्तानि, अर्धसमलक्षणानि तानि अर्धसमवृत्तानि । वक्ष्यमाणसमवृत्तेषु संकरः प्रदर्श्यते । पङ्क्तौ शुद्धविराट् समवैतालीयमपि । पणवो मात्रासमकमपि वानवासिका च । चम्पकमाला समापातलिकाऽपि । त्रिष्टुभि दोधकं समापातलिका अपि । भ्रमरविलसिता वानवासिका च । स्वागता आपातलिका अपरान्तिकाऽपि । सुभद्रिका विषमवैतालीयमपि । मौक्तिकमाला वानवासिकापि । जगत्यां तोटकं मात्रासमकमपि । कुसुमविचित्रा वानवासिकाऽपि । प्रतिमाक्षरा चित्राऽपि । मालती समवैतालीयमपि । तामरसं समापातलिकाऽपि । शक्वर्यां प्रहरणकलिता वानवासिकाऽपि । अतिशक्वर्यां शशिकला चित्राऽपि । एवमन्यत्रापि समवृत्तेषु संकरोऽभ्यूह्यः । अथार्धसमेषु द्रुतमध्या समापातलिका वा । वेगवती आपातलिका वा । भद्रविराड् औपच्छन्दसकं वा । अपरवक्त्रं वैतालीयं वा । पुष्पिताग्रा औपच्छन्दसकं वा इत्युक्तमेव इति स्थितम् ।

इति श्रीरघुसूरिसूनुर्धात्रिविक्रमसूरिविरचितायां वृत्तरत्नाकरलौकिकछन्दःसूत्रतात्पर्यटीकायां द्वितीयोऽध्यायः ॥ (६३)

सुकविहृदयानन्दिनी

(६३) त्रिगुणा इति । त्रिभिर्गुणिता नव लघवो यस्यां सा तथोक्ता । सप्तविंशल्लघुरित्यर्थः । अवसितिरवसानं तस्मिन् गुरुर्यस्याः सा तथोक्ता । इति पूर्वोक्तप्रकारेण सप्त-

विशल्लघवोऽन्ते गुरुः। एवं दलयुगकृततनुः विरचितशरीरा अतिरुचिरा नाम। यथा—

समदगजगतिरुरुकुचयुगकृतनततनुरमलवदनकमला।
अनवरतमपहरति मम हृदयमिह हि युवतिरियमतिरुचिरा॥ (६३)

इति सुल्हणविरचितायां सुकविहृदयानन्दिन्यभिधानायां वृत्तरत्नाकरछन्दोवृत्तौ मात्रावृत्ताध्यायो द्वितीयः॥

छन्दोवृत्तिः

(६३) त्रिगुणा नवलघवः प्रान्ते [1]गुरुश्च इत्येवं दलद्वितयरचिता अतिरुचिरा नाम छन्दो भवति। यथा—

घनपरिमलमिलदलिकुलमुखरितनिखिलकमलकुवलय[2]वनः।
जनयति मनसि निरवधि मुदमविरतमिह मम मधुरतिरुचिरे॥

शिक्षादीनां वर्णछन्दसां विषमवृत्तत्वेऽपि यदत्र प्रकीर्णकेऽभिधानं तत्सुखार्थम्।

सद्वृत्तरत्नाकरनामधेयशास्त्रस्य वृत्तौ प्रथमेतरेऽत्र।
प्रकीर्णकाख्योऽजनि सोमचन्द्रविनिर्मितायामधिकार एषः॥

इति श्रीपण्डितसोमचन्द्रकृतायां वृत्तरत्नाकरछन्दोवृत्तौ द्वितीयाध्यायस्य मात्रासमकप्रकरणम्। समाप्तश्च द्वितीयोऽध्यायः॥ (६३)

पञ्जिका

(६३) इयम् अतिरुचिरा नाम स्यात्। अस्याः दलं वसुगुणितसलिलनिधिलघुकविरचितपदवितति भवति। लघव एव लघुकाः। 'यावादिभ्यः कन्' (पा. ५.४.२९) इति स्वार्थे कनप्रत्ययः। सलिलनिधयश्च ते लघुकाश्च इति कर्मधारयः। वसुभिरष्टभिर्गुणिताः वसुगुणिताः। तेच ते सलिलनिधिलघुकाश्च इति पुनः कर्मधारयः। तैः विरचिता पदवितिः पदानां पङ्क्तिः यस्मिन् तत् तथोक्तम्। कर्मधारयगर्भो बहुव्रीहिः।

---

1. गुरवः इ. 2. °वनं.

दलम् इति । एषा किंविशिष्टा । त्रिगुणा नवलघुः त्रयो गुणाः येषां ते त्रिगुणाः । त्रिभिर्गुणिताः नवलघवो नवसंख्याकाः लघुवर्णाः यस्यामिति बहुव्रीहिः । पुनः किंभूता । अवसितिगुरुः अवसितौ अवसाने गुरुः यस्याः सा तथोक्ता । पुनः कीदृशी । दलयुग-कृततनुः दलयुगेन पूर्वापरार्धाभ्यां कृता रुचिरा तनुः वर्णद्वयशरीरं यस्याः सा तथोक्ता । इदमर्धं दलम् । अपरमर्धमपि ईदृशं स्यात् । भावश्चायम् । अस्याः अतिरुचिरायाः प्रथमतृतीययोः पादयोः द्वात्रिंशल्लघवः । द्वितीयचतुर्थयोः पादयोः सप्तविंशतिः लघवः अन्ते गुरुरेकश्चेति । तद्यथा—

नवनलिननिभनयन शरदुडुपतिसदृशवदन सदरुणदसनवसन
प्रबलकलिमलिगहनदहन भुजबलविजितनिखिलभुवनपते ।
विशदगुणगणकलितकमलबलवदधिपमुख बिबुधसख मुदितहृदय
त्रिदशहित चतुरुदधिवलयितधरणिधव जय जय नृपतिगुरो ॥

इति द्विपात्प्रकरणम् ॥

इति श्रीशाक्यमुनेः भगवतः सर्वज्ञस्य परमोपासकेन गौडदेशवास्तव्येन श्रीबौद्धागमचक्रवर्तिना भूसुरेणाचार्येण विरचितायां वृत्तरत्नाकरपञ्जिकायां मात्रावृत्त-लक्ष्यलक्षणविभागप्रतिपादनो नाम द्वितीयोऽध्यायः ॥ (६३)

तृतीयोऽध्यायः

वर्णसमवृत्तानि ।

[1]उक्तायाम् ।

६४. ग् श्रीः ॥

तात्पर्यटीका

(६४) अङ्घ्रयो यस्य इति लक्षितानामुक्ताद्युत्पन्नानां समवृत्तानां मध्ये कानिचित् गणपरिपाट्या कानिचित् तस्या यतिविशिष्टया लक्षितान्यनूद्य अधिकारिणां व्यवहार-सौकर्याय लक्ष्यलक्षणसंयुतैः चरणसूत्रैः नामभिः निर्देष्टुमाह--

गुरुगणोपलक्षिता श्रीः नाम व्यक्तिर्भवति । अनेनापरमपि चरणत्रयं व्याख्यातं समवृत्तत्वात् । उक्ता । इयमुक्तापि अभिधीयते । गोत्वमेवं व्यक्तिर्जातिं न जहाति इति प्रसिद्धिः । एवमुक्तादीनाम् उत्कृत्यन्तानामपि व्याख्या कार्या । वक्ष्यमाणं प्रायः सुगमम् ॥ (६४)

सुकविहृदयानन्दिनी

(६४) [2]एकाक्षरायां जातौ एको गुरुर्यस्य वृत्तस्य पादे तद्वृत्तं श्रीर्नाम । यथा- (६४)

छन्दोवृत्तिः

(६४) उक्ता इति लुप्तविभक्त्यन्तं पदम् । एवं सर्वजातिष्वपि । उक्तायां जातौ एकाक्षरे पादे गुरुश्चेत् तदा श्रीः नाम छन्दो यथा--

गीर्धीः श्रीः स्तात् ॥ (६४)

---

1. पूर्वं यदुक्तं समं वृत्तमित्यथो समदृत्तभेदानाह इत्यधिकम् ब. 2. उक्ता इति लुप्तविभक्त्यन्तं पदम् एवं सर्वजातिष्वपि । उक्तायां जातौ एकाक्षरे पादे एको गुरुश्चेद् भवति । व.

अत्युक्तायाम् ।

६५. गौ स्त्री ॥

पञ्चिका

(६४) अथ इदानीं तेषामेवोक्तात्युक्तादीनामुक्तानां छन्दसां क्रमेण लक्ष्यलक्षणे दर्शयन्नाह–उक्ता इत्यादि । उक्तायाम् उक्तानामच्छन्दसि उदाहरति इति शेषः । **ग्** इति एकस्मिन् पादे एक एव गुरुश्चेत्, तदा श्रीः नाम वृत्तं स्यात् । **अस्योदाहरणम्**—

ग	ग	ग	ग
ऽ	ऽ	ऽ	ऽ

श्रीस्त्वाम् । सा ऽव्यात् ॥ (६४)

सुकविहृदयानन्दिनी

(६५) गुरुद्वयं यत्र तद्वृत्तं स्त्री नाम । यथा—

आद्या सा स्त्री । गौरी पायात् ॥ (६५)

छन्दोवृत्तिः

(६५) यथा—

भ्रातर्दृष्टा । इष्टा सा स्त्री ॥ (६५)

पञ्चिका

(६५) गश्च गश्च गौ । 'सरूपाणामेकशेष एकविभक्तौ' (पा. १.२.६४) इति एकशेषः । **गौ** गुरुद्वयं चेत्, तदा स्त्री नाम स्यात् । तद्यथा—

ग	ग	ग	ग	ग	ग	ग	ग
ऽ	ऽ	ऽ	ऽ	ऽ	ऽ	ऽ	ऽ

वाणी विद्याम् । तुभ्यं दद्यात् ॥ (६५)

मध्यायाम् ।

६६. **मो नारी ॥**

६७. **रो मृगी ॥**

सुकविहृदयानन्दिनी

(६६) यत्र मगणः तद्वृत्तं नारी नाम । यथा—

श्रीनारी[1]गोविन्दौ । भूयास्तां वो वृद्ध्यै ॥ (६६)

छन्दोवृत्तिः

(६६) मगणश्चेत् तदा नारी नाम छन्दः । यथा—

निःसारे संसारे । सारं किं स्यान्नारी ॥ (६६)

पञ्चिका

(६६) मः मगणश्चेत् तदा नारी नाम स्यात् । तद्यथा—

म म म म

ऽऽऽ ऽऽऽ ऽऽऽ ऽ ऽ ऽ

सर्वज्ञो देवानाम् । मर्त्यानां शास्ता स्यात् ॥ (६६)

सुकविहृदयानन्दिनी

(६७) यत्र रगणः तद्वृत्तं मृगी नाम । यथा—

वध्यतां यात्यसौ । गीतगा हा मृगी ॥ (६७)

छन्दोवृत्तिः

(६७) रगणश्चेत् तदा मृगी । यथा—

वल्लभा गेहिनी । या मृगीलोचना ॥ (६७)

६८. [1]य केसा ॥

प्रतिष्ठायाम् ।

६९. [2]म्गौ चेत् कन्या ॥

पञ्चिका

(६७) रः रगणश्चेत्, तदा मृगी नाम स्यात्त । यथा--

र र र र
ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ

श्रीघनः सन्ततम् । मन्मने वर्तताम् ॥ (६७)

पञ्चिका

(६८) येत्यत्र छन्दस्त्वात् विभक्तिलोपः । यः यगणश्चेत्, तदा केसा नाम स्यात् । तद्यथा--

य य य य
।ऽऽ ।ऽ ऽ ।ऽऽ ।ऽ ऽ

मुनीन्द्र त्वदङ्घ्रिम् । नमामोऽनुकालम् ॥ (६८)

सुकविहृदयानन्दिनी

(६९) प्रतिष्ठायाम् इत्यादि । [3]चेत् यदि पादे मगणगुरू भवतः तद् वृत्तं कन्या नाम । कामक्रीडा रूढा या सा । एषा कन्या कीदृश्यस्ताः ॥

तथा च--

सर्वेषां यः सामान्यर्धिः । तस्येशः स्याद् भयो [4]वृद्धिः ॥ (६९)

छन्दोवृत्तिः

(६९) मगणो गुरुश्चेत तदा कन्या । यथा--

सर्वैर्देवैर्ययेहांचक्रे । सेयं मन्ये धन्या कन्या ॥ (६९)

---

1. 2. एते सूत्रे केषुचित पुस्तकेषु न स्तः निसा. 3. चेत् नास्ति ब. 4. वृद्ध्यै ब.

७०. यगौ व्रीडा ॥

७१. ज्ग लासिनी ॥

७२. भगौ सुमुखी ॥

पञ्चिका

(६९) प्रतिष्ठायाम् उदाहरति । म् च गश्च म्गौ । मगणगुरू चेत् तदा कन्या नाम स्यात् ।

म ग म ग म ग म ग
ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ
बुद्धं रत्नं धर्मं रत्नम् । सङ्घं रत्नं नित्यं वन्दे ॥ (६९)

पञ्चिका

(७०) यश्च गश्च यगौ । यगणगुरू चेत् तदा व्रीडा नाम स्यात् । तद्यथा—

य ग य ग य ग य ग
।ऽ ऽ ऽ ।ऽ ऽ ऽ ।ऽ ऽ ऽ ।ऽ ऽ ऽ
अयं बुद्धो दयाब्धिस्ते । सदा भक्ते शुभं क्र्यात् ॥ (७०)

पञ्चिका

(७१) ज् च गश्च ज्गेति द्वन्द्व । विभक्तिलोपः छन्दस्त्वात् । ज्ग जगणगुरू चेत् तदा लासिनी नाम स्यात् । तद्यथा—

ज ग ज ग ज ग ज ग
।ऽ। ऽ ।ऽ। ऽ ।ऽ। ऽ। ऽ।ऽ
तथागतो भवत्त्रयम् । निहन्ति ते न संशयः ॥ (७१)

पञ्चिका

(७२) भ् च गश्च भ्गौ । भगणगुरू चेत् तदा सुमुखी नाम स्यात् । तद्यथा—

भ ग भ ग भ ग भ ग
ऽ।।ऽ ऽ।।ऽ ऽ।।ऽ ऽ ।।ऽ
लोकगुरुं बुद्धमर्हम् । दुःखनुदे नौमि सदा ॥ (७२)

७३. **सुमतिः स्गौ ॥**

७४. **गौ समृद्धिः ॥**

सुप्रतिष्ठायाम् ।

७५. **भ्गौ गिति पङ्क्तिः ॥**

पञ्चिका

(७३) स् च गश्च स्गौ । सगणगुरू चेत् तदा सुमतिः नाम स्यात् । तद्यथा—

स ग स ग स ग स ग
।।ऽ ऽ।।ऽ ऽ ।।ऽ ऽ।।ऽ ऽ
मनसाऽहं वचसाऽहम् । वपुषाऽहं जिनमिच्छे ॥ (७३)

पञ्चिका

(७४) र् च गश्च गौ । रगणगुरू चेत् तदा समृद्धिः नाम स्यात् । तद्यथा—

र ग र ग र ग र ग
ऽ।ऽऽ ऽ।ऽ ऽ ऽ।ऽ ऽ ऽ।ऽ ऽ
ज्ञानसिन्धुं दीनबन्धुम् । पूजयेऽहं शाक्यसिंहम् ॥ (७४)

सुकविहृदयानन्दिनी

(७५) यत्र [1]भगणो द्वौ गुरू भवतः, तद् वृत्तं पङ्क्तिः नाम [2]भवति । यथा—

व्योमनि नीलां नीरदपङ्क्तिम् । वीक्ष्य विपन्नाः प्रोषितवध्वः ॥ (७५)

छन्दोवृत्तिः

(७५) भगणौ गुरुद्वयम् तदा पङ्क्तिः । यथा—

फाल्गुनमासे फुल्लवनान्ते । पावकतुल्या किंशुकपङ्क्तिः ॥ (७५)

---

1. भगणात् व. 2. भवति नास्ति अ.

७६. **गौयिति प्रीतिः ॥**

७७. **सती जगौ गः ॥**

पद्यचिका

(७५) सुप्रतिष्ठायामुदाहरति । भ् च गश्च भ्गौ ग गुरुः । भगणगुरुद्वयं चेत् तदा इति इयं पद्धतिः नाम स्यात् । तद्यथा—

भ ग ग भ ग ग भ ग ग भ ग ग
ऽ।।ऽऽ ऽ।।ऽऽ ऽ। ।ऽ ऽ ऽ। ।ऽऽ
हाटकवर्णः सद्गुणपूर्णः । एष मुनीन्द्रः पातु भवन्तम् ॥ (७५)

पद्यचिका

(७६) र् च गश्च गौ ग् गुरुः । रगणगुरुद्वयं चेत् तदा इति इयं प्रीतिः नाम स्यात् । तद्यथा—

र ग ग र ग ग र ग ग र ग ग
ऽ।ऽ ऽऽ ऽ।ऽ ऽ ऽ ऽ।ऽ ऽऽ ऽ।ऽ ऽ ऽ
भेजिरे बुद्धं ये जनाः सिद्धम् । सर्वथा तेषां दुर्गतिर्नासीत् ॥ (७६)

पद्यचिका

(७७) जश्च गश्च जगौ । गः गुरुः । जगणगुरुद्वयं चेत् तदा सती नाम स्यात् । तद्यथा—

ज ग ग ज ग ग ज ग ग ज ग ग
।ऽ।ऽऽ ।ऽ।ऽ ऽ ।ऽ। ऽ ऽ ।ऽ ।ऽ ऽ
अघौघहर्त्रे समस्तशास्त्रे । जनाय गोप्त्रे नमोऽस्तु तस्मै ॥ (७७)

७८. मन्दा तलगैः ॥

गायत्र्याम् ।

७९. त्यौ स्तः तनुमध्या ॥

पञ्चिका

(७८) तश्च लश्च गश्च तलगाः । तैः तगणलघुगुरुभिः मन्दा नाम स्यात् । तद्यथा—

त ल ग त ल ग त ल ग त ल ग
ऽ ऽ । । ऽ ऽ ऽ । । ऽ ऽ ऽ । । ऽ ऽ ऽ । । ऽ
बुद्धं शरणं ये ये न गताः । ते ते कुधियो मन्दा नियतम् ॥ (७८)

सुकविहृदयानन्दिनी

(७९) यत्र तगणयगणौ भवतः, तद्वृत्तं तनुमध्या नाम । यथा—

कस्यापि महद्भिः पुण्यैरनुकूला ।
श्यामा तनुमध्या गेहे भवति स्त्री ॥ (७९)

छन्दोवृत्तिः

(७९) तगणयगणौ भवतः । यथा—

लावण्यपयोधिः सौभाग्यनिधानम् ।
सा कस्य न हृद्या बाला तनुमध्या ॥ (७९)

पञ्चिका

(७९) गायत्र्यामुदाहरति । त च यश्च त्यौ तगण यगणौ स्तः भवतश्चेत् तदा तनुमध्या नाम स्यात् । तद्यथा—

त य त य त य त य
ऽ ऽ । । ऽ ऽ ऽ ऽ । । ऽ ऽ ऽ ऽ ऽ । । ऽ ऽ ऽ । । ऽ ऽ
अङ्गीकृतनन्दं शुद्धोदननन्दम् । वृन्दारकवन्द्यं वन्दे मुनिचन्द्रम् ॥ (७९)

८०. **शशिवदना न्यौ ॥**

८१. **मौ सावित्रीमाहुः ॥**

सुकविहृदयानन्दिनी

(८०) यत्र नगणयगणौ भवतः, तद्वृत्तं शशिवदना नाम । यथा—

[1]मलयजलेपः [2]कुवलयशय्या ।
दहति [3]वियोगे शशिवदनायाः ॥ (८०)

छन्दोवृत्तिः

(८०) नगणयगणौ यथा—

मनसिजलीला कुलगृहभूमिः ।
कुवलयनेत्रा शशिवदनेयम् ॥ (८०)

पञ्जिका

(८०) न् च!यश्च न्यौ । नगणयगणौ यदि स्तः तदा शशिवदना नाम स्यात् । तद्यथा—

न य न य
। । । । ऽऽ । । । । ऽऽ
विजयिनि बुद्धे मनसिजयुद्धे ।
कुसुममवर्षन् सुरजनसङ्घाः ॥ (८०)

पञ्जिका

(८१) मश्च मश्च मौ । मगणद्वयं चेत् तदा सावित्रीमाहुः नाम्ना सावित्री इति ब्रुवते आचार्याः इति शेषः । तद्यथा—

---

1. °लेपं ब. 2. °शय्याम् ब. 3. वियोगः ब.

८२. भ्रौ यस्याः सा नदी ।।

८३. म्सौ प्रोक्तं मुकुलम् ।।

८४. मालिनी भोभ्यां स्यात् ।।

म म म म
ऽऽ ऽऽ ऽ ऽ ऽऽ ऽऽ ऽ ऽ
बुद्धे धर्मे सङ्घे येषां गाढा भक्तिः । (८१)
हस्ते तेषां मुक्तिर्भुक्तिः पादाधः स्यात् ।।

पञ्चिका

(८२) म् च रश्च भ्रौ । यस्याः मगणरगणौ स्याताम्, सा नदी नाम स्यात् । **तद्यथा—**

म र म र
ऽ ऽ ऽ ऽ । ऽ ऽ ऽ ऽ ऽ । ऽ
ते शूरास्ते बुधास्ते स्युर्धन्या जनाः ।
ये सर्वज्ञं तदा बुद्धं भक्त्या नताः ।। (८२)

पञ्चिका

(८३) म् च सश्च म्सौ । मगणसगणौ चेत् तदा मुकुलं प्रोक्तं मुकुलमिति नाम्ना कथितम् । तद्यथा--

म स म स
ऽ ऽ ऽ । । ऽ ऽ ऽ ऽ । । ऽ
सा जिह्वा सुगतं या स्तौति प्रथितम् ।
तच्चित्तं सततं सद्धर्मप्रयतम् ।। (८३)

पञ्चिका

(८४) र् च मश्च मौ, रगणमगणौ । ताभ्यां मालिनी स्यात् । **तद्यथा—**

८५. **सयुगं रमणी ॥**

८६. **त्सौ चेद् वसुमती ॥**

र म र म
ऽ ।ऽ ऽ ऽ ऽ ऽ।ऽ ऽऽऽ
मा मनो मुञ्चाऽमुं सर्वथा सर्वज्ञम् ।
त्वामयं दुःखाब्धेर्मोक्ष्यति प्रेम्णैव ॥ (८४)

पञ्जिका

(८५) सरय युगं सयुगम् । सगणद्वयं चेत् तदा रमणी नाम स्यात् । तद्यथा--

स स स स
। ।ऽ । ।ऽ । ।ऽ । ।ऽ
स गुणी स धनी स कुली स बली ।
स कृती भुवि यः सुगतार्चनकृत् ॥ (८५)

सुकविहृदयानन्दिनी

(८६) तगणसगणौ पादे चेत् भवतः, तद्वृत्तं वसुमती नाम । यथा—

पृथ्वीं शृतवता राज्ञा नयवता ।
मुद्यज्जनपदा श्लाघ्या वसुमती ॥ (८६)

छन्दोवृत्तिः

(८६) तगणसगणौ यथा--

रौद्रै रणशतैर्जित्वा रिपुकुलम् ।
श्रीवाचनृपतिर्भुनक्ते वसुमतीम् ॥ (८६)

उष्णिहि ।

८७. म्सौ गः स्यान् मदलेखा ॥

पञ्चिका

(८६) त् च सश्च त्सौ । तगणसगणौ चेत् तदा वसुमती नाम स्यात् । तद्यथा—

त स त स
ऽऽ। ।।ऽ ऽऽ। ।।ऽ
ज्ञानेन सगुणै रूपेण कृपया ।
सर्वज्ञसदृशः कोऽपीह न पुमान् ॥ (८६)

सुकविहृदयानन्दिनी

(८७) मगणसगणौ गुरुश्च यत्र तद्वृत्तं मदलेखा नाम । यथा—

लावण्याम्भसि मग्ने तस्याः काममहेभे ।
भ्रष्टेयं स्तनकुम्भात् रोमाली मदलेखा ॥ (८७)

छन्दोवृत्तिः

(८७) अथ उष्णिक् जातिः । मगणसगणौ गुरुश्च मदलेखा । यथा—

यावत् केसरिनादो नायाति श्रुतमार्गम् ।
तावद् गन्धगजानां स्याद् गण्डे मदलेखा ॥ (८७)

पञ्चिका

(८७) उष्णिहि उदाहरति । म् च सश्च म्सौ, गः गुरुः । मगणसगणौ गुरुरेकः चेत् तदा मदलेखा नाम स्यात । तद्यथा—

म स ग म स ग
ऽऽऽ।।ऽ ऽ ऽऽ ऽ ।।ऽ ऽ
सद्धर्मश्रवणं मे धर्मे धीः सततं स्यात् ।
धर्म्यं कर्म च भूयाच्छास्ता मेऽस्तु स एव ॥ (८७)

८८. [1]**कुमारललिता ज्सौ ग् ॥**

८९. [2]**मधुमती नभगाः ॥**

सुकविहृदयानन्दिनी

(८८) जगणसगणौ गुरुश्च तद्वृत्तं कुमारललितं नाम । यथा—

कुमारललितानि प्रमोदजननानि ।
न याति मुदमन्यां विलोक्य जननी का ॥ (८८)

छन्दोवृत्तिः

(८८) जगणसगणौ गुरुश्च तदा कुमारललितम् । यथा—

नरेन्द्रगणसेनावृतः प्रथितशक्तिः ।
दधासि नृपते त्वं कुमारललितानि ॥ (८८)

पञ्चिका

(८८) ज् च सश्च ज्सौ ग् गुरुः । जगणसगणौ गुरुरेकश्चेत् तदा कुमारललिता नाम स्यात् । तद्यथा—

ज स ग ज स ग
। ऽ । । । ऽ ऽ । ऽ । । । ऽ ऽ
स योजयति शास्ताऽपि नो मदनगर्वम् ।
सदाऽस्तु तव शास्ता स राहुलयतीन्द्रः ॥ (८८)

तात्पर्यटीका

(८९) मधुमच्छन्दः तस्मिन् इति ॥ (८९)

---

1. कुमारललितम् सुकवि. छं. 2. मधुमति ननगा सुकवि. छं.

९०. सरगाः हंसमाला ॥

सुकविहृदयानन्दिनी

(८९) यस्य वृत्तस्य पादे द्वौ नगणौ गुरुश्च भवति तद्वृत्तं मधुमती नाम । यथा—

इह मधुसमये प्रविचरति सुखम् ।
अलिकुलमधिकं मधुमति कमले ॥ (८९)

छन्दोवृत्तिः

(८९) मधुमति ननगा । मधुमति छन्दसि नगणौ द्वौ गुरुश्च । यथा—

इह मधुसमये विचरति ससुखम् ।
अलिकुलमधिकं मधुमति कमले ॥ (८९)

पञ्चिका

(८९) नश्च भश्च गश्च नभगाः । नगणभगणौ गुरुरेकश्चेत्, तदा मधुमती नाम स्यात् । तद्यथा—

न भ ग न भ ग
।।।s ।।s ।।।s।।s
सकलशास्त्रपटुः सततधर्ममतिः ।
जयति मौर्यभवो विजयबाहुमुनिः ॥ (८९)

सुकविहृदयानन्दिनी

(९०) यत्र सगणरगणगुरवः, तद्वृत्तं हंसमाला नाम । तद्यथा—

शरदि प्रेक्ष्य यान्तीं मुदितां हंसमालाम् ।
त्यजति प्रेयसीं कः सुखलिप्सुः स्वतन्त्रः ॥ (९०)

छन्दोवृत्तिः

(९०) सगणरगणौ गुरुश्च ॥ (९०)

अनुष्टुभि ।

९१. भौ ग्गिति चित्रपदा गः ॥

पञ्चिका

(९०) सश्च रश्च मश्च सरगाः । लगणरगणौ मुरुरेकश्चेत्, तदा हंसमाला नाम स्यात् । तद्यथा—

स र ग स र ग
IISSISS IISSISS
सगुरुर्धर्मभाजां सततप्रीतिचेताः ।
भुवने राहुलाख्यो मुनिरास्तां सुहृन्मे ॥ (९०)

सुकविहृदयानन्दिनी

(९१) भगणद्वयं गुरू यत्र तद्वृत्तं चित्रपदा नाम । यथा—

नूपुरशब्दमनोज्ञं ताललयान्वितगीतम् ।
पीनपयोधरयुग्मा नृत्यति चित्रपदेयम् ॥ (९१)

छन्दोवृत्तिः

(९१) द्वौ भगणौ गुरू च चित्रपदा नाम । यथा—

तस्य कुलं जनशस्यं जन्म च चारु नरस्य ।
सूक्तविचित्रपदागीः विज्ञमता भुवि यस्य ॥ (९१)

पञ्चिका

(९१) अनुष्टुभि उदाहरति । भश्च भश्च ग् ग इति गुरू । भगणद्वयं गुरुद्वयं चेत्, तदा इत्येषा चित्रपदा नाम स्यात् । तद्यथा—

भ भ ग ग भ भ ग ग
SIISIISS SISISS
सहुलनाममुचीन्द्रः केव सखे स चकार ।
ज्ञातमिदं स हि जातो धर्मसुधारसधारैः ॥ (९१)

९२. **मो मो गो गो विद्युन्माला ॥**

९३. **माणवकं भात्तलगाः ॥**

सुकविहृदयानन्दिनी

(९२) द्वौ मगणौ द्वौ [1]च गुरू, तद्वृत्तं विद्युन्माला नाम। [2]चतुर्भिर्यतिः। यथा—

ममैव छन्दसि– मौ गौ वेदैर्विद्युन्माला।
व्योम्नि व्याप्ते नेत्य रेषा कुर्वन्ती व योग्यां मो।
नम्र त्वां भर्तृस्त्रीणां गर्जत्येका विद्युन्माला ॥ (९२)

छन्दोवृत्तिः

(९२) मगणौ द्वौ च गुरू विद्युन्माला। यथा—

सत्यं रम्या भोगा भोगाः कान्ताः कान्ताः प्राज्यं राज्यम्।
किं कुर्वन्ति प्राज्ञा यस्मादायुर्विद्युन्मालालोलम् ॥

अत्र चतुर्भिर्यतिमाहुः केचित् ॥ (९२)

पञ्चिका

(९२) मो म इति मगणद्वयं गो ग इति गुरुद्वयं चेत्, तदा विद्युन्माला नाम स्यात्। तद्यथा—

म म गग म म ग गं
S S S S SS SSSSSS SS S S
विद्युन्माला यस्या मूर्तेरायुःसाम्यं कालं कञ्चित्।
सत्कारुण्या धारासारा सा मौनेन्द्री युष्मानव्यात् ॥ (९२)

सुकविहृदयानन्दिनी

(९३) भगणतगणलघुगुरवो यत्र तद्वृत्तं माणवकं नाम। यथा—

---

1. यत्र ब. 2. अत्र इत्यधिकम् ब.

९४. म्नौ गौ हंसरुतमेतत् ॥

वाञ्छसि शं चेद् विपुलं तर्हि सखे मुञ्च शठम् ।
[1]माधवकं हास्यरुचि मित्रमपि त्वं चपलम् ॥

चतुर्भिः यतिरित्याम्नाय । माणवकाक्रीडितम् इति पिङ्गलः ॥ (९३)

छन्दोवृत्तिः

(९३) भगणात् तगणः ततो लघुगुरू च तदा माणवक[2] छन्दो यथा—

शीतरुजान्योन्यरणद्दन्तरवैर्विस्वरकम् ।
साम पठन् माणवकोऽशासि मुहुर्यत्र शुकैः ॥

अत्रापि चतुर्भिः यतिमन्ये ॥ (९३)

पञ्चिका

(९३) तश्च लश्च गश्च तलगाः, तगणलघुगुरवः । भात् भगणात् परतः तगणलघुगुरवो यदि स्युः तदा माणवकं नाम स्यात् । तद्यथा—

भ त लग भ त लग
S ।।S S ।।S S ।।SS ।।S
साधुमतं बौद्धमतं दुर्मतिभिर्नानुमतम् ।
सत्यददं नाधिगता भास्करभोलूकगणैः ॥ (९३)

सुकविहृदयानन्दिनी

(९४) यत्र मगणनगणौ द्वौ गुरू च भवतः तद्वृत्तं हंसरुतम् नाम । यथा—

दृष्ट्वाकाशकुसुमानि श्रुत्वा हंसरुतमेतत् ।
कामार्तः शरदि पान्थः कष्टं जीवति निकृष्टः ॥ (९४)

---

1. मेधां किं ज्ञास्यसि रुचिं अ. क. 2. नाम इत्यधिकम् इ.

९५. **नागरकं भरौ लगौ ॥**

९६. **नाराचिका तरौ लगौ ॥**

छन्दोवृत्तिः

(९४) मगणनगणौ द्वौ गुरू यथा—

अभ्यागामिशरल्लक्ष्मीमञ्जीरक्वणिततुल्यम ।
तीरे राजति नदीनां रम्यं हंसरुतमेतत् ॥ (९४)

पञ्चिका

(९४) मश्च नश्च म्नौ, गश्च गश्च गौ, मगणनगणौ गुरुद्वयं चेत्, तदैतत् हंसरुतं नाम स्यात् । तद्यथा--

म न ग ग म न ग ग
S S S I I I S S S S S I I I S S
यस्माद्बुद्धसदृशोऽयं यस्माद्धर्मसदृशश्च ।
यस्मात् सङ्घसदृशः स्यात् तस्माद्धर्मगुरुमेनम् ॥ (९४)

पञ्चिका

(९५) भश्च रश्च भरौ, लश्च गश्च लगौ, भगणरगणौ लघुगुरू चेत् तदा नागरकं नाम स्यात् । तद्यथा--

भ र ल ग भ र ल ग
S I I S I S I S S I I S I S I S
प्राणिवधं मृषावचः स्तेयसुरापरस्त्रियः ।
पञ्च सखे विमुञ्च तत् किं च कुरु स्वमङ्गलम् ॥ (९५)

मुकविहृदयानन्दिनी

(९६) ज्योत्स्नावितानमैन्दवं पश्य प्रिये मनोरमम् ।
कोपं त्यज प्रियं भज स्त्रीणां प्रियं हि यौवनम् ॥ (९६)

९७. **जौ समानिका गलौ च ॥**

पञ्चिका

(९६) तश्च रश्च तरौ, लश्च गश्च लगौ। तगणरगणौ लघुगुरू चेत् तदा नाराचिका नाम स्यात्। तद्यथा--

त र ल ग त र ल ग
S S ।S।S ।S S S।S।S।S
भास्वद्विभूषणाम्बरा कर्पूरकुन्दसुन्दरी।
सा ते सरस्वती सदा जाड्यं धियो हरत्वरम् ॥ (९६)

सुकविहृदयानन्दिनी

(९७) रगणजगणौ गुरुलघू च यत्र तदवृत्तं समानिका नाम। यथा—

ते समानिका च यान्ति शत्रवो भयेन धीर।
राज्यसम्पदं विहाय ये ह्यजेयबाहवोऽपि ॥ (९७)

छन्दोवृत्तिः

(९७) रगणजगणगुरुलघवः स्युः, तदा समानिका नाम छन्दः। यथा--

रागरोषमोहदोषदारुदावपावकस्य।
तीर्थिकैः समं जिनस्य ये समानिका कलापि ॥ (९७)

पञ्चिका

(९७) र् च जश्च जौ गश्च लश्च गलौ, रगणजगणौ गुरुलघू च यदि स्याताम् तदा समानिका नाम स्यात्। तद्यथा--

र ज ग ल र ज ग ल
S ।S ।S ।S। S।S।S ।S।
मञ्जुकुञ्जसङ्गतापि तारहारमण्डितापि।
वस्तुतत्त्वदास्वनेन रोचते वराङ्गनेह ॥ (९७)

९८. **प्रमाणिका जरौ लगौ ॥**

९९. **वितानमाभ्यां यदन्यत् ॥**

सुकविहृदयानन्दिनी

(९८) जगणरगणौ लघुगुरू च यत्र तद्वृत्तं प्रमाणिका नाम । यथा--

प्रवाति दक्षिणानिलः सुपुष्पिताम्रकिंशुकः ।
वसन्त एष सांप्रतम् प्रमाणिकाऽत्र कोकिला ॥ (९८)

छन्दोवृत्तिः

(९८) जगणरगणौ लघुगुरू तदा प्रमाणी नाम छन्दः । अत्र स्वार्थे कः । यथा--

तव प्रमातुमिच्छतां यशश्चुलुक्यभूपते ।
समग्रमानजित्वरी जगत्त्रयी प्रमाण्यभूत् ॥ (९८)

पञ्चिका

(९८) जश्च रश्च जरौ, लश्च गश्च लगौ । जगणरगणौ लघुगुरू चेत्, तदा प्रमाणिका नाम स्यात् । तद्यथा--

ज र ल ग ज र ल ग
।ऽ।ऽ।ऽ।ऽ ।ऽ।ऽ।ऽ।ऽ
मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ ।
प्रशस्तवाचकान्यमून्यः शुभावहो विधिः ॥ (९८)

तात्पर्यटीका

(९९) आभ्यां समानिकाप्रमाणिकाभ्यां अन्यत् यद्यनुष्टुभि समवृत्तं तद् वितानसंज्ञम् इति । आदौ एव वर्जनात् मूर्धोक्तानां चित्रपदाविद्युन्मालादीनाम् अभिधानविकल्पः ॥ (९९)

सुकविहृदयानन्दिनी

(९९) आभ्यां समानिकाप्रमाणिकाभ्यां यदन्यदष्टाक्षरं छन्दः तद् वितानं नाम। आभ्यां यदन्यदिति ब्रुवन् सूत्रकारो वितानस्य अनेकप्रकारत्वं दर्शयति। अन्यथा गण-नियमं ब्रूयात्। यथा—

ज्योत्स्नावितानमैन्दवं पश्य प्रिये मनोरमम्।
कोपं त्यज प्रियं भज स्त्रीणां प्रियं हि यौवनम्॥

अन्यच्च—

कङ्कालमालाधारिणं कन्दर्पदर्पहारिणम्।
संसारबन्धमोचनं वन्दामहे त्रिलोचनम्॥

अपि च—

तस्याः स्मरामि सुन्दरं चन्द्रोपमानमाननम्।
कन्दर्पचापभङ्गुरं भ्रुतिभ्रमोपशोभितम्॥

अन्यदतो हि वितानम् इति श्वेतपटजयदेवेन यदुक्तम् भौमिति चित्रपदा गः इत्यनेन गतार्थत्वात्॥ (९९)

छन्दोवृत्तिः

(९९) अनुष्टुभि जातौ समानिकाप्रमाणिकाभ्यां यदन्यत् छन्दो दृश्यते, तद् वितान-सञ्ज्ञम्। यथा—

कङ्कालमालधारिणम्, कन्दर्पदर्पहारिणम्।
संसारबन्धमोचनं वन्दामहे त्रिलोचनम्॥

तथा—

तस्याः स्मरामि सुन्दरं चन्द्रोपमानमाननम्।
कन्दर्पचापभङ्गुरं भ्रूविभ्रमोपशोभितम्॥

नाराचकं तरौ लगौ॥ (९९)

बृहत्याम् ।

१००. राज्ञसाविह हलमुखी ॥

पञ्चिका

(९९) आभ्यां समानिकाप्रमाणिकाभ्यां यद अन्यद वृत्तं तद्वितानं नाम स्यात् । अन्यदिति सगानिकायामादौ रगणः पश्चात् जगणः ततः गुरुलघू च । प्रमाणिकायामादौ जगणः पश्चात् रगणः, ततः लघुगुरू च इति क्रमव्युत्क्रमाभ्यां समानिकाप्रमाणिके निष्पन्ने । आभ्यां क्रमाभ्यां योऽन्यत्क्रमः जगणादिः तगणमध्यः गुरुद्वयं च, रगणादिः सगणमध्यः लघुद्वयं च, तद्वितानं नाम स्यात् इत्यर्थः । तद्यथा—

ज त ग ग ज त ग ग
।ऽ ।ऽ ऽ।ऽ ऽ।ऽ ।ऽ ऽ।ऽ ऽ
यदा यदा धर्महानिर्नृणां भवेत् पापभाजाम् ।
तदा तदा दोषराशिर्विवृद्ध्य संमोहयेत्तान् ॥

र स लल र स लल
ऽ। ऽ ।।ऽ।। ऽ।ऽ ।। ऽ।।
पाहि मां पुरुषोत्तम सर्वतो जिन गौतम ।
भक्तिरस्तु सदा त्वयि सत्कृपां कुरु तां मयि ॥ (९९)

सुकविहृदयानन्दिनी

(१००) यत्र रगणनगणसगणाः तद् वृत्तं हलमुखी नाम । यथा—

निन्दितां वपुषि पुरुष– द्वेषिणीं विरलदशनाम् ।
तां सखे परिणयविधौ दूरतस्त्यज हलमुखीम् ॥ (१००)

त्रिभिर्यतिः इत्युपदेशः ॥

छन्दोवृत्तिः

(१००) रगणात् नगणसगणौ हलमुखी नाम छन्दः । यथा—

दन्तुरं कपिशनयनम् यन्मुखं विकटचक्षुकम ।
तां स्त्रियं सुखमभिलषन् दूरतस्त्यज हलमुखीम् ॥ (१००)

१०१. भुजगशिशुभृता नौ मः ॥

पञ्चिका

(१००) बृहत्यामुदाहरति । नश्च सश्च नसौ । इह रात् रगणात् परतः नगणसगणौ चेत्, तदा हलमुखी नाम स्यात् । तद्यथा—

र न म र न स
ऽ।ऽ।।।।।ऽऽ । ऽ।।।।।ऽ
बाहुलेयचरणयुगं वाञ्छितार्थदमनुकलम् ।
सिद्धयेऽत्र शुचिवचसा संजपन्तु बहु जनताः ॥ (१००)

सुकविहृदयानन्दिनी

(१०१) द्वौ नगणौ मगणश्च यत्र, तद्वृत्तं भुजगशिशुभृता नाम । यथा—

वरतरुलवलीवल्ली–किशलयगहनच्छन्नाः ।
भुजगशिशुभृता रम्या मलयगिरिवनोद्देशाः ॥
भद्रिका भवति रो नरौ ॥ (१०१)

छन्दोवृत्तिः

(१०१) द्वौ नौ एको मः भुजगशिशुभृता नाम । यथा—

नयनविलमितैरस्याः कथमिव बत मूर्च्छते ।
भुजगशिशुभृताद् यद्भावगतमुरगकन्येयम् ॥
क्वचिद् भृता इति पाठो दृश्यते तद्विचिन्त्यम् ॥ (१०१)

पञ्चिका

(१०१) नश्च नश्च नौ नगणद्वयं मः मगणः चेत्, तदा भुजगशिशुभृता नाम स्यात् । तद्यथा—

न न म न न म
। ।।।।।ऽऽऽ । ।।।। ।ऽऽऽ
स मुनिविजयबाहुर्वै त्रिपिटकमखिलं धत्ते ।
गुणिगणगहनस्तस्मात् सरसरसर संसेतुम् ॥ (१०१)

पञ्चक्तौ ।

१०२. **म्सौ ज्गौ शुद्धविराडिदं मतम् ॥**

१०३. **म्नौ य्गौ चेति पणवनामेदम् ॥**

सुकविहृदयानन्दिनी

(१०२) मगणसगणजगणाः गुरुश्च यत्र तद्वृत्तं शुद्धविराट् नाम । यथा—

कुर्वन् राज्यमपीह सततम् कामक्रोधविवर्जितः सदा ।
मित्रेऽरौ च समो भवानतः सत्यं शुद्ध वि राडसि प्रभो ॥ (१०२)

छन्दोवृत्तिः

(१०२) मसजा गणा गुरुश्च यत्र, शुद्धविराट् नाम छन्दः । यथा—

सम्यग्ज्ञानचारित्र्यपात्रतां यो दध्रे भुवनैकबान्धवः ।
त्रैलोक्यस्पृहणीयतां गतः सत्यं शुद्धविराडयं मुनिः ॥ (१०२)

पञ्जिका

(१०२) पञ्चक्तावुदाहरति । म च सश्च म्सौ, ज् च गश्च ज्गौ, मगणसगणौ जगण-गुरू चेत्, तदा इदं शुद्धविराड् नाम मतं कीर्तितम् । तद्यथा—

म स ज ग म स ज ग
ऽ ऽ ऽ।।ऽ। ऽ।ऽ ऽ ऽ ऽ ।।ऽ। ऽ ।ऽ

मातः पर्वतपुत्रि शारदे त्वत्पादौ परिपूज्य भक्तितः ।
के वा नो कथयन्ति साध्वतस्त्वन्मूलं सुधियां धियः श्रियः ॥ (१०२)

सुकविहृदयानन्दिनी

(१०३) यत्र मगणनगणयगणगुरवः तद्वृत्तं पणवनाम । पञ्चभिः यतिः । यथा—

यासां वक्षसि घनवक्षोजे हारः सम्प्रति शुशुभे तारः ।
पादौ नूपुरखवाचालौ भ्रातस्ताः पणवनिताः पश्य ॥

१०४. जौ रगौ मयूरसारिणी स्यात् ॥

छन्दोवृत्तिः

(१०३) मनयगा पणवनाम । यथा—

आदेशः सुगुरुपदोपान्तात् केनापि प्रचुरशुभैकाध्वा ।
संप्राप्यो जडिममहानिद्रा- विच्छेदे पणवरवोऽत्युच्चैः ॥ (१०३)

पञ्चिका

(१०३) म् च नश्च म्नौ, य् च गश्च य्गौ मगणनगणौ यगणगुरू च इति हेतोः इदं वृत्तं पणवनाम स्यात् । पणव इति नाम यस्य तत् पणवनाम इति समासः । यथा—

म	न	य	ग	म	न	य	ग
ऽ ऽ ऽ	। । ।	। । ऽ	ऽ ऽ ऽ	ऽ	ऽ	ऽ	। । । । ऽ ऽ ऽ

जानेऽहं तव हृदयं गुप्तं ही ही त्वत्कृतमिदमौत्सुक्यम् ।
शक्तिस्ते कितव हि सा तस्यां गच्छ त्वं मम मुखतः शीघ्रम् ॥ (१०३)

सुकविहृदयानन्दिनी

(१०४) रगणजगणरगणा गुरुश्च यत्र तद् वृत्तं मयूरसारिणी नाम । यथा—

विस्तरेण बर्हिभाररम्या बर्हिणी मयूरसारिणीयम् ।
गर्जितं निशम्य वारिदानाम् नृत्यति प्रमोदनिर्भराङ्गी ॥ (१०४)

छन्दोवृत्तिः

(१०४) रजरा गुरुश्च (मयूरसारिणी नाम) । यथा—

या घनान्धकारडम्बरेषु प्रीतमानसा विसर्पतीह ।
क्षोभयत्यपि क्षणाद् भुजङ्गान संत्यजेन्मयूरसारिणीं ताम् ॥ (१०४)

पञ्चिका

(१०४) र् च जश्च जौ, रश्च गश्च रगौ, रगणजगणौ रगणगुरू यदि भवेताम्, तदानीं मयूरसारिणी नाम स्यात् । तद्यथा—

१०५. **भ्मौ स्रगयुक्तौ रुक्मवतीयम् ॥**

र ज र ब र ज र ग
ऽ ।ऽ ।ऽ।ऽ। ऽऽऽ ।ऽ ।ऽ।ऽ ।ऽऽ
या कुलान्तरादुपैति रन्तुं या भुजङ्गभोगसक्तचित्ता ।
यामितं प्रयाति सन्तता या तां मयूरसारिणीं तु विद्यात् ॥ (१०४)

सुकविहृदयानन्दिनी

(१०५) भगणमगणसगणा गुरुश्च यत्र तद्वृत्तं रुक्मवती नाम । यथा—

चेतसि यस्या जीवितनाथस्तत्प्रियकार्यासक्तमनस्का ।
देवगुरुश्वश्रूद्विजभक्ता रुक्मवती स्यात् कीर्तिमती च ॥

चम्पकमाला चेद् भमसाद् गः ॥ (१०५)

छन्दोवृत्तिः

(१०५) भमसा गुरुश्च । यथा—

ये विजितात्मानो नयनिष्ठा जाग्रति लोकं रक्षितुकामाः ।
स्यान्नियतं तेषां वसुधेयम् रुक्मवती मृन्मय्यपरेषाम् ॥

चम्पकमाला इत्यन्ये ॥ (१०५)

पञ्चिका

(१०५) भ् च मश्च भ्मौ, सश्च गश्च सगौ, ताभ्यां सगणगुरुभ्यां युक्तौ भगणमगणौ यदि भवेताम् तदानीम् इयं रुक्मवती नाम स्यात् । तद्यथा—

भ म स ग भ म स ग
ऽ।।ऽऽ ऽ । ।ऽ ऽ ऽ।।ऽऽ ऽ।।ऽऽ
राहुलनामा कोऽपि यतीन्द्रः पण्डितवृन्दं तर्पितुकामः ।
मौर्यकुलं सत्कर्तुमिलायां संप्रति वृद्धौ लोकविवृद्धयै ॥

१०६. ज्ञेया मत्ता मभसगयुक्ता ॥

चम्पकमाला चेद् भमसाःगः ॥ यथा—

भ म स ग भ म स ग
ऽ ।।ऽ ऽ ऽ ।। ऽऽ ऽ ।।ऽ ऽ ऽ ।। ऽऽ
सामिकवन्ती सामिबहिस्ते चम्पकमालाशालिकुलेयम् ।
हे विपरीतक्रीडनलोले कस्य मनो नाकर्षति बाले ॥ (१०५)

सुकविहृदयानन्दिनी

(१०६) मगणभगणसगणगुरवो यत्र तद्वृत्तं मत्ता नाम । चतुर्भिः यतिरिति आम्नायः। **यथा—**

यच्चूताग्रे स्मरशरबन्धौ बद्धावासाः पिकसहचर्यः ।
गायन्त्येताः कलमतिमत्ताः तन्मन्येऽहं सखि मधुरेषः ॥ (१०६)

छन्दोवृत्तिः

(१०६) मभसा गुरुश्च । यथा—

आताम्रत्वं वपुषि दधानो घूर्णन् पृथ्वीतलपतनेच्छुः ।
द्राग्बारुण्यां निहितकरोऽयं मत्तावस्थां प्रथयति भानुः ॥

अत्र केचित् चतुर्भिर्यतिमाहुः ॥ (१०६)

पञ्चिका

(१०६) मश्च भश्च सश्च गश्च मभसगाः । तैः मगणभगणसगणगुरुभिः युक्ता या सा मत्ता नाम ज्ञेया ज्ञातव्या । तद्यथा—

म भ स ग म भ स ग
ऽऽ ऽ ऽ ।।। ।ऽऽ ऽऽ ऽ ऽ ।।।।ऽऽ
बिभ्रद्गङ्गां शिरसि कपालं धृत्वा हस्ते प्रमथपतिर्यः ।
भिक्षालीलं चरति हरोऽयं युष्मानव्यात् त्रिभुवननाथः ॥ (१०६)

१०७. **नरजगैर्भवेन्मनोरमा ॥**

१०८. **त्रिसगा अपि मेघवितानम् ॥**

सुकविहृदयानन्दिनी

(१०७) यत्र नगणरगणजगणा गुरुश्च तद्वृत्तं मनोरमा नाम। यथा—

युवतिरिन्दुसुन्दराननना पृथुघनस्तनी कृशोदरी।
गुरुनितम्बभारमन्थरा हरति मे मनो मनोरमा ॥ (१०७)

छन्दोवृत्तिः

(१०७) नरजा गुरुश्च यथा—

निखिलदीनदुःखहारिणी [1]सकलबन्धमविभागकृत्।
गुणिजनामृतार्णवोपमा भवति सा रमा मनोरमा ॥ (१०७)

पञ्चिका

(१०७) नश्च रश्च जश्च गश्च नरजगाः। तैः नगणरगणजगणगुरुभिः मनोरमा नाम भवेत्। तद्यथा—

न र ज ग न र ज ग
। । । ऽ । ऽ । ऽ । ऽ । । । ऽ । ऽ । ऽ । ऽ
अवनतामरेन्द्रमूर्धिन या स्फुरति या सदा मनोरमा।
भवतु सा भवच्छ्रये महात्रिपुरसुन्दरीनखप्रभा ॥ (१०७)

पञ्चिका

(१०८) त्रयश्च ते साश्च इति त्रिसाः। त्रिसाश्च गश्च त्रिसगाः इति द्वन्द्वः। अपीह सम्भावनायाम्। अपि सम्भाव्यते सगणत्रयं गुरुरेकश्चेत् तदा मेघवितानं नाम स्यात्।

स स स ग स स स ग
। । ऽ । । ऽ । । ऽ ऽ । । ऽ । । ऽ । । ऽ ऽ
प्रणतक्षितिपालकिरीटोल्लसदग्रमणिप्रभया यः।
शुशुभे स्वनखांशुभयातो नृपतिः स पराक्रमबाहुः ॥ (१०८)

---

1. सकलबन्धुसंविभागकृत् अ.

१०९. **रश्च सौ सगुरुर्मणिरागः ॥**

११०. **त्वरितगतिस्तु नजनगैः ॥**

१११. **त्जौ नो गुरुणेयमुपस्थिता ॥**

पञ्चिका

(१०९) रो रगणः सश्च सश्च सौ सगणौ सगुरुः गुरुसहितश्चेत् तदा **मणिरामः नाम स्यात्** । तद्यथा—

र स स ग र स स ग
ऽ । ऽ । । ऽ । । । ऽ ऽ ऽ । ऽ । । ऽ । । ऽ ऽ
याति वीतमलोऽपि विकारं सङ्गमेन विरुद्धगुणानाम् ।
सन्निधौ स्फटिकोपलषण्डको रज्यते ज्वलयन् मणिरागैः ॥ (१०९)

पञ्चिका

(११०) **नश्च जश्च नश्च गश्च नजनगाः तैः नगणजगणनगणगुरुभिस्तु त्वरितगतिः नाम स्यात्** । तद्यथा—

न ज न ग न ज न ग
। । । ऽ । । । । ऽ । । । ऽ । । । । ऽ
सरसिजभूप्रभृतिसुरैः शिरसि कृतं यदतिमुदा ।
तव दुरितं तदनुपमं हरतु हरेश्चरणयुगम् ॥ (११०)

सुकविहृदयानन्दिनी

(१११) तगणजगणौ जगणो गुरुश्च तद्वृत्तम् उपस्थिता नाम । **अत्र द्वाभ्यामष्टाभिश्च यतिरित्येके** । **यथा**—

त ज ज ग त ज ज ग
ऽ ऽ । । ऽ । । ऽ । ऽ ऽ ऽ । । ऽ । । ऽ । ऽ
त्यक्त्वा निजशस्त्रमुपस्थिता ये प्राञ्जलयस्तव शत्रवः ।
तेषामवनीश्वर जीवितं दत्तं भवता समराजिरे ॥ (१११)

त्रिष्टुभि ।

११२. **त्जौ ज्गौ गुरुणेयमुपस्थितोक्ता ।।**

११३. **मः सो जो गुरुयुग्ममेकरूपम् ।।**

छन्दोवृत्तिः

(११२) तजजगगाः उपस्थिता । यथा--

या मानमहाविषघूर्णिताऽऽगी नाभूत्कलयापि वशंवदा ते ।
लोलयन्मलयानिलदोलितात्मा प्रीत्या सविलासमुपस्थिता सा ।। (११२)

पञ्चिका

(११२) त्रिष्टुभि उदाहरति । त् च जश्च त्जौ ज् च गश्च ज्गौ । किं भूतौ तौ । गुरुणा उपलक्षितौ सहितौ । तगणो जगणद्वयं गुरुद्वयं च चेत् तदा इयम् उपस्थिता नाम उक्ता कथिता । तद्यथा--

त ज ज ग ग त ज ज ग ग
ऽ ऽ।।ऽ।।ऽ।ऽ ऽऽऽ।।ऽ।।ऽ।ऽ ऽ
संसारमहार्णवमध्यमग्नानुद्धर्तुमहर्निशमीहते यः ।
मद्दुःखमपाकुरुताद् दयाब्धिर्नाथः स सतामवलोकितेशः ।। (११२)

पञ्चिका

(११३) मः मगणः, सः सगणः, जः जगणः गुरुयुग्मं गुरुद्वयं च चेत् तदा एकरूपं नाम स्यात् । तद्यथा--

म स ज ग ग म स ज ग ग
ऽ ऽ ऽ।।ऽ।ऽ।ऽ ऽ ऽऽ ऽ।।ऽ।ऽ।ऽ ऽ
पायात त्वामवलोकितेश्वरोऽयं हीने दीनजनेऽनुकम्पकोऽयम् ।
यस्याभूच्छरदिन्दुकोटिभासा त्रैलोक्यं सहसा पयःपयोधिः ।। (११३)

११४. स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥

११५. उपेन्द्रवज्रा जतजास्ततो गौ ॥

सुकविहृदयानन्दिनी

(११४) यत्र द्वौ तगणौ जगणो गुरू च तदवृत्तम् इन्द्रवज्रा नाम । यथा—

स्यादिन्द्रवज्राधिककर्कशं मे चेतो यदीये विरहागमेऽस्मिन् ।
नूनं तदानीं दयितावियोगे सन्तापसम्पत्सहनक्षमः स्याम ॥ (११४)

छन्दोवृत्तिः

(११४) द्वौ तौ एको जः द्वौ गुरू तदा इन्द्रवज्रा नाम छन्दो यथा—

यस्याः प्रसादेन समस्तवस्तु- विस्तारदर्शीह भवेज्जडोऽपि ।
जाड्याद्रिनाशानुकृतेन्द्रवज्रा सा भारती यच्छतु भारतीव ॥ (११४)

पञ्चिका

(११४) तश्च तश्च तौ, जश्च गश्च जगौ, गः गुरुः, तगणद्वयं जगणो गुरुद्वयं च यदि भवेत् तदा इन्द्रवज्रा नाम स्यात् । तद्यथा—

त त ज ग ग त त ज ग ग
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
सत्पाटवान् पक्षविलोपदक्षा लक्ष्मीः करोति प्रतिवादिमुख्यान् ।
मानातिरूढा तव दुर्निवारा वागीन्द्र वज्रासिरिवाचलेन्द्रान् ॥ (११४)

सुकविहृदयानन्दिनी

(११५) यत्र जगणतगणजगणा गुरू च तद्वृत्तमुपेन्द्रवज्रा नाम । यथा—

उपेन्द्रवज्रादिमहाभिघाता प्रयान्ति नाशं स्मरतो नरस्य ।
अहर्निशं त्वां विजिता मुरारे श्रीकृष्ण विष्णो कुरु मे प्रसादम् ॥ (११५)

११६. अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥

छन्दोवृत्तिः

(११५) जतजा गुरू द्वौ च । यथा—

उपेन्द्रवज्रायुधचन्द्ररोचिर्विरिञ्चिमुख्यास्त्रिदशाः परत्र ।
दिशन्ति नो वा विबुधाधिपत्यं सरस्वतीहैव ददाति देवी ॥ (११५)

पञ्जिका

(११५) जश्च तश्च जश्च जतजाः । ततः तदनन्तरं गौ गुरू जगणतगणजगणाः गुरुद्वयं चेत् तदा उपेन्द्रवज्रा नाम स्यात् । तद्यथा—

ज त ज ग ग ज त ज ग ग
।ऽ।ऽऽ।। ऽ।ऽऽ।ऽ।ऽऽ।।ऽ।ऽऽ
कुजार्कमन्देष्वपि कश्चिदेको यदाष्टमद्वादशजन्मयातः ।
तदा विशेषात् स शुभं प्रपद्यादुपेन्द्रवज्राप्रतिमोऽपि योऽस्मिन् ॥ (११५)

तात्पर्यटीका

(११६) इतीह पक्षोऽङ्गीक्रियते । अथान्वयः । भवन्ति काः । ताः । ताः इति काः । यदीयौ भवतः । कौ । पादौ इति । प्राचीनव्याख्याविशेषात पादा .....। किंविशिष्टौ पादौ भवतः । अनन्तरोदीरितलक्ष्मभाजौ, अनन्तरमुदीरिते इति अनन्तरोदीरिते ते च लक्ष्मणी च अनन्तरोदीरितलक्ष्मणी इन्द्रवज्रोपेन्द्रलक्ष्मणी । .....अनन्तरोदीरितलक्ष्मभाजौ । चतुश्चरणस्यास्य वृत्तस्य अनन्तरोदीरितलक्ष्मभावत्वं व्यक्तिद्वयस्य विन्यासविशेषादनेकप्रकारं सम्भवति । तस्य च विन्यासस्य सुखावगमार्थं तदुत्पन्नचर्णवृत्तव्यक्तिविशेषसंख्यावगमार्थं वेदम् सूत्रम्—

उक्ताचनुश्चरणवारिनिधौ समार्थैस्तुल्यैर्विना गुरुलघुप्रतिकल्पितेन ।
व्यक्त्योरभीष्टयुतयोरुपलक्षणेन विद्धि प्रभेदमुपजातिषु सूर्यसंख्यम् ॥

ISSS, SISS, IIS, SSIS, ISIS, SIIS, SSSI, ISSI, SISI, IISI, SSII, ISII, SIII, IIII

गुरुस्थाने अत्र इन्द्रवज्रा, लघुस्थाने उपेन्द्रवज्रा कल्पनीया। याः वन्त्रप्रदर्शिताः वृत्तव्यक्तयः ताः किं भवन्ति। उपजातयो भवन्ति इति उपजातिसञ्ज्ञा भवन्ति इत्यर्थः। ननु उपजातिलक्षणसूत्रस्यानया विश्लेषव्याख्यया यस्य वृत्तस्य यथा कथंचिद एकव्यक्तिजनितं चरणत्रयमपरव्यक्तिजनितमेकचरणमपरव्यक्तिसमुत्पन्नमपरचरणत्रयमपरव्यक्तिसमुत्पन्नश्च एकचरणो भवति इत्थंभूतं यच्चतुश्चरणं वृत्तं तदेव उपजातिसञ्ज्ञामासादयति, यस्य पुनर्यथाकथंचित् एकव्यक्तिजनितं चरणद्वयं तस्य कथं स्यादिति चेदुच्यते। अस्य चतुश्चरणस्य लक्ष्यलक्षणवाक्यस्य स्वरूपेण तथा सूचनात्। अर्थस्य सूचनात् सूत्रमित्युक्तम् एव इति स्थितम॥ (११६)

सुकविहृदयानन्दिनी

(११६) न विद्यतेऽन्तरं व्यवधानं यस्य तदनन्तरम्। उदीरितमुक्तं लक्ष्म लक्षणं भजते इति। यस्याः पादौ तावदनन्तरोदीरितलक्ष्मभाजौ इन्द्रवज्रोपेन्द्रवज्रयोः इत्यर्थः॥ (११६)

छन्दोवृत्तिः

(११६) यदीयौ विषमसमपादौ अनन्तरोदीरितलक्ष्मभाजौ इन्द्रवज्रोपेन्द्रवज्रोक्तलक्षणयुजौ भवतः ताः उपजातयः। अत्र बहुवचनं व्याप्त्यर्थम्। तेन यथा तथापीन्द्रवज्रोपेन्द्रयोर्योगे सा भवति इति व्याप्नोति। एवं च सति प्रस्तारे चतुर्दशधा उपजातिस्थापना यथा। तत्राद्यभेदोदाहरणं यथा--

प्रायः पुमांसोऽभिनवार्थलाभे गुणोज्ज्वलेष्वप्रकृतादराः स्युः।
अवाप्य कुन्दं मधुपो हि जज्ञे गतोपजातिभ्रमणाभिलाषः॥

एवमन्येऽपि॥ (११६)

पत्रचिका

(११६) यासामेतौ यदीयौ 'त्यदादीनां च' इति ईयच् प्रत्ययः। यदीयौ पादौ यासां चरणौ अनन्तरोदीरितलक्ष्मभाजौ। यतः अनन्तरोदीरितयोः पूर्वोक्तयोः इन्द्रवज्रोपेन्द्रवज्रयोः लक्ष्मभाजौ लक्षणं भजेते, ताः उपजातयः उपजातिनामानि भवन्ति। उपजातयो हि चतुर्दश भवन्ति। उक्तं जयदेवेन--

पादेन पादत्रितयेन चाष्टावर्धायोर्धगेन षडेव भेदाः ।
इतीन्द्रमाला खिलपूर्वमिश्राः प्रमाणतः षोडशभेदभिन्नाः ॥
इति ।

(१) उ इ इ इ–कीर्तिः । (२) इ उ इ इ– वाणी । (३) इ इ उ इ– शाला । (४) उ उ उ इ– जाया । (५) इ इ इ उ– माया । (६) उ उ इ उ– प्रेमा । (७) उ इ उ उ– ऋद्धिः । (८) इ उ उ उ– बाला । इत्येकस्य एकेन पादेन अन्यैः त्रिभिः पादैश्चाष्टभेदाः । (९) उ उ इ इ– माला । (१०) उ इ उ इ– हसी । (११) इ उ उ इ– बुद्धिः । (१२) उ इ इ उ– आर्द्रा । (१३) इ उ इ उ– भद्रा । (१४) इ इ उ उ– –रामा । इत्यर्धद्वयसम्बन्धेन षड् इति सर्वाश्चितुर्दश । इहार्धमिति पादद्वयमात्रमेव द्रष्टव्यम् । यथोक्ताः चतुर्दश पूर्वोक्ताभ्यामिन्द्रवज्रोपेन्द्रवज्राभ्यां मिलिता षोडश इन्द्रमाला इत्युच्यते । तद्यथा––

(१) कीर्तिः––(उ इ इ इ)

ज त ज ग ग त त ज ग ग
।ऽ ।ऽऽ ।।ऽ।ऽऽ ऽऽ। ऽ ऽ ।।ऽ ।ऽऽ
यदि स्युराकारविशेषवन्तौ बुद्धस्य शास्तुः सकला गुणौघाः ।

त त ज ग ग त त ज ग ग
ऽ ऽ ।ऽऽ । ।ऽ।ऽ ऽ ऽऽ।ऽऽ ।।ऽ।ऽ ऽ
त्रैलोक्यगर्भेऽपि महावकाशे गच्छेयुरेते कथमप्रमाणाः ॥

(२) वाणी––(इ उ इ इ)

त त ज ग ग ज त ज ग ग
ऽऽ।ऽऽ ।।ऽ ।ऽ ऽ ।ऽ।ऽऽ।।ऽ ।ऽ ऽ
तन्नादभूताः क्रमशालिनस्ते नृवीरसद्वैरिविधातिशौर्याम् ।

त त ज ग ग त त ज ग ग
ऽ ऽ ।ऽ ऽ। । ऽ।ऽ ऽ ऽऽ।ऽ ऽ।।ऽ ।ऽ ऽ
दीप्तस्वभावस्य हि चित्रभानोः चित्रं न भस्मीकरणं तरूणाम् ॥

(३) शाला-(इ इ उ इ)

त त ज ग ग त त ज ग ग
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
रोधौ लतामण्डपयातकान्ता सम्भोगतः सर्पति काञ्चनादे ।

ज त ज ग ग त त ज ग ग
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
ररक्ष राजानमथ व्यलीकात् उत्त्रासमुक्तः कलहंसनादः ॥

(४) जाया—(उ उ उ इ)

ज त ज ग ग ज त ज ग ग
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ । ऽ । ऽ ऽ । । ऽ । ऽ ऽ
मृगच्छलेनैव तुषाररश्मिर् बिभर्ति देहेन कपोतधूम्रम् ।

ज त ज ग ग त त ज ग ग
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
हराग्निदग्धस्य शरीरभस्म प्रेम्णा बबन्धे कुसुमायुधस्य ॥

(५) माया—(इ इ इ उ)

त त ज ग ग त त ज ग ग
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
माशोक शोकं भज पुष्पलक्ष्मीः कालेऽप्यरूढप्रणया मयीति ।

त त ज ग ग ज त ज ग ग
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ । ऽ । ऽ ऽ । । ऽ । ऽ ऽ
भावीयतेत्यद्रुमदुर्लभस्ते वधूरणन्नूपुरपादघातः ॥

(६) प्रेमा—(उ उ इ उ)

ज त ज ग ग ज त ज ग ग
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ । ऽ । ऽ ऽ । । ऽ । ऽ ऽ
गुणक्षयोऽपि प्रथितो गुणौघै—रनीतिमान् नीतिविचक्षणोऽपि ।

त त ज ग ग ज त ज ग ग
ऽ ऽ । ऽ ऽ ।। ऽ । ऽ ऽ । ऽ । ऽ ऽ । । ऽ । ऽ ऽ
अप्युद्धृतारिः परलोकभीरुः भवन्निभः सोऽपि जगत्यधीशः ॥

(७) ऋद्धिः—(उ इ उ उ)

ज त ज ग ग त त ज ग ग
। ऽ । ऽ ऽ ।। ऽ । ऽ ऽ ऽ ऽ । ऽ ऽ ।। ऽ । ऽ ऽ
मदेन दृप्तारिवधूजनानां वैधव्यमापादितमित्यलं ते ।

ज त ज ग ग ज त ज ग ग
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ । ऽ । ऽ ऽ । । ऽ । ऽ ऽ
कुतो हि तावद्विधाकृतस्ता वसन्ति कान्ताहृदयावदेते ॥

(८) बाला—(इ उ उ उ)

त त ज ग ग ज त ज ग ग
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ । ऽ । ऽ ऽ । । ऽ । ऽ ऽ
प्राणच्छिदां दैत्यपतेर्नखानामुपेयुषां भूषणतां क्षतेन ।

ज त ज ग ग ज त ज ग ग
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ । ऽ । ऽ ऽ । । ऽ । ऽ ऽ
प्रकाशकार्कश्यगुणौ दधानाः स्तनौ तरुण्यः परिवव्रुरेनम् ॥

(९) माला—(उ उ इ इ)

ज त ज ग ग ज त ज ग ग
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ । ऽ । ऽ ऽ । । ऽ । ऽ ऽ
अनन्यबद्धप्रणयाः समन्ताद् विशन्ति रत्नाकरमेव नद्यः ।

त त ज ग ग त त ज ग ग
ऽ ऽ । ऽ ऽ ।। ऽ । ऽ ऽ ऽ ऽ । ऽ ऽ ।। ऽ । ऽ ऽ
लावण्यसारः कुलधामलक्ष्म्याः प्रायोभिगम्यः पतिरङ्गनानाम् ॥

(१०) हंसी—(उ इ उ इ)

ज त ज ग म त त ज ग ग
।ऽ ।ऽऽ ।।ऽ। ऽ ऽ ऽऽ ।ऽऽ । ।ऽ। ऽ ऽ
त्वयाऽर्थिवर्गे दिशतार्थमिष्टं नूनं गुणौघेऽपि समर्पितश्च ।

ज त ज ग ग त त ज ग ग
।ऽ । ऽऽ ।।ऽ। ऽऽ ऽऽ ।ऽऽ।।ऽ। ऽ ऽ
यतः स पर्याप्तमनोरथेन देशान्तरेष्वर्थिजनेन नीतः ।।

(११) बुद्धिः—(इ उ उ इ)

त त ज ग ग ज त ज ग ग
ऽ ऽ । ऽ ऽ ।।ऽ । ऽ ऽ ।ऽ। ऽ ऽ । ।ऽ। ऽ ऽ
क्षीणे परित्यक्तकलङ्कभावः समग्रभावे तु विरूढकार्ष्ण्यः ।

ज त ज ग ग त त ज ग ग
। ऽ। ऽ ऽ।।ऽ। ऽ ऽ ऽऽ। ऽ ऽ।।ऽ ।ऽ ऽ
न चन्द्रमास्तद्वदनानुकारी दोषाकरः साधुसमः कदा स्यात् ।।

(१२) आर्द्रा—(उ इ इ उ)

ज त ज ग ग त त ज ग ग
।ऽ।ऽ ऽ ।।ऽ।ऽ ऽ ऽऽ।ऽऽ।।ऽ।ऽ ऽ
मनोहरात्यङ्गजपूर्णकुम्भ—ग्रवेयसूत्रप्रकरोपमेण ।

त त ज ग ग ज त ज ग ग
ऽ ऽ।ऽ ऽ। ।ऽ। ऽ ऽ ।ऽ।ऽ ऽ ।।ऽ।ऽ ऽ
मुक्ताकलापेन परिष्कृताङ्गः शिरोधरापीनपयोधरायाः ।।

(१३) भद्रा—(इ उ इ उ)

त त ज ग ग ज त ज ग ग
ऽ ऽ ।ऽ ऽ।।ऽ।ऽ ऽ ।ऽ। ऽ ऽ। ।ऽ।ऽ ऽ
अम्भश्च्युतः कोमलरत्नराशीन् अपांनिधिः फेनपिनद्धभासः ।

११७. इत्थं किलान्यास्वपि मिश्रितासु ।
स्मरन्ति जातिष्विदमेव नाम ॥

त त ज ग ग ज त ज ग ग
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ । ऽ । ऽ ऽ । । ऽ । ऽ ऽ
यत्रातपे दातुमिवाधितल्पं प्रसारयामास तरङ्गहस्तैः ॥

(१४) रामा—(इ इ उ उ)

त त ज ग ग त त ज ग ग
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
आकर्षतेवोर्ध्वमतिक्रशीयान् अत्युन्नतत्वात् कुचमण्डलेन ।

ज त ज ग ग ज त ज ग ग
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ । ऽ । । ऽ । ऽ ऽ
ननाम मध्योतिगुरुत्वभाजा नितान्तमाक्रान्त इवाङ्गनानाम् ॥ (११६)

तात्पर्यटीका

(११७) इत्थम् अनेन प्रकारेण अन्यास्वप्युक्तादिषु समुत्थितासु व्यक्तिषु युगलीकृत्य **मिश्रितासु** सतीष्विदमेव इति उपजातयः इति नाम स्मरन्ति चिन्तयन्ति इत्यर्थः । अथ **उक्तादिषु** प्रतिजात्युपजातिप्रस्तारमूलभूतानि कति कति व्यक्तियुगलानि भवन्ति इति **चेच्छिष्याणां** सुखावगमार्थं तदानयनसूत्रमुच्यते ।

पादवारांनिधिः सङ्ख्या तयैवैकोनया हता ।
स्यादर्धतुल्यसङ्ख्याथ त(द्व)र्गो मूलवर्जितः ।
तद्दलं युगसङ्ख्या स्यात् प्रतिजात्युपजातिषु ॥

अस्य उदाहरणं यथा— प्रतिष्टायां समुद्रे जातिसङ्ख्या १६ । सा एकन्यूना **गुणकः** तत्र जातं २४०, तद्दलं १२० । एवमन्यासामपि । उपजातिसूत्रव्याख्यानस्य **अयमभिसन्धिः** । उक्तादीनां जातीनां चतुश्चरणवारिधौ तत्समार्धसमविषमगाथाभ्यो-ऽन्यत्र याश्चतुश्चरणव्यक्तयोऽवशिष्यन्ते, (त)तो (त) एव प्रस्तारकष्टभीरूणां **प्रकारान्तरेणोत्पाद्य** नामतो निर्दिष्टा इति ॥ (११७)

सुकविहृदयानन्दिनी

(११७) इत्थममुना प्रकारेणान्यासु अपि उपप्रभृतिषु जातिषु मिश्रितासु इदमेवोपजाति नाम स्मरन्ति वदन्ति छन्दोविदः । यथा—

विहाय पद्मेरुहकाननानि स्फारस्फुरत्केतकमप्युपास्य ।
मेघागमेऽस्मिन्नुपजाति सर्वं भ्रमन्त्यमी षट्चरणा रणन्तः ॥

एवमन्यान्युदाहरणानि कुमारसम्भवमहाकाव्ये द्रष्टव्यानि । समवृत्ताध्यायेऽपि प्रसङ्गादुपजातीनां पाठो लाघवार्थः । एषां प्रस्तारवशात् चतुर्दशप्रकारा भवन्ति । अत्र प्रथमगणकृत एव विशेषः । अत एव प्रसार्यते । यथा ॥ (११७)

छन्दोवृत्तिः

(११७) इत्थमन्यास्वपि जातिषु पूर्वस्वित:परं वक्ष्यमाणासु च मीलितासु उपजातयो भवन्ति । किल इति वृद्धाम्नाये । तत्र जात्या वंशस्थेन्द्रवंशयोः योगे यथा—

गङ्गातरङ्गार्कसुतापयःसदृक्-मूलाग्रभागान् हरिणाक्षिशावकान् ।
कटाक्षपातानुपजातिसंस्थिता द्विरेफमालाऽनुकरोति चञ्चला ॥

यथा च—

मानं मनाक् प्राप्य मनोहरा भवेत् मनस्विनीप्रेममहारसस्थितिः ।
सुस्वादुभावं रसवन्त्युपैति किं न यावदीषल्लवणेन मिश्रिता ॥

एषाऽपि पूर्ववत् प्रस्तारे चतुर्दशधा । एवमन्येऽपि जातियोगजा अपि भेदा यथादर्शनं ज्ञेयाः ॥ (११७)

पञ्चिका

(११७) इत्थमनेन प्रकारेण अन्यास्वपि इन्द्रवज्रोपेन्द्रवज्राभ्यामितरासु मिश्रितासु किल निश्चयेन इदमेव उपजातिः इत्येव नाम स्मरन्ति वदन्ति । अन्यजातीनां च मिश्रता दृश्यते । तद्यथा—

११८. **नजजलगैर्गदिता सुमुखी ॥**

त त ज र ज त ज र
ऽऽ ।ऽ ऽ। ।ऽ ।ऽ ।ऽ ।ऽ ऽ ।। ऽ ।ऽ ।ऽ
इत्थं रथाश्वेभनिषादिनां प्रगे गणो नृपाणामथ तोरणाद्बहिः ।

त त ज र ज त ज र
ऽ ऽ ।ऽ ऽ।। ऽ ।ऽ ।ऽ ।ऽ ऽ ।। ऽ ।ऽ ।ऽ
प्रस्थानकालक्षमवेषकल्पना कृतेक्षणाक्षेपमुदीक्षताच्युतम् ॥

अत्रायुग्पादौ इन्द्रवंशायाः । युग्पादौ तु वंशस्थस्य ॥

वसन्ततिलकेन्द्रवज्रयोः मिश्रिता दृश्यते । तद्यथा—

त भ ज ज ग ग त त ज ग ग
ऽ ऽ ।ऽ ।।। ऽ ।। ऽ ।ऽ ऽ ऽऽ । ऽऽ ।। ऽ ।ऽ ऽ
कल्लोलवेल्लितदृषत्परुषप्रहारैः रत्नानि रत्नाकरमावमंस्थाः ।

त भ ज ज ग ग त त ज ज ग ग
ऽ ऽ ।ऽ। ।।ऽ । ।ऽ। ऽऽ ऽ ऽ ।ऽ ऽ।। ऽ ।। ऽ ।ऽ ऽ
किं कौस्तुभेन भवतो विहितेन नाम याच्ञाप्रसारितकरः पुरुषोत्तमोऽपि ॥
(११७)

सुकविहृदयानन्दिनी

(११८) नगणजगणजगणा लघुगुरू च यत्र, तद्वृत्तं सुमुखी नाम । पञ्चभिः यतिः इत्याम्नायः । यथा—

सुतजननी सुकुलप्रसवा मृदुवचना सुरते चतुरा ।
भवति गृहे विपुलैः सुकृतैः मृगनयना युवतिः सुमुखी ॥ (११८)

११९. दोधकवृत्तमिदं भभभाद् गौ ॥

छन्दोवृत्तिः

(११८) नगणौ द्वौ जगणौ लघुगुरू च सुमुखी यथा—

कनकरुचिर्घनपीतकुचा मनसिजविभ्रमकेलिगृहम् ।
चलनयना नवकुन्ददती न हरति कस्य मनः सुमुखी ॥ (११८)

पञ्जिका

(११८) नश्च जश्च जश्च लश्च गश्च नजजलगाः । तैः नगणजगणद्वयलघुगुरुभिः सुमुखी गदिता सुमुखी नाम्नी कथिता । तद्यथा—

न ज ज ल ग न ज ज ल ग
।। ।।ऽ ।।ऽ।।ऽ ।।।।ऽ । ।ऽ। । ऽ

मयि दधती दृशमेकतरां मुहुरितरां च सखीषु मुदा ।
मधुरगिरा स्मितसारजुषा मदयति सा हृदयं सुमुखी ॥ (११८)

तात्पर्यटीका

(११९) भश्च भश्च भश्च भभभम् इति समाहारत्वादेकवचनम् । तस्माद् भभभात् । अत्र एकशेषाद् भेभ्यः इति प्राप्तमपि नाङ्गीकृतमसंशयार्थं लक्ष्यलक्षणसंयुतत्वनिर्वाहाय च । एवमन्यत्रापि ॥ (११९)

सुकविहृदयानन्दिनी

(११९) यत्र भगणत्रयं द्वौ गुरू च तद्वृत्तं दोधकनाम । यथा—

यस्य नरस्य भवेदिह साक्षाद् वृत्तमदोधकयोरपि तुल्यम् ।
तेन समं कथमर्थवताऽपि प्रेमकथां कथयामि वयस्ये ॥ (११९)

छन्दोवृत्तिः

(११९) भगणत्रयं गुरुद्वयं च दोधकछन्दः । यथा—

पुष्करमम्बुदगर्जितधीरैः श्रव्यमदो धकधौंकृतनादैः ।
व्यञ्जितपाठकृतिध्वनिपाद- न्यासमसावि ह नृत्यति सुभ्रूः ॥ (११९)

१२०. शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ॥

पत्रचिका

(११९) भश्च भश्च भश्च भभभमिति समाहारे नपुंसकम्। तस्माद् भगणत्रयात्परतः गौ गुरुद्वयं च चेत तदा इदं दोधकवृत्तं स्यात्। तद्यथा—

भ भ भ ग ग भ भ भ ग ग
ऽ । । ऽ । । ऽ । । ऽ ऽ ऽ । । ऽ । । ऽ । । ऽ ऽ

या न ययौ प्रियमन्यवधूभ्यः सारतरागमनायतमानम्।

तेन सहेह बिभर्ति रहः स्त्री सारतरागमनायतमानम् ॥ (११९)

तात्पर्यटीका

(१२०) अब्धिलोकैः (४.७) यतिर्भवति इति शेषः। एवं यत्र यत्र संख्यापदं गणादि-सम्बन्धपरिवर्जितं दृश्यते, तत्र तत्र यतिस्थाननिरूपकं ज्ञातव्यम् ॥ (१२०)

सुकविहृदयानन्दिनी

(१२०) मगणतगणतगणा द्वौ गुरू च यत्र तद्वृत्तं शालिनी नाम। अत्र चतुर्भिः सप्तभिः यतिरित्याम्नायः। यथा—

नो जानीते शालिनीवारयोर्यः प्रायेणेह स्वादुभेदं मनुष्यः।
सामग्रेम प्राप्य दैवात् प्रियायाः धुर्यात्मानं वेत्ति वैदग्ध्यभाजाम् ॥ (१२०)

छन्दोवृत्तिः

(१२०) मगणः, द्वौ तौ, द्वौ गुरू तदा शालिनी नाम। अब्धिलोकैरिति चतुर्भिः सप्त-भिश्च यतिः। यथा—

श्यामा श्यामा कान्तकान्ताभवक्त्रा चेतश्चेतःसंभवास्त्रं ययौ नो।
एषा बाला बालसारङ्गनेत्रा येषां तेषां शालिनी कीर्तिरत्र ॥ (१२०)

१२१. वातोर्मीयं गदिता म्भौ तगौ गः ॥

पञ्चिका

(१२०) म् च तश्च म्तौ, तश्च गश्च तगौ, गः गुरुः । मगणतगणद्वयं गुरुद्वयं च चेत् तदा शालिनी उक्ता शालिनी नाम्ना कथिता । अब्धिलोकैः क्रमेण चतुर्भिः सप्तभिः वर्णैः यतिः स्यात् इत्यध्याहार्यम् । तद्यथा—

म त त ग ग म त त ग ग
ऽ ऽ ऽ ऽ ऽ।ऽ ऽ। ऽ ऽ ऽ ऽ ऽ ऽ ऽ।ऽ ऽ।ऽ ऽ

कृत्वा पुंवत् पातमुच्चैर्भृगुभ्यः मूर्ध्नि ग्राव्णां जर्जरा निर्झरौघाः ।
कुर्वन्ति द्यामुत्पतन्तः स्मरार्त—स्वर्लोकस्त्रीगात्रनिर्वाणमत्र ॥ (१२०)

सुकविहृदयानन्दिनी

(१२१) मगणभगणतगणा गुरुद्वयं यत्र तद्वृत्तं वातोर्मी नाम । अत्र वक्ष्यमाणसूत्रे च विशेषानभिधानात् प्रागुक्तैव यतिः । यथा—

बलाद्वातोर्मय एते सनक्राः सामुद्राणां सलिलानां समूहाः ।
आब्रह्मादीनपि संहृत्य लोकान् येषामन्तः सुखशायी मुरारिः ॥ (१२१)

छन्दोवृत्तिः

(१२१) मगणभगणतगणाः गुरुद्वयं च वातोर्मी नाम । अत्र अब्धिलोकैः इत्यनुवर्तते । यथा—

त्वच्छत्रूणां विपिनं प्रस्थितानां क्षिप्तः पांशुर्दृशि वातोर्मिकाभिः ।
तापः सूर्येण च मर्ध्नि प्रकीर्णः को वा नास्कन्दति संप्राप्तभङ्गान् ॥
(१२१)

पञ्चिका

(१२१) म् च भश्चम्भौ, तः च गश्च तगौ गः गुरुः । मगणभगणतगणाः गुरुद्वयं च चेत् तदा इयं वातोर्मी गदिता वातोर्मी नाम्ना कथिता । तद्यथा—

१२२. म्भौ न्लौ गः स्याद् भ्रमरविलसितम् ॥

म भ त गग म भ त गग
ऽ ऽ ऽऽ ।। ऽऽ ।ऽऽ ऽऽऽऽ ।।ऽऽ ।ऽऽ
पृथ्वीं पृथ्वीं त्वयि राजाधिराजे शासत्यासीन्नरलोकः समृद्धः ।
सर्वे भूपा वनवासं प्रविष्टाः ध्यायन्तस्ते सततं वीर वीर्यम् ॥

सुकविहृदयानन्दिनी

(१२२) प्राच्येव यतिः । यथा—

त्यक्त्वा मानं चरणनिपतितः तन्मन्येऽहं प्रियसखि नियतम् ।
त्वद्वक्त्राब्जे भ्रमरविलसितं कर्तुंवाञ्छत्ययमिह दयितः ॥ (१२२)

छन्दोवृत्तिः

(१२२) मभना लघुर्गुरुश्च भ्रमरविलसिता । यथा—

कुञ्जा गुञ्जद्भ्रमरविलसिता वेल्ल्योवेल्लत्स्फुटदलकुसुमाः ।
स्वापालापाः परभृतदयिता मुग्धे स्निग्धे विलसति सुरभौ ॥ (१२२)

पञ्जिका

(१२२) म् च भश्च म्भौ, न् च लश्च न्लौ, गः गुरुः । मभणभगणनगणाः, लघुर्गुरुश्च चेत् तदा भ्रमरविलसितम् नाम स्यात् । तद्यथा—

म भ न ल ग म भ न ल ग
ऽ ऽ ऽ । । । । । । ऽ ऽऽऽ ऽ ।।। । ।। ऽ
शान्तं दान्तं त्रिदशनरगुरुम् सर्वज्ञं यः प्रणमति सततम् ।
तस्यापाये न भवति गमनम् सत्यं सत्यं जगुरिति मुनयः ॥ (१२२)

१२३. **पञ्चरसैः स्त्री(श्रीः) भतनगगैः स्यात् ॥**

सुकविहृदयानन्दिनी

(१२३) भगणतगणनगणा द्वौ गुरू च यत्र तद्वृत्तं श्रीः नाम। [1]पञ्चभिः षड्भिः यतिः। यथा—

द्रव्यविमोहाज्जलनिधियानं संगरभूमौ त्यजति च देहम्।
कृत्यमकृत्यं गणयति नैव श्रीरसलुब्धो ध्रुवमिह जन्तुः॥

कुड्मलदन्ती इत्येके। [2]मौक्तिकमाला यदि भतनाद् गौ। [3]सान्द्रपदं भ्तौ नगलघुभिश्च॥ (१२३)

छन्दोवृत्तिः

(१२३) [4]भतनात् द्वौ गुरू श्रीरिति नाम। पञ्चरसैरिति पञ्चभिः षड्भिर्यतिः। यथा—

या सुजनानामुपकरणाय प्रद्विषतां च प्रतिकरणाय।
मानधनानां भवति नराणां श्रीरितरा स्यात् परिकरमात्रम्॥ (१२३)

पञ्चिका

(१२३) भश्च तश्च नश्च गश्च गश्च भतनगगाः। तैः भगणतगणनगणगुरुद्वयैः स्त्री स्यात् स्त्री नाम भवति। यस्य स्त्रीवृत्तस्य पञ्चभिः षड्भिः वर्णैः यतिः स्यात्। तद्यथा—

भ त न ग ग भ त न ग ग —
ऽ।।ऽऽ ।।।।ऽ ऽ ऽ।।ऽऽ ।।।।ऽ
राहुलनामा मुनिरतिविद्वान् सदगुणभारी त्रिपिटकधारी।
मौर्यकुलाब्धिप्रभवसुधांशुः जन्मनि जन्मन्यपि मम मित्रम्॥ (१२३)

---

1. पञ्चरसैरिति पञ्चभिः ब. 2. वाक्यमिदं नास्ति ब. 3. मान्द्रपदमित्यन्यो ब. 4. मौक्तिकमाला यदि भतनाद् गौ ब. इ.

१२४. [1]रो नराविह रथोद्धता लगौ ॥

१२५. स्वागतेति रनभाद् गुरुयुग्मम् ॥

सुकविहृदयानन्दिनी

(१२४) यत्र रगणनगणरगणा लघुगुरू च तदवृत्तं रथोद्धता नाम । यथा—

लग्न एष पदयोरथोद्धता– न्यायताक्षि वचनानि संशृणु ।
सत्सखीभिरिति या प्रबोधिता तां स्मरामि निजजीवितौषधीम ॥ (१२४)

छन्दोवृत्तिः

(१२४) वाजिवारणमहारथोद्धता दुर्धरारिपृतनापि जीयते ।
पौरुषेण पुरुषेण न त्वयं केवलोऽपि मदनः कदाचन ॥ (१२४)

पञ्चिका

(१२४) रः रगणः, तस्मात् नश्च रश्च नरौ नगणरगणौ, लश्च गश्च लगौ, लघुगुरू च चेत्, तदा इह शास्त्रे रथोद्धता नाम स्यात् । तद्यथा—

र न र लग र न र लग
ऽ ।ऽ।।।ऽ। ऽ।ऽ ऽ ।ऽ।। ।ऽ।ऽ ।ऽ
अञ्जनाभमरविन्दलोचनं काञ्चनाभमहिभोगशायिनम् ।
तं जना भजत कौस्तुभप्रभं रञ्जनाभरणपीनवक्षसम् ॥ (१२४)

सुकविहृदयानन्दिनी

(१२५) यस्य पादे रगणनगणभगणा गुरू च तद्वृत्तं स्वागता नाम । यथा—

सर्वलोकसुखदास्वपि वर्षा–स्वागतासु न सुखी रिपुवर्गः ।
विन्ध्यवर्मनृपते तव खड्ग–भ्रान्तिभाजमचिरांशुमवेक्ष्य ॥ (१२५)

---

1. राज्ञरावि निसा.

१२६. ननसगगुरुरचिता वृन्ता (पृथ्वी) ॥

छन्दोवृत्तिः

(१२५) रनभेभ्यः गुरुयुग्मं तदा स्वागता । यथा—

स्वागतादिवचनैः परितोषो जायते न तु धनैः सुजनानाम् ।
वारिवाहनिनदैः शितिकण्ठाः हृष्टिपुष्टिमुपयान्ति न तोयैः ॥ (१२५)

पञ्जिका

(१२५) रश्च नश्च भश्च रनभम् । रगणनगणभगणाः । तस्मात् गुरुयुग्मम् गुरुद्वयं च चेत् तदा इयम् स्वागता नाम स्यात् । तद्यथा—

र न भ ग ग र न भ ग ग
ऽ । ऽ । । । ऽ । । ऽ ऽ ऽ । ऽ । । । ऽ । । ऽ ऽ
मन्मथाग्निपरितप्तमनस्के चन्दनं किमनुलिम्पसि बाले ।
किं न वेत्सि बहिरङ्गविधानाद् अन्तरङ्गविधिरेव बलीयान् ॥ (१२५)

सुकविहृदयानन्दिनी

(१२६) द्वौ नगणौ सगणो गुरुद्वयं यस्य पादे तद्वृत्तं वृन्ता नाम । अत्र मण्डूकप्लुति-न्यायेन शालिन्युक्ता इति सूत्राद् अब्धिलोकैः इति पदमनुवर्तते । तेन इह चतुर्भिः यतिः । यथा—

मधुकरचरणभराक्रान्तं पतदिह कुसुममिदं वृन्तात् ।
कथयति विषयवियुक्तानां विधिपरिणतिमिव लोकानाम् ॥ (१२६)

१२७. **ननरलगुरुभिश्च [1]भद्रिका ॥**

छन्दोवृत्तिः

(१२६) द्वौ नौ सगणो गुरू च वृत्ता नाम । यथा--

मदकलखलपटलीला दलितकुशलफलचेष्टायाम् ।
नृपपरिषदि कलिकालेऽस्मिन् गुणिजनभजनकथा वृत्ता ॥ (१२६)

पत्रिका

(१२६) नश्च नश्च सश्च गश्च गुरुश्च ननसगगुरवः । तैः नगणद्वयसगणगुरुयुगलैः रचिता कृता पृथ्वी नाम स्यात् । वृत्ता वा अस्य पृथ्वीवृत्तस्य वृत्ता इति वा नाम स्यात । तद्यथा--

न न स ग ग न न स ग ग
।। ।। ।।ऽ ऽऽ ।।। ।।। ।।ऽ ऽऽ
त्वयि समिति न परतो याते मनसि वपुषि गिरिचारिण्यः ।
झटिति भवति भवतोऽमीषाम् असुखमरुचिरपशब्दत्वम् ॥ (१२६)

सुकविहृदयानन्दिनी

(१२७) द्वौ नगणौ रगणो लघुगुरू च यत्र तद्वृत्तं भद्रिका नाम । यथा—

विविधपरिकथाप्रगल्भवाग् अविरलविसंष्ठुलद्विजा ।
कपिलचिकुरसंचया कृशा न भवति वनिता सुभद्रिका ॥ (१२७)

छन्दोवृत्तिः

(१२७) नद्वयं रलघुगुरुभिः भद्रिका । यथा—

उपकृतिकृतिकोविदा सदा परिहृतपरदोषकीर्तना ।
सुजनततिरमुत्र भद्रिका शरदमितशतानि जीवतात् ॥ (१२७)

---

1. सुभद्रिका (चन्द्रिका वा) निसा.

१२८. [1]श्येनिका रजौ रलौ गुरुर्यदा ॥

पञ्चिका

(१२७) नश्च नश्च रश्च लश्च गुरुश्च ननरलगुरवः। तैः नगणद्वयरगणलघुगुरुभिः सुभद्रिका नाम स्यात्। चन्द्रिका वा अस्य वृत्तस्य चन्द्रिका इति वा नाम स्यात्। तद्यथा—

न न र लग न न र लग
।।।।।।ऽ।ऽ।ऽ।।।।।।ऽ।ऽ।ऽ
कुचतटविनिवारितोदरा कुवलयनिभलोललोचना।
विलुलितविनतालताकुलाद् दिव इव भुवमागता बभौ ॥ (१२७)

सुकविहृदयानन्दिनी

(१२८) रगणजगणरगणा लघुगुरू च तद्वृत्तं श्येनिका नाम। यथा—

श्येनिकाशृगालसंकुले रणे विन्ध्यवर्मदेव ये त्वया हताः।
शत्रवस्त एव तारकाश्रियं तन्वते विमानगाः सुराः वृताः ॥ (१२८)

छन्दोवृत्तिः

(१२८) रजरा लघुगुरू च। यथा—

भ्रान्तगृध्रवृन्दकङ्कमण्डल—श्येनिका त्वदीयवैरिवाहिनी।
आपतत्कृतान्तरौद्रकिङ्कर—व्याकुलेव लक्ष्यते क्षमापते ॥ (१२८)

पञ्चिका

(१२८) रश्च जश्च रजौ, रश्च लश्च रलौ, गुरुरिति प्रसिद्धं। रगणजगणरगणाः लघुगुरू च यदा स्युः तदा वैतिका नाम स्यात्। तद्यथा—

---

1. वैतिका निसा.

१२९. [1]मौक्तिकमाला यदि भतनाद्गौ ॥

१३०. [2]उपस्थितमिदं जसौ ताद् गकारौ ॥

र ज र लग र ज र लग
ऽ।ऽ।ऽ ।ऽ।ऽ।ऽ ऽ। ऽ। ऽ।ऽ। ऽ ।ऽ
मानसं सदा विधेहि सत्कृतौ मुञ्च मुञ्च दुर्जनस्य सङ्गतिम् ।
देहि दानमन्वहं विभूतये भावयेत्तथागतं विमुक्तये ॥ (१२८)

पत्रचिका

(१२९) भश्च तश्च नश्च भतनम् इति समाहारद्वन्द्वः । तस्माद् भगणतगणनगणरूपौ गौ गुरू च यदि तदा मौक्तिकमाला नाम स्यात् । तद्यथा—

भ त न गग भ त न गग
ऽ।।ऽऽ।।।।ऽ ऽ ऽ।। ऽ ऽ ।।।ऽ ऽ
मन्मथदग्धयुवतिमनस्कं सेचय गाढं स्वजनसुधाभिः ।
मौक्तिकमाला शशिघनसारैः साम्यति नैव प्रियसखकाश्मम् ॥ (१२९)

सुकविहृदयानन्दिनी

(१३०) जगणसगणतगणा द्वौ गुरू च यत्र तद्वृत्तम् उपस्थितं नाम । यथा—

उपस्थितमनेकाश्वेभकीर्णं चुलुक्यनृपतेः सैन्यं विशालम् ।
अवन्त्यधिप हित्वा त्वां न कोऽपि ध्रुवं क्षितितले जेतुं समर्थः ॥ (१३०)

छन्दोवृत्तिः

(१३०) जसता गुरुद्वयं उपस्थित नाम । यथा—

वसन्त वसुधानन्दप्रदायिन् समस्तगुणसम्पल्लाभशोभिन् ।
उपस्थितमिदं किं पापपुञ्जं तवास्ति विशदा जातिर्न येन ॥ (१३०)

---

1. इदं सूत्रं पूर्वमेव (स्त्री) इति लक्षितम् । पञ्चिकायां तु मौक्तिकमाला नामतः पुनर्दत्तम् । 2. शिखण्डितमिदं जसौ तगौ गुरुश्च ब.

जगत्याम् ।

१३१. चन्द्रवर्त्म गदितं तु रनभसैः ॥

पत्रिका

(१३०) जश्च सश्च जसौ जगणसगणौ, तात् तगणात् परौ गकारौ गुरू चेत्, तदा इदम् उपस्थितं नाम स्यात् । तद्यथा—

ज स त गग ज स त ग ग
।ऽ ।।।ऽऽ ऽ ।ऽऽ ।ऽ।।।ऽ ऽऽ।ऽ ऽ

उपस्थितमिदं भक्त्या भजेत तथागतपदं श्रेयस्करायम् ।
नपागतसुखं मुञ्चन्ति सन्तो वदामि कृपया गुप्तं वचस्ते ॥ (१३०)

शुकविहृदयानन्दिनी

(१३१) यत्र रगणनगणभगणसगणा भवन्ति, तद्वृत्तं चन्द्रवर्त्म गदितम् । यथा—

चक्षुषी परिविमृश्य करयुगात् कान्तहर्यपरिशोभितवदना ।
चन्द्रवर्त्म कथयेत्यतिविवशा कान्तमेवमवदन्निशि वनिता ॥ (१३१)

छन्दोवृत्तिः

(१३१) रनभसा गणा यथा—

चन्द्रवर्त्म सकलं जलदघटा सन्निरुध्य परितिष्ठति नितराम् ।
एष येन किरणैरमुहरणैः पीडयत्युपगतीर्मृगनयनाः ॥ (१३१)

पत्रिका

(१३१) जगत्यामुदाहरति । रश्च नश्च भश्च सश्च रनभसाः । तैः रगणनगणभगण-सगणैः तु चन्द्रवर्त्म नाम गदितं प्रोक्तम् । तद्यथा—

र न भ स र न भ स
ऽ।ऽ। ।।ऽ।। ।।ऽ ऽ।ऽ।।।ऽ। ।।।ऽ

सन्दधत्क्षरितदानमलिनतो गन्धचक्रमपनीय तनुखचम् ।
शं करोतु तव कुञ्जरवदनः शम्भुजः प्रमथितासुरनिकरः ॥ (१३१)

१३२. **जतौ तु वंशस्थमुदीरितं जरौ ॥**

१३३. **स्यादिन्द्रवंशा ततजै रसंयुतैः ॥**

सुकविहृदयानन्दिनी

(१३२) यत्र जगणतगणजगणरगणाः तदवृत्तं वंशस्थं नाम । यथा--

स्ववेश्मवंशस्थमुदीक्ष्य वायसम् प्रियागमाशंसिनमुत्तमेऽङ्गितैः ।
जगाद काचिन्मुदिता समागते प्रिये प्रदास्यामि तवेप्सितं खग ॥ (१३२)

छन्दोवृत्तिः

(१३२) जतजरा यथा--

सलीललोलद्दलराजिराजिनीः सरोजिनीश्चम्पकचूतमञ्जरीः ।
समुल्लसन्तीश्च विहाय मल्लिकाः द्विरेफ वंशस्थ कथं न लज्जसे॥(१३२)

पञ्जिका

(१३२) जश्च तश्च जतौ, जश्च रश्च जरौ, जगणतगणौ जगणरगणौ तु यदि तदा वंशस्थमुदीरितं वंशस्थम् इति नाम्ना कथितम् । तद्यथा--

ज त ज र ज त ज र
।ऽ ।ऽऽ ।।ऽ ।ऽ।ऽ ।ऽ।ऽ ऽ।।ऽ।ऽ।ऽ
नृपः पराक्रान्तिभुजो महीभुजां शिरोमणिः पण्डितमण्डलीसखः ।
स रामचन्द्रं कविभारतिद्विजं चकार बौद्धागमचक्रवर्तिनम् ॥ (१३२)

सुकविहृदयानन्दिनी

(१३३) यत्र द्वौ तगणौ जगणरगणौ तदवृत्तं इन्द्रवंशा नाम । यथा--

अद्रीन्द्रवंशादिसमस्तभूरुहप्रच्छादितानेकगुहागृहोऽपि सन् ।
धाराधिनाथस्य भयेन विद्रुतान् भूगोप्तुरिष्टान्न भवानिवेश्वरः ॥ (१३३)

१३४. इह तोटकमम्बुधिसैः [1]प्रमितम् ॥

छन्दोवृत्तिः

(१३३) ततजराः तदा इन्द्रवंशा यथा—

आस्तां गुणावाप्तिरहो महात्मनो नामापि लब्धं परमोदयि श्रिये ।
पश्येन्द्रवंशाय कृतादरैर्नरैः पुष्पाविपूजाप्रकरः प्रदीयते ॥ (१३३)

पञ्चिका

(१३३) तश्च तश्च जश्च ततजाः । तैः तगणतगणजगणैः रसंयुतैः रगणसहितैः इन्द्रवंशा नाम स्यात् । तद्यथा—

त त ज र त त ज र
ऽ ऽ । ऽ ऽ । । ऽ । ऽ । ऽ ऽ ऽ । ऽ ऽ । । ऽ । ऽ । ऽ

शोकोष्णनिःश्वासमरुद्भिरायतैः सन्तापितेनेव तवारियोषिताम् ।
भित्त्वाधरं सप्रतिघाश्रुशीकरै रागेण नेत्रद्वयमास्पदं कृतम् ॥ (१३३)

सुकविहृदयानन्दिनी

(१३४) यत्र चत्वारः सगणाः तद्वृत्तं तोटकं नाम । यथा—

त्यज मानममानमनन्तगुणं कुरु वाक्यमिदं परिणामहितम् ।
त्वमितोटकजायतनेत्रयुगे त्वरितं दयितान्तिकमिन्दुमुखि ॥ (१३४)

छन्दोवृत्तिः

(१३४) अम्बुधिसैः इति चतुर्भिः सगणैः तोटकम् । यथा—

तटिनीतटमेत्य मितच्छद मा परितोऽट कलं कुरु मा निनदम् ।
दयितागतनूपुरमञ्जुरवस्मरणेन नरिष्यति पान्थजनः ॥ (१३४)

---

1. प्रथितम् सुकवि.

१३५. द्रुतविलम्बितमाह नभौ भरौ ॥

पञ्चिका

(१३४) सश्च सश्च सश्च सश्च इति एकशेषः । अम्बुधिसैः चतुर्भिः सगणैः इह ~~च्छन्दसि~~ तोटकं नाम प्रमितं प्रमाणीकृतम । तद्यथा--

स स स स स र स र
। ।ऽ। ।ऽ।।ऽ।।ऽ ।।ऽ। ।ऽ ।।ऽ। ।ऽ
स तथेति विनेतुरुदारमतेः प्रतिगृह्य वचो विससर्ज मुनिम् ।
तदलब्धपदं हृदि शोकघने प्रतियातमिवान्तिकमस्य गुरोः ॥ (१३४)

सुकविहृदयानन्दिनी

(१३५) नगणभगणौ भगणरगणौ यत्र तद्वृत्तं द्रुतविलम्बितं नाम । यथा--

द्रुतविलम्बितगेन तवारिणा क्वचिदपि स्थिरभावमविन्दता ।
गुरुनितम्बभरालसगामिनी प्रतिपदं स्ववधूर्न ~~प~~ निन्द्यते ॥ (१३५)

छन्दोवृत्तिः

(१३५) यथा--

प्रियतमाधरपानरसोत्सुका पृथुनितम्बघनस्तनशालिनी ।
द्रुतविलम्बितमायतलोचना निरगमत् सदनान्मदनातुरा ॥ (१३५)

पञ्चिका

(१३५) नश्च भश्च नभौ, भश्च रश्च भरौ, नगणभगणौ भगणरगणौ च यदि स्याताम्, तदा द्रुतविलम्बितं नाम आह ब्रूते आचार्यः इति शेषः । तद्यथा--

न भ भ र न भ भ र
। । ।ऽ ।।ऽ ।।ऽ ।ऽ ।।।ऽ। ।ऽ। । ऽ।ऽ
अपि दलं मुकुले बकुले यया पदमदायि कदापि न तृष्णया ।
अहह सा सहसा विधुरे विधौ मधुकरी बदरीमनुवर्तते ॥ (१३५)

१३६. वसुयुगविरतिर्नौ म्यौ पुटोऽयम् ॥

१३७. प्रमुदितवदना भवेन् नौ ररौ ॥

सुकविहृदयानन्दिनी

(१३६) द्वौ नगणौ मगणयगणौ यत्र तद्वृत्तं पुटो नाम। वसुभिः अष्टभिः, युगैः चतुर्भिः विरतिः यतिः। यथा—

अपि चरणनतोऽहं तत् प्रमीद त्यज सरसिजनेत्रे मौनमुद्राम्।
वचनममृतकल्पं श्रोतुकामः श्रवणपुटनिपेयं सर्वदा ते ॥ (१३६)

छन्दोवृत्तिः

(१३६) द्वौ नगणौ मगणयगणौ अयं पुटः नाम छन्दः। वसु इति अष्टाभिः, युगेति चतुर्भिः यतिः। यथा—

तरललवणिमाम्भःपूर्णकुम्भी सुचरितफलपाकोल्लासवल्ली।
सुतनु तव विराजत्यङ्गमंगात् नयनपुटनिपेया यौवनश्रीः ॥ (१३६)

पञ्जिका

(१३६) नश्च नश्च नौ, म् च यश्च म्यौ, नगणनगणौ मगणयगणौ च चेत् तदा अयं पुटो नाम स्यात्। स किंभूतः। वसुयुगविरतिः वसुभिः अष्टाभिः वर्णैः युगैः चतुर्भिः यर्णैश्च विरतिः यतिः यस्य इत्यन्यपदममासः। तद्यथा—

न न म य न न म य
।।।।।।ऽऽऽ।ऽऽ ।।।।।।ऽऽऽ।ऽऽ
कनकरुचिजटाग्रं कालकण्ठं शशिशकलविराजं मौलिभाजम्।
सकलभवलताया नाशहेतुं प्रणमत परमीशं लोकनाथम् ॥ (१३६)

सुकविहृदयानन्दिनी

(१३७) द्वौ नगणौ द्वौ रगणौ यत्र तद्वृत्तं प्रमुदितवदना नाम। यथा—

गुरुकुचयुगलां विशालेक्षणां विकटकटितटां मनोज्ञां सदा।
विविधसुरतकेलिदक्षामहं प्रमुदितवदनां स्मरामि प्रियाम् ॥ (१३७)

१३८. **नयसहितौ न्यौ कुसुमविचित्रा ॥**

छन्दोवृत्तिः

(१३७) नद्वयं रद्वयं प्रमुदितवदना नाम । यथा--

स्खलितवचसि भर्तरि भ्रूकुटिं, प्रियसखि घटयेत्यपि प्रेरिता ।
अविदितरसविभ्रमा बालिका प्रमुदितवदना भवत्युन्मुखी ॥ (१३७)

पञ्जिका

(१३७) नश्च नश्च नौ, रश्च रश्च रौ, नगणद्वयं रगणद्वयं च चेत्, तदा प्रमुदितवदना नाम भवेत् । तद्यथा--

न न र र न न र र
। । । । । ऽ । ऽ ऽ । ऽ । । । । । । ऽ । ऽ ऽ । ऽ
अपि सुरभिरभाजि पुष्पश्रिया–मतनुतरतयेव सन्तानकः ।
तरुणपरभृतस्वरं रागिणा–मतनुतरतयेव सन्तानकः ॥ (१३७)

सुकविहृदयानन्दिनी

(१३८) नगणयगणौ पुनर्नगणयगणौ यत्र तद्वत्तं कुसुमविचित्रा नाम । षड्भिर्यतिः इत्युपदेशः । यथा--

परिहृतरोषा कृतबहुवेषा सह निजभर्त्रा तरुणि वसन्ते ।
प्रमुदितपुंस्कोकिलरवरम्यां व्रज वनराजिं कुसुमविचित्राम् ॥ (१३८)

छन्दोवृत्तिः

(१३८) नयनयाः यथा--

सरसिजवक्त्रा कुवलयनेत्रा विकचजपौष्ठी विचकिलदन्ता ।
इयमनुरूपा ननु कुसुमेषोः जयति धनुःश्रीः कुसुमविचित्रा ॥ (१३८)

पञ्जिका

(१३८) न् च यश्च न्यौ नगणयगणौ । किंभूतौ तौ । नयसहितौ नयाभ्यां सहितौ नगणयगणाभ्यां युक्तौ चेत्, तदा कुसुमविचित्रा नाम स्यात् । तद्यथा--

१३९. **रसैर्जसजसा जलोद्धतगतिः ॥**

न य न य न य न य
।।।।ऽऽ ।।।।ऽ ऽ ।।।।ऽऽ ।।। ।ऽ ऽ
अनियतमायुः प्रकृतिचला श्रीः सुखमतिमन्दं जगति तथापि ।
न भजति लोको दशबलदेवं शरणममुं धिग् व्यपगतबुद्धिः ॥ (१३८)

सुकविहृदयानन्दिनी

(१३९) यत्र जगणसगणजगणाः सगणश्च तदवृत्तं जलोद्धतगतिः नाम । षड्भिः यतिः । तथा—

अतीत्य सरितो जलोद्धतगतीः अनेकगहनाकुलानपि गिरीन् ।
समुद्रतटमाश्रिता रिपुनृपाः सुखं न निशि शेरते तव भयात् ॥ (१३९)

छन्दोवृत्तिः

(१३९) [1]रसैः षड्भिः, **जगणसगणजगणसगणाः** जलोद्धतगतिः[2] । यथा—

[3]विकासकुसुमं सदा फलयुतं निसर्गशिशिरं तटे विटपिनम् ।
निपातितवती हहा मदिरेयं[4] निकामकलुषी जलोद्धतगतिः ॥ (१३९)

पञ्जिका

(१३९) जश्च सश्च जश्च सश्च जसजसाः । तैः जगणसगणजगणसगणैः **जलोद्धतगतिः** नाम स्यात् । अस्य वृत्तस्य रसैः षड्भिः वर्णैः यतिः स्यात् । तद्यथा—

ज स ज स ज स ज स
।ऽ।।।ऽ ।ऽ।।।ऽ ।ऽ।।।ऽ ।ऽ।।।ऽ
समीरशिशिरः शिरःसु वसतां सतां जवनिका निकामसुखिनाम् ।
बिभर्ति जनयन्नयं मुदमपां-मपायधवला बलाहकततिः ॥ (१३९)

1. रसैः षड्भिः नास्ति इ. 2. षड्भिः यतिः इत्यधिकम् इ. 3. विकाशि° अ. इ. 4. निकामकलुषा अ. इ.

१४०. **भुजङ्गप्रयातं भवेद् यैश्चतुर्भिः ॥**

१४१. **रैश्चतुर्भिर्युता स्रग्विणी सम्मता ॥**

सुकविहृदयानन्दिनी

(१४०) चत्वारो यगणा यत्र तद्वृत्तं भुजङ्गप्रयातं नाम । यथा—

[1]विदग्धाङ्गनालोचनानन्दकारी सखि स्वेच्छया वीक्षितुं [2]प्राणनाथः ।
मया नैव लब्धो [3]हतग्राममार्गे भुजङ्गप्रयातानुकारिण्यमुष्मिन् ॥ (१४०)

छन्दोवृत्तिः

(१४०) चतुर्भिः यगणैर्यथा—

न सूरिः सुराणां गुरुर्नासुराणां पुराणां रिपुर्नापि नापि स्वयम्भूः ।
खला एव विज्ञाश्चरित्रे खलानां भुजङ्गप्रयातं भुजङ्गा विदन्ति ॥(१४०)

पञ्चिका

(१४०) यश्च यश्च यश्च यश्च याः इत्येकशेषः । चतुर्भिर्यगणैः भुजङ्गप्रयातं नाम भवेत् । तद्यथा—

य य य य य य य य
।ऽ ऽ। ऽऽ ।ऽ ऽ।ऽ ऽ ।ऽ ऽ। ऽऽ।ऽ ऽ ।ऽ ऽ
अनात्मन्यनित्येऽशुभे दुःखदुःखे दुरन्तेऽत्र संसारचक्रे भ्रमन्तम् ।
त्वमेकोऽसि मां त्रातुमीशो दयाब्धे प्रभोऽतः प्रसीद प्रसीद प्रसीद ॥(१४०)

सुकविहृदयानन्दिनी

(१४१) चत्वारो रगणा यस्य पादे तद्वृत्तं स्रग्विणी नाम । यथा—

पद्मपत्रायताक्षी शशाङ्कानना कुङ्कुमोद्वर्तिताङ्गी घनोच्चस्तनी ।
अङ्गहारैरनेकप्रकारैर्युतं नृत्यति स्त्री सखे स्रग्विणी [4]सुन्दरी ॥ (१४१)

---

1. विदग्धाननायौवनानन्दकारी अ. 2. प्राणनाथ ब. 3. हतत्रासमार्गे भुजङ्गप्रयातानुकारिणाम् ब. 4. सुन्दरा ब.

१४२. भुवि भवेन्नभजरैः प्रियम्वदा ॥

छन्दोवृत्तिः

(१४१) रैश्चतुर्भिरित्यादि तथा—

कामिनी वा शरद्यामिनी हृष्टये कस्य नो जायते पूर्णचन्द्रानना ।
चन्द्रिका चारुचीनांशुकेनावृता [1]तारतारामुक्ताफला लम्बिणी ॥ (१४१)

पञ्जिका

(१४१) रश्च रश्च रश्च रश्च राः इत्येकशेषः । चतुर्भी रगणैर्युता लम्बिणी नाम सम्मता प्रोक्ता । तद्यथा—

र र र र र र र र
ऽ । ऽऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ
अङ्गनामङ्गनामन्तरा माधवो माधवं माधवं चान्तरेणाङ्गनाः ।
इत्थमाकल्पिते मण्डले मध्यगः संजगौ वेणुना देवकीनन्दनः ॥ (१४१)

सुकविहृदयानन्दिनी

(१४२) नगणभगणजगणा रगणो यत्र तद्वृत्तं प्रियम्वदा नाम । यथा—

गुरुपयोधरवती सुमध्यमा विपुलपुण्यनिचयैः स्ववेश्मनि ।
भवति पार्वणशशाङ्कसुन्दरा–ननवती प्रियतमा प्रियम्वदा ॥ (१४२)

छन्दोवृत्तिः

(१४२) नभजरगगैः यथा—

प्रणयतत्परमिमं सखि प्रियं मधुरमालप मयैव शिक्षिता ।
विधुरितासमदकोकिलारवैः यदि भविष्यसि मधौ प्रियम्वदा ॥ (१४२)

---

1. तारतालिमुक्ता[0] अ. ड.

१४३. **त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः ॥**

पञ्जिका

(१४२) नश्च भश्च जश्च रश्च नभजराः । तैः **नगणभगणजगणरगणैः भुवि छन्दोभूमौ प्रियम्वदा नाम भवेत्** । तद्यथा--

न भ ज र न भ ज र
।।।ऽ ।।।ऽ ।ऽ।ऽ ।।।ऽ ।।।ऽ ।ऽ।ऽ

सततत्रुटगकरुणोर्मिसागरे कथितमुन्मथितकल्मषैरिव ।
यदपवर्गफलदं ममामृतं तदितरद्गरलमेव जल्पितम् ॥ (१४२)

तात्पर्यटीका

(१४३) छिन्ना इति कृतयतिरित्यर्थः । **गुहवक्त्रैरिति । गुहः कार्तिकेयः तस्य वक्त्राणि षट् तन्मिता वर्णा अपि गौण्या वृत्त्या गुहवक्त्राण्युच्यन्ते । तैरिति करणे तृतीया । इह गौण्यपि वृत्तिराश्रिता लक्ष्यलक्षणनिर्वाहाय । एवमन्यत्रापि ॥** (१४३)

सुकविहृदयानन्दिनी

(१४३) नगणयगणतगणयगणा यत्र तद्वृत्तं मणिमाला नाम । **षड्भिर्यतिः । यथा**--

मातः सुरसिन्धो त्रैलोक्यपवित्रे पास्यामि कदा ते पापापहमम्भः ।
चञ्चन्मणिमालालङ्कारवतीनां त्यक्त्वा वनितानां सङ्गं विषतुल्यम् ॥
(१४३)

छन्दोवृत्तिः

(१४३) तयतयैः यगैः मणिमाला । **गुहवक्त्रैरिति षड्भिर्यतिः । यथा**--

सन्तोषधनानां का नाम सम्बुद्धिः चारित्रसुधाप्तौ धिक् कामपिपासाम् ।
निर्बीजसमाधावास्तां सुरसौख्यं जैनी यदि कण्ठे वाक् किं मणिमाला ॥

१४४. धीरैरभाणि ललिता तभौ जरौ ॥

पुष्पविचित्रा इति केचित्। तया यथा--

भ्राम्यदभ्रमरव्याकीर्णोद्धरगन्धा मन्दारवती सन्तानप्रसवाढ्या।
नाभेयं जिनस्योद्दामा सुरनार्थै-र्दिव्या रचिता पुष्पविचित्रा ॥

मणिमालातोऽस्या अयतित्वं भेदहेतुः ॥ (१४३)

पत्रचिका

(१४३) त् च यश्च त्यौ, पुनरपि च त् च यश्च त्यौ। तगणयगणौ तगणयगणौ च चेत् तदा मणिमाला नाम स्यात। एषा गुहवक्त्रैः षड्भिः वर्णैश्च अवसानीकृता। तद्यथा--

त य त य त य त य
ऽ ऽ । । ऽ ऽ ऽ । । ऽ ऽ ऽ ऽ । । ऽ ऽ ऽ ऽ । । ऽ ऽ

वृन्दारकवृन्दामन्दीकृतवन्द्यं वन्दे जननन्दं स्कन्दं शिवकन्दम्।
चण्डीकृतसन्धं बन्धुं गुणसिन्धुं कुन्दं पदकुन्दं विन्देऽमरविन्दम् ॥ (१४३)

सुकविहृदयानन्दिनी

(१४४) यत्र तगणभगणजगणरगणाः तद्वृत्तं ललिता नाम। यथा--

पीनोन्नत[1]स्तनभरोपरिस्फुरद्धारावली सुभागायतलक्षणा।
नृत्यत्यसौ सुललितं हि नूपुरध्वानप्रबोधितमनोभवा वधूः ॥ (१४४)

छन्दोवृत्तिः

(१४४) तभजरैर्ललिता यथा--

यस्मिन् वरं किमपि नार्थगौरवं काचिन्न चापि ललिता पदस्थितिः।
चेतः सतां तदपि किं प्रमोदयेत् काव्यं हि शब्दनिचयैकसंचितम् ॥ (१४४)

---

1. °स्तनभरा परिस्फुरद् फ.

१४५. प्रमिताक्षरा सजससैरुदिता ॥

षञ्चिका

(१४४) तश्च भश्च तभौ, जश्च रश्च जरौ । तगणभगणौ जगणरगणौ यदि तदा धीरैः छन्दोविद्भिः ललिता नाम अभाणि कथिता । तद्यथा—

त भ ज र त भ ज र
ऽ ऽ । ऽ । । । ऽ । ऽ । ऽ ऽ ऽ । ऽ । । । ऽ । ऽ
चोलीवधूवदनपङ्कजश्रिया- मासामकालजलदोदयस्थिराम् ।
त्वं सर्वदा नरपते गुणप्रियो जीयाः पराक्रमभुजेन्द्र भूतले ॥ (१४४)

सुकविहृदयानन्दिनी

(१४५) सगणजगणौ द्वौ सगणौ यत्र तद्वृत्तं प्रमिताक्षरा नाम । यथा—

चरणानति गतवति प्रसभं दयिते नितान्तसुभगे सुभगे ।
परुषाणि संत्यज वचांसि सखि प्रमिताक्षरा भव शशाङ्कमुखि ॥ (१४५)

छन्दोवृत्तिः

(१४५) सजससैः गणैः प्रमिताक्षरा । यथा—

बहुभिश्च किन्तु लपितैरसतां सरसोक्तियुक्तिघटनारहितैः ।
हृदयं हरन्ति विततार्थयुताः प्रमिताक्षरा अपि गिरः सुधियाम् ॥ (१४५)

षञ्चिका

(१४५) सश्च जश्च सश्च मश्च सजससाः । तैः सगणजगणसगणद्वयैः प्रमिताक्षरा नाम उदिता प्रोक्ता । तद्यथा—

स ज स स स ज स स
। । ऽ । ऽ । । । ऽ । । ऽ । । ऽ । ऽ । । । ऽ । । ऽ
रजनीमवाप्य रुचमाप शशी सपदि व्यभूषयदमावपि ताम् ।
अवलम्बितक्रममहो महता- मितरेतरप्रकृतिमच्चरितम् ॥ (१४५)

१४६. **ननभरसहिताभिहितोज्वला ॥**

१४७. **पञ्चाश्वैश् छिन्ना वैश्वदेवी ममौ यौ ॥**

सुकविहृदयानन्दिनी

(१४६) द्वौ नगणौ भगणरगणौ च यत्र तद्वृत्तं उज्ज्वला नाम । यथा—

इह शरदि भवन्त्युदकाशया विमलतरशशाङ्ककरोज्ज्वलाः ।
विदधति गमनं विजयार्थिनः प्रतिदिशमवनीपतयः स्वयम् ॥ (१४६)

छन्दोवृत्तिः

(१४६) नद्वयभरगणैः उज्ज्वला । यथा—

विनियतमनसोऽपि निरन्तरं बत विदधतु किं नु विवेकिनः ।
नयनगतिरियं हि सुदुःसहा चकितमृगदृशामहहोज्ज्वला ॥ (१४६)

पञ्जिका

(१४६) नश्च नश्च भश्च रश्च ननभराः । तैः नगणद्वयभगणरगणैः सहिता संयुक्ता उज्ज्वला अभिहिता उज्ज्वलेति नाम्ना कथिता । तद्यथा—

न न भ र न न भ र
।।।।।ऽ ।।ऽ।ऽ ।।।।।।ऽ।।ऽ।ऽ
सकलगुणनिधिः करुणाम्बुधि- र्विरहितवृजिनः सुखदो जिनः ।
भजदमरतरुर्जगतां गुरुः स हरतु भवतः कुमतिं सतः ॥ (१४६)

सुकविहृदयानन्दिनी

(१४७) द्वौ मगणौ द्वौ यगणौ यत्र तद्वृत्तं वैश्वदेवी नाम । पञ्चभिः सप्तभिः यतिः । यथा—

वश्यात्मा नित्यस्नानशीलो महात्मा मित्रे शत्रौ वा तुल्यचित्तप्रवृत्तिः ।
श्रद्धासंपन्नो वैश्वदेवी च लोके स स्वर्गस्त्रीणां वल्लभः स्यात् सदैव ॥
(१४७)

१४८. [1]अब्ध्यङ्गैः स्याज्जलधरमाला म्भौ स्मौ ॥

छन्दोवृत्तिः

(१४७) द्वौ मगणौ द्वौ यगणौ, पञ्चाश्वैरिति पञ्चभिः सप्तभिः यतिः, वैश्वदेवी नाम। यथा--

प्राप्तुं दुष्प्राप्याः सम्पदो वैश्वदेवी–श्चित्ते चिन्ता चेद्वर्तते ते तदानीम्।
अक्षग्रामोऽयं [2]दुर्दमोऽपीह जेयः कृच्छ्रायत्ता हि प्रायशः साध्यसिद्धिः ॥
(१४७)

पञ्जिका

(१४७) मश्च मश्च ममौ, यश्च यश्च यौ इत्येकशेषः। मगणद्वयं यगणद्वयं च चेत् तदा वैश्वदेवी नाम स्यात्। एषा पञ्चाश्वैः छिन्ना पञ्चभिः सप्तभिः वर्णैः छिन्ना अवसिता। तद्यथा--

म म य य म य य य
ऽ ऽ ऽ ऽऽऽ। ऽऽ। ऽ ऽ ऽऽऽ ऽ ऽऽ। ऽऽ। ऽऽ
पान्थस्त्रीचेतोलक्षभेदक्षमाम्भो–धारानाराचक्षेपयोघः पयोधः।
कालं संहर्तुं यानि तानि प्रजानां बौद्धोक्तां शान्ति यान्ति चेतोरजांसि ॥
(१४७)

सुकविहृदयानन्दिनी

(१४८) मगणभगणसगणमगणाः यत्र तद्वृत्तं जलधरमाला नाम। चतुर्भिः अष्टभिश्च यतिः। [3]यथा--

सत्याकाशे जलधरमालाव्याप्ते नीपामोदे प्रसरति झञ्झावाते।
वर्षाकाले मुदितमयूरव्राते त्यक्त्वा कान्तां व्रजसि कथं पान्थ त्वम् ॥
(१४)

1. अब्धयष्टाभिः फ. निसा. 2. दुर्जयो अ. इ. 3. यथा नास्ति क.

१४९. [1]इह नवमालिनी नजपरौ भ्यौ ॥

छन्दोवृत्तिः

(१४८) मभसमैः गणैः जलधरमाला। अब्ध्यङ्गैः इति चतुर्भिः अष्टभिः यतिः। तद्यथा—

त्वत्सेनाभिः कृतरिपुधामश्लोषे दृष्टवा व्योम्नि स्फुरदुरुधूमस्तोमम्।
ग्रीष्मेऽप्युल्काः सपदि मयूरा राजन् शब्दायन्ते जलधरमालाभ्रान्त्या ॥
(१४८)

पञ्चिका

(१४८) म् च भश्च म्भौ, स् च मश्च स्मौ। मगणभगणौ सगणमगणौ च चेत् तदा जलधरमाला नाम स्यात्। अस्य वृत्तस्य अब्ध्यष्टाभिः चतुर्भिः अष्टाभिश्च वर्णैः यतिः भवति। तद्यथा—

म भ स म म भ स म
ऽ ऽ ऽ ऽ । । । । ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ । । । । ऽ ऽ ऽ ऽ
दिव्यस्त्रीणां सचरणलाक्षारागा–रक्तापाते निपतितपुष्पापीडाः।
पीडाभाजां कुसुमितमाला यासां शंसन्त्यस्मिन् सुरतविशेषं शय्याः ॥(१४८)

सुकविहृदयानन्दिनी

(१४९) नगणजगणभगणयगणा यत्र तद्वृत्तं नवमालिनी नाम। इह इत्येवंग्रहणात् अब्ध्यङ्गैः इति पदविपरीततया परिणमति। तेन अष्टाभिः यतिश्चतुर्भिश्च। तद्यथा—

तव निशितासिघातदलितारि–द्विपवरकुम्भमौक्तिकसमूहैः।
कृतनवमालिनीव भजति त्वां प्रतिसमरं नरेन्द्र जयलक्ष्मीः ॥ (१४९)

---

1. इह नवमालिका नजभयैः स्यात् निसा.

१५०. स्वरशरविरतिर्ननौ रौ प्रभा ॥

छन्दोवृत्तिः

(१४९) नजभयैः नवमालिनी यथा—

परिमललुब्धमुग्धमधुपालीं यदि नवमालिनीह न विधत्ते ।
किमितरपुष्पभारभजनस्ते कनककणोऽपि तारनिकरोऽस्तु ॥ (१४९)

पञ्चिका

(१४९) नश्च जश्च नजौ ताभ्यां नगणजगणाभ्याम् परौ, भ् च यश्च भ्यौ, भगण-यगणौ चेत्, तदा इह छन्दसि नवमालिनी स्यात् । तद्यथा—

न ज भ य न ज भ य
।।। ।ऽ।।।ऽऽ ।।।।ऽ।ऽ।।।ऽऽ
धवलितविश्वमम्बुरुहषण्डै–रनुमितरात्रिवासरविभागम् ।
हरहसिता विसारि तव तुष्टयै भवतु भवद्यशो विसरगौरम् ॥ (१४९)

सुकविहृदयानन्दिनी

(१५०) यत्र द्वौ नगणौ द्वौ रगणौ तद्वृत्तं प्रभा नाम । स्वरैः सप्तभिः, शरैः पञ्च-भिश्च यतिः । यथा—

[1]प्रचुरविभवता नवं यौवनं विमललवणिमा समग्राः कलाः ।
सकलमपि सखे तदेतन्मुधा यदि मृगनयना न हेमप्रभा ॥ (१५०)

छन्दोवृत्तिः

(१५०) द्वौ नौ द्वौ रौ प्रभा नाम[2] । सप्तभिः पञ्चभिः यतिः । यथा—

प्रचुरविभवता नवं यौवनं विमललवणिमा समग्राः कलाः ।
सकलमपि सखे तदेतन्मुधा यदि मृगनयना न हेमप्रभा ॥ (१५०)

---

1. उदाहरणमिदं नास्ति फ. 2. छन्दः इत्यधिकं ज. झ.

१५१. भवति नजावथ मालती जरौ ॥

पञ्चिका

(१५०) नश्च नश्च ननौ, रश्च रश्च रावित्येकशेषः । नगणद्वयं रगणद्वयं च चेत् तदा प्रभा नाम स्यात् । अस्य वृत्तस्य स्वरशरैः सप्तभिः पञ्चभिः वर्णैः विरतिर्यतिः स्यात् । तद्यथा—

न न र र न न र र
। । । । ।।ऽ ।ऽऽ ।ऽ । । ।।।।ऽ ।ऽ ऽ।ऽ
अयि सखि सततं वदस्यन्यथा त्वयि पुनरधमः करोत्युत्तरम् ।
जगति च भवतु प्रभासप्रिया विरहिणि मयि मास्तु वह्निप्रभा ॥ (१५०)

सुकविहृदयानन्दिनी

(१५१) नगणजगणौ जगणरगणौ यत्र तद्वृत्तं मालती नाम । यथा—

भ्रमरयुवा भ्रमतीह मालती—तरुतलमप्यपहाय केतकीम् ।
युवतिजनेन गृहीतमानसः कथमपि न प्रबोधमेत्यसौ ॥

वरतनुरित्येके ॥ (१५१)

छन्दोवृत्तिः

(१५१) नजजरैः मालती । यथा—

भ्रमर सखे व्रज यत्र सा प्रिया कथय दशामिति मे तदग्रतः ।
अभिनवपुष्पितरम्यमालती—परिमलमुल्लसितं पिबाथवा ॥ (१५१)

पञ्चिका

(१५१) नश्च जश्च नजौ । जश्च रश्च जरौ । नगणजगणौ, अथ अनन्तरम्, जगण-रगणौ चेत् तदा मालती नाम भवति । तद्यथा—

१५२. जरौ जरौ वदन्ति पञ्चचामरम् ॥

१५३. इति वद तामरसं नजजाद् यः ॥

न ज ज र न ज ज र
। । ।ऽ ।ऽ। ऽ ।ऽ । ।।। ऽ । । ऽ।ऽ ।ऽ

इति निभृता समुवाच राधिका स्थितवति मानिनि माधवे पुरः ।
घटय हरेर्वनमालती तनुः प्रणमति या सखि ते पुनः पुनः ॥ (१५१)

सुकविहृदयानन्दिनी

(१५२) जगणरगणौ पुनर्जगणरगणौ यत्र तद्वृत्तं पञ्चचामरम् नाम । यथा--

सदैव पार्वती ददातु ते सुखं भवन्तु भूतयेऽथ पञ्चचामराः ।
सहस्रनेत्रशङ्कराद्यपूरुषा वसुन्धरापते रविप्रजापती ॥ (१५२)

छन्दोवृत्तिः

(१५२) जगणरगणौ द्वौ पञ्चचामरम् । यथा--

ज र ज र ज र ज र
।ऽ। ऽ।ऽ ।ऽ। ऽ ।ऽ । ऽ। ऽ।ऽ। ऽ ।ऽ।ऽ

सदैव पार्वती ददातु ते सुखं भवन्तु भूतयेऽथ पञ्चचामराः ।
सहस्रनेत्रशङ्कराद्यपूरुषा वसुन्धरापते रविप्रजापती ॥ (१५२)

सुकविहृदयानन्दिनी

(१५३) नगणजगणौ जगणयगणौ यत्र तद्वृत्तं तामरसं नाम इति वद शिष्येति शेषः ।
यथा—

मृदुतरतामरसारुण[1]पादन्यस-ततिविस्रवदस्रजलौघाः ।
विदधति पर्वतरोधसि यानं करपिहितोच्चकुचा रिपुवध्वः ॥ (१५३)

---

1. पादैः प्रपतितविस्रवद[0] ब.

अतिजगत्याम् ।

१५४. तुरगरसयतिर्नौ ततौ गः क्षमा ॥

छन्दोवृत्तिः

(१५३) नजजयगणाः तामरसम् । यथा—

[1]सततविकासि समुद्धरशोभं [2]सकलकलङ्ककलापरिमुक्तम् ।
तव वदनं मदिराक्षि किमेतद्[3]भुवि न च तामरसं न च चन्द्रः ॥* (१५३)

पञ्जिका

(१५३) नश्च जश्च जश्च नजजमिति समाहारे नपुंसकम् । तस्मात् नगणजगणद्वयात् परो यः यगणश्चेत् तदा इदं तामरसं नाम वद । भोः शिष्य इति शेषः । तद्यथा—

न ज ज य न ज ज य
।।।।ऽ।।ऽ । ।ऽऽ ।।।।ऽ।।ऽ। ।ऽऽ
रिपुनृपतिव्रजमूर्ध्नि किरीटः स्फुरदुरुरत्नकलावलिकम्बुः ।
विहरति यस्य रणोत्सुकपाणिः स जयति भूपपराक्रमबाहुः ॥ (१५३)

सुकविहृदयानन्दिनी

(१५४) यत्र द्वौ नगणौ द्वौ तगणौ गुरुश्च तदवृत्तं क्षमा नाम । सप्तभिः षड्भिश्च यतिः । यथा—

चकितमृगदृशा नेक्षितो लीलया त्रिवलितवदनग्रीवयाऽहं मृदुः ।
न च सुरतटिनी च क्षमा चाश्रिता गतमिदमधुना जीवितं मे वृथा ॥(१५४)

---

1. सततविकाससमुद्धर अ. °विकासि समुच्चर ब. इ. 2. सकलकलाकलङ्क-परिमुक्तम् इ. 3. भवति न तामरसं अ. ब.

१५५. म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ॥

छन्दोवृत्तिः

(१५४) ननततगुरुभिः क्षमा । तुरगरसेति सप्तभिः षड्भिः यतिः । यथा—

अयि जडयसि किं नित्यमङ्गं जलैः क्वचिदपि सुकृतं स्यान्मुधैवं जड ।
तदिह परभवे पुण्यपुञ्जप्रदां वत कुरु हृदये न सत्क्षमामेकदा ॥

चन्द्रिका इत्यपरे ॥ (१५४)

पञ्जिका

(१५४) अतिजगत्यामुदाहरति । नश्च नश्च नौ इत्येकशेषः । तश्च तश्च ततौ । गः गुरुः । नगणद्वयं तगणद्वयं च गुरुरेकश्चेत् तदा क्षमा नाम स्यात् । सा किंभूता । तुरग-रसयतिः तुरगैः सप्तभिः रसैः षड्भिश्च यतिः यस्याः इत्यन्यपदार्थसमासः । तद्यथा—

न न त त ग न न त त ग
।।। । ।।ऽऽ । ऽ ऽ।ऽ । । ।। ।।ऽ ऽ ।ऽऽ । ऽ
क्षणमपि सहते या न ते दर्शनं हरि हरि विरहे सा कथं प्राणिति
शृणु मम वचनं मा विलम्बं कुरु व्रज सपदि हरे राधिकां जीवय ॥
(१५४)

सुकविहृदयानन्दिनी

(१५५) मगणनगणजगणरगणगुरवो यत्र तद्वृत्तं प्रहर्षिणी नाम । त्रिभिः दशभिः यतिः । यथा—

लोलाक्षी विपुलनितम्बबद्धकाञ्ची पीनोच्यस्तनयुगला सुरोमराजिः ।
नृत्यन्ती सुललितमङ्गहाररम्यं वारस्त्री गमनलसत्प्रहर्षिणीयम् ॥ (१५५)

छन्दोवृत्तिः

(१५५) मनजरैः गुरुणा च प्रहर्षिणीयम् । त्रिदशयतिः । यथा—

उत्प्रेङ्खत्त्रिदशधनुश्छलेन वर्षा–लक्ष्म्योद्यन्मणिरुचिचित्रतोरणस्रक् ।
पञ्चेषोर्भुवनजयोत्सवैकचिह्न–मावद्धा सपदि मनःप्रहर्षिणीयम् ॥ (१५५)

१५६. चतुर्ग्रहैरिह रुचिरा जभौ स्जगाः ॥

पञ्चिका

(१५५) म् च नश्च म्नौ, ज् च रश्च ज्रौ, गः गुरुः । मगणनगणौ जगणरगणौ गुरुरेकश्चेत्, तदा इयं प्रहर्षिणी नाम भवति । सा किंभूता । त्रिदशयतिः त्रिभिर्दशभिः वर्णैः यतिः यस्या इति विग्रहः । तद्यथा—

म न ज र ग म न ज र ग
S S S ।।।।S।S। SSSSS ।।।।S।S।S S

सौभाग्यं रिपुविजयोन्नतिश्च षष्ठे वैवर्ण्यं कलहविधिश्च सप्तमे जेः ।
मृत्युस्थे सुतजयभोगवस्तुलाभो नैपुण्यं भवति मतिप्रहर्षिणी च ॥ (१५५)

सुकविहृदयानन्दिनी

(१५६) यत्र जगणभगणसगणजगणगुरवः तद्वृत्तं रुचिरा नाम । यथा—

समीहते य इह परं पदं वियत सरित्तटद्रुमरुचिरोटजालयः ।
मृगीदृशो वदनसरोजदर्शनं न तस्य तत्प्रमदकरं करङ्कवत् ॥ (१५६)

छन्दोवृत्तिः

(१५६) जभसजगुरुभिः रुचिरा । चतुर्ग्रहैः इति चतुर्भिः नवभिश्च यतिः । यथा—

मनीषिता हिमरुचिरापि निष्फला समाकुले खलपटलेन मण्डले ।
नभस्तले घननिवहैर्निरन्तरे सुधारुचेः करनिकरः करोति किम् ॥ (१५६)

पञ्चिका

(१५६) जश्च भश्च जभौ, स् च जश्च गश्च स्जगाः । जगणभगणौ, मगणजगणगुरवश्च यदा स्युः तदा इह छन्दसि रुचिरा नाम स्यात् । अस्य वृत्तस्य चतुर्ग्रहैः चतुर्भिः नवभिश्च वर्णैः यतिः स्यात् । तद्यथा—

१५७. वेदै रन्ध्रैर्मौ यसगा मत्तमयूरम् ॥

ज भ स ज ग ज भ स ज ग
।ऽ।ऽ।।।ऽ।ऽ।ऽ ।ऽ।ऽ ।।।ऽ।ऽ।ऽ
समुल्लसत्तुरगतरङ्गसङ्गतैः प्रमन्थनोऽमररिपुवाहिनीपतेः ।
श्रियं महाभुजगवपुर्गुणैर्भरन् भवद्भुजो रणभुवि मन्थरायते ॥ (१५६)

सुकविहृदयानन्दिनी

(१५७) यत्र मगणतगणयगणसगणगुरवः तद्वृत्तं मत्तमयूरम् नाम । चतुर्भिर्नवभिः यतिः । यथा—

चञ्चच्चूतं पुष्पितकङ्केल्लितरुभिः क्रीडत्क्रोडं संचरदुन्मत्तमृगौघम् ।
स्निग्धच्छायं वारिततापं तरुषण्डै. माद्यद्भृङ्गं मत्तमयूरं वनमेतत् ॥
(१५७)

छन्दोवृत्तिः

(१५७) मतयसगैः चतुर्भिः नवभिर्यतिः मत्तमयूरं नाम । यथा—
प्रावृड्लक्ष्म्या निश्चितमत्रावतरन्त्याः संभूयाग्रे कल्पितकोलाहलमुच्चैः ।
जल्पन्तोऽमी हन्त निदाघापसरेति प्रातीहार्यं मत्तमयूराः कलयन्ति ॥
(१५७)

पञ्चिका

(१५७) म च तश्च म्तौ, यश्च सश्च गश्च यसगाः । मगणतगणौ यगणसगणगुरवश्च चेत्, तदा मत्तमयूरं नाम स्यात् । अस्य वृत्तस्य वेदैः रन्ध्रैः चतुर्भिः नवभिश्च वर्णैः यतिर्भवेत् । तद्यथा—

म त य स ग म त य स ग
ऽऽऽऽ ऽ।।ऽऽ ।।ऽऽ ऽऽ ऽ ऽ ऽ।।ऽऽ ।।ऽऽ
विद्युन्नद्धाः सेन्द्रधनुर्द्योतितदेहा वातोद्धूताःश्वेतबलाकास्थिकचिह्नाः ।
एते मेघा गर्जितगम्भीरनिनादैः प्रावृट्कालं मत्तमयूराः कथयन्ति ॥
(१५७)

१५८. **सजसा जगौ भवति मञ्जुभाषिणी ॥**

१५९. **ननतरगुरुभिश्चन्द्रिकाश्वर्तुभिः ॥**

सुकविहृदयानन्दिनी

(१५८) यस्य पादे सगणजगणसगणजगणगुरवः तद्वृत्तं मञ्जुभाषिणी नाम। यथा--

स्मरसुन्दराकृतिमनेकवल्लभं चरणप्रणामनतमीप्सितं पतिम्।
परुषोक्तिभिः किमिति [1]घट्टयस्यमुं सखि वल्लभा भवति मञ्जुभाषिणी ॥
(१५८)

छन्दोवृत्तिः

(१५८) सजसजगणाः सगुरवः मञ्जुभाषिणी। यथा--

वसुधाधिपत्वमिह देव नार्थये सुरनाथतापि पुरुहूतसम्पदः।
वरदोऽसि चेन्मम तदा सदा विभो भवतु प्रिया सततमञ्जुभाषिणी ॥
(१५८)

पत्रचिका

(१५८) मश्च जश्च सश्च सजसाः, जश्च गश्च जगौ। सगणजगणसगणजगण-गुरवश्चेत् तदा [2]मञ्जुभाषिणी नाम भवति। तद्यथा--

म ज स ज ग स ज [3]स ज ग
।।ऽ ।ऽ ।।।ऽ।ऽ।ऽ ।।ऽ ।ऽ।।।ऽ ।ऽ।ऽ

इभकुम्भतुङ्गघटितेतरेतर-स्तनभारदूरविनिवारितोदराः।
परिफुल्लगण्डफलकाः परस्परं परिरेभिरे कुकुरकौरवस्त्रियः ॥ (१५८)

सुकविहृदयानन्दिनी

(१५९) द्वौ नगणौ तगणरगणौ गुरुश्च यत्र तद्वृत्तं चन्द्रिका नाम। सप्तभिः षड्भिश्च यतिः। यथा--

वितरति कुमुदानां श्रियं समग्रां तम इव वनितानां भिनत्ति मानम्।
ततमपि गगनं चन्द्रिका भुविस्था धवलितमपि चक्रे शरन्निशासु ॥
अष्टभिर्यतिरित्येके[3] ॥ (१५९)

---

1. खेदयसि व. फ. 2. सुनन्दिनी निसा. 3. उपस्थितमिदं जसौ त्सौ यदि गुरुः स्यात्। सजसा जगौ यदि तदा सुनन्दिनी व.

१६०. **यमौ रौ विख्याता चञ्चरीकावली गः ॥**

छन्दोवृत्तिः

(१५९) यथा--

ननसरगुरवो यदि भवन्ति [1]तदा चन्द्रिका नाम छन्दः । (१५९)

पञ्जिका

(१५९) नश्च नश्च तश्च रश्च गुरुश्च ननतरगुरवः । तैः नगणद्वयतगणरगणगुरुभिः चन्द्रिका नाम स्यात् । अस्य वृत्तस्य अश्वषड्भिः सप्तभिः षड्भिः वर्णैः यतिर्भवेत् । तद्यथा—

न न त र ग न न त र ग
। । । । । ऽ ऽ । ऽ । ऽ ऽ । । । । । । ऽ ऽ । ऽ । ऽ ऽ
अयि शिशिरकरो माममन्दमुद्यत् तव सखि वदनं वीक्ष्य लज्जयेव ।
प्रहरति तिमिरं केशपाशबुद्ध्या मदयति मदनं त्वां प्रहर्तुमुच्चैः ॥ (१५९)

पञ्जिका

(१६०) यश्च मश्च यमौ । रश्च रश्च रौ इत्येकशेषः । गः गुरुः । यगणमगणौ रगणद्वयं गुरुरेकश्च चेत्, तदा चञ्चरीकावली ख्याता [2]चञ्चरीकावली इति नाम्ना प्रसिद्धा । तद्यथा--

य म र र ग य म र र ग
। । ऽ ऽ ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ ऽ ऽ ऽ । ऽ ऽ । ऽ ऽ
वसन्ते वासन्तीपल्लवोल्लङ्घलीला भ्रमद्भृङ्गक्रीडां काङ्क्ष्यमाणान्न यान्ती ।
नवामालीपुष्पोद्भूतसीधुप्रमत्ता हरत्येषा चित्तं चञ्चरीकावली मे ॥
(१६०)

---

1. अश्वाश्च ऋतवश्च अश्वर्तवः । सप्तषड्भिर्यतिः तदा चन्द्रिका भवति इ.
2. मञ्जरीकावली निसा.

शववर्याम् ।

१६१. म्तौ न्सौ गावक्षग्रहविरतिरसम्बाधा ॥

सुकविहृदयानन्दिनी

(१६१) मगणतगणनगणसगणा द्वौ गुरू च यत्र तद्वृत्तं असम्बाधा नाम । अक्षैरिन्द्रियैः पञ्चभिः ग्रहैः नवभिश्च यतिः । यथा—

यावदगच्छेयं दयितविहितसङ्केत–स्थानस्याभ्याशं कृतनिभृततुलाकोटिः ।
तावच्चक्रेऽग्रे द्रुतमुदयमयं वैरी भित्त्वा सम्बाधान्यपि तिमिराणीन्दुः ॥
(१६१)

छन्दोवृत्तिः

(१६१) मतनसगुरुद्वयैः असम्बाधा नाम । अक्षग्रहेति पञ्चभिर्नवभिः यतिः । यथा—

रागे नीरागाः सविनयकृतरुद्राभाः द्वेषे सद्वेषाः कृतगुरुशुश्रूषाः ।
कामे निष्कामाः सकरुणकरणग्रामाः ते स्तोकालोका इह सततमसम्बाधाः ॥
(१६१)

पञ्जिका

(१६१) म् च तश्च म्तौ, न् च सश्च न्सौ । गश्च गश्च गौ इत्येकशेषः । मगण-तगणौ नगणसगणौ गुरुद्वयं च यदि असम्बाधा नाम स्यात् । इयं कीदृशी ; अक्षग्रह-विरतिः अक्षैः पञ्चभिः ग्रहैः नवभिश्च वर्णैः विरतिर्यतिः यस्याः सा तथोक्ता । तद्यथा—

म त न स ग ग म त न स ग ग
ऽ ऽ ऽ ऽ ऽ । । । । । । ऽ ऽ ऽ ऽ ऽ ऽ ऽ । । । । । । । ऽ ऽ ऽ
स्कन्दं सानन्दं प्रणमत सततं यूयं धर्मश्चार्थश्च प्रभवति भवतां नित्यम् ।
शास्त्रव्याख्याने प्रसरति विशदा बुद्धिः शक्ता व्याकर्तुं स्फुरति जगति सामर्थ्यम् ॥
(१६१)

१६२. ननरसलघुगैः स्वरैरपराजिता ॥

सुकविहृदयानन्दिनी

(१६२) द्वौ नगणौ रगणसगणलघुगुरवो यत्र तद्वृत्तं अपराजिता नाम। सप्तभिः —यतिः। यथा—

तुरगराजवतीं तुलार्कमहीपतेः इतरनृपशतैश्चमूमपराजिताम्।
जयति विजयदोर्युगैकसहायवान् अवनिपतिरसौ प्रमारकुलोद्भवः॥ (१६२)

छन्दोवृतिः

(१६२) नद्वयरसगणैर्लघुगुरुसहितैः स्वरैः सप्तभिः यतिः। यथा—

त्रिभुवनविदितां परैरपराजितां मिहिरहरिहरादिमाममरावलीम्।
अपि कुसुमशरैश्चकार वशंवदां स जयति विलसन् महामहिमा स्मरः॥
(१६२)

पञ्जिका

(१६२) नश्च नश्च रश्च सश्च लघुश्च गश्च ननरसलघुगाः। तैः नगणद्वयरगण-सगणलघुगुरुभिः अपराजिता नाम स्यात्। अस्य वृत्तस्य सप्तभिः वर्णैः यतिः स्यात्। तद्यथा—

न न र स ल ग न न र स ल ग
।।।।।।ऽ।ऽ।।ऽ।ऽ ।।।।।।ऽ।ऽ।।ऽ।ऽ
भुवनपरिसरान्तरालनिरन्तरं तिमिरमविकलं महोनिधिरुद्गतः।
विवृतदिनमुखं पिबन्निव भासते कलशभव इवाखिलं जलधेः पयः॥
(१६२)

१६३. **ननभनलगिति [1]प्रहरणकलिता ॥**

सुकविहृदयानन्दिनी

(१६३) द्वौ नगणौ भगणनगणलघुगुरवश्च यत्र तद्वृत्तं प्रहरणकलिता नाम। इति[2] शब्दस्यान्वयस्य ग्रहणात् सैव यतिः। यथा—

रणभुवि भवता प्रहरणकलिताः परिहृतवनितास्तव नृप रिपवः।
विदधति शयनं कृततृणशयना वनभुवि सततं भयचकितहृदः॥ (१६३)

छन्दोवृत्तिः

(१६३) ननभना लघुगुरू च इति प्रहरणकलिता। अत्र स्वरैः इत्यनुवर्तते। तेनेहापि सप्तभिः यतिः। यथा—

तव गुणनिकरैरपि दृढविपुलै–रहितसमुदयः सपदि नियमितः।
नरपतितिलक त्वमिह भुजलतां प्रथयसि किमसिप्रहरणकलिताम्॥(१६३)

पञ्जिका

(१६३) नश्च नश्च भश्च नश्च लश्च ग् च ननभनलग् इति समाहारे नपुंसकम्। नगणद्वयभगणनगणलघुगुरुभिः इति इयं प्रहरणकलिता नाम स्यात्। तद्यथा—

न न भ न लग न न भ न ल ग
।।।।।।ऽ।।।।।।ऽ।।।।।।ऽ।।।।।ऽ
सरसिजवदनं कुवलयनयनं मधुमुरमथनं कलिमलदहनम्।
हरिमतिसदयं कृतभवविजयं प्रणमत सभयं सकलमदलयम्॥ (१६३)

---

1. प्रहरणकलिका निसा. 2. शब्दस्यान्वयस्यैव ग्रहणात् पूर्वोक्तात् स्वरैः इति यतिः ब.

१६४. [1]उक्ता वसन्ततिलका तभजा जगौ गः ॥

१६५. [2]सिंहोद्धतेयमुदिता मुनिकाश्यपेन ॥

सुकविहृदयानन्दिनी

(१६४) यत्र [3]तगणभगणजगणा जगणगुरवः तद्वृत्तं वसन्ततिलका नाम । यथा—

ध्यातर्वसन्ततिलकानतिमुक्तकं च संदृश्यतेऽत्र किमु मन्युरतस्त्वमेतत् ।
नाहं सुयोऽभवदनेकविधोत्सवश्रीः संप्रत्यसह्यविरहैकगृहं प्रियायाः ॥
(१६४)

छन्दोवृत्तिः

(१६४) तभजजाः गुरुद्वयं वसन्ततिलका । यथा—

सत्कर्णिकारचितविभ्रमभासमानां नव्यस्फुरद्रुचिरपत्रलतावलीकाम् ।
दिष्ट्या वसन्ततिलकां चितचारुशोभां कान्तां वनश्रियमिमां त्वमुपागतोऽसि ॥
(१६४)

पञ्जिका

(१६४) तश्च भश्च जश्च तभजाः । जश्च गश्च जगौ । गः गुरुः । तगणभगणौ जगणगुरुद्वयं च चेत् तदा वसन्ततिलकं वसन्ततिलकमिति नाम्ना उक्तं कथितम् । तद्यथा—

त भ ज ज ग ग त भ ज ज ग ग
ऽ ऽ । ऽ । । । ऽ । । ऽ । ऽ ऽ ऽ ऽ । ऽ । । । ऽ । । ऽ । ऽ ऽ

कर्पूरपूरपरिपूरितनागवल्ली–कस्तूरिकापरिमलोज्ज्वलपूगपूगैः ।
सम्भावयत्यनुदिनं निवहं कवीना मौर्यान्वयो विजयबाहुमुनिर्मनीषी ॥
(१६४)

तात्पर्यटीका

(१६५) इयमिति वसन्ततिलकैव । अनेकाभिधानानां व्यक्तीनां शास्त्रान्तरोक्ताभिधानस्वीकारेणापि वावदूकस्य न प्रतिज्ञाहानिः स्यात् इति दर्शितम् ॥ (१६५)

---

1. उक्तं वसन्ततिलकं निसा. 2. सिंहोन्नतेति । [0]उद्धर्षिणीयमुदिता मुनिसैतचेन । रामेण सेयमुदिता मधुमाधवीति निसा. 3. तगणभगणौ द्वौ गुरू च यस्य पादे तद्वृत्तं व.

१६६. **इन्दुवदना भजसनैः सगुरुयुग्मैः ॥**

सुकविहृदयानन्दिनी

(१६५) इयमेव वसन्ततिलका कश्यपस्याचार्यस्य मतेन सिंहोद्धता नाम । यथा—

उन्निद्रपद्मवदनः [1]सुभगोऽङ्गनानां आरक्तपादतलपाणिरदीनसत्त्वः ।
सिंहोद्धतासमगलः सुविशालवक्षाः स्यादीदृशो नरपतिः पुरुषः पृथिव्याः ॥

[2]उद्धर्षणीति कविराजवसुन्धरेण ।
गोमेन सैव गदिता मधुमाधवीति ॥

संवत्सरे रसपयोनिधिसूर्यसंख्ये श्रीविक्रमान्नरपतेः रचिता मयेयम् ।
उक्ता सनामभिरुदाहरणैरुदारैः उद्धर्षणी भवतु चेतसि सत्कवीनाम् ॥

वसन्ततिलकम् इत्यन्ये ॥ (१६५)

छन्दोवृत्तिः

(१६५) अस्या नामान्तरमाह । स्पष्टम् ॥ (१६५)

पञ्जिका

(१६५) मुनिश्चासौ कश्यपश्च इति मुनिकाश्यपः । तेन काश्यपेन मुनिना इदं वसन्ततिलकं सिंहोन्नता इति नाम्ना गदिता कथिता ॥ (१६५)

सुकविहृदयानन्दिनी

(१६६) भगणजगणसगणनगणा गुरुद्वयं च [3]यत्र, तद्वृत्तं इन्दुवदना नाम । यथा—

मारुतवशप्रचलितोत्पलदलाक्षं शोभनललाटतटमध्यकृतपुण्ड्रम् ।
रे पथिक सम्प्रति मधौ मदनबन्धौ संस्मरसि तद्वदनमिन्दुवदनायाः ॥
(१६६)

---

1. सुभगाऽङ्गनानां व. 2. उद्धर्षिणीति सैतवः यदा संवत्सरे ब. 3. यस्य पादे फ.

१६७. द्विः सप्तच्छिदलोला म्सौ म्भौ गौ चरणे चेत् ॥

छन्दोवृत्तिः

(१६६) भजसनभगैः गुरुयुग्मेन[1] इन्दुवदना । यथा—

सस्पृह इह त्वयि रतेरपि हि कामः त्वद्वदनवीक्षणवशाद्विगलितचापः ।
ताडयति नैष भवतीं शरसमूहैः इन्दुवदने न रमणे तदसि रक्ता ॥ (१६६)

पत्रिका

(१६६) भश्च जश्च सश्च नश्च भजसनाः । तैः भगणजगणसगणनगणैः सगुरुयुग्मैः गुरुद्वयसहितैः इन्दुवदना नाम स्यात् । तद्यथा—

भ	ज	स	न	ग ग
ऽ।।	।ऽ।	।।ऽ	।।।	ऽऽ

सागर जडाशयतया त्वमसि हीनः
केवलमितोऽसि वपुषैवमभिमानः ।
श्रीमणिभयामृतधनाद्यपहरद्भो
रक्षितुमपायविचयस्तव हि नासीत् ॥ (१६६)

सुकविहृदयानन्दिनी

(१६७) यत्र मगणसगणमगणभगणा [2]गुरू च तद्वृत्तं **अलोला नाम** । [3]सप्तभिः **सप्तभिर्यतिः** । यथा—

यो देवद्विजभक्तः संसारेषु विरक्तः श्रौतस्मार्तविधीनां कर्ता त्यक्तविकल्पः ।
मैत्रः कारुणिकात्मा क्रोधामर्षविमुक्तः तस्य श्रीर्भुवने स्यादलोला नूनमलोला ॥
(१६७)

---

1. सहितेन इत्यधिकम् इ. 2. द्वौ इत्यधिकम् ब. 3. द्विः सप्तच्छिदिति वा रूढयं सप्तभिर्यतिः ब.

अतिशक्वर्याम् ।

१६८. द्विहतहयलघुरथ गिति शशिकला ॥

छन्दोवृत्तिः

(१६७) मसमभगरुद्वयेन द्विः सप्तेति वारद्वयं सप्तभिर्यतिः । यथा—

आत्मारामपदैकव्यापाराभिरतानां संसाराब्धिरगाधस्तेषां गोष्पदमात्रम् ।
अन्तस्तत्त्वसमाधिः प्राणायामनिरोधान् नासावंशनिषण्णा येषां दृष्टिरलोला ॥
(१६७)

पञ्जिका

(१६७) म् च सश्च म्सौ, म् च भश्च म्भौ । गश्च गश्च गौ इत्येकशेषः । **मगण-समणौ मगणभगणौ गुरुद्वयं च चरणे पादे चेत् तदा अलोला नाम स्यात् ।** इयं कीदृशी । **द्विः सप्तच्छित् ।** छेदनम् छिदिति सम्पदादित्वात् भावे क्विप्प्रत्ययः । सप्तभिश्च छित् सप्तभिश्च छित द्विः द्विवारं यथा स्यात् द्विः सप्तच्छिद् च्छेदो यस्या इति बहुव्रीहिः । **सप्तभिः वर्णैः यतिर्भवति इत्यर्थः ।** तद्यथा—

म स म भ ग ग
ऽ ऽ ऽ । । ऽ ऽ ऽ ऽ ऽ । । ऽ ऽ
लक्ष्मीः सुन्दरि लोला लोलं यौवनमेतल्
लोलं चायुरिदं ते सर्वं विद्धि सुलोलम् ।
पापं दुर्गतिहेतुस्तस्मान्मुञ्च सदा तद्
धर्मं स्वर्गनिदानं यत्नादेतुमुपेहि ॥ **(१६७)**

तात्पर्यटीका

(१६८) द्वाभ्यां हत इति गुणितो द्विहतः । हयैरिति सप्तभिर्मितो लघुः हयलघुः । द्विहतश्चासौ हयलघुश्च द्विहतहयलघुः । अथ गिति गुरुरिति शशिकला नाम वृत्तं भवति ॥ **(१६८)**

सुकविहृदयानन्दिनी

(१६८) द्वाभ्यां हता ताडिता हयलघवः सप्तलघवो यस्याः सा तथोक्ता । चतुर्दशलघुः इत्यर्थः । गुरुश्च[1] भवति [2]यस्य चरणे तद्वृत्तं शशिकला नाम । [3]सप्तभिरष्टभिश्च यतिः । पारिशेष्यात् यथा—

कुसुमशरतनुदहनशिरसि जटा–मुकुटतटसितमणिरमलकिरणा ।
तव भवतु सुखकृदियमिह सततं प्रतिपदि सुनभसि वसति शशिकला ॥

चन्द्रावर्ता इति पिङ्गलः ॥ (१६८)

छन्दोवृत्तिः

(१६८) चतुर्दशलघवः एको गुरुः शशिकला । यथा—

अरतिमति हि मम वपुषि विदधतीं तिरयसि यदि नवजलद शशिकलां ।
स्वयमपि किमिति न कलयसि करुणां यदिह विरचयसि कटुरसितमहो ॥
(१६८)

पञ्जिका

(१६८) अतिशक्वर्यामुदाहरति । इति एषा शशिकला । किंविशिष्टा । द्विहतहयलघुः द्विहता द्विः गुणिता हयलघवः सप्तलघुवर्णा यस्याः सा तथोक्ता । अथ अनन्तरं ग् गुरुः । चतुर्दशलघुभिरेकेन गुरुणा च शशिकला नाम भवति । तद्यथा—

लघु १४ ग
। । । ।

१६९. स्रगिति भवति रसनवकयतिरियम् ॥

तात्पर्यटीका

(१६९) इयम् इति अनुवर्तते । इयं शशिकला एव यतिविशेषात् स्रग्नामा मणिगुण-निकरनामा च ॥ (१६९)

सुकविहृदयानन्दिनी

(१६९) [1]इयं सैव शशिकला षड्भिर्नवभिश्च यदा यतिर्भवति तदा स्रगिति नाम । माला इति वक्तव्ये छन्दोभङ्गभयात् स्रग् इत्युक्तम् । एकार्थत्वान्न दोष । यथा—

घनपरिमलमिलितमधुनिचया स्रगियमुरसि [2]नवशशिमुखि शुशुभे ।
कटकयुगलकमपि कलरवसुभगं श्रियमिदमिह जनयति सुचरणयोः ॥
(१६९)

छन्दोवृत्तिः

(१६९) इयमेव शशिकला चेत् षड्भिः नवभिः यतियुक्ता तदा स्रक् नाम । यथा—

प्रसरति तव सुभग विरहदहने शृणु यदजनि किमपि कुवलयदृशः ।
सरसिजमपि तपति नवविचकिलं स्रगपि सपदि जनयति भृशमरतिम् ॥
(१६९)

पञ्जिका

(१६९) रसनवकयतिः रसैः षड्भिः नवकैः नवभिश्च वर्णैर्यतिः चेत् तदा इयं शशिकला स्रगिति भवति स्रग् इति नाम्ना स्यात् । तद्यथा—

ल १४ ग
।।।।।।।।।।।।।ऽ
खरतरशरविनिहृतदशवदनः
न जयति गुरुभवभयचयशमनः ।
रवगपगनगधरफणधरशयनः
परपदकरवरसरसिजनयनः ॥ (१६९)

1. इयमेव अ. ब. 2. तव अ. फ.

१७० **वसु[1]हययतिरिह [2]मणिगणकिरणः ॥**
१७१. **ननमययुतेयं मालिनी भोगिलोकैः ॥**

सुकविहृदयानन्दिनी

(१७०) इयमेव शशिकला वसुभिरष्टभिः हयैः सप्तभिः यदा यतिर्भवति तदा मणिगुणनिकरः [3]इति नाम। यथा--

परजनहितकरवरधनकलितः सुवचनकृतवरजनसुखनिवहः।
भव भुवि भवकृतवरतरमहिमा स भवति नरवर मणिगुणनिकरः ॥(१७०)

छन्दोवृत्तिः

(१७०) यथा—

नृवर यशसि मतिरविकलकलिता भुजबलमनुपममतिनयपरता।
नतिरनुगुरुजनमुचितचतुरता त्वयि जयति नृपतिमणिगुणनिकरः ॥ (१७०)

पञ्जिका

(१७०) इह शशिकलायां वसुमुनियतिः वसुभिरष्टभिः मुनिभिः सप्तभिश्च वर्णैः यतिश्चेत् तदा मणिगणकिरणो नाम स्यात्। तद्यथा–

ल १४ ग
। । । । । । । । । । । । । । ऽ
अविरतममृतदमितमतिसुखदं
सुरनरमुनिगणकृतबहुशरणम्।
दशबलपदयुगमपगतकलुषं
प्रभवति कुशलकृदनुपमपुरुषः ॥ (१७०)

सुकविहृदयानन्दिनी

(१७१) [4]इयं मालिनी नाम अष्टभिः सप्तभिर्यतिः। यथा--

नवजलधरमालामालिनीलां विलोक्य निजदयितवियोगप्रान्तभागं निबोध।
न खलु जलधराणां नादमाकर्ण्य कश्चिद् भवति शिथिलबुद्धिर्वेश्म गन्तुं प्रवासी ॥
(१७१)

---

1. °मुनि° निसा. 2. मणि गुणनिकरा ब. 3. इति नास्ति ब. 4. द्वौ नगणौ मगणो द्वौ यगणौ यस्य पादे तद्वृत्तं मालिनी नाम। भोगिभिः अष्टभिः, लोकैरिति सप्तभिर्यतिः ब.

१७२. भवति नजौ भजौ रसहिनौ प्रभद्रकम् ॥

छन्दोवृत्तिः

(१७१) नद्वयं मो यद्वयं स मालिनी नाम । भोगि इत्यष्टभिः लोकैः इति सप्तभिर्यतिः । यथा--

प्रतिमुहुरिह दोलान्दोलनव्यापृतानां कुवलयनयनानामाननैरुल्लसद्भिः ।
बिमलतरवणिमान्तश्चन्द्रिकां द्राक् किरद्भिः नवशशधरमालामालिनी वाभवद् द्यौः ॥
(१७१)

पञ्चिका

(१७१) नश्च नश्च मश्च यश्च यश्च ननमययाः तैः नगणद्वयमगणयगणद्वयैः युक्ता इयं मालिनी नाम स्यात् । अस्याः भोगिलोकैः भोगिभिरष्टाभिः लोकैः सप्तभिश्च वर्णैः यतिः स्यात् । तद्यथा--

न न म य य
। । । । । । ऽ ऽ ऽ । ऽ । । । ऽ
अथ सललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे ।
सहचरमधुहस्ते न्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थौ प्राञ्जलिः पुष्पकेतुः ॥ (१७१)

सुकविहृदयानन्दिनी

(१७२) यत्र[1] नगणजगणौ भगणजगणरगणाश्च तद्वृत्तं प्रभद्रकं नाम । यथा--

अलभत दुश्चरेण तपसा हिमाद्रिजा यमिह पतिं पतिं त्रिजगतां महेश्वरम् ।
नयनसमुद्गतानलशिखाहुतस्मरो दिशतु सतां सदैव स विभुः प्रभद्रकम् ॥
(१७२)

---

1. पादे इत्यधिकम् ब, नजभजरैर्विराजितमिदं सुकेशरम् अ, नजभजरं सुकेशरम् त्र.

१७३. **सजना नयौ शरदशयतिरति[1]रेखा ॥**

छन्दोवृत्तिः

(१७२) नजभजरा गणाः यथा--

जयति जगत्त्रयोपकृतिकारणोदयो जिनपतिभानुमान् परमधामतेजसा ।
भविकसरोरुहां गलितमोहनिद्रकं भवति यदीयपादलुठनात् प्रभद्रकम् ॥
(१७२)

पञ्जिका

(१७२) नश्च जश्च नजौ, भश्च जश्च भजौ । नगणजगणौ भगणजगणौ रसहितौ रगणयुक्तौ चेत् तदा प्रभद्रकं नाम भवति । एतदेव केचित् सुकेशरम् इति ब्रुवते । तद्यथा--

ज भ ज र
।।।।ऽ।ऽ।।।ऽ।ऽ।ऽ
अमरतरुर्यदीयमनिशं विहारित-
प्रकरमवेक्ष्य तु स्वयमुपैति लाघवम् ।
कविकुमुदप्रबोधहिमदीधितिप्रभो
जयति सुखं पराक्रमभुजो महीपतिः ॥ (१७२)

सुकविहृदयानन्दिनी

(१७३) यत्र सगणजगणनगणा नगणयगणौ च तद्वृत्तं एला नाम । [2]पञ्चभिर्दशभिः-यतिः । यथा--

वरचन्दनद्रुमकिसलयमरि[3]चैला लवलीलताप्रभृति वनमिह हि धुन्वन् ।
मलयानिलः सपदि विदलित[4]प्रयुक्त-प्रमदाजनः प्रसरति रतिपतिबन्धुः ॥
(१७३)

---

1. एला सु. टं. 2. शरैरित्यधिकम् ब. फ. 3 [0]चैली क. 4. [0]वियुक्त मुद्रितः पाठः

१७४. **स्रौ म्यौ यान्तौ भवेतां [1]सप्ताष्टकैश्चन्द्रलेखा ॥**

छन्दोवृत्तिः

(१७३) सजननयाः पञ्चभिर्दशभिर्यतिः एला नाम छन्दः । यथा—

चलितैर्घटोद्भवमुनिदिशमभि यस्य प्रबलैर्बलै[2]र्बलमथनसदृशमूर्तेः ।
निषिषेविरे चिरमुदधितटवनान्ताः परितो [3]लसद्बहुलबलिवकुलैला ॥
(१७३)

पञ्चिका

(१७३) सश्च जश्च नश्च सजनाः । नश्च यश्च नयौ । सगणजगणनगणद्वयं यगणश्च चेत्, तदा अतिरेखा ताम स्यात् । एषा कीदृशी । शरदशयतिः शरैः पञ्चभिः दशभिश्च वर्णैः यतिः यस्या इत्यन्यपदार्थसमासः । अस्याः एला इति नामान्तरम् । तद्यथा—

स ज न न य
।। ऽ । ऽ ।।।। ।।।। ऽ ऽ
यदि कोपिनी प्रभवसि मदुपरि कान्ते
दृढबन्धनं घटय भुजलतिकया मे ।
सहसा कुरु प्रखरनयनशरघातं
रदनच्छदावय दश सुमुखि यथेच्छम् ॥ (१७३)

सुकविहृदयानन्दिनी

(१७४) [4]मगणरगणौ मगणयगणौ यगणश्च यत्र भवेतां तद्वृत्तं चन्द्रलेखा नाम । सप्तभिरष्टाभिर्यतिः । यथा—

बिभ्राणश्चन्द्रलेखां चूडामणिस्थानभूतां
तार्तीयं चापि नेत्रं जाज्वल्यमानं ललाटे ।
कण्ठे यस्यास्थिमाला भस्माङ्गरागः शरीरे
कल्याणं वः स दिश्यात् त्रैलोक्यनाथो गिरीशः ॥ (१७४)

---

1. सप्ताष्टाभिः निसा. 2. बलिमथन° अ. ब. 3. लसद्बहुल° इ. 4. यस्य पादे मगणरगणमगणाः द्वौ यगणौ तद्वृत्तं ब.

१७५. **कामक्रीडा छन्दो यत्तत्कृत्वा माभ्यां मो मो मः**[1] ॥

छन्दोवृत्तिः

(१७४) मरमयया: सप्ताष्टाभिर्यतिश्चन्द्रलेखा । यथा—

राजन् सत्यं तदेतत् ब्रूमोऽद्भुतं वर्णनं ते
दोर्दण्डस्थामभिः स स्पर्धां करोतु त्वदीयैः ।
आच्छिन्द्याद्यो मुरारेर्वक्षस्थलात् कौस्तुभं वा
यः कर्षेच्चन्द्रलेखां शम्भोर्जटामण्डलाद्वा ॥ (१७४)

पञ्चिका

(१७४) म् च रश्च म्रौ । म् च यश्च म्यौ । मगणरगणौ मगणयगणौ च यान्तौ यगणावसानौ यदि भवेताम् तदा चन्द्रलेखा नाम स्यात् । एतस्याः सप्ताष्टकैः सप्तभिरष्टभिश्च वर्णैः यतिः स्यात् । तद्यथा—

म र म य य
ऽ ऽ ऽ ऽ । ऽ ऽ ऽ ऽ । ऽ ऽ । ऽ ऽ
मांसग्रन्थौ स्तनौ ते वक्त्रं च लालायितं स्यात्
मूत्रक्लिन्ना च योनिर्देहस्तथैवापवित्रः ।
ब्रूषे मिथ्यैव वाचं निन्द्यं च कार्यं करोषि
प्रायः पापकरा त्वं कस्माद् भवेश्चन्द्रलेखा ॥ (१७४)

सुकविहृदयानन्दिनी

(१७५) पञ्च मगणा यस्याम् सा कामक्रीडा ।
सगणैः शिवनक्त्रमितैः कथिता नलिनी ॥[2] (१७५)

1. सजौ ससयुतौ वृषभस्ततो यः इत्यधिकम् फ. 2. रान्नभःद्वितयरैरुदितं रमणीयकम् इत्यधिकम् ब.

अष्टचाम् ।

१७६. भ्रत्रिनगैः स्वरात् खमृषभगजविलसितम् ॥

छन्दोवृत्तिः

(१७५) माः पञ्च यस्यां सा कामक्रीडा नाम । यथा—

म म म म म
ऽ ऽ ऽऽ ऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽ

उक्ता वाचं नो दत्ते तल्पे शेते व्यावृत्ताङ्गी
पर्याक्षित्पक्ष्मप्रान्ता प्रस्थानं काङ्क्षत्याशु ।
कामक्रीडावार्तागोष्ठीप्रारम्भेऽत्युच्चैर्व्रीडां
धत्ते पत्युः प्रीत्यै वामारम्भाप्येवं सा बाला ॥ (१७५)

तात्पर्यटीका

(१७६) त्रिभिः मिताः नः त्रिनः । ननु त्रयश्च ते नाश्च त्रिनाः इति कर्मधारयः । तस्य संख्यापूर्वं[1] ॥ (१७६)

सुकविहृदयानन्दिनी

(१७६) भगणरगणौ त्रयो नगणा गुरुश्च यत्र तद्वृत्तं ऋषभगजविलसितं नाम । स्वरात् सप्तभ्यः परं खं (नवभिः) यतिः । यथा—

यत्र चतुष्पथेषु विविधयुवतिजनता-गीतमनोरमेषु तव रिपुवरनगरे ।
त्वद्भुजविक्रमेण नृपतिवर विजयते सम्प्रति तत्र वन्यमृषभगजविलसितम् ॥
(१७६)

छन्दोवृत्तिः

(१७६) भरौ नगणत्रयं गुरुश्च ऋषभगजविलसितम् । स्वरात् सप्तकविरामात् खं नवकयतिकम् । यथा—

विन्ध्यधराधरस्य ऋषभगजविलसितं कामिजनस्य भीरुवरतरतनुललितम् ।
आभरणं धनस्य गुणगुणिनि वितरणं धन्यधराधिपस्य कविवररसभजनम् ॥
(१७६)

---

1. अग्रभागो नष्टः ता.

१७७. **नजभजरैः (नजभजतैः) सदा भवति वाणिनी गयुक्तैः (गान्वितैः)॥**

पञ्जिका

(१७६) अष्टम्यामुदाहरति । भ् च र्श्च भौ, नश्च नश्च नश्च ना:, त्रयश्च नाश्चेति त्रिना:, ग: गुरु:, त्रिनाश्च गश्चेति त्रिनगाः । भगणरगणौ नगणत्रयं गुरुरेकश्च चेत्, तदा ऋषभगजविलसितम् नाम स्यात् । एतस्य वृत्तस्य स्वरात् खम् स्वरा: सप्त खं नव, सप्तभिर्नवभि: वर्णै: यतिर्भवति इत्यर्थ: । तद्यथा—

भ र न व न ग
ऽ।।ऽ। ऽ। ।।।। ।।।। ।ऽ
कोऽहमहं च कस्य कथमिह वसतिरियं
का जननी पिता च मम भवति जगति कः ।
के सुहृद: प्रयामि कुह पुनरपि सकलं
धान्यं धनं विहाय जिन जिन किमिदमहो ॥ (१७६)

सुकविहृदयानन्दिनी

(१७७) [1]नगणजगणभगणजगणरगणाः ग: यत्र तदवृत्तं वाणिनी नाम । यथा—

चकितमृगेक्षणा गुरुनितम्बबद्धकाञ्ची
गुणकलकिङ्किणीरवविबोधितासमेषु: ।
जनयति वाणिनी चतुरवाक्यपण्डितेयं
मुदमधिकं सखे मनसि मेऽद्य दृष्टमात्रा ॥ (१७७)

छन्दोवृत्ति:

(१७७) नजभजगा: गुरुश्च । यथा—

अविरलपुष्पबाणललिता निदर्शयन्ती परिमलहारितामरसवक्त्रमुद्वहन्ती ।
मदकलगजहंसगमनानि भावयन्ती शरदिह मानसं हरति हन्त वाणिनीव ॥
(१७७)

---

1. नगणजगणभगणजगणरगणगुरवो यत्र ब. फ.

अत्यष्टयाम् ।

१७८. रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ॥

पञ्चिका

(१७७) नश्च जश्च भश्च जश्च तश्च नजभजताः, तैः नगणजगणभगणजगणतगणैः, सान्वितैः गुरुसहितैः, सदा सर्वदा वाणिनी नाम भवति । तद्यथा—

न ज भ ज त ग
।।।।ऽ।ऽ।।।ऽ।ऽ ऽ।ऽ
दशनमृणालनालदलदन्तुरं दन्तिनां
दलितनिपातितश्रवणपद्मिनीकर्णिकम् ।
कलुषितलोहिताम्बुजितवीरहंसाम्बुजं
रिपुरणभूसरस्तव भुजेन संक्षोभितम् ॥ (१७७)

सुकविहृदयानन्दिनी

(१७८) यगणमगणनगणसगणभगणलघुगुरवो यत्र तद्वृत्तं शिखरिणी नाम । [1]षड्भिरेकादशभिर्यतिः । यथा—

शशाङ्कास्या चञ्चत्कुवलयदलस्पर्धिनयना
सलीलं गच्छन्ती गुरुजघनभारालसगतिः ।
इयं पीनोत्तुङ्गस्तनशिखरिणी वारवनिता
कटाक्षैर्विक्षोभं जनयति मुनीनामपि हृदि ॥ (१७८)

छन्दोवृत्तिः

(१७८) यमनसभलघुगुरुभिः, रसैः षडभिः रुद्रैरेकादशभिः यतिः । यथा—

हरन् सर्वाम्भोजश्रियमविरतं सिन्धुपतिना
कृतार्थस्तन्वानो निशि तमसि विद्योतमसमम् ।
सितांशुस्तद्वंशे त्वमिह जयसिंह क्षितिपते
कलापूर्णः पद्योदयशिखरिणीहाभ्युदयते ॥ (१७८)

---

1. रसैः षड्भिः रुद्रैरेकादशभिः ब:

१७९. **जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥**

पञ्जिका

(१७८) अत्यष्ट्यामुदाहरति । यश्च मश्च नश्च सश्च भश्च लश्च यमनसभलाः, गः गुरुः, यगणमगणनगणसगणभगणाः लघुगुरू च चेत्, तदा शिखरिणी नाम स्यात् । इयं कीदृशी । रसैः रुद्रैः छिन्ना, रसैः षड्भिः, रुद्रैः एकादशभिश्चवर्णैः छिन्ना अवधीकृता यतिमती इत्यर्थः । तद्यथा—

य म न स भ ल ग
। ऽ ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । । । ऽ

दुरालोकस्तोकस्तबकनवकाशोकलतिका-
विकाशः कासारोपवनपवनोऽपि व्यथयति ।
अपि ग्राम्यद् ही ही रणितरमणीयानमुकुल-
प्रसूश्चूतानां सा सखि शिखरिणीयं सुखयति ॥ (१७८)

सुकविहृदयानन्दिनी

(१७९) जगणसगणौ जसयलगा यत्र तद्वृत्तं पृथ्वी नाम । [1]अष्टभिर्नवभिश्च यतिः । यथा—

किमित्ययमसंस्कृतस्तव सुकेशि केशोच्चयः
किमित्युत सुमेखलाविरहिता च पृथ्वी कटिः ।
तदेहि कुरु मण्डनं त्यज रुषं वसन्तोत्सवे
यतः सुतनु पञ्चषैरपि दिनैर्वयो यास्यति ॥ (१७९)

छन्दोवृत्तिः

(१७९) जसजसयलघुगुरुभिः पृथ्वी नाम । अष्टभिर्नवभिर्यतिः । यथा—

त्वदीयरिपुभूभुजां पुरि पुरारिवेश्मायतो
निरीक्ष्य चमरी वृषं सपदि मन्मथव्याकुला ।
परिस्पृशति जिह्वया ककुदकेन कण्डूयते
निमीलितविलोचना किल चुलुक्यपृथ्वीपते ॥ (१७९)

---

1. वसु इति अष्टभिः ग्रहैः नवभिः यतिः ब.

१८०. दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ॥

पत्रिका

(१७९) जश्च सश्च जसौ, जश्च सश्च यश्च लश्च जसयलाः, गुरुरिति प्रसिद्धः । जगणसगणौ जगणसगणयगणाः लघुगुरू च चेत्, तदा पृथ्वी नाम स्यात् । एषा किं-विशिष्टा । वसुग्रहयतिः, वसुभिः अष्टभिः, ग्रहैः नवभिश्च वर्णैर्यतिः यस्याः इति बहु-व्रीहिः । तद्यथा--

ज स ज स य ल ग
। ऽ। ।। ऽ । ऽ ।।। ऽ। ऽ ऽ। ऽ
न चन्दनजलच्छटा नवविचित्ररत्नस्रजो
न चन्द्रकिरणाङ्कुरा नवहिमोत्तरा वायवः ।
व्रजन्ति कमनीयतां शिशिरसङ्गमे देहिनां
भवेन्नहि जडात्मनां गुणवदाश्रयः प्रीतये ॥ (१७९)

सुकविहृदयानन्दिनी

(१८०) [1]वंशपत्रपतितं नाम [2]दशभिः सप्तभिर्यतिः । यथा--

नैव विदुस्तृषातुरधियस्तव रिपुनगरे
मन्दिरदीर्घिकासु सलिलं सविधमपि मृगाः ।
अम्बुजवंशपत्रपतितं कमलदलनिकरैः
छादितमातपे सुमहति क्षितिपतितिलक ॥ (१८०)

छन्दोवृत्तिः

(१८०) निर्मलवंशपत्रपतितं जलदपृषतकं
पङ्क्तिविमुक्तमौक्तिकतुलां कलयति परमाम् ।
स्थानसमागमेन भजतेऽद्भुततरुजननीं
कामपि विष्टपस्य पदवीं किमिह हि कुतुकम् ॥ (१८०)

---

1. भगणरगणनगणभगणनगणलघुगुरवः यत्र तद्वृत्तं इत्यधिकम् ब. 2. दिङ्मुनि इति लुप्तविभक्त्यन्तं पदम् इत्यधिकम् ब.

१८१. रसयुगहयैर्नौ म्रौ स्लौ गो यदा हरिणी तदा ॥

पद्यचिका

(१८०) भश्च रश्च नश्च भश्च नश्च लश्च गश्च भरनभनलगाः, तैः भगणरगण-नगणभगणनगणलघुगुरुभिः वंशपत्रपतितं नाम स्यात्[1] । इदं किंभूतम् । दिङ्मुनि दिक् दश मुनिः सप्त यतेः स्थानत्वेन यस्मिन् तत् तथोक्तम् । तद्यथा--

भ	र	न	भ	न	ल	ग
ऽ।	।ऽ।	ऽ।।	।ऽ	।।।	।।।	।ऽ

यत्र शरीरबिम्बमुदितं निजममलतले
सेर्ष्यमवेक्षितं कमलया परयुवतिधिया ।
काष्ण्यमवक्षिपन् भगवतः समविधिरिव यो
भाति हृदि स्थितो मुरभिदः स मणिरवतु वः ॥ (१८०)

सुकविहृदयानन्दिनी

(१८१) नगणसगणौ मगणरगणौ सगणलघुगुरवः यत्र तद्वृत्तं हरिणी नाम । रसैः षड्भिः, युगैश्चतुर्भिः, हयैः सप्तभिः यतिः । यथा--

वदनममलं धत्ते शोभां शशाङ्कसमाश्रिताम्
श्रवणयुगलं दोलालीलां तनोति मनोभुवः ।
स्तनपरिसरे हारः स्फारः स्फुरत्यतिनिर्मलः
किमिह न भवेत् तस्या हारि ध्रुवं हरिणीदृशः ॥

ऋषभचरितमित्येके ॥ (१८१)

छन्दोवृत्तिः

(१८१) नसमरसगणैः लघुगुरुसहितैः हरिणी । रसैरिति षड्भिः, युगैरिति चतुर्भिः, सप्तभिः च यतिः । यथा--

---

1. एतदेव मणिमरीचि इति नाम्ना केचिदाहुः निसा.

१८२. मदाक्रान्ता जलधिषडगैर्भौ नतौ ताद् गुरू चेत् ॥

कथय किमदं लक्ष्म च्छाया शुचेस्तु भवेत् कथं
तव हिमरुचे यद्वोत्संगे कृतः कृपया ध्रुवम् ।
नभसि रभसात् बद्धाटोपप्रधावितलुब्धक–
क्षुभितहरिणीगर्भाद्भ्रष्टः कुरङ्गक एव हि ॥

हरिणीति मृगशिरः ॥ (१८१)

पञ्चिका

(१८१) न् च सश्च न्सौ, म् च रश्च म्रौ, स् च लश्च स्लौ, गः गुरुः, नगणसगण-मगणरगणसगणा लघुगुरू च यदा तदा हरिणी नाम स्यात् । एतस्य वृत्तस्य रसयुग-हयैः, रसैः षड्भिः, युगैः चतुर्भिः, हयैः सप्तभिश्च वर्णैः यतिः स्यात् । तद्यथा––

न स म र स ल ग
। । । । । ऽ ऽ ऽ ऽ ऽ । ऽ । । ऽ । ऽ
गणयति गुणग्रामं भामं भ्रमादपि नेहते
वदति परितोषं दोषं वा विमुञ्चति दूरतः ।
युवतिषु बलात् कृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किम् ॥ (१८१)

सुकविहृदयानन्दिनी

(१८२) मगणभगणनगणाः तगणद्वयं गुरुद्वयं [1]यत्र तद्वृत्तं मन्दाक्रान्ता नाम । जलधिभिः चतुर्भिः, षड्भिः, अगैः सप्तभिः यतिः । यथा––

मन्दाक्रान्ताधरकिसलया पाणिपद्मं [2]धुनाना
गाढाश्लेषप्रणयशिथिला वेपमानाङ्गयष्टिः ।
स्विद्यद्वक्त्रा पुलकिततनुः किंचिदामीलिताक्षी
सद्यः प्रीतिं जनयति भृशं नूतनोढा विवोढुः ॥ (१८२)

---

1. यत्र पादे फ. 2. दधाना मुद्रितः पाठः

१८३. [1]यदि भवतो नजौ भजजला गुरु [2]नर्कुटकम् ॥

छन्दोवृत्तिः

(१८२) मभनततता गणाः गुरुद्वयं च। जलधि. इत्यादि चतुर्भिः षड्भिः सप्तभिर्यतिः। यथा—

जन्मस्थाने न चरमजिनः स्वर्णकुम्भौघधारा–
सारं सोढा कथमिति पुरा वज्रिणा शङ्कितेन।
दृष्टः पश्चाज्जयति चरणाङ्गुष्ठपर्यन्तलीला–
मन्दाक्रान्तामरगिरिशिरः[3]कम्पतो विस्मितेन ॥ (१८२)

पञ्चिका

(१८२) म् च भश्च म्भौ नश्च तश्च नतौ मगणभगणौ नगणतगणौ तात् तगणात् परतो गुरू च चेत्, तदा मन्दाक्रान्ता गाम स्यात्। अस्य वृत्तस्य जलधिषडगैः जलधिभिः चतुर्भिः, षड्भिः, अगैः सप्तभिः च वर्णैः यतिः स्यात्। तद्यथा—

म भ न त त ग ग
ऽऽ ऽऽ।।।।।ऽ ऽ।ऽऽ।ऽऽ
बाला चेयं मृदुरियमिति त्यज्यतामत्र शङ्का
दृष्टा काचिद्भ्रमरहरणा मञ्जरी भिद्यमाना।
तस्मादेषा रहसि भवता निर्दयं पीडनीया
मन्दाक्रान्ता विसृजति रसं नेक्षुयष्टिः समग्रम् ॥ (१८२)

सुकविहृदयानन्दिनी

(१८३) नगणजगणौ भगणः जगणद्वयं लघुगुरू च यत्र तद्वृत्तं नर्कुटकं नाम। अवितथमित्यन्ये। यथा—

---

1. हयदशभिर्नजौ निसा. 2. तत्कुटकम् निसा. 3. कम्पते अ. ब. इ.

१८४. मुनिगुहकार्णवैः कृतयतिं वद कोकिलकम् ॥

सुरभिसमागमे विरहिणीकृतकोपकरे
कृतबहुमण्डना त्वमिति भामिनि मद्वचनैः ।
निजदयितान्तिकं यदि न यासि गतं त्वमहो
अवितथवाक्यकौशलमिदं मम निष्फलताम् ॥ (१८२)

छन्दोवृत्तिः

(१८३) नजभजजा लगौ यथा—

मधुरिमचारुवृत्तवरनर्कुटकेन समं
प्रकटयदङ्गमङ्गगुरुतां लघुतां च सदा ।
स्फुटमपि कुर्वत्श्रोत्रमपि सर्वत एव दधत्
परमतमं न कस्य रतये मृगशावदृशः ॥ (१८३)

पञ्चिका

(१८३) नश्च जश्च नजौ, **भश्च जश्च लश्च** भजजलाः, गुरु इति नपुंसकमक्षरवाचित्वात् । नगणजगणभगणजगणद्वयं लघुगुरू यदि तत्कुटकं नाम स्यात् । अस्य वृत्तस्य **हय-दशभिः, हयैः** सप्तभिर्दशभिश्च **वर्णैः यतिः** भवेत् । तद्यथा—

न ज भ ज ज ल ग
।।।।ऽ।ऽ ।।।ऽ।।ऽ ।।ऽ
दशविधधर्मसु प्रतिदिनं चरतः कृपया
सरसमनास्त्वसौ रिपुवधूवदनाब्जशशी ।
गुणगणभूषणः सुगतशासनवृद्धिकरः
सकलकलाकृतिर्गुरुपराक्रमबाहुनृपः ॥ (१८३)

सुकविहृदयानन्दिनी

(१८४) [1]**नर्कुटकमेव** सप्तभिः **गुहकैः** कार्तिकशिरोभिः षड्भिश्चतुर्भिः **कृतयतिं तद्वृत्तं वद कोकिलकम्** । हे शिष्य इति **शेषः** । **यथा—**

---

1. नर्कुटकमिव मुनिभिः सप्तभिः कार्तिकेयशिरोभिः षड्भिः अर्णवैः चतुर्भिः कृतयतिः चेत् तदा कोकिलकम् नाम वद हे शिष्य इति शेषः ब.

धृतौ ।

१८५. स्याद् भूतर्क्षवैः कुसुमितलतावेल्लिता म्तौ नयौ यौ ॥

मदनमहोत्सवे मुदितकोकिलकान्तरवे
न भजति या प्रियं प्रणयसुन्दरमिन्दुमुखि ।
ध्रुवमिह सा बलात् स्वयमहर्निशमेव भृशम्
सखि परितप्यते गुरुमनोभवतापवती ॥ (१८४)

छन्दोवृत्तिः

(१८४) नर्कुटकमेव सप्तभिः षड्भिश्चतुर्भिश्चेत् यतिः तदा कोकिलकं नाम छन्दः । यथा—

कलयति कोकिले मधुरपञ्चमगीतिमिमां
मलयसमीरणो भवति (पल्लव) नाट्यगुरुः ।
इह हि यदाज्ञया नवनवाद्भुतगन्धजुषः
किसलयहस्तकान् वितनुते सहकारलता ॥ (१८४)

पञ्चिका

(१८४) मुनयः सप्त, गुहस्य स्कन्दस्य कानि मस्तकानि षड् इत्यर्थः । अर्णवाश्चत्वारः मुनयश्च गुहकानि च अर्णवाश्च मुनिगुहकार्णवाः । तैः कृतयतिं कोकिलकं वद, तत्कुटकमेव यतिभेदात् कोकिलकं कथय हे छात्र इति शेषः । तद्यथा—

न ज भ ज ज ल ग
। । । । ऽ । ऽ । । । ऽ । । ऽ । । ऽ
भवति किमीश्वरो मुररिपुः किमु किं च विधिः
किमु धनदोऽथवा रतिपतिः किमु जम्भरिपुः ।
न स न स नैव सोऽयमपि नो न स नायमहो
वसति सतां मुदे भुवि पराक्रमबाहुनृपः ॥ (१८४)

सुकविहृदयानन्दिनी

(१८५) मगणतगणनगणाः त्रयो यगणाः यत्र तद्वृत्तं कुसुमितलतावेल्लिता नाम । पञ्चभिः षड्भिः सप्तभिः यतिः । यथा—

उद्यानाब्जानां प्रकरधुननावाप्तसौरभ्यसम्पत्
कङ्कोलैलानां कुसुमितलतावेल्लितानाततान।
आगस्त्यो वायुर्विविधसुरतायासजाताङ्गनानां
स्वेदाम्भोबिन्दून् हरति पुनरप्यादिशन् संगमेच्छाम्[1] ॥ (१८५)

छन्दोवृत्तिः

(१८५) मतना यगणत्रयं च। भूतादिना पञ्चभिः षड्भिः सप्तभिर्यतिः कुसुमितलतावेल्लिता नाम। यथा—

किङ्केल्लिस्कन्धे कुसुमितलता वेल्लिता मन्दमन्दं
क्रीडादोलेयं स्मरविरचिता दाक्षिणात्यानिलेन।
अस्यां खेलन्ती रतिरतितरां हन्त गीतिं तनोति
व्याकूजन् मत्तभ्रमररमणी फूत्कृतीनां छलेन ॥ (१८५)

पञ्चिका

(१८५) धृतावुदाहरति। म् च नश्च म्तौ, नश्च यश्च नयौ, यश्च यश्च यौ इत्येकशेषः। मगणतगणनगणयगणत्रयं च यदि तदा कुसुमितलतावेल्लिता नाम स्यात्। अमुष्य वृत्तस्य भूतत्वश्वैः भूतैः पञ्चभिः, ऋतुभिः षड्भिः, अश्वै सप्तभि यतिः भवेत्। तद्यथा—

म त न य य य
ऽ ऽ ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । ऽ ऽ । ऽ ऽ
शोभामाधत्ते मधुकरवधूकण्ठगीताभिरामे
प्रारम्भे माद्यद्विहगविरुता नोऽद्य जाते च जाते।
पुष्पालंकारा निपुणपवनाचार्यदत्तोपदेशा
लास्यं तन्वाना वनतरलतायोषिदारामरङ्गे ॥ (१८५)

---

1. त्रियुतदशशरच्छिदुक्ता ननौ रो ररौ रो निशा।
द्वौ नगणौ चत्वारः रगणाः यत्र तदवृत्तं निशा नाम।
दश वसुविरतिर्ननौ रैश्चतुर्भिर्युता सालसा।
स्याद् भूतविश्वैस्तमौ भ्मौ विरतिश्चेत् सिंहविस्फूर्जितं यौ।
भवति नयुगलं रभौ रौ दशभिर्गिरीन्द्रैर्लता ॥ इत्यधिकम् ब.

१८६. सौ जजौ भरसंयुतौ करिबाणकैः हरनर्तकम् ॥

१८७. कथितमिह ननौ ररौ चेद् ररौ सिंहविक्रीडितम् ॥

पञ्चिका

(१८६) र् च सश्च सौ, जश्च जश्च जजौ, भरसंयुतौ भश्च रश्च भरौ ताभ्यां संयुतौ **सहितौ**। रगणसगणजगणद्वयभगणरगणाश्च चेत् तदा हरनर्तकं नाम स्यात्। एतस्य **वृत्तस्य** करिबाणकैः करिभिः अष्टभिः, बाणकैः पञ्चभिश्च वर्णैः यतिः स्यात्। **पादान्तयतिस्त्वनुक्तसिद्धा एव**। तद्यथा—

र स ज ज भ र
ऽ।ऽ।।ऽ।ऽ। ।ऽ।ऽ ।।ऽ।ऽ
श्रीपराक्रमबाहुदेव महीपते महतां गते
सङ्गते सति सङ्गरं त्वयि केन वापि किमग्रतः।
पाणिनासिररेः शिरोऽप्यसिना मुनेरिव भीतया
त्वं तयापि लसद्यशो यशसा तथा भुवनत्रयम् ॥ **(१८६)**

पञ्चिका

(१८७) नश्च नश्च ननौ, रश्च रश्च ररौ, पुनरपि रश्च रश्च ररौ। **नगणद्वयं रगण-चतुष्टयं** च चेत् तदा इह छन्दसि सिंहविक्रीडितं नाम कथितम्। **तद्यथा**—

न न र र र र
।।।।।। ऽ।ऽऽ।ऽ ऽ ।ऽ ऽ।ऽ
रघुपतिरपि जातवेदोविशुद्ध्या प्रगृह्य प्रियां
प्रियसुहृदि विभीषणे संक्रमय्य श्रियं वैरिणः।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥ **(१८७)**

अतिधृतौ ।

१८८. रसत्वंश्वैर्यमौ न्सौ ररगुरुयुतौ मेघविस्फूर्जिता स्यात् ॥

सुकविहृदयानन्दिनी

(१८८) यगणमगणनगणसगणा द्वौ रगणौ गुरुश्च यस्य पादे तद्वृत्तं भवेत् मेघविस्फूर्जिता नाम । षड्भिः षड्भिः सप्तभिश्च यतिः । यथा--

स मायातः स्वैरं कुटजकुसुमामोदवाही समीरः
श्रुतं धैर्यध्वंसी प्रसभमधुना मेघविस्फूर्जितं च ।
वियोगे सद्भर्तुर्निजलवणिमाधःकृतस्यान्तजस्य
प्रयान्तीमे प्राणाः कुलिशकठिना मे न नाशं तथापि ॥ (१८८)

छन्दोवृत्तिः

(१८८) अतिधृतिः । यमनसा रगणद्वयं गुरुश्च, षड्भिः सप्तभिर्यतिः । यथा—

निरुन्धानस्तापं जगति कलयंश्चण्डकोदण्डदण्डं
पदं व्यातन्वानः सततमखिलक्ष्माभृतां चोपरिष्टात् ।
निकामं दुर्धर्षा दिशि दिशि समुल्लासयन्वाहिनीश्च
त्वमुश्चैश्चोलुक्येश्वर घटयसे मेघविस्फूर्जितानि ॥ (१८८)

पञ्चिका

(१८८) अतिधृत्यामुदाहरनि । य् च मश्च य्मौ, न् च सश्च न्सौ, यगणमगणौ नगणसगणौ । रश्च रश्च गुरुश्च ररगुरवः । तैर्युतौ सहितौ रगणद्वयगुरुयुक्तौ च चेत् तदा मेघविस्फूर्जिता नाम स्यात् । अस्य वृत्तस्य रसत्वंश्वैः रसैः षड्भिः अश्वैः सप्तभिश्च वर्णैर्यतिर्भवति । तद्यथा--

य म न स र र ग
।ऽ ऽ ऽ ऽ ऽ ।।।।।ऽऽ।ऽ ऽ।ऽऽ
श्रिया जुष्टं दिव्यैः सपटहरवैरन्वितं पुष्पवर्षैः
वपुष्टश्चैद्यस्य क्षणमृषिगणैः स्तूयमानं निरीय ।
प्रकाशेनाकाशे दिनकरकरान् विक्षिपद्विस्मिताक्षैः
नरेन्द्रैरौपेन्द्रैर्वपुरथ विशुद्धं प्रवीक्षांबभूवे ॥ (१८८)

१८९. **सूर्याश्वैर्मसजाः स्ततः सगुरवः शार्दूलविक्रीडितम् ॥**

सुकविहृदयानन्दिनी

(१८९) मगणसगणजगणसगणा द्वौ तगणौ गुरुर्यस्य पादे तद्वृत्तं शार्दूलविक्रीडितं **नाम** । द्वादशभिः सप्तभिश्च यतिः । यथा—

श्रीखण्डाचलकन्दरात्सरभसं निर्गत्य सान्द्रद्रुमान्
चञ्चच्चम्पकचारुकेशरभरं धुन्वन्मुहुर्लीलया ।
इत्थं बिभ्रदयं वसन्तपवनः शार्दूलविक्रीडितं
स्त्रीणां मानगजं हनिष्यति हठात्मानोत्कटानामपि ॥

शार्दूलमित्यन्ये ॥ (१८९)

छन्दोवृत्तिः

(१८९) मसजसततगुरुभिः शार्दूलविक्रीडितम् । सूर्य इत्यादि द्वादशभिः सप्तभिर्यतिः । **यथा—**

क्ष्मापालाखिलभूमिपालपटलीं शार्दूलविक्रीडितं
पश्यन्ति स्म तवारिवारणघटास्त्रस्यन्ति नश्यन्ति वा ।
तच्चाश्चर्यमिदं तु कौतुकमहो यत्त्वामवेक्ष्य क्षणात्
यान्त्येताः परमप्रमोदपदवीसंगं कुरङ्गीदृशः ॥ (१८९)

पञ्चिका

(१८९) मश्च सश्च जश्च **मसजाः**, स् च तश्च तश्च **स्ततः**, **मगणसगणजगणसगण-तमणतगणाः** सगुरवः गुरुसहिताश्च चेत् तदा शार्दूलविक्रीडितं नाम स्यात् । अस्य **वृत्तस्य सूर्याश्वैः** सूर्यैः द्वादशभिः अश्वैः सप्तभिर्वर्णैर्यतिर्भवेत् । **तद्यथा—**

कृतौ ।

१९०. [1]**सभरा नम्ग्लगिति त्रयोदशयतिर्मत्तेभविक्रीडितम् ।।**

१९१. **ज्ञेया सप्ताश्वषड्भिर्मरभनययुतौ भ्लौ गः सुवदना ।।**

म स ज स त त ग
ऽऽ ऽ ।।ऽ । ऽ ।।।ऽ ऽ ऽ । ऽऽ ।ऽ
अक्षं विक्षिपति ध्वजं त्रुटयते मुष्णाति नद्धं युगं
चक्रं चूर्णयति क्षिणोति तुरगान् रक्षःपतेः पक्षिराट् ।
रुन्द्धे गर्जति तर्जयत्यभिभवत्यालम्बते ताडय-
त्याकर्षत्यपकर्षति प्रचलति न्यञ्चत्युदञ्चत्यपि ।। (१८९)

पञ्चिका

(१९०) कृतावुदाहरति । सश्च भश्च रश्च सभराः । नश्च म् च य् च लश्च ग् च नम्ग्लग् समाहारे नपुंसकम् । सगणभगणरगणनगणमगणयगणाः लघुगुरू च चेत् तदा इह इदम् मत्तेभविक्रीडितं नाम स्यात् । अस्य वृत्तस्य त्रयोदशयतिः त्रयोदशभिर्वर्णैर्यतिर्भवति । तद्यथा–

स भ र न म य ल ग
।।ऽ ऽ । । ऽ । ऽ ।।। ऽ ऽ ऽ । ऽ ऽ । ऽ
सुमनस्सद्मनि केचिदाहुरमतं केचित् सुतालिङ्गने
रमणीनामधरेषु केऽपि कतिचिच्चन्द्रे निधौ वाऽपरे ।
सुमते भूमिपते पराक्रमभृज त्वत्के कटाक्षे कृपा–
भरिते सम्प्रति तिष्ठतीति सुधियां वन्द्यो वयं ब्रूमहे ।। (१९०)

सुकविहृदयानन्दिनी

(१९१) यस्य वृत्तस्य पादे मगणरगणभगणनगणयगणभगणलघुगुरवः तद्वृत्तं सुवदना नाम । सप्तभिः सप्तभिः षड्भिश्च यतिः । यथा––

---

1. सभरान्मौ यलगास्त्रयोदशयतिर्मत्तेभविक्रीडितम् इति पुस्तकान्तरपाठः

१९२. **त्री रजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम ॥**

रम्भास्तम्भोपमोरुः सुगुरुघनकुचा सारङ्गनयना
मध्यक्षामा सुरोमावलिरमललसद्दन्तेन्दुवदना ।
हृत्स्थं भावं कटाक्षैर्निजमिव कथयन्त्येषा सुवदना
यूनां चेतांसि सद्यो मदयति युवतिश्छेकोक्तिकुशला ॥ (१९१)

छन्दोवृत्तिः

(१९१) मरभनयभलगुरवः सप्तादिना सप्तभिः अश्वैः सप्तभिः षड्भिः यतिः । **यथा—**

आकल्पं कल्पयित्वाभिनवमृगमदैरामुच्य वपुषि
क्षौमे कृत्वा विभूषां मरकतमणिभिर्गन्तुं प्रियगृहं ।
औत्सुक्याद्यावदस्थात्पथि मुखशशिना तावद्गततमी
ज्यौत्स्नी जातेति मूर्च्छामभजत सहसा कष्टं सुवदना ॥ (१९१)

पञ्जिका

(१९१) मश्च रश्च भश्च नश्च यश्च मरभतयाः, तैर्मगणरगणभगणनगणयगणैः **युतौ सहितौ**, भ् च लश्च भ्लौ भगणलघू, गः गुरुरेकश्च यदि तदा सुवदना नाम ज्ञेया **ज्ञातव्या** । अस्य वृत्तस्य सप्ताश्वषड्भिः सप्तभिः अश्वैश्च सप्तभिः षड्भिश्च वर्णैर्यतिर्भवेत् । तद्यथा—

म र भ न य भ ल ग
ऽऽ ऽ ऽ ।ऽऽ ।। ।।।।ऽ ऽऽ ।। ।ऽ
दूती सत्कीर्तिरेषा तव मगधपते तुभ्यं नृप ददौ
वैधात्रं सत्कलत्रं मधुमथनवधूं चानीय झटिति ।
इत्याकर्ण्येश्वरोऽसौ वपुषि भगवतीं धत्ते ध्रुवमभूद्
इन्द्रो भूरीक्षणोऽथ व्रतमनुपयमं स्कन्दोऽभजदयम् ॥ (१९१)

तात्पर्यटीका

(१९२) त्रीन् वारान् त्रिः । रश्च जश्च रजौ । सन्धौ रलोपे पूर्वस्य दीर्घोऽणः (पा. ६-३-१११) इति दीर्घप्रकृतिः ॥ (१९२)

मुकविहृदयानन्दिनी

(१९२) त्रीन् वारान् रगणजगणौ गुरुलघू यस्य पादे तद्वृत्तं वृत्तनाम। वृत्ताभिधानमित्यर्थः। यथा--

सम्पदाप्तिसम्भवो मदः कदाचिदेव मानसेन यस्य
न प्रमाणविद्यया परप्रमेयजालभङ्गदक्षयापि।
नाप्यरूपरूपया पराङ्गनाभिमर्शनो रसः कदापि
तस्य वृत्तमीदृशं शिरोभिरुह्यते नरैरतो विचार्य॥ (१९२)

छन्दोवृत्तिः

(१९२) रजगणौ त्रिवारान् आवृत्तौ गलौ चेति वृत्तं नाम छन्दः। यथा--

प्रीणिताखिलार्थिदानमूर्जितारिजिष्णुपौरुषं महर्षि-
चित्रकृज्जितेन्द्रियत्वमेवमद्भुतान् गुणान् दधन्तरेन्द्र-।
रामपार्थधुन्धुमारमृत्युपूर्वभूमिपालवृत्तमत्र
सत्यतां चिराय नीतवानसि त्वमुच्चकैश्चुलुक्यचन्द्र॥ (१९२)

पल्लिका

(१९२) रश्च जश्च रजौ, त्रिवारं रजौ त्रिरजौ, गश्च लश्च गलौ, रगणजगणौ रगणजगणौ रगणजगणौ गुरुलघू च चेत् तदा इह छन्दसि ईदृशेन उक्तरूपेण लक्षणेन वृत्तनाम भवेत्। वृत्तमिति नाम यस्येति समासः। तद्यथा--

र ज र ज र ज ग ल
ऽ।ऽ।ऽ।ऽ।ऽ।ऽ। ऽ।ऽ।ऽ।ऽ।ऽ।
यत्पदे पदे समुद्गतेषु फुल्लपङ्कजेष्वपङ्कजेषु
भूमिदेवताप्रसारितेष्विवायतेषु पाणिसम्पुटेषु।
संचरन्विराजिराजहंसलीलया प्रजाहितोदयाय
तत्सुरेन्द्रवन्दितं मुनीन्द्रपादयुग्ममस्तु वः शिवाय॥ (१९२)

१९३. **सजजा भरौ सलगाश्च चेदुदितं तदा प्रमदाननम् ॥**

प्रकृतौ ।

१९४. **स्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥**

पञ्चिका

(१९३) सश्च जश्च जश्च सजजाः, भश्च रश्च भरौ, सश्च लश्च गश्च सलगाः, **सगणजगणद्वयभगणरगणसगणाः** लघुगुरू च चेत तदा प्रमदाननमुदितं प्रमदाननमिति **नाम्ना** कथितम् । तद्यथा—

स ज ज भ र स ल ग
। । ऽ । ऽ । । ऽ । ऽ । । ऽ । ऽ । । ऽ । ऽ
शरदिन्दुकुन्दतुषारहारपवीरवारदसुन्दरं
जपमालिकामणिपद्मपाणिमशेषलोकहितैषिणम् ।
जिनमौलिमादिगुरुं जटामुकुटादिभूषणभूषितम्
प्रणमामि सम्प्रति सम्पदामवलोकितेश्वरमीश्वरम् ॥] **(१९३)**

सुकविहृदयानन्दिनी

(१९४) मगणरगणभगणनगणा यगणत्रयं यस्य पादे तद्वृत्तं स्रग्धरानाम । वारत्रयं **सप्तभिर्यति**: । यथा—

यामामुन्निद्रपद्मद्युतिमुखममलं स्फारविस्फारिताक्षं
चञ्चत्काञ्चीगुणेन स्फुरदुरुमणिना वार्त्तलक्ष्मीं वितन्वत् ।
चेतःप्रीतिं नराणां विदधति विलसन्नाभिमध्यप्रदेशाः
गच्छन्त्यो राजमार्गे विकचविचिकिलस्रग्धरा राजवध्वः ॥ **(१९४)**

छन्दोवृत्तिः

(१९४) मरभनैर्यगणत्रयेण त्रिमुनीति सप्तभिर्यतिः वारत्रयम् । यथा—

आवासः पर्णशाला वपुषि च वसनं नूतना त्वक् तरूणां
पाणावाषाढयष्टिः शिरसि च चिकुरैर्नव्यगुम्फो जटानाम् ।

१९५. भौ भभाश्च भरौ यदि कीर्तय पुत्रक मत्तविलासिनीम् ॥

कर्णेऽक्षस्रग्धराया: परिवृढविपिने त्वद्भ्रिया सम्प्रतीत्थं
वृत्तिर्द्वित्रैरहोभिस्त्वदरिनृपजनै: शिक्षिता तापसानाम् ॥ (१९४)

पञ्चिका

(१९४) म् च र्श्च भ् च न्श्च भ्रभ्ना:, तैर्मगणरगणभगणनगणै: यानां त्रयेण यगणानां त्रयेण स्रग्धरानाम कीर्तिता कथिता । किंभूता । त्रिमुनियतियुता । मुनय: सप्त, त्रयश्च ते मुनयश्चेति त्रिमुनय:, तैर्यति: त्रिमुनियति: । ताभिर्युता सप्तभि: सप्तभि: सप्तभिर्यतिरित्यर्थ: । तद्यथा--

म र भ न य य य
ऽऽ ऽ ऽ।ऽऽ।।।।।।ऽ ऽ।ऽ ऽ।ऽ ऽ
उद्यत्कोटिग्रहेशारुणवपुरनघं सन्दधानं चतुर्भिर्
दोर्भि: पाशं कुशेष्वासनमपि सशरं सेमृवक्त्रं त्रिनेत्रम् ।
शान्तं सर्वज्ञमाद्यं वरदमविरतं वन्द्यमानं सुरेन्द्रै
रत्नालङ्कारदिव्यावयवि कुचभरोद्भारि वस्तु प्रपद्ये ॥ (१९४)

पञ्चिका

(१९५) भश्च भश्च भावित्येकशेष: । भश्च भश्च भश्च भभभा: भश्चरश्च भरौ । भगणषट् रगणश्च यदि तदा अये पुत्रक, मत्तविलासिनीं कीर्तय, नाम्ना मत्तविलासिनीति वद । तद्यथा--

भ भ भ भ भ भ र
ऽ ।।ऽ। । ऽ ।।ऽ।।ऽ ।।ऽ।।ऽ।ऽ
मञ्जुचलन्मणिशिञ्जितनूपुरमञ्जितलोचनपङ्कजं
गण्डलसन्मणिकुण्डलमुल्ललिताभ्रविलोलितकुन्तलम् ।
इन्दुरुचिस्फुरकुन्दगुलुच्छसितच्छविभासमनोहरम्
कम्पयति स्ववपुर्मम या मनसा सह मत्तविलासिनी ॥ (१९५)

आकृतौ ।

१९६. भौ नरना रनावथ गुरुर्दिगर्कविरमं [1]प्रभद्रकमिदम् ॥

सुकविहृदयानन्दिनी

(१९६) भगणः रगणनगणत्रयं गुरुश्च यस्य पादे तद्वृत्तं भद्रकं नाम । दशभिर्यतिः । यथा—

त्वत्कथितैरलीकवचनैः करोमि कथमस्य कोपमसमं
यस्य न विप्रियं सखि मया श्रुतं न च निरीक्षितं कथमपि ।
भद्रकरैरयं प्रियतमः करोति वचनैर्मनः समदनं
पश्य विमुक्तलाजमधुना ममाङ्घ्रियुगले लुठत्यविभृशम् ॥ (१९६)

छन्दोवृत्तिः

(१९६) भरनरनरनगुरुभिः भद्रकम् । दिगादिना, दशभिर्द्वादशभिर्यतिः । यथा—

देव जगत्त्रयैकतिलकप्रभो प्रणयिलोककल्पविटपिन्
पुण्यवतां शिरोमणिपदव्यभाजि सुरनाथ तैरिह जनैः ।
ये विकचैश्चिराय चरणारविन्दयुगमर्चयन्ति कुसुमै-
र्भद्रकमन्द्रगीतिभिरभिष्टुवन्ति च चरित्रमत्रभवतः ॥ (१९६)

पञ्जिका

(१९६) भ् च रश्च भौ, नश्च रश्च नश्च नरनाः, रश्च नश्च रनौ, भगणरगणौ नगणरगणनगणाः रगणनगणौ, अथ अनन्तरं गुरुरेकश्च चेत् तदा इदं प्रभद्रकं नाम स्यात् । तत्किंभूतम् । दिगर्कविरमं, दिग्भिः दशभिः, अर्कैर्द्वादशभिर्विरमो विरामो यस्य तथोक्तम् । तद्यथा—

---

1. हि भद्रकमिदम् सु. छं.

विकृतौ ।

१९७. यदिह नजौ भजौ भजभलग् तदाश्वललितं हरार्कयतिमत् ॥

भ र न र न र न ग
ऽ ।।ऽ।ऽ ।। । ऽ।ऽ।।।ऽ।ऽ।।।ऽ
प्राप्तमहोदयः प्रणयिभिर्घनैरसकृदात्तसारविभवः
सद्गुणरत्नभूरविकृतिस्थितिर्विपुलसत्त्वकायभरणः ।
दीप्तमहानलः सकलदिङ्मुखानुगततारशब्दविसर–
स्त्वं यदि वारिधे गुणनिधिः कुतस्तव भुजाग्रसंगतिरियम् ॥
(१९६)

सुकविहृदयानन्दिनी

(१९७) यस्य पादे नगणजगणौ भगणजगणभगणजगणभगणलघुगुरवो भवन्ति तद्वृत्तं अश्वललितं नाम । एकादशभिर्द्वादशभिर्यतिः । यथा—

समरविनिर्जितारिनिवहक्षितीश्वरविचित्रमश्वललितं
हृदयचमत्कृतिप्रदमिदं विलोक्य भवतो वदन्ति कवयः ।
ध्रुवमुररीचकार नृपते दिवस्पतिरिमं तुरङ्गमवरं
बहुतरमन्यथा न वियति क्रमैरिह विवर्ततेति बहुलैः ॥ (१९७)

छन्दोवृत्तिः

(१९७) पूर्वं नजगणौ ततो वारद्वयं भजौ ततो भलगास्तदाश्वललितं नाम । हरार्केति एकादशभिर्द्वादशभिर्यतिः । यथा—

प्रवरशताङ्गभङ्गिसुभगं [1]तरङ्गचलरङ्गदश्वललितं
विकृपकृपाणपाणिसुभटं मदोत्कटनटन्मत्तगजघटं ।
कठिनघनस्तनोरुजघनाङ्गनाम्बुजमनोहरास्यललनं
कुरु निहताहितं हितकरं चिरं नरवरेन्द्र राज्यममलम् ॥ (१९७)

---

1. तुरङ्गबलरङ्गदश्वललितम् इ.

१९८. मत्ताक्रीडा मौ तनौ नौ नलिगति भवति वसुशरदशयतियुता ॥

पञ्चिका

(१९७) विकृतावुदाहरति । बश्च जश्च नजौ, भश्च जश्च भजौ, भश्च जश्च भश्च लश्च ग् च भजभलग्, समाहारोऽयं द्वन्द्वः । व्यञ्जनान्तनपुंसकत्वात् सेर्लोपः । इह छन्दसि यदा यद्वृत्तं नगणजगणभगणजगणभगणजगणभगणाः लघुगुरू च चेत् तदा अश्वललितं नाम स्यात् । तत् कीदृक् । हरार्कयतिमत् हरैरैकादशभिः अर्कैर्द्वादशभिश्च वर्णैर्यतिर्यस्य तत् तथोक्तम् । तद्यथा--

न ज भ ज भ ज भ ल ग
।।।।ऽ ।।।।।ऽ।ऽ।।।ऽ ।ऽ।।।ऽ
नहनभुजङ्गभोगवलयालवालरचना तदङ्गमनिजै-
र्घृणिभिरुपाहितोत्किसलयश्रियो विशदचन्द्रिकाकुसुमिताः ।
सुरसरिदम्बुसेकरतयस्तवाभिरतये जटावृततया
त्रिपुरभिदो भवन्तु हिमवत्सुतानयनभृङ्गविभ्रमभुवः ॥ (१९७)

सुकविहृदयानन्दिनी

(१९८) यस्य पादे द्वौ मगणौ तगणनगणौ द्वौ नगणौ नगणलघुगुरवः तद्वृत्तं मत्ताक्रीडानाम । अष्टभिः पञ्चभिः दशभिश्च यतिः । यथा--

दृष्ट्वा चान्द्रं बिम्बं रात्रौ करनिकरविनिहततिमिरनिकरम्
गायन्ति स्म स्वैरं यस्मिन् सुविकसति कुसुमवति मधुसमये ।
पौरा वध्वस्तस्मिन् सम्प्रत्यवनिपतितिलक तव रिपुनगरे
मत्ताः क्रीडन्ति स्वच्छन्दं विगतभयविभवमिव मृगनिवहाः ॥(१९८)

छन्दोवृत्तिः

(१९८) द्वौ मौ तनौ द्वौ नौ नगणो लघुर्गुरुः मत्ताक्रीडम् । वस्वादीति अष्टभिः पञ्चभिर्दशभिर्यतिः । यथा--

१९९. भैरथ सप्तभिरत्र कृता गुरुणा गुरुणा च मयूरगतिः स्यात् ॥

सा मत्ता क्रीडत्यव्रीडं सरलतरतरलकरदलकलिका
प्रोत्तुङ्गत्तुङ्गद्वक्षोजस्तबकभरदरविनतसुतनुतनुः ।
बिम्बालम्बिच्छायाचुम्बि स्फुटबहुलरससदधरफलयुता
रामान्तस्था रामा वीरुन्मदमनयदविरलमधुपटलम् ॥ (१९८)

पञ्चिका

(१९८) मश्च मश्च मौ, त् च नश्च त्नौ, नश्च नश्च नौ, नश्च् ल् च नलौ ग् गुरुः । मगणद्वयतगणनगणचतुष्टयं लघुगुरू च यदि तदा इह इयम् मत्ताक्रीडानाम भवति । किंविशिष्टा । वसुशरदशयतियुता वसवोऽष्टौ शराः पञ्च दश प्रसिद्धाः । वसवश्च शराश्च दश च वसुशरदश तैर्यतिः तया युता सहिता । तद्यथा--

म म त न न न न ल ग
ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ । । । । । । । । । । । । । । । ऽ
नानाविद्याधारं धीरं धरणिधरनिकरयुवतिजनलसत् .
सीमं नोद्यत्सिन्दूरौघादुदितपदकमलयुगलमविकलम् ।
धर्मे कर्मण्यासक्तं तन्नयविजितदनुगुरुममरगुरु-
प्रख्यं वाग्भिर्वीरं पायादनवरतमवनिपतिमिह सुगतः ॥ (१९८)

पञ्चिका

(१९९) भश्च भश्च भश्च भश्च भश्च भश्च भश्च भा इत्येकशेषः । तैः सप्तभिर्भगणैः अथ अनन्तरं गुरुणा गुरुणा च गुरुद्वयेन च कृता रचिता अत्र छन्दसि मयूरगतिर्नाम स्यात् । तद्यथा--

भ भ भ भ भ भ भ ग ग
ऽ । । ऽ । । ऽ । । ऽ । । ऽ । । ऽ । । ऽ । । ऽ
स्वापविमोहितचेतसि वोढरि गूढनभोविवरे तिमिरौघे
गेहजनैरविकारमजानति गोपितबालवधूजनभावा ।
धीरमनोभवधीपरिदूरितभीरतिदूरपथान्निशि याऽस्मिन्
याति मयूरगतिस्तु तया किल कोऽपि नरो रमते गतशङ्कः ॥
(१९९)

सङ्कृतौ ।

२००. **भूतमुनीनैर्यतिरिह भतनाः स्भौ भनयाश्च यदि भवति तन्वी ॥**

तात्पर्यटीका

(२००) इनैरिति सूर्यैर्यदि भवति यतिरित्यर्थः ॥ (२००)

सुकविहृदयानन्दिनी

(२००) भगणतगणनगणसगणाः द्वौ भगणौ नगणयगणौ यस्य पादे तद्वृत्तं तन्वी नाम । पञ्चभिः सप्तभिरादित्यैश्च यतिः । यथा—

या मुखपद्मं शशधरसदृशं सुन्दरलोलनयनमतिरम्यं
सुभ्रु बिभर्ति त्रिभुवनजयिनो वासनिवासमिव मकरकेतोः ।
पीननितम्बा गुरुकुचयुगला वृत्तसुकोमलभुजकरयुग्मा
सा मम चित्ते जनयति युवती हर्षमनल्पमियमिह सुतन्वी ॥ (२००)

छन्दोवृत्तिः

(२००) भतनसभभनयगणैः । यतिः भूतैरिति पञ्चभिः सप्तभिर्द्वादशभिः । यथा—

पेशलशब्दा शशधरविशदालङ्करणोज्ज्वलसुललितपादा
सुन्दरवृत्ता नवरससघनाश्लेषकलाजनजनितसुहर्षा ।
शोभनवर्णा विलसितललना निर्मललक्षणपरिचयरम्या
वेश्मनि तन्वी मुखसरसिरुहे सत्कविता भुवि कृतसुकृतानाम् ॥
(२००)

पञ्चिका

(२००) सङ्कृतावुदाहरति । भश्च तश्च नश्च भतनाः, स् च भश्च स्भौ, भश्च नश्च यश्च भनयाः । भगणतगणनगणसगणभगणभगणनगणयगणाश्च यदि स्युस्तदा तन्वी नाम भवति । इह अस्मिन् वृत्ते भूतमुनीनैः भूतैः पञ्चभिः मुनिभिः सप्तभिः इनैः सूर्यैर्द्वादशभिश्च वर्णैर्यतिः स्यात् । तद्यथा—

अतिकृतौ ।

२०१. क्रौञ्चपदा भ्मौ स्भौ ननना न्गाविषुशरवसुमुनिविरतिरिह भवेत् ॥

भ त न स भ भ न य
ऽ ।।ऽऽ।। ।।।।ऽ ऽ।।ऽ ।।।।।।ऽऽ.

नीलतमालद्युतिविपुलतरं दानवसैनिकशरशतपातं
सङ्गतलक्ष्मीस्तनगलितलसत्कुङ्कुमरागरचितनवसन्ध्यम् ।
मौक्तिकहारस्फुरदुडुनिकरं कौस्तुभरत्नशशिकिरणधौतं
प्रीतिविशेषं वितरतु नितरां शौरिभुजान्तरगगनतलं ते ॥ (२००)

सुकविहृदयानन्दिनी

(२०१) भगणमगणसगणभगणाश्चत्वारो नगणा गुरुश्च यस्य पादे तद्वृत्तं क्रौञ्चपदानाम । पञ्चभिः पञ्चभिरष्टभिः सप्तभिश्च यतिः । यथा--

क्रौञ्चपदा या रोमशगात्री विकटदशनततिरतिपरुषतनुः
पिङ्गलदृष्टिः सूक्ष्मनितम्बा कपिलकचनिचयविषमकुचयुगा ।
या च हसन्ती लोचनवारि प्रकटयति रहसि निजपतिविमुखी
मुञ्च सखे तामिष्टतमं चेत् चिरतरमिह तव वरविषयसुखम् ॥
(२०१)

छन्दोवृत्तिः

(२०१) भमसभा नगणाश्चत्वारो गुरुश्च । इषुशरेति पञ्चभिः पञ्चभिः अष्टभिः सप्तभिर्यतिः । यथा--

प्रोज्झ्य पुराणि त्वद्भ्रययोगान्नृपवर भवदरिरतिशयविधुरो
दूरमरण्यं प्राप्य कलत्रैः सह समजनि गतिरयवशतृषितः ।
सारसनादात्स स्वयमादौ प्रसरति कियदपि भुवमथ सहसा
प्रेक्ष्य चकोरक्रौञ्चपदाङ्कान् ध्रुवमिह सरिदिति निगदति दयिता ॥
(२०१)

उत्कृतौ ।

२०२. **वस्वीशाश्वच्छेदोपेतं ममतनयुगनरसलगैर्भुजङ्गविजृम्भितम् ॥**

पञ्जिका

(२०१) अतिकृतावुदाहरति । भ् च मश्च भ्मौ, स् च भश्च स्भौ, नश्च नश्च नश्च नननाः, न् च गश्च न्गौ । भगणमगणौ सगणभगणौ नगणचतुष्टयं गुरुरेकश्च चेत् तदा इह छन्दसि क्रौञ्चपदानाम भवेत् । किंभूता । इषुभिः पञ्चभि- शरैः पञ्चभिः वसुभिरष्टभिः मुनिभिः सप्तभिर्वर्णैर्यतिर्यस्याः सा तथोक्ता । तद्यथा—

भ	म	स	भ	न	न	न	न	ग
ऽ।।ऽऽऽ।।ऽऽ	। । । । । । । । । । । । । । । ऽ							

मत्तगजेन्द्रव्यूहघनौघैः स्थगितसकलदिशि बहलकलकले
प्रोद्यतचापे सायकधाराप्रकरमुचि नमुचिबलघनसमये ।
शान्तिमुपेते शान्तिविघातिन्यशिशिरकर इव शरदमधिगुणं
बोधिमवाप्योऽधिकशोभः शमयतु मुनिरिह तव दुरितममौ ॥
(२०१)

तात्पर्यटीका

(२०२) नयोर्युगं नयुगं । मश्च मश्च तश्च नयुगं च नश्च रश्च सश्च लश्च गश्च ते तथोक्ताः । तैर्युक्तमित्यर्थः ॥

इति श्रीरघुसूरिसूनुश्रीत्रिविक्रमसूरिविरचितायां वृत्तरत्नाकरछन्दःसूत्रतात्पर्यटीकायां उक्ताद्युत्पन्नसमवृत्तव्यक्त्यभिधानोपदेशप्रकरणं समाप्तम् ॥ (२०२)

सुकविहृदयानन्दिनी

(२०२) द्वौ मगणौ तगणः त्रयो नगणाः रगणसगणौ लघुगुरू च यस्य पादे तद्वृत्तं भुजङ्गविजृम्भितं नाम । अष्टभिरेकादशभिः सप्तभिश्च यतिः । यथा—

प्रालेयांशुज्योत्स्नाकान्तिद्युतिसुभगविमलविलसद्वितानमनोहरे
क्रीडागारे चञ्चच्चित्रे कुसुमपरिमलमिलदलिव्रजे सुधयोज्ज्वले ।
प्रेमोद्रेकाद्वेश्यावृत्तं कुलयुवतिरपि तनुते यदा सुरतोत्सवे
प्रेयानप्यानन्देनैव प्रकटयति रहसि न तदा भुजङ्गविजृम्भितम् ॥ (२०२)

छन्दोवृत्तिः

(२०२) ममता नगणत्रयं रसलघुगुरवः । वस्वादिना अष्टभिः एकादशभिः सप्तभिर्यथा—

श्रीकण्ठः सोत्कण्ठः कण्ठाभरणमकृत तव वपुषो भुजङ्गविजृम्भितं
शक्रः शक्तिं धर्तुं च त्वं सनयनगरसरिदवनीं समुद्धरणोचिताम् ॥
भोगित्वं चक्रित्वं चोच्चैः प्रकटयसि च परमनया द्विजिह्वयैकया
नित्यत्वं बिभ्रत्याभ्रान्ति प्रसररहितमखिलमपि व्यधायि मलीमसम् ॥
(२०२)

पञ्चिका

(२०२) उत्कृतावुदाहरति । मश्च मश्च तश्च नयुगश्च नश्च रश्च सश्च लश्च गश्च, ममतनयुगनरसलगाः । तैर्मगणद्वयतगणनगणत्रयरगणसगणलघुगुरुभिः भुजङ्गविजृम्भितं नाम स्यात् । किंभूतम् । वस्वीशाश्वच्छेदोपेतम् । वसवोऽष्टौ, ईशा एकादश, अश्वाः सप्त । वसवश्च ईशाश्च अश्वाश्च वस्वीशाश्वाः । तैश्च्छेदः यतिः, तेनोपेतं युक्तम् । तद्यथा—

म म त न न न र स ल ग
ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ । । । । । । । । । । ऽ । ऽ । । ऽ । ऽ
जन्मक्षीराम्भःकल्लोलं बहुगदमकरपरिगतं दुरन्तदुरुत्तरम्
संसाराकूपारं घोरं विकृतमरणमुखवडवामुखान्तरसम्मुखम् ।
प्रज्ञामन्थेनामथ्नन्तः सदमृतविभवसमुदया मुदं विबुधा ययु-
र्मूढस्तस्मिन् क्लेशावृत्तभ्रमकुहरगहनपतितो जनः परिखिद्यते ॥
(२०२)

२०३. मो नाः षट् सगगिति यदि नवरसरसशरयतियुतमपवाहाख्यम् ॥

सुकविहृदयानन्दिनी

(२०३) यस्य पादे मगणो नगणाः षट् सगणो द्वौ गुरू च तद्वृत्तं अपवाहं नाम। नवभिः षड्भिः षड्भिः पञ्चभिर्यतिः। यथा--

आत्मानं कलयति तृणमिव सुरगुरुधरणितलसुरगवामर्थे
यो नित्यं विकसितमुखकमलमिह वितरति धनममलमर्थिभ्यः।
सम्पत्त्या समुपहसितधनदविभवनिवहमहह विधिदौरात्म्यात्
लोकः पश्यति विगलितबहुविधमतिमतिकुशलतनुमपवाहन्तम् ॥

इत्युक्तादिजातिप्रकरणम्। अत ऊर्ध्वं शेषजातिप्रकरणं भवति। तच्चात्र नोक्तं ग्रन्थगौरवभयात् केदारेण ॥ (२०३)

छन्दोवृत्तिः

(२०३) मगणः, षट् नगणाः, एकः सगणः, द्वौ गुरू। नवादिना नवभिः षड्भिः षड्भिः पञ्चभिर्यतिः। अपवाहं नाम। यथा--

चक्रे द्विट्कटकमभटमकरटिघटमरथपटलमपवाहाख्यं
शौर्यं याचकजनहृदभिलषितधनवितरणमरचयदौदार्यम्।
लावण्यं रतिपतितनुलवणिमनिरुपममममददलनं यस्या-
कार्षीद्भ्रो समरनिकरतिलक इह हि जगति झगिति न हि सुप्रापः ॥

उक्तादिजातिप्रकरणं सप्ताधिकशतम् ॥ (२०३)

पञ्जिका

(२०३) मः मगणः। नश्च नश्च नश्च नश्च नश्च नश्च ना इत्येकशेषः। नगणाः षट। सश्च गश्च ग् च सगग्। समाहारे नपुंसकम्। सगणगुरुद्वयं च। इति एवं यदि तदा अपवाहाख्यं स्यात् अपवाह इति आख्या नाम यस्येति बहुव्रीहिः। एतत् किंभूतम्।

दण्डकाः ।

२०४. यदिह नयुगलं ततः सप्तरेफास्तदा चण्डवृष्टिप्रयातो भवेद्दण्डकः ॥

नवरसरसशरयतियुतम् । नवभिः रसैः षड्भिः पुनरपि रसैः षड्भिः शरैः पञ्चभिश्च वर्णैरुक्तक्रमेण या यतिः तया यत्या युतं सहितम् । तद्यथा--

म न न न न न न न स ग ग
ऽ ऽ ऽ । ऽ ऽ ऽ
गोविन्दं गरुडगमनमनुपमगुणमसुरमथनमतिकारुण्यं
कंसारिं कुवलयदृशमुदधिशयनमनुगतजनसुमनोवृक्षम् ।
ब्रह्मेशप्रभृतिविबुधनिवहविनतचरणकमलं कमलाजानिं
बिभ्राणं दशशतमुखमहिपतिमहमतिसिततनुमनिशं वन्दे ॥ (२०३)

तात्पर्यटीका

(२०४) अथोद्देशप्राप्ता दण्डकजातिः शास्त्रान्तराल्लक्ष्यते । तथा हि—

यदेकेन गणेनोक्तं कृत्स्नमादित्रिकेष्वथ ।
किंचिद्विभिद्यते पादस्यान्ते यदपि पूर्वकम् ॥

आचतुर्थगणादंशभेदवद्वापि तन्मुखम् ।
अनिबद्धलगाभ्यां य(द्यल्) गाभ्यां वापि निर्मितम् ॥

षड्विंशादक्षरादूर्ध्वं समवृत्तं तु दण्डकः ॥

इमां जातिमधिकृत्य स्वलक्षणेन निःकृष्य काश्चिद् व्यक्तीर्नामभिर्निर्देष्टुमाह । चण्डवृष्टिरित्यस्य नाम । प्रयातः प्रज्ञातः प्रसिद्धः इत्यर्थः ॥ (२०४)

सुकविहृदयानन्दिनी

(२०४) एवमुक्तादिजातिषु उत्कृत्यवसानासु श्रीप्रभृत्यपवाहान्तानि समवृत्तानि प्रदर्श्य

यत्किंचिद् दृश्यते छन्दः षड्विंशत्यधिकाक्षरं ।

शेषजात्याधिकं चोक्त्वा तत्सर्वं दण्डक विदुः ॥
इत्यादिलक्षणात् दण्डकानाह ।

इह शास्त्रे चण्डवृष्टिप्रयातो नाम दण्डको भवेत् यदा नगणौ द्वौ सप्त रगणाश्च भवन्ति । शतमाण्डव्याभ्यामृषिभ्यामनेकास्य संज्ञा कृता । यथा—

कुवलयदलदीर्घनेत्रा सुमध्या पृथुश्रोणिबिम्बा नवप्रागसंसक्तकृत्
प्रथमविरहपीडिता सा मृता प्रेयसी गर्जितं वारिदानां निशम्य ध्रुवम् ।
नभसि कुटजपुष्पसंभारगन्धासवोन्मत्तभृङ्गाङ्गनागीयमानागमे
हतपथिक वृथा किमायासदेन ..... अहर्निशम् ॥

चण्डवृष्टिरित्येके ॥ (२०४)

छन्दोवृत्तिः

(२०४) यदि नगणयुग्मं सप्त रगणाः तदा चण्डवृष्टिप्रयातो नाम दण्डको भवति । यथा—

अभिनवतरदुर्दमोद्दामपाथोदमालाप्रतिच्छादिते सर्वतो व्योमनि
स्फुटितकुटजकेतकीपांशुपुञ्जच्छदाच्छोटिताशेषदिग्येन्द्रदिग्मारुते ।
मुदितनिखिलनीलकण्ठैः कृते क्रूरकेकारवव्याकुले ताण्डवाडम्बरे
कथमिव चलितोऽसि भो पान्थ हित्वा प्रियां चण्डवृष्टिप्रयाताकुले वर्त्मनि ॥
(२०४)

पञ्चिका

(२०४) अधुना दण्डकवृत्तं वक्तुमारभते । इह छन्दसि यत्रयुगलम् यत्रगणद्वयं ततः तस्मान् नयुगलात् परे सप्त रेफाः सप्त रगणाः यदि स्युः तदा अयं चण्डवृष्टिप्रयातो नाम दण्डको भवेत् । तथा—

न न र र र र र र र
।। ।।।। ।ऽऽ।ऽ ऽ।ऽ ऽ ।ऽऽ ।ऽऽ ।ऽ ऽ ।ऽ
तव हिमक[illegible]लकर्पूरकान्तागता कीर्तिरिन्दुं विजेतुं रुचा वै सदा
गगनमथ स[illegible]विभूत्यामुनामुं कुलं कीर्तिमन्वाययौ स्नातुमम्भोनिधिम् ।
कलशजमुनि[illegible]पि यः प्रोज्झितोऽसौ निशम्येति सम्प्राप्ति तस्मादपि प्रागमत्
कमलभव[illegible]लं शुद्धये श्रीपराक्रान्तिबाहो महीपालचूडामणे ॥ (२०४)

२०५. प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः ॥

तात्पर्यटीका

(२०५) सुगमम् । नद्वयादुपरि अष्टभी रगणैः अर्णैः । नवभिरर्णवैः । दशभिर्व्यालैः । एकादशभिर्जीमूतैः । द्वादशभिर्लीलाकरैः । त्रयोदशभिरुद्दामैः । चतुर्दशभिः शङ्खैः । आदिग्रहणात् पञ्चदशभिः समुद्रैः । षोडशभिर्भुजङ्गैः इति । इदमादिग्रहणं व्यवस्थाबलात् गणान्तरतिर्मितदण्डकस्वीकारार्थमपि । तत्र एकगणविनिर्मितो यथा—

छन्दःशेखरात्

प्रभूता यकारा यथेष्टं निविष्टा यदि स्युस्तदा
जायते दण्डकः सिंहविक्रीडनामा ॥

मत्तमातङ्गलीलाकरो नामतः सुप्रसिद्धो
भवेद् दण्डकः स्वेच्छया रैः कृतैः ॥

कुसुमास्तरणाभिध एष भवेच्चरणे सगणैस्तु
यथेष्टकृतैः कृतिभिः ॥

आचतुर्थगणादंशभेदवत् इत्यस्य वृत्तरत्नाकरोक्तदण्डकसूत्रत्रयमेवोदाहरणम् । यथा—

यदि नकारात् परस्माद् गुरुस्तत्परत्रापि रम्याः क्रियन्ते मनूनां
प्रमाणेन रेफास्तदानीं स लीलाविलासाभिधानो भवेद्दण्डकः ॥

विषयलघुतः परे यत्र रेफाः यथेष्टं कृताश्चण्डकालः स नाम्ना भवेद्दण्डकः ॥
यदि ननगगुरुभ्यो यकारा यथेष्टं कृताः स्युस्तदा सिंहविक्रीडनामा
भवेद्दण्डकोऽन्यः ॥

नयुगमथ मकारः स्यात्ततो या यथेष्टं कृता दण्डके मेघमालाभिधाने ।
यदि तु नयुगलतः स्वेच्छयापि क्रियन्ते यकारास्तदा कीर्तितो
दण्डकश्चण्डवेगः ॥

अन्ते विभेदतः पूर्वस्य यथा--

पादे समस्तैस्तकारैः कृतः कामब्राणाभिधानो भवेद्दण्डकोऽन्ते गयुग्मं यदि स्यात् ॥
यस्तु भकारगकारगणैः क्रियते सकलो निधने च गुरुद्वितयं स भुजङ्गविलासः ॥

लगाभ्यां निर्गतो यथा--

लगा निरन्तरा यदा निजेच्छया कृतास्तदा स दण्डको भवेदनङ्गशेखरः ॥

गलाभ्यां यथा--

दृश्यते निजेच्छया निरन्तरो गुरुर्लघुश्च यत्र सा भवेदशोकपुष्पमञ्जरी ॥
इत्यादि । इति दण्डकप्रकरणम् ।

इति श्रीरघुसूरिविरचितायां वृत्तरत्नाकरछन्दःसूत्रतात्पर्यटीकायां समवृत्ताध्यायः समाप्तः ॥ (२०५)

सुकविहृदयानन्दिनी

(२०५) चरणं चरणं प्रति प्रतिचरणं रगणानां वृद्ध्या इहार्णादयो दण्डकाः स्युः । अष्टभी रगणैरर्णो यथा--

श्रमसलिलमपाकरोति द्रुतं कामिनीनां रतायासजातं मरुत्शीकरामोदवान्
जनयति मधुपस्य तीरद्रुमालीलसत्पल्लवालङ्कृतं कामिनीविभ्रमादेशकम् ।
अयमिह दयितैः पुरार्णोनिधिर्यस्य शक्यं समासाद्य वज्रप्रहारानभिज्ञम्यसी
भुजगपुरवधूलसल्लोचनानन्दकारी स्फुरन्तीं न लीलां तनोत्यद्विराजात्मजः ॥

नवभी रगणैरर्णवो यथा—

त्रिनयननगतुङ्गशृङ्गश्रियं बिभ्रदुद्दण्डपिण्डीरपिण्डावदातैस्तरङ्गोत्तरैरुल्लसन्

मकरतिमितिमिङ्गलैर्विस्तृताधिष्ठितक्रोडसम्प्राप्तशोभैर्नभःप्राङ्गणज्ञापकैः ।

भुजगशयनशायिनो देवदेवस्य यो वासवेश्मश्रियो वीजनेनार्णवः सोऽय-
मश्रीः प्रिये

तव नयनपथं प्रयातस्तनोतु प्रमोदं विनोदास्पदं तीरसंभृतपुन्नागपूगद्रुमैः ॥

दशमी रगणैर्व्यालो यथा—

प्रसरति मलयानिलो विप्रयुक्ताङ्गनादीर्घनिःश्वाससंपर्कप्रौढिस्वभावे
मनोनन्दिनि

स्फुटितबकुलकर्णिकाराम्रपुन्नागमाकन्दकङ्केलिसच्चम्पकामोदवाहिन्यमुष्मिन्
वसन्तागमे ।

भज चरणयुगानतं संनताङ्गि प्रियं प्रीतिसन्दोहदं कामिनीनामनङ्गातुराणां
मृगीचक्षुषां

तरुणिमनि सखि स्फुरद्व्यालजिह्वाग्रलोलेऽङ्गनानां सदा
सौख्यविध्वंसिनानेन किं दग्धमानेन ते ॥

एकादशभिर्जीमूतो यथा—

प्रियविरहितकामिनीजीविताशाविनाशैकदक्षानिलोद्धूत-
कादम्बपुष्पासवामूर्च्छिताशेषभृङ्गव्रजे
नभसि नभसि वीक्ष्य सौदामिनीमालयालङ्कृतां नील-
जीमूतपङ्क्तिं बलाकावलीसेवितां लोचनानन्ददाम् ।

विरचितमधुरस्वरं चातकानां च रम्यं समूहं तृषा-
क्रान्तमप्युन्मदं भाविनीं तृप्तिमाकाङ्क्षमाणं मुहुः
कृतविततसुबर्हिभारः शिखी संभवन्मन्मथः प्रेयसीप्रीति-
मुत्पादयन् नृत्यति स्वाङ्घ्रिविन्याससौन्दर्यवत् ॥

द्वादशभिर्लीलाकरो यथा—

अभिनवतरुपल्लवास्वादसंशुद्धकण्ठान्यपुष्टाङ्गनासुन्दरारब्ध-
गीतध्वनिप्राप्तबाधिर्यदिक्चक्रवाले वने

कुसुमितबहुपाटलाकर्णिकाराम्रसत्सिन्दुवारोत्तमाशोकसत्पुष्प–
भारावनम्रीकृताशेषशाखावलीपल्लवे ।

विलपति वनिताजनस्याभिमानग्रहं लास्यलीलाकरो
माधवीपल्लवानामयं कामदेवैकबन्धुर्वसन्तानिलो

जगति विजयिनीं स्मराज्ञामिवाविष्करोत्यङ्गनानां रतायासज–
स्वेदबिन्दुप्रसक्तालकप्रान्तकम्पं विधत्सुर्मुहुः ।।

त्रयोदशभी रगणैरुद्दामो यथा—

शशधरसदृशं मुखाम्भोरुहं बिभ्रती पक्वबिम्बाधरो–
द्दामहारावलीशोभितोच्चस्तनी सूक्ष्मरोमावलीप्राप्तनाभिह्रदा
श्रवणयुगनिवेशितस्वर्णताटङ्कसंलग्नरत्नप्रभाभासितापाङ्गरङ्गा-
ङ्गणोत्सङ्गसंनृत्यमानेक्षणक्षोभितक्ष्मातला ।

कलरवकिङ्किणीप्रववणन्मेखलालंकृतश्रोणिबिम्बानुवृत्ता–
नुपूर्वोरुयुग्मा सरोजारुणाङ्घ्रिद्वयन्यस्तसन्नूपुरा

हृदयमशरणं मुनीनामपीयं सलीलं व्रजन्ती करोति
स्फुरच्चीवरप्राञ्जलोद्बोधितानङ्गलक्ष्मीकृताशेषलोकं भृशम् ।।

चतुर्दशभी रैः शङ्खोयथा—

क्वचिदुपरिचलत्तुङ्गशङ्खवल्लीवितानैः क्वचिद्विद्रुमाणां
लतासंचयैः संचरन्नक्रचक्रैः क्वचिन्नीरसंभूतपूगद्रुमैः शोभितं
क्वचिदपि घनसाम्रहिंतालतालावलीचारुताम्बूलवल्लीसमूहैः
क्वचिद् व्यालसल्लोलकोलाहलोत्पादितोर्वीप्रकम्पम् ।

क्वचिदभिनवचम्पकोन्निद्रचञ्चत्प्रसूनासवामोदसम्पर्कसम्प्राप्तसौरभ्य–
सम्पत्समीरागमानीततोयःकणैस्तीरद्रुतां विद्रुतां ।
सलिलनिधिमनेकरत्नाकरप्रीतिसन्दोहदं सेतुसीमन्तमन्तं विलोक्य द्रुतं
लोचनाभ्यां निपातं वयस्याः सुसाफल्यमापादय ।।

आदिशब्दात्पञ्चदशभी रैः समुद्रः, षोडशभिर्भुजङ्ग इत्येवमादयो यथेष्टकृत-
नामानो दण्डका भवन्ति ।। (२०५)

छन्दोवृत्तिः

(२०५) [1]चण्डवृष्टेरनन्तरं प्रतिपादं प्रत्येकमेकैकरगणवृद्धाः क्रमेणार्णदयो दण्डकाः स्युः । तत्र नगणद्वयात्परैरष्टभी रगणैरर्णो यथा--

अविरलगुरुशाखिनोऽरण्यभागान् समुत्तुङ्गशृङ्गावलीशालिनः सर्वभूमीवृतो
विपुलतरतरङ्गसंसङ्गिनीः कूलिनीरुच्छ्रितानेकसौधान् पुरग्रामदेशानापि ।
स्थगयसि तमसि प्रपन्ने सपत्नत्वमुन्मुक्तधैर्यस्य पाथोनिधेर्मङ्क्षुरज्यद्वपुः
कुपित इव तदर्णसः प्रोद्ययौ तस्य संहारकारी समुद्यत्करोऽयं निशावल्लभः ॥

नवभिरर्णवो यथा--

प्रसृतनिबिडमारुतान्दोलिताश्वत्थसशीर्णपर्णौघविस्फारिवातोलिकापूर्यमाणाम्बरे घनवनदवदह्यमानाखिलक्रूरशार्दूलपोतोद्भटोन्नादसंत्रस्तमातङ्गयूथाकुले ।

दिनकरकरतप्तकोलावलीशीर्यमाणार्द्रप्रल्लेलसंल्लोलकल्लोलवाचालमाद्यन्महापयसि ननु प्रियग्रीष्मकालेऽधुना मा स्म गा मानय त्वं हि पीनस्तनाश्लेषसौख्यानि मे ॥

दशभिर्व्यालो यथा--

चिरवहदरघट्टसंपूर्यमाणोच्छलन्सारणीतोयधाराभिरामं सदैकान्तकान्तप्रसर्पल्लतां बहुलिततरुगुल्मकेलीगृहं ये पुरोद्यानमुद्दामलीलाजुषः स्त्रीसखश्चारुचेरुश्चुलुक्येश्वर ।

तृषितकरटियूथभल्लूकसंदोहकोलव्रजव्याकुलाश्यानकल्लोलिनीवारि दुर्वारसूर्यद्युति व्यतिकरविधुरीकृतव्यालसंरुध्यमानद्रुमच्छायमुद्दण्डकान्तारमीयुस्त्वदीयद्विषस्तेऽधुना ॥

एकादशभिर्जीमूतो यथा--

जिनपतिपदपङ्कजस्पर्शपुण्यीकृताशेषसंगः पुरस्तादयं तत्तदाश्चर्यसम्पन्निदानं भुवो भूषणम्

प्रतिविपिननिकुञ्जकूजत्पिकीपञ्चमोच्चारसंवर्धितस्वर्गसीमन्तिनीगीर्वर्ग-
गीतिप्रपञ्चाभिरामोन्वहं ।

---

1. चण्डवृष्टिप्रपातादनन्तरम् अ. ब.

कुरबकसहकारकारस्करशोकजम्बूकदम्बेङ्गुदीवेणुकान्तारमाला–
प्रतिच्छन्नमार्तण्डचण्डातपः
प्रतितटविनिविष्टजीमूतसन्दोहनिर्मुच्यमानामृताम्भारपूर्णोद्र-
हन्निर्भरः पश्य दिष्ट्या जयन्तो गिरिः ॥

द्वादशभिर्लीलाकरो यथा––

घनपरिमलसारकर्पूरपानीयतिम्पद्दुकूलश्रियं पद्मिनीपल्लवस्रस्तरः खादिरा–
ङ्गारविस्फूर्जितं
तुहिनकिरणचन्द्रिका हन्त हालाहलत्वं चन्दनं तप्तलोहोपमं वेणुवीणा–
निनादोऽपि कर्णज्वरत्वं दधन् ।
अयि तव वरहे यदस्या मृगाक्ष्या भवन्नामधेयाक्षरोच्चारमन्त्रैकरक्षाजुषः
साम्प्रतं सर्वमेवाभवद्वचत्ययं
तदतिसुभग सान्द्रपीयूषलीलाकरैस्तैर्वचोभिः समाश्वासयैतां चिरायान्यथा तु
त्वमेवात्र निःशूकचूडामणिः ॥

त्रयोदशभिरुद्दामो यथा––

वलयितवरकन्धरं वल्गदुत्तुङ्गतेजस्विगन्धर्ववाजीखुरक्षुण्ण–
विश्वम्भराक्षोदसन्दोहविक्षेपणाद्दुर्दिनाम्बरं
प्रथममपि निरीक्ष्य सप्रेम कान्तामुखाम्भोरुहालोकने सक्षणं
कौतुकी नष्टुकामोऽपि यावद्भ्रुवत्युन्मनास्त्वद्विपक्षव्रजः ।
नृपवर सहसा जयश्रीविलासैकधामाभ्रमातङ्गसंस्पर्धिनोऽभ्र-
ङ्कषैर्विग्रहैर्भीषणाः क्षोभयन्तो जगद् गर्जितैरूर्जितैः
सृतिमदजलनिर्भरैर्ध्वस्तधूलीवितानाः कृतान्ता इवोद्दामगन्ध–
द्विपास्तावदाविर्भवन्तश्चिरान्मूर्छयामासुरेतं विभो ॥

चतुर्दशभिः शङ्खो यथा––

अमरपतिकरिभ्रमं बिभ्रतीभाः समग्राः लङ्कः कलाविभ्रमं धारयत्यत्रिनेत्र–
प्रसूतस्य कृष्णो वहत्यन्धकत्रासकर्तुस्तुलां
कुवलयवनमातनोति श्रियं पौण्डरीकीं कलिन्दात्मजा जह्नुकन्यो–
ज्ज्वलं वारि धत्तेऽञ्जनाद्रिर्विलासं च कैलासपृथ्वीभृतः ।

कलयति लवणोदधिः क्षीरपाथोधिलीलायितं शेषशोभामशेषाहयः
प्राप्नुवन्तीन्द्रनीलाश्च मुक्तामणीनां समासादयन्ते त्विषं
विचकिलहरहासनीहारहारेन्दुशङ्खावदातैरमीभिः स्फुरद्भिर्मही–
पालचूडामणे शासनैश्वर्यवज्रायुध त्वद्यशोराशिभिः ।।

आदिशब्दात्पञ्चदशभिरम्बुज इत्येवमादयो यथेष्टं कल्पितनामानो यावदेकोन–सहस्राक्षरः पादस्तावद्दण्डका भवन्ति । यदाह––

एकोनसहस्राक्षरपर्यन्ता दण्डकाऽध्यः प्रोक्ताः ।
वर्णत्रिकगणवृध्दया नद्वितयाद्या महामतिभिः ।।

नामकल्पना चेयम् । आरामसंग्रामसुरामवैकुण्ठसोत्कण्ठसंसारकासारविस्तारसंहारनीहार-मन्दारकेदारसाधारसत्कारसंस्कारमाकन्दगोविन्दसानन्दसन्दोहानन्द इत्येवमादिका नामकल्पना । उदाहरणानि स्वबुद्धया ज्ञेयानि । मया तु ग्रन्थविस्तारभयान्नोक्तानि ।।
(२०५)

पञ्चिका

(२०५) चरणे चरणे प्रतिचरणम् तस्मिन् विवृध्दाः वृध्दिं गताः रेफाः रगणाः यषां ते विवृद्धरेफाः अर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः स्युः । तदुक्तं भवति नगण-द्वयात् परतः अष्टौ रगणाश्चेत् अर्णो नाम दण्डकः । नव चेत् अर्णवो नाम दण्डकः । दश चेत् व्यालो नाम दण्डकः । एकादश चेत् जीमूतो नाम दण्डकः । द्वादश चेत् लीलाकरो नाम दण्डकः । त्रयोदश चेत् उद्दामो नाम दण्डकः । चतुर्दश चेत् शङ्खो नाम दण्डकः । आदिशब्दादेवान्येऽपि सिंहसमुद्रभुजङ्गाद्या दण्डकाः प्रयोगानुसारेण द्रष्टव्याः । तत्रार्णो यथा––

न न र र र र र र र र र
।।।।।।ऽ।ऽऽ।ऽऽ।ऽऽ।ऽऽ।ऽऽ।ऽऽ।ऽ ऽ।ऽ
प्रणतनरपतिस्फुरन्मौलिमालामहामूल्यमाणिक्यरश्मिच्छटारञ्जिताङ्घ्रे प्रभो
कुसुमपुरपते पराक्रान्तिबाहो पुरीषु द्विषां ते वनालीतमिस्रासु वन्यो गजः ।
स्फटिकरचितभित्तिषु स्वीयबिम्बं समीक्ष्यान्यनागोऽयमित्याबिभेदाग्रदन्तैः क्रुधा
झटिति सपदि तेषु दन्तेषु दृष्ट्वा पुनर्हस्तिनीत्याशयानुप्रयाति स्मरार्तोऽद्भुतम् ।।

अर्णवो यथा--

न न र र र र र र र र र र
।।।।।।ऽ।ऽऽ।ऽऽ।ऽऽ।ऽऽ।ऽऽ।ऽऽ ।ऽऽ ।ऽऽ।ऽ
दिनमणिकुलदीप दीपावलीदानसन्तानसंजातपुण्यप्रसूत स्फुरज्ज्योतिरस्ताखिल-
भ्रम विविधमहामहादानसन्तर्पिताशेषदेशागतब्राह्मणादेर्गुरो दानशौण्डाग्रणीः ।
हरिहरपरमेष्ठिषाण्मातुरेभाननादित्यसर्वग्रहाराधनाधूतकृत्स्नप्रजोपद्रव
कृतचतुरपुरोहिताधिष्ठितेज्यक्रियाजालमम्पच्चतुर्वेदविद्यानिधे जीव लङ्कापते ।।

व्यालो यथा--

न न र र र र र र र र र र र
।। ।।। ।ऽ।ऽऽ।ऽ ऽ।ऽऽ।ऽऽ ।ऽ ऽ।ऽ ऽ।ऽऽ।ऽऽ।ऽ ऽ।ऽ
रणशिरसि कठोरदोर्दण्डखण्डीकृताशेषचण्डारिमुण्डावलीपिण्डदृप्तामनुष्यस्वने भीषणे
प्रशमितरिपुवर्गमाविर्भवत्सद्यशोराशिमौत्सुक्यसंवर्धितात्मीयबन्धुप्रसादं प्रसन्नाननम् ।
अशरणशरण प्रतीकारधौरेय राजन् पराक्रान्तिबाहो द्विषद्राजराहो भवन्तं विलोक्याधुना
विदधति दिवि साधुकारं महेन्द्रादयो देवता वीर्यतुष्टास्तव न्याययुद्धैषिणः किं पुनर्मानवाः ।।

जीमूतो यथा--

न न र र र र र
।। ।।।।ऽ।ऽऽ।ऽऽ।ऽऽ ।ऽऽ।ऽ
स्वकठिनकरमुक्तनाराचभिन्नेभकुम्भस्तलध्वस्तमु-
र र र र र र
ऽ।ऽ ऽ।ऽ ऽ।ऽऽ।ऽऽ ।ऽऽ।ऽ
क्ताफले शोणिताम्भःप्लवन्मत्तमातङ्गपङ्कच्छले
प्रचुरविलसदुत्पलस्वान्तपङ्केरुहोद्भासिरक्तस्रवन्तीशतालिङ्गिते
भूरिनृत्यत्कबन्धे क्वचिद्वन्धुरे ।
सुरयुवतिसमागमे प्रेत्सुवीरव्रजाहूतकृतिध्वान्तभीमे पयोधाविवाजि-
स्थले लूनपत्त्यश्वनागावली-
च्युतरुधिरकणोक्षितार्द्रः कृपाणो बभौ ते यथायं जयश्रीप-
दालक्तकारञ्जितः श्रीपराक्रान्तिबाहोऽधिकम् ।।

लीलाकरो यथा--

न न र र र र र
।।।।।।ऽ।ऽऽ।ऽ ऽ।ऽऽ।ऽ ऽ।ऽ
विशदसुरसमूहनारायणो वैरिभूपान्धकारोष्णभा-

र र र र र र र
ऽ ।ऽऽ ।ऽऽ ।ऽ ऽ।ऽ ऽ ।ऽ ऽ ।ऽऽ ।ऽ
नुः सपत्नाहिनागान्तको राजवेश्याभुजङ्गोऽरिभूतान्तकः

प्रखररिपुदशास्यरामो द्विषत्तारकस्कन्ददेवो विपक्षाघबुद्धोऽ-
रिकालानलाम्भोधरो वैरिवृक्षावलीकुञ्जरः ।

अरिशिखरिदिवस्पतिर्दस्युदावानलः शत्रुदीपाशुगोऽरातिपाथोधि-
कुम्भोद्भवो द्वेषणस्तोममातङ्गकण्ठीरवो

बलकुलपुरशूलपाणिर्महोमोहितामात्यमित्रान्वयोदन्वदिन्दुः
पराक्रान्तिबाहुर्महीनायको भाति विद्वन्मुदे ॥

उद्दामो यथा--

न न र र र र र र
।।। ।।।ऽ।ऽऽ।ऽऽ।ऽऽ।ऽ ऽ।ऽऽ।ऽ
सपदि यदवलोकनाद्देवदैत्योरगग्रामणीसिद्धविद्याधरा-

र र र र र र र
ऽ ।ऽऽ ।ऽ ऽ।ऽ ऽ ।ऽऽ ।ऽऽ।ऽ ऽ।ऽ
द्या नरेन्द्रास्तथान्ये जनाः स्युः कृतार्थाः सदारात्मजाः कामदा-

स्तव निवसति देव देहे लसल्लक्षणे सेह लक्ष्मीर्मुखा-
म्भोरुहे भारती विश्ववन्द्या नरीनृत्यते क्षीरकुन्देन्दुगौरी मुदा ।

हृदयसरसिजे मुहुर्द्योतते नीतिसीमन्तिनी गाढमन्त्रान्निरीक्ष्येति
कीर्ती रुषा सत्वरं सप्त संलङ्घ्य वारांनिधीन्निर्ययौ

क्षितिपतिरिति मेदिनीजानिरित्यन्वहं वाचमाकर्ण्य सोढुं न शक्ता
सती द्वेष्यया श्रीपराक्रान्तिबाहो महाभाग भूमीपते ॥

२०६. प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः सप्तभिर्यैः ॥

शङ्खो यथा--

न न र र र र र र
। । ।।।ऽ ।ऽऽ।ऽ ऽ।ऽ ऽ ।ऽ ऽ। ऽ ऽ।ऽ
तव कथमधुना दरीदृश्यते मीनशुष्कं मुखं नाथ कन्दर्पचि-

र र र र र र र र
ऽ ।ऽ ऽ ।ऽ ऽ।ऽ ऽ ।ऽ ऽ। ऽ ऽ। ऽ ऽ।ऽ
त्तव्यथाया मनो दुःखमासीत् कुतो हन्त जीयां समालोक्यतां भूयसीम्
अभिजजशमनीमपूर्वानुभूतां सवामेक्षणापत्यमित्रादिकानां च बन्धुव्रजानां
हुहुं ब्रूहि कस्मान्नशोधास्तव ज्ञातयः कथ्यते ।
सकलजलधिशोषणेन प्रभो सत्यमेतत् किमेवं कथं श्रीपराक्रान्तिबाहौ
प्रयाते तदीयाश्वसेनाखुरक्षुण्णभूरेणुभिर्मिश्रितैस्तदनु समदनो दृशा
दिव्यया वीक्ष्य वृत्तान्तमाश्वासयामास शोष्यद्द्विषत्सुन्दरीदीर्घनेत्राम्बुवाहैः
पुनः पूरितस्त्वन्न शोचेति तम् ॥ (२०५)

सुकविहृदयानन्दिनी

(२०६) नगणद्वयादनन्तरं सप्तभिर्यैः प्रचितको नाम दण्डकः स्मृतः। पूर्ववदत्रापि प्रतिचरणविवृद्धरेफक्रमेण यगणादिसमस्तगणवृद्धया दण्डका भवन्ति। यथा पूर्वमेकैकाक्षरवृद्धया छन्दसामृद्धिरुक्ता तथा अत्र दण्डकेषु रेफादिगणोपलक्षितवर्णत्रयेण वृद्धिः। सा चाचार्यपारम्पर्योपदेशात्तावद्ग्राह्या यावदेकोनमक्षरसहस्रं भवति। यद्यपि कैश्चिदुक्तं सहस्राक्षरपर्यन्ता दण्डका इति तथापि रकाराणां वृद्धया एकोनमेव सहस्रं भवतीति। इति दण्डकप्रकरणम्। (२०६)

इति सुल्हणविरचितायां सुकविहृदयानन्दन्यभिधानायां वृत्तरत्नाकरछन्दोवृत्तौ समवृत्ताध्यायस्तृतीयः ॥

छन्दोवृत्तिः

(२०६) नगणद्वयात्परैः सप्तभिर्यगणैः प्रचितको नाम दण्डको भवति। उपलक्षणं चैतत्। नगणद्वयात्परै रगणं हित्वा अन्यैरपि सप्तभिर्गणैः प्रचितको नाम दण्डको भवति। यदाह–प्रचितक इति सप्तसङ्ख्यैर्भवेद्दण्डको नद्वयाद्यैर्मैर्तैर्यैर्जैर्सैर्भैः समेतैः इति। उदाहरणम्––

विलसदुरुतरवारिप्रचण्डे महावाहिनीव्यूहविस्फारणव्यक्तशक्तौ
प्रकटयति रुचिराखण्डकोदण्डदिशेत्युच्चकैः राजहंस प्रणाशं।
प्रशमयति निखिलं मेदिनीचक्रमन्तापपरिस्फूर्जितं न्यक्कृतार्कप्रतापे
प्रचितघनबलयुक्ते नभस्यायमाने चुलुक्येश्वरे को न धत्ते प्रमोदम्॥

एवं शेषगणेऽप्युदाहार्यम्। एवं गणसप्तकानन्तरं एकैकयादिवृद्धचा अर्णकादिदण्डकाः स्युः इति वृद्धकोपदेशः। अतस्तेऽप्युदाहार्याः। दण्डकप्रकरणमसङ्ख्यम्॥ (२०६)

सद्वृत्तरत्नाकरनामधेयशास्त्रस्य वृत्तौ समवृत्तनामा।
इत्थं तृतीयोऽजनि सोमचन्द्रविनिर्मितायामधिकार एषः॥

पञ्चिका

(२०६) नद्वयात् नयुगलात् उत्तरैः परैः सप्तभिर्यैः यगणैः प्रचितकसमभिधो दण्डकः धीरधीभिः पण्डितैः स्मृतः कथितः। प्रचितक इति समभिधा सम्यक् अभिधानं यस्य तथोक्तः। प्रचितकनामेत्यर्थः। यथा––

न न य य य य य य य य
।।।।।।ऽ ऽ।ऽ ऽ । ऽऽ।ऽऽ।ऽ ऽ।ऽ ऽ।ऽऽ
द्विजकुलमखिलमङ्गैरुपाङ्गैश्च वेदानधीते समं काव्यशास्त्रागमाद्यैः
स्वपथगतिनिरतास्ते च वर्णत्रयो यस्य राज्ये तथा शङ्करा धर्मयुक्ताः।
भवति सगिरिवना रत्नसूर्भूमिरब्दाश्च वर्षन्ति काले सदा धेनवः स्यु–
श्चिरमपि बहुपयोदाः पराक्रान्तिबाहौ ततः सिंहलाधीश्वरे शस्तमास्ताम्॥

२०७. [1]एवमेकोनसहस्राक्षरवृद्धिर्भवति दण्डकं वृत्तम् ॥

नद्वयात् नगणद्वयात् परतः तकारेणाऽपि तगणेनाऽपि क्वचित् कुत्रचित् दण्डाः दण्डकवृत्तविशेषाः दृश्यन्ते ।

न न त त त त त त त
। । ।।।।ऽ ऽ ।ऽ ऽ। ऽऽ । ऽ ऽ ।ऽऽ । ऽ ऽ।ऽऽ ।
प्रतिदिनमवलोकेश्वरो नाथ एषा क्रिया लोकरक्षाकरी सर्ववेदीति
विदधदनुपमः सम्भ्रमं त्यज्यसेऽतस्ततो हीनदीनानुकम्पीति विज्ञाय ।
शरणमहमुपैमि प्रभुं तं मदीयप्रमोदालयं बोधिसत्त्वाग्रगण्यं नु
व्रजत सपदि यूयं च सर्वे जनाः स्वर्गमोक्षार्थिनस्तं गुरुं सिद्धये साधु ॥ (२०६)

पञ्चिका

(२०७) एवमुक्तप्रकारेण रगणयगणतगणैः क्रमेण वृद्धिः वृद्धिं गतम् दण्डकं वृत्तम् एकोनसहस्राक्षरं भवति । एतेषामुदाहरणानि ग्रन्थबाहुल्यभयादिह न लिखितानीति ॥

इति श्रीशाक्यमुनेर्भगवत्. सर्वज्ञस्य परमोपासकेन
गौडदेशवास्तव्येन श्रीबौद्धागमचक्रवर्तिना
भूसुरेणाचार्येण विरचितायां वृत्तरत्नाकर–
पञ्चिकायां समवृत्तविभागप्रतिपादनो
नाम तृतीयोऽध्यायः ॥

---

1. इदं सूत्रं बहुषु पुस्तकेषु न दृष्टम् ।

चतुर्थोऽध्यायः

अर्धसमवृत्तानि

२०८. विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकावुपचित्रम् ॥

तात्पर्यटीका

(२०८) उद्देशसूत्रक्रमप्राप्तानां प्रथमाङ्घ्रिसम इत्यादिना लक्षितानामर्धसमानां गणपरिपाट्या केषांचिल्लक्षणमनूद्याधिकारिणां व्यवहारसौकर्याय नामानि निर्देष्टुं त्रिष्टुबादिजातीरधिकृत्याह । विषमे इति प्रथमचरणतृतीयचरणनिर्मिते । दले इत्यर्धे । चतुश्चरणमिदं वृत्तमतश्चरणद्वयस्य दलत्वमिति । एवं युजि इति समे दले इत्यपि व्याख्येयम् । उपचित्रमित्यस्याभिधानम् । एकजातिसमुत्पन्नमेतदर्धसमम् । एवमग्रेतनेष्वपि व्याख्येयम् ॥ (२०८)

सुकविहृदयानन्दिनी

(२०८) अथार्धसमवृत्ताध्यायमाह । अत्र पादे इति वक्तव्ये अर्धसमवृत्ताध्याये त्वर्धापेक्षया अर्ध इत्युक्तं सूत्रकारेणेति न दोषः । विषमे प्रथमे तृतीये पादे त्रयः सगणाः लघुगुरू यदि युजि समे द्वितीये चतुर्थे भमणत्रयं द्वौ गुरू तदा उपचित्रा नामार्धसमवृत्तं भवति । यथा--

त्वदरातिपुरे क्षितिपोद्वसे मुक्तमहोरगकञ्चुकवन्ति ।
उपचित्रमुदीक्ष्य दिवा भयान्नो विविशुर्भवनानि हरिण्यः ॥ (२०८)

छन्दोवृत्तिः

(२०८) यदुक्तमर्धसमवृत्तमित्यथार्धसमवृत्तभेदानाह--
विषमे पादे सगणत्रयं लघुगुरू च, युजि समे पादे भगणत्रयं गुरुद्वयं पूर्वार्धे एतत् लक्षणम् । अत्र चार्धसमवृत्तप्रस्तावात् पूर्वार्धलक्षणमपि अपराधेऽपि स्यात् । एवं

२०९. **भत्रयमोजगतं गुरुणी चेद् युजि च नजौ ज्ययुतौ द्रुतमध्या ॥**

सर्वत्रापि । तदुपचित्रं नामार्धसमं छन्दो भवति । यथा--

अयमत्र नृपः सचिवस्त्वसावेष कुमार इति प्रतिहारः ।
उपचित्रमिदं त्वदरेर्गृहे वक्ति मिथः किल पान्थसमूहः ॥ (२०८)

पञ्जिका

(२०८) अथेदानीमर्धसमवृत्तानां लक्ष्यलक्षणान्याचष्टे । दले अर्धे इत्यधिकारः स्यादाध्यायपरिसमाप्तेः । सश्च सश्च सौ, सश्च लश्च गश्च सलगाः, सगणत्रयं लघुगुरू च विषमे अयुक्पादे यदि, भश्च भश्च भौ भगणौ, भात् भगणात्परौ गुरुकौ गुरुद्वयम् युजि समपादे यदि तदा उपचित्रं नाम स्यात् । तद्यथा--

स स स लग भ भ भ ग ग
।।ऽ ।।ऽ ।।ऽ ।ऽ ऽ।।ऽ।।ऽ।।ऽ ऽ
अधुना मधुना प्रतिबोधितं चूततरुप्रसवं प्रसमीक्ष्य ।
भ्रमरावलिलीढदलं न के यान्ति मनोजवशं तु युवानः ॥ (२०८)

तात्पर्यटीका

(२०९) भिन्नजातिसमुत्पन्नं त्रिष्टुब्जगतीव्यक्तिभ्यां निष्पन्नं द्रुतमध्या नाम अर्धसमम् ॥ (२०९)

सुकविहृदयानन्दिनी

(२०९) यस्यार्धसमवृत्तस्य ओजे विषमे प्रथमे तृतीये पादे भगणत्रयं द्वौ गूरू, यदि समे द्वितीये चतुर्थे नगणजगणद्वययगणाः च तद्वृत्तं द्रुतमध्या नाम । यथा--

दृष्टिविलासविशेषमशेषं विविधगभीरवचोरचनां च ।
यौवनमेत्य वधूर्द्रुतमध्या जयति मनोभवदत्तविवेका ॥ (२०९)

छन्दोवृत्तिः

(२०८) ओजयोर्विषमयोः पादयोर्भगणत्रयं गुरुद्वयं च, युजि समयोः पादयोर्नगणः द्वौ जगणौ यगणः द्रुतमध्या । यथा--

२१०. सयुगात्सगुरू विषमे चेद् भाविह वेगवती युजि भाद् गौ ॥

वीरजिनेन्द्र भवत्पदपद्मं भ्रमर इव द्रुतमध्यगमद्य ।
मुक्तिवधूपरिरम्भणसौख्यं करतलयामि कृतं खलु तेन ॥

उपचित्रा आपातलिकाऽपरान्तिकेयम् ॥　　(२०९)

पञ्चिका

(२०९) भानां त्रयं भत्रयं, गुरु च गुरु च गुरुणी, ओजगतम् विषमपादसहितम् भगणत्रयं गुरुद्वयं च चेत् । नश्च जश्च नजौ । किंभूतौ । ज्ययुतौ जश्च यश्च ज्यौ ताभ्यां युतौ सहितौ । युजि च समपादे च नगणजगणद्वयं यगणश्च चेत् तदा द्रुतमध्या नाम स्यात् । तद्यथा--

भ भ भ ग ग　न ज ज　य
ऽ।।ऽ।।ऽ।　।ऽऽ　।।।।ऽ।।ऽ।　।ऽऽ
चन्दनमिन्दुमहश्च सुगन्धिर् मलयमरुन्मदिरा च मनोज्ञा ।
वामदृशां च वपुः सविलासं मनसिजपौष्टिकयोगविशेषः ॥　　(२०९)

तात्पर्यटीका

(२१०) पङ्क्तित्रिष्टुभोर्विशेषव्यक्तिभ्यां वेगवती नामार्धसमं भवति । अस्या उपदेशः त्रिष्टुभोऽधस्तनीनां उक्तादधिकानां मध्ये जातिद्वयोत्पन्नं व्यक्तिद्वयमादाय स्वेच्छया अर्धसमान्युत्पाद्य दर्शयेदिति । अथ नामानि निर्देष्टुं जातिक्रमानियमेन यदृच्छया सूत्रयन्नाह ॥　　(२१०)

सुकविहृदयानन्दिनी

(२१०) विषमे पादे त्रयः सगणा गुरुश्चेत्, युजि समे भगणत्रयं द्वौ गुरू च यदा तदा वेगवती नाम । यथा--

सुकृतैकनिधेः स्मरबन्धोः कस्यचिदालयमालि सलीलम् ।
इयमुन्नतपीननितम्बा गच्छति वेगवती मदनार्ता ॥　　(२१०)

२११. **ओजे तपरौ जरौ गुरुश्चेन्म्सौ ज्गौ ग् भद्रविराड् भवेदनोजे ॥**

छन्दोवृत्तिः

(२१०) विषमे सगणत्रयं च गुरुः, युजि समपादे भगणत्रयं गुरू द्वौ वेगवती नाम। यथा--

अतिवेगवती सरिदेषा लोलदृशो वसतिः परतीरे।
विदधाति किमित्युरुचिन्तातापमवाप्य मृतः पथि पान्थः ॥

आपातलिकेयम् ॥ (२१०)

पञ्जिका

(२१०) सयोर्युगम् सयुगम्। तस्मात्सगणद्वयात् परे सगुरू सगणगुरू विषमे अयुक्पादे चेत्, भश्च भश्च भौ, भात् परौ गौ, इह अस्मिन् युजि समपादे भगणत्रयं गुरुद्वयं च चेत् तदा वेगवती नाम स्यात्। तद्यथा--

स स स ग भ भ भ ग ग
।।ऽ। ।ऽ ।।ऽ ऽ ऽ। ।ऽ। ।ऽ।।ऽऽ
उदियाय गिरेः शिखराग्राद् एष शशाङ्क उदारमुखाभः।
भवनानि यया परितुष्यन्मानवतीजनमानविघाती ॥ (२१०)

तात्पर्यटीका

(२११) भद्रविराण् नाम ॥ (२११)

सुकविहृदयानन्दिनी

(२११) ओजे विषमे पादे प्रथमे तृतीये च तगणात् परौ जगणरगणौ गुरुश्चेद्यदि भवति। अनोजे समे द्वितीये चतुर्थे पादे मगणसगणजगणाः गुरू च भवन्ति तद् वृत्तं भद्रविराट् नाम। यथा--

कुन्देन्दुसमुज्ज्वलेन बद्धा ब्रह्माण्डोदरवर्तिनो नगेन्द्राः।
नीता हरशैलसख्यमेते शुद्धं भद्रविराडिदं यशस्ते ॥ (२११)

२१२. असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद्गः ॥

छन्दोवृत्तिः

(२११) ओजे इति विषमयोः पादयोः तजरगाः, अनोजे समपादयोः मसजा गुरुद्वयं च तदा भद्रविराट् भवेत् । यथा—

पश्येद्भगवत्पदारविन्दद्वन्द्वं भक्तित एकदाऽपि यस्ते ।
बिभ्रद्भुवनाधिपत्यमेकं भद्रं भद्रविराट् भजेत सोऽपि ॥

औपच्छन्दसिकमिदम् ॥ (२११)

पञ्चिका

(२११) ओजे विषमपादे तात् तगणात्परौ जरौ जगणरगणौ गुरुश्चेत् । म् च सश्च म्सौ मगणसगणौ, ज् च गश्च ज्गौ जगणगुरू, ग् गुरुश्च, अनोजे समपादे चेत् तदा भद्रविराड् नाम भवेत् । तद्यथा–

त ज र ग म स ज ग ग
ऽ ऽ । । ऽ । ऽ । ऽ ऽ ऽ ऽ ऽ । । ऽ । ऽ । ऽ ऽ
ब्रूते निजकिङ्करस्य कर्णे नीचैः पार्श्वगतस्य काल एवम् ।
नारायणपादपद्मभक्तं दृष्ट्वा दूरत एव मुञ्च मुञ्च ॥ (२११)

तात्पर्यटीका

(२१२) केतुमती नाम पङ्क्तित्रिष्टुभोरर्धसमम् ॥ (२१२)

सुकविहृदयानन्दिनी

(२१२) असमे सगणजगणसगणा गुरुश्च, समे भगणरगणनगणाः द्वौ गुरू तद् वृत्तं केतुमती नाम । यथा—

भवता रणाङ्गणगतेन प्रस्फुरितासिमात्रसचिवेन ।
विजिता नराश्वगजयुक्ता केतुमती नरेन्द्र रिपुसेना ॥ (२१२)

२१३. ससजा विषमे यदा गुरुः समरा स्याल्ललिता समे लगौ ॥

छन्दोवृत्तिः

(२१२) विषमे पादे सजसगाः, समे पादे भरना गुरुद्वयं च केतुमती नाम । यथा--

प्रसरद्रजःस्थगितसूर्या केतुमतीमुद्वीक्ष्य तव सेनाम् ।
वसुधापते दिवमिवात्ममाशामशङ्कत त्वदरिवर्गः ॥ (२१२)

पञ्जिका

(२१२) सश्च जश्च सजौ सगणजगणौ । किंभूतौ । सगुरुयुक्तौ सश्च गुरुश्च सगुरू । ताभ्यां सगणगुरुभ्यां युक्तौ सहितौ । असमे अयुक्पादे चेत् । भश्च रश्च नश्च गश्च भरनगमिति समाहारे नपुंसकम् । समे युक्पादे । तस्माद्भगणरगणनगणगुरुतः परो गः गुरुश्चेत् । तदा केतुमती नाम स्यात् । तद्यथा--

स ज स ग भ र न ग ग
।।ऽ ।ऽ।। ।ऽ ऽ ऽ।।ऽ ।ऽ। । ।ऽऽ
नलिनं द्विरेफमलिनं स्याद् इन्दुमधः करोति च कलङ्कः ।
वदनं प्रमोदसदनं ते सुन्दरि केन वा सृजति साम्यम् ॥ (२१२)

पञ्जिका

(२१३) सश्च सश्च जश्च ससजाः । विषमे विषमपादे सगणसगणजगणाः गुरुश्च यदि । सश्च भश्च रश्च सभराः, लश्च गश्च लगौ । समे समपादे सगणभगणरगणाः लघुगुरू च तदा ललिता नाम स्यात् । तद्यथा--

स स ज ग स भ र ल ग
।।ऽ ।।ऽ। ऽ । ऽ ।।ऽऽ ।।ऽ।ऽ । ऽ
सहसा विदधीत न क्रियाम् अविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥ (२१३)

२१४. आख्यानिकी तौ जगुरू ग ओजे जतावनोजे नगुरू गुरुश्चेत् ॥

तात्पर्यटीका

(२१४) आख्यानिकीति नाम ॥ (२१४)

सुकविहृदयानन्दिनी

(२१४) ओजे प्रथमे तृतीये पादे तगणौ द्वौ जगणो द्वौ गुरू च, अनोजे द्वितीये चतुर्थे जगणतगणौ जगणो द्वौ गुरू च तद्वृत्तं आख्यानिकी नाम। यथा--

ये ये त्वया संयति शत्रुभूपा हता हताशेषविपक्षवर्गाः।
आख्यानिकी कीर्तिरवन्तिनाथ बभूव ते सच्चरितान्तरिक्षे ॥ (२१४)

छन्दोवृत्तिः

(२१४) ओजे ततजगणाः गुरुद्वयं, समे पादे जतजाः गुरुद्वयं च। यथा--

त्वद्वैरिभूपैरियमागतोच्चैर्मरालनादैर्मुखरा शरच्छ्रीः।
आख्यानिकीव त्वदनीकयात्रोत्सवस्य सद्यश्चकितैरुदीक्षि ॥

आख्यानिकी वार्ताहारिका ॥ (२१४)

पञ्जिका

(२१४) तश्च तश्च तौ। जश्च गुरुश्च जगुरू। गः गुरुः। ओजे विषमचरणे तगणद्वयं जगणगुरुद्वयं च चेत्। जश्च तश्च जतौ। जश्च गुरुश्च जगुरू। गुरुः प्रसिद्धः। अनोजे समचरणे जगणतगणजगणाः गुरुद्वयं च चेत्। तदा आख्यातकी नाम स्यात्। तद्यथा--

त त ज ग ग ज त ज ग ग
ऽ ऽ ।ऽ ऽ। । ऽ । ऽ ऽ । ऽ । ऽ ऽ ।। ऽ । ऽ ऽ
अग्रेऽहमग्रेऽहमिति प्रियायाः पुरा वचोजीवितयो रणेऽभूत्।
कण्ठाग्रहोजोर्बहिरुत्प्रयाणे प्रिये प्रियामीति विचारितायाः ॥ (२१४)

२१५. जतौ जगौ गो विषमे समे चेत् तौ ज्गौ ग एषा विपरीतपूर्वा ॥

तात्पर्यटीका

(२१५) विपरीताख्यानिकीति नाम । त्रिष्टुभोरर्धसमम् । इह आख्यानिक्या लक्षण-वैपरीत्येन विपरीताख्यानिक्युपदेशः स्थालीपुलाकन्यायेन उपचित्रादीनामपि तथा दल-वैपरीत्यदर्शने विपरीतपूर्वाभिधानप्रकल्पनार्थः ॥ (२१५)

सुकविहृदयानन्दिनी

(२१५) यस्य विषमे पादे जगणतगणजगणा द्वौ गुरू च समे द्वौ तगणौ जगणो द्वौ गुरू च तद्वृत्तं विपरीताख्यानिकी नाम । यथा--

ध्रुवं समागच्छति जीवितेशः श्रुत्वातिकारुण्यपरं वचो मे ।
भवेन्न चेद् दैववशादिहान्या साख्यानिकी मे विपरीतपूर्वा ॥

आख्यानिकी वार्ताहारिकोच्यते । एतयोश्च पूर्वोक्तोपजात्यन्तर्गतत्वे विशेषसंज्ञार्थमर्ध-समवृत्ताध्याये पाठः ॥ (२१५)

छन्दोवृत्तिः

(२१५) विषमे पादे जतजा गुरुद्वयं, समे ततजा गुरुद्वयं, एषा आख्यानिकी विपरीता-ख्यानिकीत्यर्थः । यथा--

अमंस्त ते दुर्नयचेष्टितानामाख्यानिकीयं विपरीतवृत्तिं ।
पुरः सखीनां ब्रुवता विपक्षनाम त्वया सम्प्रति लज्जिता सा ॥ (२१५)

पञ्जिका

(२१५) जश्च तश्च जतौ । जश्च गश्च जगौ । गः गुरुः । विषमे अयुक्पादे जगण-तगणजगणगुरुद्वयं च चेत् । तश्च तश्च तौ । ज् च गश्च ज्गौ । गः गुरुः । समे युक्पादे तगणद्वयं जगणगुरुद्वयं च चेत् । एषा आख्यातकी विपरीतपूर्वा स्यात् विपरीताख्यातकी नाम भवति । तद्यथा--

ज त ज ग ग त त ज ग ग
।ऽ ।ऽऽ ।। ऽ।ऽऽ ऽ ऽ । ऽऽ।। ऽ ।ऽ ऽ
शशाङ्कमग्ने मम सीधुपात्रे नास्मिन् स राहुर्ननु रोहिणी स्वः ।
वधो विदग्धः प्रमदाप्रसङ्गे यूनां मनः कम्पत इत्यचित्रम् ॥ (२१५)

२१६. सयुगात् सलघू विषमे गुरुर्युजि नभौ च भरौ हरिणप्लुता ॥

२१७. अयुजि ननरला गुरुः समे न्जमपरवक्त्रमिदं ततो जरौ ॥

तात्पर्यटीका

(२१६) हरिणप्लुता नाम ॥ (२१६)

सुकविहृदयानन्दिनी

(२१६) यस्या विषमे पादे सगणत्रयं लघुर्गुरुश्च, समे पादे नगणभगणौ भगणरगणौ च तद्वृत्तं हरिणप्लुता नाम । यथा--

यदि शीघ्रगतिर्हरिणप्लुतान् सुविषमांस्तनुते पथिकः पथि ।
जलदाभिगमे प्रियया तदा भवति सङ्गतिरर्धशरीरया ॥ (२१६)

छन्दोवृत्तिः

(२१६) विषमे पादे सगणत्रयं लघुगुरू च समे पादे नभभरा यत्र सा हरिणप्लुता । यथा--

नृप शैलशिलाशयनासना विदितकन्दफलाहरणाः सदा ।
निवसन्ति वने भवतो द्विषस्तरुनिकुञ्जगता हरिणप्लुताः ॥ (२१६)

पञ्जिका

(२१६) सयोर्युगम् सयुगम् । तस्मात् सगणद्वयात् । सलघू सगणलघू । गुरुः प्रसिद्धः । विषमे ओजपादे चेत् । नश्च भश्च नभौ । भश्च रश्च भरौ । युजि समपादे नगण-भगणौ भगणरगणौ च यदि । तदा हरिणप्लुता नाम स्यात् । तद्यथा--

स स स ल ग न भ भ र
। ।ऽ ।।ऽ । ।ऽ।ऽ । ।।ऽ । ।ऽ । ।ऽ।ऽ
स ददौ प्रविभज्य महीपतिर् न कनकाद्रिमिति प्रतिवासरम् ।
प्रवदन्निव नीयत षड्क्तयस्तव पराक्रमबाहुनृपाऽगुणम् ॥ (२१६)

तात्पर्यटीका

(२१७) अपरवक्त्रमिति नाम । त्रिष्टुब्जगत्योरर्धसमम् ॥ (२१७)

२१८. अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा ॥

सुकविहृदयानन्दिनी

(२१७) विषमे पादे नगणौ द्वौ रगणो लघुश्च गुरुश्च भवन्ति समे पादे नगणजगणौ नगणरगणौ तद्वृत्तं अपरवक्त्रं नाम । यथा—

ज्वलदनलपिशङ्गलोचनं मदनरिपोः शशिखण्डमण्डितम् ।
अपहरतु भयानि दक्षिणं तदपरवक्त्रमयङ्करं सताम् ॥

अस्य वैतालीयान्तर्गतस्यापि विशेषसंज्ञार्थमिहोपन्यासः ॥ (२१७)

छन्दोवृत्तिः

(२१७) अयुजि विषमे पादे नगणद्वयं रगणलघुगुरवः समे पादे नजजराः । यथा—

नृपवर भवदीयवर्णनं निखिलमुखै रचयन्पुरातनैः ।
अधिकमपरवक्त्रमीहते श्रुतिपठनाय चतुर्मुखोऽधुना ॥

वैतालीयमिदम् ॥ (२१७)

पञ्जिका

(२१७) नश्च नश्च रश्च लश्च ननरलाः । गुरुः प्रसिद्धः । अयुजि विषमपादे नगणद्वयरगणलघुगुरवश्च चेत् । न् च जश्च ज्जमिति समाहारे नपुंसकम् । जश्च रश्च जरौ । समे युक्पादे नगणजगणं ततः तस्मात् परौ जगणरगणौ चेत् । तदा इदं अपरवक्त्रं नाम स्यात् । तद्यथा—

न न र ल ग न ज ज र
। । । । । ऽ । ऽ । ऽ । । । । ऽ । । ऽ । ऽ । ऽ

अथ हिमशुचिभस्मभूषितं शिरसि विराजितमिन्दुलेखया ।
स्ववपुरतिमनोहरं हरं दधतमुदीक्ष्य ननन्द वासवः ॥ (२१७)

तात्पर्यटीका

(२१८) पुष्पिताग्रा नाम जगत्यतिजगत्योरर्धसमम् ॥ (२१८)

सुकविहृदयानन्दिनी

(२१८) यस्य विषमे पादे नगणद्वयं रगणात्परो यगणः, समे नगणजगणौ जगणरगणौ गुरुश्च तद्वृत्तं पुष्पिताग्रा नाम । यथा—

२१९. वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः ।
पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं तथा ॥

चलकिसलयवत्यशोकशाखा तव चरणाहतिमात्रपुष्पिताग्रा ।
शशिमुखि सखि मुञ्च मानमस्य मदनमहोत्सव एष पश्य याति ॥

इयमप्यौपच्छन्दसिकस्य विशेषसंज्ञाज्ञापनार्थमत्रोच्यते ॥ (२१८)

छन्दोवृत्तिः

(२१८) अयुजि विषमे पादे नगणद्वयं रयौ च समे नजजरगुरवः । यथा—

स्मर इव शयितः कयाप्यशोके पदहननेन जगज्जयाय नुन्नः ।
सपदि यदिषवोऽस्य पुष्पिताग्रप्रसवमिषात्प्रगुणाः परिस्फुरन्ति ॥

औपच्छन्दसिकभेदः ॥ (२१८)

पञ्चिका

(२१८) नयोर्युगम् नयुगम् । तच्च रेफश्च नयुरेफमिति समाहारे नपुंसकम् । तस्मात् नगणद्वयरगणात् परो यकारो यगणश्चेत् । अयुजि विषमाङ्घ्रौ । नश्च जश्च नजौ । जश्च रश्च गश्च जरगाः । युजि च समाङ्घ्रौ च नगणजगणद्वयरगणा गुरुश्च चेत् तदा पुष्पिताग्रा नाम स्यात् । तद्यथा—

न न र य न ज ज र ग
।।।।।।ऽ।ऽ।ऽऽ ।।।।ऽ।।ऽ ।ऽ।ऽऽ
करतलगतमप्यमूल्यचिन्ता – मणिमवधीरयतीङ्गितेन मूर्खः ।
कथमहमपहाय बुद्धरत्नं जगति धनी गुणवांश्च पण्डितश्च ॥ (२१८)

तात्पर्यटीका

(२१९) इदं वैतालीयादारभ्य एतत्पद्यपर्यन्तं पूर्वप्रकारेणोक्तनानावृत्तलक्षणदर्शनम् एकस्यामेव व्यक्तौ नामसङ्करस्वीकारदर्शनार्थमिति स्थितम् । अथ व्याप्तिप्रदर्शनार्थं छन्दःशेखरात् ।

२२०. **स्यादयुग्मके रजौ रजौ समे तु जरौ जरौ गुरुर्यवात् परा मतीयम् ॥**

जौ रजावयुज्यसौ यवाद् मतीह जकारतः परौ रजौ रगौ तु युग्मे ।
ज्रजर्गि षट्पदावली भवेदयुग्मे जौ रजौ यदीययुग्मपादयोस्तु ॥
ससजा गयुजोः प्रबोधिता सभरलगा यदि युग्मपादयोः ।
भौ तलगा विषमेऽङ्घ्रिद्वितये नजनसगा युजि विलसितलीला ॥
स्यादियमोजयोर्दशयतौ भरनभनलगैः ।
यदि युजि मानिनी हरयतौ न्जभजनसगणैः ॥ (२१९)

छन्दोवृत्तिः

(२१९) प्रागेव गतार्थमिदम् ॥ (२१९)

पञ्चिका

(२१९) अपरवक्त्रमित्याख्या नाम यस्य तत्तथोक्तम् । विपश्चितः अपरवक्त्रं वैतालीयं वदन्ति । वैतालीयलक्षणस्याप्यत्र विद्यमानत्वात् । पुष्पिताग्रेत्यभिधा नाम यस्य तत्तथोक्तम् । तथा केचिच्छन्दोविदः पुष्पिताग्राभिधम् औपच्छन्दसिकं वदन्ति । तल्लक्षणस्याप्यत्र विद्यमानत्वात् (पृ. ७५) ॥ (२१९)

तात्पर्यटीका

(२२०) सुगमम् । तथा जगती-अतिजगतीव्यक्तिभ्यां वाङ्मतीमर्धसमं दर्शयन् त्रिष्टुभः परासां जातीनामुत्कृत्यन्तानां मध्ये व्यक्तिद्वयमादाय अर्धसमानि स्वेच्छया ग्रथनीयानि इति सूचयति । तथा—

इति श्रीरघुसूरिसूनुत्रिविक्रमसूरिविरचितायां
वृत्तरत्नाकरछन्दःसूत्रतात्पर्यटीकायाम्
अर्धसमाध्यायश्चतुर्थः । (२२०)

सुकविहृदयानन्दिनी

(२२०) यस्य विषमे पादे रगणजगणौ रगणजगणौ, समे जगणरगणौ जगणरगणौ गुरुश्च तद्वृत्तं यवात्परा मती यवमती इत्यर्थः । यथा—

मालवक्षितीश माषमुद्गशालि यवानतारिभूपमेदिनी समग्रा ।
आत्मसाकृता त्वया रिपुन्विजित्य समग्रसैन्यसंयुतानपि प्रसह्य ॥ (२२०)

छन्दोवृत्तिः

(२२०) अयुग्मके विषमे पादे रजरजाः समे जरजरगाः यदा तदा यवात्परा मती । यवमतीत्यर्थः । यथा--

वन्यसैरभा भवद्विपक्षधाम्नि निरन्तरेन्द्रनीलबद्धभूमिभागे ।
न्यङ्गमुखं प्रकुर्वते मुधा वितर्क्य विलीनविस्फुरद्यवान्वितां धरित्रीम् ॥

यवान्वितां यवमतीमित्यर्थः । छन्दोवशात् यवान्वितामित्युक्तम् ।

सद्वृत्तरत्नाकरनामधेयशास्त्रस्य वृत्तौ च चतुर्थसंख्या ।
इत्थं हि तुर्योऽजनि सोमचन्द्रविनिर्मितायामधिकार एषः ॥ (२२०)

षञ्चिका

(२२०) रश्च जश्च रजौ । पुनरपि रश्च जश्च रजौ अयुग्मके विषमचरणे रगण-जगणौ रगणजगणौ च चेत् । जश्च रश्च जरौ जश्च रश्च जरौ । समे तु समे चरणे जगणरगणौ पुनः जगणरगणौ गुरुश्च यदि । तदा इदं यवात् परा मती यवमती नाम स्यात् । यवोऽस्याऽस्तीति वाक्ये संज्ञायामदन्तादपि मतुप्प्रत्ययः । अन्यत्र तु यवमतीत्येव भवति । तद्यथा--

र ज र ज ज र ज र ग
ऽ । ऽ । ऽ । ऽ । ऽ । ऽ । । ऽ । ऽ । ऽ । ऽ । ऽ । ऽ । ऽ
राधिकामितस्ततश्च तामवेक्ष्य चिरं प्रसूनबाणखिन्नचेतसाऽपि ।
नन्दनन्दनः स माधवः ससाद कलिन्दनन्दिनीतटान्तकुञ्जभूमौ ॥ (२२०)

इति श्रीशाक्यमुनेर्भगवतः सर्वज्ञस्य परमोपासकेन
गौडदेशवास्तव्येन श्रीबौद्धागमचक्रवर्तिना
भूसुरेणाचार्येण विरचितायां वृत्तरत्ना-
करपञ्चिकायामर्धसमवृत्तविभाग-
प्रतिपादनो नाम चतुर्थोऽध्यायः ॥

२२१. **विषमे ससजा गुरावनोजे सभरा यश्च तु मालभारिणीयम् ॥**

सुकविहृदयानन्दिनी

(२२१) यस्य विषमे सगणद्वयं जगणश्च द्वौ गुरू यत्र समे तु सगणभगणरगणयगणाश्च तद्वृत्तं मालभारिणी नाम । यथा—

स स ज भग स भ र य
। ।ऽ।।ऽ। ऽ।ऽऽ ।।ऽ ऽ।।ऽ। ऽ।ऽ ऽ
य इहानुदिनं न पूजयेत्तां परलोकानुरतश्च मालवः स्यात् ।
स कथं प्रलभेत तत्फलं वा यदि देवीं किल मालभारिणीयम् ॥ (२२१)

इति सुल्हणविरचितायां सुकविहृदयानन्दिन्य-
भिधायां वृत्तरत्नाकरछन्दोवृत्तौ
अर्धसमवृत्ताध्यायः चतुर्थः ॥

पञ्चमोऽध्यायः

विषमवृत्तकथनम्

२२२. मुखपादोऽष्टभिर्वर्णैः
परेऽस्मान्मकरालयैः क्रमाद्वृद्धाः ।
सततं यस्य विचित्रैः पादैः संपन्नसौन्दर्यं
तदभिहितममलधीभिः पदचतुरूर्ध्वाभिधं वृत्तम् ॥

तात्पर्यटीका

(२२२) पूर्ववत्क्रमोपदेशसिद्धानामुक्तादिषु भिन्नजातिसमुत्पन्नानां केषांचित् विषमवृत्तानां नामानि निर्देष्टुं सूत्रयन्नाह । अस्यान्वयः । अभिहितं कथितम् । किम् । तत् । तदिति किम् । वृत्तम् । कथंभूतमभिहितम् । पदचतुरूर्ध्वाभिधम् । पदचतुरूर्ध्वमित्यभिधा नाम यस्य तत्तथोक्तम् । कैरभिहितम् । अमलधीभिः, अमला धीर्बुद्धिर्येषां ते तथोक्तास्तैरिति । कथंभूतं तत् । यस्य भवति । कः । मुखपादः, प्रथमचरणः । कैर्भवति । वर्णैः । कतिभिः । अष्टभिः । ततः परं किमित्यपेक्षायामाह । भवन्ति । के । पादाः इत्यध्याहारः । कथंभूताः । ये परे इत्युत्तरे । कस्मात् । प्रथमचरणात् । कथंभूताः भवन्ति । वृद्धाः अभ्यधिकाः । कैः । वर्णैरित्यध्याहारः । कतिभिः । मकरालयैरिति चतुर्भिः । ते च कथं वृद्धाः भवन्ति । क्रमात्, पूर्वपूर्वापेक्षया उत्तरोत्तरम् । अयमर्थः । प्रथमाद् द्वितीयश्चतुर्भिर्वृद्धो, द्वितीयात् तृतीयः, तृतीयाच्चतुर्थः इत्यर्थः । पुनः कथंभूतम् । यत्, संपन्नं सौन्दर्यं यस्य तदित्थंभूतम् । कैः । पादैरिति चरणैः । कथंभूतैः । विचित्रैः । परस्परं भिन्नसंख्यत्वं वैचित्र्यमेषाम् । कथमभिहितम् । सततम् । अयमर्थः । ततनं ततं तनोतेर्भावे निष्ठा । प्रस्तार इत्यर्थः । सह तेन वर्तते सततं सप्रस्तारम् । अयमभिसन्धिः । एतल्लक्षणनियतं सर्वगुरुचरणचतुष्टयं प्रस्तार्य सर्वलघुव्यक्त्यवधिकः समुद्रो दर्शनीय इति । अथवा अस्याष्टाक्षरादीनां चरणानां स्थाने विनिमयविन्यासेत चतुर्विंशतिजात्युत्पादनप्रकारप्रदर्शनं प्रस्तारः ततमुच्यते । तेन सहितं सततमिति । ततः

चतुःषट्कोत्पत्तये चतुष्किकेयम् ।

८.१२.१६.२०	१२.१६.२०.८	१६.२०.८.१२	२०.८.१२.१६
१२.८.१६.२०	१६.१२.२०.८	२०.१६.८.१२	८.२०.१२.१६
८.१६.१२.२०	१२.२०.१६.८	१६.२०.१२.८	२०.१२.८.१६
८.१२.२०.१६	१२.१६.८.२०	२०.१६.१२.८	२०.८.१६.१२
२०.१२.१६.८	८.१६ २०.१२	१२.२०.८.१६	१२.८.१६.२०
१६.१२.८.२०	२०.१६.१२.८	२०.१२.८.१६	१२.८.२०.१६
प्रथमचतुष्कस्य	द्वितीयचतुष्कस्य	तृतीयचतुष्कस्य	चतुर्थचतुष्कस्य

सुकविहृदयानन्दिनी

(२२२) अथ विषमवृत्ताध्याय आरभ्यते— प्रथमपादोऽष्टाक्षरः । परे च द्वितीय-तृतीयचतुर्थाः, अस्मात् प्रथमपादात् मकरालयैश्चतुर्भिश्चतुर्भिरक्षरैः क्रमाद् वृद्धा वर्धिताः । क्रमादिति कोऽर्थः । द्वितीयो द्वादशाक्षरः, तृतीयः षोडशाक्षरः, चतुर्थो विंशत्य-क्षरः इति क्रमाद् वृद्धिं नीताः । सततमनवरतं इति विविधैश्चतुर्विंशतिप्रकारप्रस्तारेण विचित्रैः पादैः प्राप्तं सौन्दर्यं तद् वृत्तं आचार्यैः पदचतुरूध्वं नामोक्तम् ॥ यथा—

आकर्णमाकृष्य धनु-
र्यें त्वया निहता रणाङ्गणे शरैः ॥

रिपवः सहसा गतासवः क्षितिपते द्रुतं
पदचतुरूध्वं न चलन्ति तत्रैव निपतन्ति सशल्याः ॥

अत्र गणे पादाभावाल्लघुगुरु नेष्यते । अत्र च प्रस्तार्यमाणं चतुर्विंशतिधा भवति ॥ (२२२)

छन्दोवृत्तिः

(२२२) यदुक्तं विषमं वृत्तमितीदानीं तद्भेदानाह । यस्याद्यः पादोऽष्टभिर्वर्णैः श्रितोऽन्ये त्रयः पादाः मकरालयैश्चतुर्भिः क्रमात् प्रवृद्धाः तत्पदचतुरूध्वं नाम छन्दोऽभि-हितमुक्तम् । तच्च विचित्रैः नानात्वं प्राप्तैः । कोऽर्थः । चपलोष्ट्रचङ्क्रमणक्रमेण विविध-न्यासोपेतैः पादैः संपन्नसौन्दर्यं जातमाधुर्यं भवति । इत्थं प्रस्तारवशात् चतुर्विंशतिभेदं स्यात् । स्थापना चेयम् । तत्रादिमसप्तमत्रयोदशैकोनविंशतितमभेदोदाहरणानि । यथा—

प्राप्ते वसन्तमासेऽस्मिन्[८]
अन्तरेणौषधिं वल्लभां गेहिनीम् । [१२]
पदचतुरूर्ध्वं कथमिव पथिक यास्यसि [१६]
विषलतिकानामिवोत्फुल्लकङ्केल्लिलतानां गन्धं जिघ्रन् ॥ [२०]

जनयति महतीं प्रीतिं हृदये [१२]
कामिनां चूतमञ्जरीमिलदलिचक्रचञ्चुपरिचुम्बितकेसरा । [१६]
एतत्स्थानं निरथकं ज्ञेयम् [८]
कोमलमलयवातपरिनर्तिततरुशिखरस्थिता । [१६]

विरहविधुरवाणकान्ताकपोलावदातं [१६]
परिणतिदरपीतपाण्डुच्छविलवलीफलं निदाघे । [२०]
जयति हिमशीतलं [८]
पाण्डव स्वादु तृष्णाहरं सुन्दरम् ॥ [१२]

यदि वाञ्छसि कर्णरसायनं सततममृतधाराभि- [२०]
र्यदि हृदि वा परमानन्दरसं । [१२]
भ्रातः शृणु धरणीधरवाणीममृतमयीम् [१६]
तत्काव्यगुणभूषणम् ॥ [८]

इहाप्युत्तरवत् त्रिषु भेदेषु केचित्कालिकादीनि नामानि मन्यन्ते । अतस्तान्युदाहरणेषु दृश्यन्ते । इत्थं शेषभेदोदाहरणान्यप्युदाहार्याणि ॥ (२२२)

पञ्चिका

(२२२) अथेदानीं पदचतुरूर्ध्वादिविषमवृत्तानां लक्ष्यलक्षणान्यभिधत्ते । अमला निर्मला धीर्बुद्धिर्येषां ते अमलधियः तैर्मनीषिभिः तद्वृत्तं पदचतुरूर्ध्वाभिधमभिहितम् नाम्ना पदचतुरूर्ध्वमिति प्रोक्तम् । तदिति किम् । यस्य वृत्तस्य विचित्रैः पादैः मनोहरैश्चरणैः सततमनवरतं संपन्नसौन्दर्यं सम्पूर्णसुन्दरत्वं भवति । तेषां पादानां लक्षणमाह । मुखपादः प्रथमपादः अष्टभिर्वर्णैरुपलक्षितो भवति । अस्मात् प्रथमपादात् परे अन्ये त्रयः पादाः मकरालयैश्चतुर्भिर्वर्णैः क्रमादवृद्धाः क्रमेण वर्धन्ते स्म । अयमर्थः । प्रथमः पादः अष्टवर्णः, द्वितीयो द्वादशवर्णः, तृतीयः षोडशवर्णः, चतुर्थो विंशद्वर्णः इति ।

२२३. **प्रथममुदितवृत्ते**
विरचितविषमचरणभाजि ।
गुरुकयुगलनिधन इह कलित आङा
विधृतरुचिरपदवितितियतिरिति भवति पीडः ॥

तद्यथा—

स र ग ग
। । ऽऽ ।ऽऽऽ
अपि वेदान्तमज्ञाय

य स त म
।ऽऽ। । ऽ ऽ ऽ। ऽऽऽ
शिवब्रह्मसदित्यासामभाषन्ते ।

स भ म म य ग
।।ऽ ऽ । ।ऽ ऽऽ ऽ ऽ ऽ।ऽऽ ऽ
सुगतं यं च तथा बोधायन्ते पूरुषासङ्ख्या–

न न स भ स र ग ग
। । । । । । । ऽऽ । । । । ऽ ऽ। ऽ ऽऽ
स्तमखिलभुवननिदानं सततमभीष्टार्थदं वन्दे ॥ (२२२)

तात्पर्यटीका

(२२३) तदुभयार्थसमुच्चयोऽत्र संमत इति निदर्शयन् पदचतुरूर्ध्वसप्तोत्पन्नायाः कस्याश्चिद् व्यक्तेः पादप्रस्तारे प्रथमषट्कस्थां प्रथमव्यक्तिं स्वलक्षणेन निर्धार्य नाम्ना निर्देष्टुमाह । अस्यान्वयः । भवति स्थितिं लभते । कः । पीड इति पीडशब्दः । किं-विशिष्टः । कलित इति युक्तः । क्व । प्रथममित्यादौ । केन कलितः । आङा इत्याकारेण उपसर्गेण । एतावता वाक्येन प्रस्तुतप्रस्तारविरुद्धपदकदम्बकेन आपीड इति नाम निगदितम् । कुत्रोत्पद्यत इति चेत् । इहेति । क्व । उदितवृत्ते । उदितमित्युक्तम् । तच्च तद् वृत्तं च उदितवृत्तम् । वृत्तमिह पदचतुरूर्ध्वविशिष्टव्यक्तिः, तस्यामित्यर्थः । पुनः

किंविशिष्टे उदितवृत्ते । विरचितविषमचरणभाजि । विरचिताश्च ते विषमचरणाश्च विरचितविषमचरणाः । संख्यापेक्षमिह चरणानां वैषम्यम् । तान्भजति (इति) विरचि(तविषमचरणभाक्)-- (२२३)

सुकविहृदयानन्दिनी

(२२३) प्रथममुदितवृत्ते पदचतुरूध्वें विरचितान् विषमान् अष्टद्वादशषोडशविंशत्यक्षरान् पादान् भजतीति तस्मिन् विषमचरणभाजि इह छन्दसि आडा कलितो युक्तो पीडो भवति आपीड इत्यर्थः । क्व सति इत्याह । गुरुकयुगलनिधने, गुरुद्वयं निधने अवसाने यस्य तस्मिन्सति । कीदृशमित्याह । विधृता रुचिराणां पदानां वितत्या यतिविरामो यस्य स तथोक्तः । अन्ते गुरुद्वयोपादानात् अत्र शेषाणां लघुत्वमस्यानुज्ञातं केदारेणेति मन्यामहे । यथा--

ध्रुवमिह वनितानां
हृदि विनिहितदयितगुणानाम् ।
प्रसरति मलयमरुति विरहवतीनां
स्मरसुहृदि विजयिनि भवति नियतमसुविनाशः ॥

द्विगुरुणि छन्दसि आपीडेति । त्रयाणां गुरूणामप्रवेशात् आपीड इति नाम उक्तम् । इदमपि पूर्ववच्चतुर्विंशति प्रस्तारो भवति ॥ (२२३)

छन्दोवृत्तिः

(२२३) पूर्वमुक्ते पदचतुरूध्वें छन्दसि प्रतिपादं निधने अन्ते गुरुद्वयं, शेषाः वर्णाः सर्वे लघवः इति श्रुतिसुखपदपङ्क्तिराडा कलितः पीडः स्यात् । आपीड इत्यर्थः । यथा--

मदमुखरमयूरे
स्फुटविविधसरिदधिकपूरे ।
नवघनसमय इह कलय बत कान्तां
शरणमयि पथिकहतक झगिति जहिहि वनान्तम् ॥ (२२३)

२२४. प्रथममितरचरणसमुत्थं
श्रयति जगति लक्ष्म ।
इतरदितरजनितमपि यदि च तुर्यं
चरणयुगलकमविकृतमपरमिति कलिका सा ॥

पञ्जिका

(२२३) गुरुरेव गुरुकः तयोर्युगलम् गुरुकयुगलम् । गुरुद्वयं निधने अवसाने यस्येति व्यधिकरणबहुव्रीहिः । विषमाः परस्परासदृशाः । ते च ते चरणाश्चेति ते तथोक्ताः । विरचिता निबद्धाश्च ते विषमचरणाश्चेति पुनः कर्मधारयः । तान् भजतीति भाक् । क्विन् प्रत्ययः । तस्मिन् स्वरचितविषमचरणभाजि । प्रथममुदितवृत्ते पूर्वमुक्तपदचतुरूर्ध्वाख्ये । इह अस्मिन् गुरुकयुगलनिधने सति अयं पीडः स्यात् । किंभूतः । आङा कलितः आङशब्दसम्बद्धः । आपीडो नामेत्यर्थः । पुनः किंभूतः । विधृतरुचिरपदवितति-यतिः, विधृतरुचिरपदवितत्या यतिर्यस्य स तथोक्तः । तद्यथा—

न न ग ग
। । । । । । ऽ ऽ
तुहिनशिखरिपुत्री–
न न न य
। । । । । । । । । । ऽ ऽ
तनयमनुपमगुणगणं तम् ।
न न न न स ग
। । । । । । । । । । । । । । ऽ ऽ
ससुरसुरपतिसरसिजभवहरीड्यं
न न न न न न ग ग
। । । । । । । । । । । । । । । । । । ऽ ऽ
प्रणतजनसकलफलदमिभवदनमभिवन्दे ॥ (२२३)

तात्पर्यटीका

(२२४) (प्रथमषट्के द्वितीय)व्यक्षिप्तं स्वलक्षणेन निःकृष्याभिधानं प्रतिपिपादयिषु-राह । अस्यान्वयः । भवति । का । सा इत्यापीडव्यवितः । किं भवति । कलिका

भवति। कलिकाभिधानं प्रतिपद्यते। किं यदि स्यात्। यदि श्रयति। किमधिकरणम्। प्रथममित्याद्यचरणस्थानम्। किं कर्तृ। लक्ष्म। किंविशिष्टम्। इतरचरणसमुत्थम्। इतरश्चासौ चरणश्च इतरचरणः। सान्निध्यादितरोऽत्र द्वितीयः। इतरचरणात् समुत्तिष्ठति इति इतरचरणसमुत्थम्। किंविशिष्टम्। चतुर्थं लक्ष्म। चतुरशब्दात्साधावर्थे यः तद्धितः। कुशलो योग्यो हितश्च साधुरिति चतुराणां योग्यमित्यर्थः। अपि संभावने। पुनः किम्। यदि भवति। यदि श्रयति। किम्। इतरदिति। प्रथमप्रतियोगि द्वितीयस्थानम्। किं कर्तृ। लक्ष्म। किंविशिष्टम्। इतरजनितम्। इतरोऽत्र द्वितीयप्रतियोगी प्रथमचरणः। तेन जनितमितरजनितमिति। नन्वत्र द्वितीयप्रतियोगी तृतीयचरणः इति कस्मान्नोच्यते इति न वाच्यम्। लक्ष्यलक्षणसंयुतसूत्रस्वरूपोपदेशविरोधात्। पुनः किम्। यदि स्यात्। यदि श्रयति। किमधिकरणम्। चरणयुगलकम्। किंविशिष्टम्। अपरं द्वितीयार्धसंबन्धि। किं कर्तृ। लक्ष्म। किंविशिष्टम्। अविकृतम्। प्रकृतमापीडस्येवेत्यर्थः। ननु कर्मणोऽधिकरणत्वेन कथं टीकायामाक्षेप इति केचित्। सत्यम्। अधिकरणमेवात्र श्रयतिव्याप्यत्वेन कर्मतां प्राप्तमिति निदर्शयितुमित्यलम्। क्व कलिकाभिधानमापद्यते। जगति लोके। यावान् लोकस्तत्रेति व्याप्त्यर्थे जगतीति ग्रहणम्॥ (२२४)

सुकविहृदयानन्दिनी

(२२४) तेभ्यश्चतुर्विंशतिभ्यस्त्रीनाकृष्य नामान्यभिधातुमाह। आपीडस्य प्रथमं इतरचरणसमुत्थं द्वितीयं पादं द्वादशाक्षरोपलक्षितं लक्ष्म भजति श्रयति। कोऽर्थः। प्रथमपादो द्वादशाक्षरः। द्वितीयोऽष्टाक्षरः। अपरमपि चरणयुगलमविकृतमप्राप्तान्यथाभावमित्येवंलक्षणा कलिका नाम। मञ्जरीति वक्तव्ये छन्दोभङ्गभयात् कलिकेत्युक्तम्। एकार्थत्वान्न दोषः। यथा--

अधमजनसुहृदि कलिकाले
सुजनकृतविरोधे।
सकलकलुषमुषि सपदि विधुवनायाः
तदनु विमनमनसि मुदमिह जनयति निवासः॥ (२२४)

छन्दोवृत्तिः

(२२४) यदि आपीडस्य प्रथमद्वितीयपादयोः परस्परं विपर्ययो भवति, अपरं चरणद्वयं यथावस्थितं तदा कलिका इति नाम इति समासार्थः। उदाहरणं सूत्रमेव। इयं मञ्जरीति केचित्॥ (२२४)

२२५. द्विगुरुयुतसकलचरणान्ता
मुखचरणातमनुभवति च तृतीयः ।
चरण इह च लक्ष्म
प्रकृतमपरमखिलमपि यदि भवति लवली सा ॥

पञ्जिका

(२२४) इतरच्च तत् चरणं चेति इतरचरणम् । तस्मात् समुत्थं सम्यगुत्थानं यस्य तत् त्रयोक्तम् । जगति लोके प्रथमं प्रथमचरणं (कर्ता) इतरचरणसमुत्थं, द्वितीयचरणसमुद्भूतं लक्ष्म लक्षणं यदि श्रयति भजति । इतरच्चतुर्थमपि अन्यद्द्वितीयचरणमपि इतरजनितं प्रथमचरणजातं लक्षणं यदि श्रयति । अपरं चरणयुगलकम् अन्यत् तृतीयचतुर्थपादद्वयम् अविकृतम् नान्यविकृतम् स्वस्वरूपस्थितं यदि स्यात् । इत्येवं सति सा कलिका नाम भवति । अस्यां कलिकायां प्रथमपादो द्वादशाक्षरः । द्वितीयस्त्वष्टाक्षरः । अन्यद्द्वयं पूर्ववत् । तद्यथा—

न न न म
। । । । । । । । । । ऽ ऽ
सुचिरनिहितहितमतिकन्दा–

न न ग ग
। । । । । । ऽ ऽ
ङ्कुर इव तव भाति ।

न न न न स ग
। । । । । । । । । । । । ऽ ऽ
विषमजनदमनघटितविकटमूर्ते–

न न न न न न ग ग
। । । । । । । । । । । । । । । । ऽ ऽ
स्त्रिपुरहरमकुटमणिसदृशदशनकलिकेयम् ॥ (२२४)

बात्पर्यटीका

(२२५) अथ तत्रैव द्वितीयषट्के चतुर्थव्यक्तिं स्वलक्षणेन निष्कृष्य नाम्ना निर्देष्टुमाह ।

भवति । का । सा । सेति का । आपीडव्यक्तिः । किंविशिष्टा भवति । लवली इति लवलीसंज्ञा । क्व । इह पदचतुरूर्ध्वजातौ । किंविशिष्टा या । अस्याः अनुभवति । कः । चरणः । किंविशिष्टः । तृतीयः । किमनुभवति । लक्ष्म । किंविशिष्टं लक्ष्म । मुखचरणरचितम् । आपीडस्य प्रथमचरणेन रचितम् । पुनः किंविशिष्टा । या द्विगुरुयुतसकलचरणान्ता । द्वाभ्यां गुरुभ्यां युता द्विगुरुयुता । सकलाश्च ते चरणाश्च सकलचरणाः । तेषामन्ताः सकलचरणान्ताः । द्विगुरुयुताः सकलचरणान्ताः यस्याः सा द्विगुरुयुतसकलचरणान्ता । पुनः किंविशिष्टा । यस्याः यदि भवति । किम् । अपरमिति शेषस्य पादत्रयस्य लक्ष्म । किंविशिष्टम् । अखिलम् अखण्डितम् । तस्य कीदृशं लक्ष्मेति चेत् । इति ईदृशमिति । यथात्र तिष्ठति तथेत्यर्थः ॥ (२२५)

सुकविहृदयानन्दिनी

(२२५) यस्यास्तृतीयः पादः प्रथमचरणरचितं लक्षणमनुभवति। द्वाभ्यां गुरुभ्यां युताः सकलचरणानामन्ताः यस्या सा तथोक्ता लवली नाम । अपरं लवल्याः सर्वमपि प्राक्तनं प्रकृतं पूर्ववदिति भवति । यथा—

गगनतलममलमलमेतद्
सपदि शशभृदयमनलव्यतिकरौघैः ।
जनयति च लवल्या—
श्चलमिति सरसं तु वियद्भुवि परिणतिषरिपीडाः ॥ (२२५)

छन्दोवृत्तिः

(२२५) यदा आपीडस्य प्रथमः पादस्तृतीयस्य स्थाने भवति अन्यत्सर्वं यथावस्थितमेव । अयं भावः । प्रथमपादो द्वादशाक्षरः, द्वितीयः षोडशाक्षरः, तृतीयोऽष्टाक्षरः, चतुर्थो विंशत्यक्षर इति तदिदं लवल्या लक्ष्म । तदा लवलीतिसंज्ञं छन्दो भवतीत्यर्थः । उदाहरणं सूत्रमेव ॥ (२२५)

पञ्जिका

(२२५) इह तृतीयश्चरणः मुखचरणगतम् आदिपादस्थं लक्ष्म लक्षणं यदि अनुभवति भजति । अपरं प्रकृतं प्रस्तुतं पूर्वोक्तं अखिलमपि लक्ष्म सकलमपि लक्षणं इह पादत्रये यदि भवति । तदा सा लवली नाम स्यात् । कीदृशी । द्विगुरुयुतसकलचरणान्ता ।

२२६. **प्रथममधिवसति यदि तुर्यं**
चरमचरणपदमवसितिगुरुयुग्मा ।
निखिलमपरमुपरितनसममिह ललितपादा
त्रितयममृतधारा ॥

इति पदचतुरूर्ध्वप्रकरणम् ।

चरणानामन्तः चरणान्तः । द्विगुरयुतः गुरुद्वयसहितः । सकलचरणान्तः समस्तपादान्तो यस्याः सा तथोक्ता । अत्र तु प्रथमः पादो द्वादशाक्षरः, द्वितीयः षोडशाक्षरः, तृतीयोऽष्टाक्षरः, चतुर्थः पूर्ववद्द्विशत्यक्षर इति । तद्यथा—

न न न य
।।।।।।।।।ऽऽ
प्रसरदुरुदहनघनघोरा

न न न न स ग
।।।।।।।।।।।।।ऽऽ
च्छटमिव गगनतलमिव च विदधाना ।

न न ग ग
।।।।।।ऽऽ
प्रसभमभिमुखं ते

न न न न न न ग ग
।।।।।।।।।।।।।।।।ऽऽ
प्रशमयति शमनमविनयनवलननवलीला ॥ (२२५)

तात्पर्यटीका

(२२६) अथ तत्रैवोत्पन्नां प्रथमव्यक्तिं स्वलक्षणेन निःकृष्य नाम्ना निर्देष्टुमाह—

अस्यान्वयः । पूर्वस्मादिह सेत्यनुषज्यते । भवति । का । सा इति आपीडव्यक्तिः । किं भवति । अमृतधारा भवति इति अमृतधाराख्यां लभते । यदि किं स्यात् । यद्यधिवसति । किं तत् । इह लक्ष्मेत्यनुषज्यते । किंविशिष्टं लक्ष्म । तुर्य चतुर्णा पूरणमित्यर्थः । पूरणेऽर्थे चतुरे यदीयौ चलोपश्च । पुनः किंविशिष्टम् । प्रथममिति । प्रथमचरणस्थं तस्य लक्ष्म । कथं चतुर्थमिति चेत् तदुच्यते । आपीडस्थानां द्वितीयादीनां चरणानां प्रोक्ताः वर्णसमाश्रिताः परस्परसंकीर्णाः तिस्रः संख्याः त्रीणि लक्षणानि, प्रथमचरणस्था तु संख्या चतुर्थीति तस्याः तुर्यत्वम् । किमधिकरणमधिवसति चरमचरणपदम् । चरमोऽन्तिमः स चासौ चरणश्च चरमचरणः तस्य पदं स्थानं चरमचरणपदम् । यदि पुनः किं स्यात् । यद्यपरं त्रितयमिति शेषचरणत्रयमुपरितनं स्यात । उपरितनः आपीडः । तेन सममुपरितनसमम् । किंविशिष्टम् । निखिलमिति समग्रम् । किंविशिष्टा अमृतधारा भवति । अवसितिरवसानं पर्यन्तः तत्र गुरुयुग्मम् यस्याः सा अवसितिगुरुयुग्मा । पुनः किंविशिष्टा । ललितपादा । ललिताः विलसिताः पादाः यस्याः सा ललितपादा । क्व भवति । इहेति पदचतुरूर्ध्वजातौ । इति पदचतुरूर्ध्वप्रकरणम् ॥ (२२६)

सुकविहृदयानन्दिनी

(२२६) प्रथमं पादं चरमचरणपादं पश्चात्पादस्थानं यद्यधिवसति । अपरमप्यन्यत् सर्वमुपरितनं पूर्ववत् । अन्ते गुरुद्वययुक्ता सुललितपदपङ्क्तिरमृतधारा नाम । यथा--

शशधरमुखि सखि परिरम्भम्
तव मम वपुषि मलयजरसनिषेकः ।
श्रवणपुटसुखकृदतिचतुरमतिहृद्यं
वचनममृतधारा ॥

पिङ्गलनागस्तु पदचतुरूर्ध्वादिषु प्रथमपादविपर्यासे सति मञ्जरीया (r. मञ्जर्या) दिनामानि वीक्ष्यति । इति पदचतुरूर्ध्वप्रकरणम् ॥ (२२६)

छन्दोवृत्तिः

(२२६) अत्रापीडस्य प्रथमः पादश्चतुर्थस्य स्थाने भवति । अपरं सर्वं पूर्ववत् । तदा मधुरपादा सती अमृतधारानाम छन्दः । उदाहरणं सूत्रमेव । केचिदन्ये भेदद्वयेऽपि लक्षण्यमृताधारे प्राहुः । यथा--

त्वयि जलधिमनुचलति नृप गुरुवासः [१६]
समजनि निखिलदिगबलानां [१२]।
सुरभिबहुरजोभिस्तरलतुरगनिकरखुरमृ- [२०]
दितमृदुलवलीना [८] ॥
प्रणयवति सखिसमुपहसितमनसिशयरूपे [२०]
प्रणयमनुसरदक इव मानः। [१२]
स्रवति वचनमपि मधुरमिह यदस्य [१६]
सततममृतधाराम् ॥ [८] (२२६)

पञ्चिका

(२२६) इह अस्मिन् वृत्ते तृतीयं तुर्यं तृतीयं चरणम् (कर्ता) चरमचरणपदम् यद्यधिवसति अन्तिमपादस्थाने यदि तिष्ठति। अत्राधारेऽपि व्याप्यविवक्षायां कर्मणि द्वितीया। पदशब्दो स्थानवचनः। उक्तंच 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घिवस्तुषु' इति। इह अस्मिन् अपरं निखिलं त्रितयम्, अन्यत् पादत्रयम्, उपरितनसमम्, प्राक्तनसदृशम्। पदचतुरूर्ध्वतुल्यं यदि भवति। तदा अमृतधारा नाम स्यात्। एषा किंविशिष्टा। अवसितिगुरुयुग्मा अवसाने गुरुद्वयं यस्याः सा तथोक्ता। पुनः किंभूता। ललितपादा, ललिता मधुरा मनोज्ञाः पादाश्चरणा यस्याः सा तयोक्ता। अत्र प्रथमपादो द्वादशाक्षरः, द्वितीयः षोडशाक्षरः, तृतीयो विंशत्यक्षरः, चतुर्थस्त्वष्टाक्षर इति। तद्यथा—

न न न य
।।।।।।।।।।ऽऽ
मृदुजनमनुपुनरियमेव

न न न न स ग
।।। ।।।।।। ।।।।।ऽऽ
व्युपशमितसकलुषविषततिविशेषा।

न न न न न न ग ग
।।।।।।।।।।।।।।।।।।ऽऽ
प्रतिमुहुरभिनवविमलसुखनिधिमुपनयन्ती

न न ग ग
।।।।।।ऽऽ
नियतममृतधारा ॥ (२२६)

इति पदचतुरूर्ध्वप्रकरणम्।

२२७. **सजमादिमे सलघुकौ च**
नसजगुरुकेऽब्धयोद्गता ।
त्र्यङ्घ्रिगतभनजला गयुताः
सजसा जगौ चरम एकतः पठेत् ॥

तात्पर्यदीका

(२२७) अथ पञ्चक्त्याश्चरणद्वयं, त्रिष्टुभः एक, अतिजगत्याश्चतुर्थश्चरणः इत्थभूतं विषमवृत्तं पूर्वलक्षणप्रसिद्धं नामनिर्देशाय प्रतिचरणगणपरिपाट्या अनुवदन्नाह—

सश्च जश्च सजमिति समाहारः । तृतीयोऽङ्घ्रिः त्र्यङ्घ्रिरिति । वृत्तौ तीयप्रत्ययलोपः । एकस्मिन् एकतः इत्याद्यादित्वात् सप्तम्यर्थे तसः । देवदत्तोऽद्य ग्रामं गच्छेदितिवत् पठेदित्यत्र संभावने लिङ । तदेवं वाक्यार्थः । एवंविधेन लक्षणेन उद्गताभिधानं विषमवृत्तं पठ्यते इति संभावयेदित्यर्थः । शेषं सुगमम् ॥ (२२७)

सुकविहृदयानन्दिनी

(२२७) प्रथमपादे सगणजगणसगणा लघुश्च । तथा द्वितीयपादे नगणसगणजगणगुरवो भवन्ति । त्रिसंख्योपलक्षितोऽङ्घ्रिः त्र्यङ्घ्रिस्तृतीयःपादः तस्मिन् गता भगणनगणजगणलघवः गुरुयुताः । चतुर्थे चरणे सगणजगणसगणा जगणो गुरुश्च यत्र सा उद्गता नाम । एकतः इति प्रथमं पादं द्वितीयेन सह विलम्बितं भवेदित्यर्थः । यथा—

जितमत्सराः सुकृतिनोऽथ
परिहृतकलङ्कबान्धवाः ।
वीक्ष्य सपदि युवतिं विकृतिं
नियतं प्रयाति विपुलोद्गता तनुः ॥ (२२७)

छन्दोवृत्तिः

(२२७) यस्य आदिमे पादे सजसला, अथ द्वितीये नसजगा, तृतीये भनजलगाः, चतुर्थे भजसजगाः उद्गता नाम । उदाहरणं सूत्रमेव ॥ (२२७)

पञ्चिका

(२२७) अधुनोद्गतादीनां लक्ष्यलक्षणानि व्याहरति। सश्च जश्च सजमिति समाहारे नपुंसकम्। लघुरेव लघुकः। सश्च लघुकश्च सलघुकौ। आदौ भवः आदिमः। आदिमे आद्ये पादे सगणजगणसगणलघवश्च यदि। नश्च सश्च जश्च गुरुकश्च नसजगुरुकाः। अथ द्वितीये पादे नगणसगणजगणगुरुकेषु सत्सु। भश्च नश्च जश्च लश्च भनजलाः। त्रिभिः संख्यातोऽङ्घ्रिः व्यङ्घ्रिः व्यङ्घ्रीणां गताः व्यङ्घ्रिगताः। ते च ते भनजलाश्च इति कर्मधारयः। किंभूताः। गयुताः गुरुसहिताः। तृतीयपादे भगणनगणजगणाः लघुगुरू च यदि। सश्च जश्च सश्च सजसाः जश्च गश्च जगौ। इह जगणाद्व्यतिरिक्तः चतुर्थः पादो नामान्यो नास्तीति अभेदोपचारात् "सजसा जगौ चरम एकत" इत्युक्तम्। एतदुक्तं भवति। चरमे पश्चिमे चरणे सगणजगणसगणनगणाः गुरुश्च चेत्। तदा उद्गता नाम स्यात्। एकतः पठेदिति अर्धद्वयमप्येकीकृत्य एकत उच्चारयेत्। द्वितीयपादस्तृतोयपादश्च सन्धिसमासवशादेकीभवतीत्यर्थः। उक्तं च जयदेवेन--तरसोदिता सजसलेष्वित्यादि (५.२१)। तत्र च तरसोदितेति वेगेनोच्चरिता। अर्धद्वयमेकीकृत्य पठितेत्यर्थः। तद्यथा--

स ज स ल
।।ऽ ।ऽ ।।।ऽ ।
तडितोज्ज्वलं जलदराशि–

न स ज ग
। ।।।।ऽ ऽ। ऽ
मनिशमुदहारबन्धुरम्।

भ न ज लग
ऽ।।।।।।ऽ।।ऽ
घोरघनरसितमीशतनुः

स ज स ज ग
।।ऽ ।ऽ। ।।ऽ।ऽ ।ऽ
कृपया कयापि वहतीयमुद्गता॥ (२२७)

२२८. चरणत्रयं भजति लक्ष्म
यदि निखिलमुद्गतागतम् ।
नौ भगौ भवति सौरभकं
चरणे यदीह भवतस्तृतीयके ॥

सुकविहृदयानन्दिनी

(२२८) यद्युद्गतायास्तृतीये पादे रगणनगणभगणगुरवो भवन्ति तदा सौरभकं नाम वृत्तं भवेत् । यथा—

मलयानिलः प्रियवियुक्तः
युवतिजनता वियत्यतः ।
मन्दमन्दमयमेति मधौ
घनसारसौरभक उद्गमन्निव ॥ (२२८)

छन्दोवृत्तिः

(२२८) चरणत्रयं प्रथयद्वितीयचतुर्थरूपं यद्युद्गतागतं लक्षणमाश्रयति । तथा तृतीये पादे रनभगाः स्युः तदा सौरभकम् । उदाहरणं सूत्रमेव ॥ (२२८)

पञ्चिका

(२२८) चरणत्रयं प्रथमद्वितीयचतुर्थास्त्रयः पादा उद्गतागतम् उद्गतावृत्तस्थितम् निखिलं लक्ष्म सकलं लक्षणं यदि भजन्ति । र् च नश्च नौ, भश्च गश्च भगौ । इह अस्मिन् चरणे तृतीयके तृतीये पादे, रगणनगणौ भगणगुरू च यदि भवतः तदा सौरभकं नाम भवति । तद्यथा—

स ज स ल
। । ऽ। ऽ। । । ऽ ।
अत एव दुष्करतराणि

२२९. **नयुगं सकारयुगलं च**
भजति चरणं तृतीयकम् ।
तदुदितगुरुमतिभिर्ललितं
यदि शेषमस्य खलु पूर्वतुल्यकम् ॥

॥ इत्युद्गताप्रकरणम् ॥

न स ज ग
। । । । ऽ । ऽ । ऽ
विलसितशतानि तन्वतः ।

र न भ ग
ऽ । ऽ । । । ऽ । । ऽ
ह्लादयत्यखिललोकमिदं

स ज स ज ग
। । ऽ । ऽ । । । ऽ । ऽ । ऽ
पटुकीर्तिसौरभकमद्भुतं विभोः ॥ (२२८)

सुकविहृदयानन्दिनी

(२२९) यद्युद्गतायास्तृतीयचरणे द्वौ नगणौ द्वौ सगणौ च भवतः तदा ललितं नाम । शेषमुद्गतावत् । यथा—

ललिताङ्गरागरमणीय–
मभिनवललितमांसलम् ।
इयमभिनयति मुदा प्रमत्ता
पुरतो वयस्य तव लास्यमुन्नतम् ॥
इति उद्गताप्रकरणम् ॥ (२२९)

छन्दोवृत्तिः

(२२९) यदि तृतीये पादे नगणद्वयं सगणद्वयं च शेषं पूर्ववत् तदा ललितं नाम । उदाहरणं सूत्रमेव । उद्गताप्रकरणं त्रिभिः ॥ (२२९)

२३० म्सौ ज्भौ गौ प्रथमाङ्घ्रिरेकतः पृथगन्यत्
त्रितयं सनजरगास्तथा ननौ सः ।
त्रिनपरिकलितजयौ
प्रचुपितमिदमुदितमुपस्थितपूर्वम् ॥

वज्रचिक्रा

(२२९) नयोर्युगम् नयुगम् । सकारयोर्युगलम् सकारयुगलम् । अस्य वृत्तस्य तृतीयकं चरणं तृतीयोऽङ्घ्रिः नगणद्वयं सगणद्वयं च यदि भजति । अस्य वृत्तस्य शेषम् अन्यत् प्रथमद्वितीयचतुर्थपादत्रयम् खलु निश्चयेन यदि पूर्वतुल्यकम् उद्गतासमं स्यात् । तत् तदा उरुमतिभिः महाबुद्धिभिः कोविदैः ललितमुदितं ललितमिति नाम्ना गदितम् । **तद्यथा--**

स　ज　स　ग
।।ऽ।ऽ।।।ऽऽ
भ्रुकुटीकटाक्षदशनेषु

न　स　ज　ग
।।।　।।ऽ।　ऽ।ऽ
किमपि विकृतानि बिभ्रतः ।

न　न　स　स
।।।।।।　।।ऽ।.।ऽ
दमयति तव भुवनानि विभो

स　ज　स　ज　ग
।।ऽ।　ऽ　।　।।ऽ।ऽ।ऽ
ललितं च किं न विकटं यदीदृशम् ॥　　(२२९)

॥ इत्युद्गताप्रकरणम् ॥

सुकविहृदयानन्दिनी

(२३०) यस्य प्रथमे पादे मगणसगणजगणभगणाः द्वौ गुरू एकतः । पृथक् अन्यत्त्रितयं पादत्रयं कथितमित्यर्थः । द्वितीये पादे सगणनगणजगणरगणा गुरुश्च । तथा तृतीये द्वौ

नगणौ सगणश्च । चतुर्थे नगणत्रयं जगणयगणौ च । तद्वृत्तमुपस्थितपूर्वं प्रचुपितम् । उपस्थितप्रचुपितमित्यर्थः । यथा--

आरुह्यान्यभृतप्रियालसत्सहकारं
प्रकटीकृतनवमञ्जरी सगर्वा ।
निजकलरवनिनदैः
कटयति रतिपतिमहोत्सवमालि ॥ (२३०)

छन्दोवृत्तिः

(२२०) प्रथमे पादे मसजभगगाः, द्वितीये सनजरगाः, तृतीये ननसाः, चतुर्थे नगणत्रयं जयौ च यत्र भवन्ति तत् उपस्थितपूर्वं प्रचुपितं नाम इत्यर्थः । उदाहरणं सूत्रमेव ॥ (२३०)

पञ्जिका

(२३०) सम्प्रत्युपस्थितप्रचुपितप्रभृतीनां लक्ष्यलक्षणानि ब्रवीति । म् च सश्च म्सौ, ज् च भश्च ज्भौ, गश्च गश्च गावित्येकशेषः । मगणसगणजगणा भगण गुरुद्वयं च । प्रथमाङ्घ्रिः प्रथमपादः एकतः एकत्र पृथग् भवति । अन्यत्त्रितयम् इतरपादत्रयम् अपरं पृथग् भवति । अमीषां त्रयाणां पादानां लक्षणमाह सनजरगा इति । सश्च नश्च जश्च रश्च गश्च सनजरगाः । सगणनगणजगणरगणा गुरुरेकश्च । तथा तेन प्रकारेण । नश्च नश्च ननौ नगणद्वयं सः सगणश्च । तृतीयपादः । त्रयश्च ते नाश्चेति त्रिनाः तैः परिकलितौ सहितौ जयौ जगणयगणौ । नगणत्रयं जगणयगणौ च । चतुर्थः पादः । इदं वृत्तं प्रचुपितम् । किंभूतम् । उपस्थितपूर्वम् उपस्थितशब्दः पूर्वो यस्मिंस्तत्तथोक्तम् । उपस्थितप्रचुपितं नाम भवतीत्यर्थः । अस्मिन् वृत्ते प्रथमः पादः यतिवशाद् पृथग्वक्तव्यः । अपरे च त्रयः पादाः एकीकृत्य तथा भिन्नाः वाच्याः । जयदेवोऽप्याह--"म्सौ ज्भौ यौ च तुरीयमेकतः पृथगन्यत् त्रितयं सनजरगेषु नौ सयुक्ताविति (५.२६) । तद्यथा--

म स ज भ ग ग
ऽ ऽ ऽ । । ऽ । ऽ । ऽ । । ऽ ऽ
प्राग्भारातिशयेऽपि तादृशेऽद्भुतभीमे

२३१. नौ पादेऽथ तृतीयके सनौ नसयुक्तौ
प्रथमाङ्घ्रिकृतयतिः प्रवर्धमानम् ।
त्रितयमपरमपि पूर्वसदृशमिह भवति
प्रततमतिभिरिति गदितं खलु वृत्तम् ॥

स न ज र ग
।ऽ। ऽ।।।।ऽ।ऽ।ऽ ऽ
भुवनाहितहृतये समं समन्तात् ।

न न स
।।।।।।।।ऽ
मरुदनतिशयरसः

न न न ज य
।।।।।।।।।।ऽ।ऽ।ऽ ऽ
प्रचुपितमपि तव न नमेति सलीलम् ॥ (२३०)

सुकविहृदयानन्दिनी

(२३१) तदेव उपस्थितप्रचुपितम्। तृतीये पादे द्वौ नगणौ सगणनगणौ नगणसगणौ च भवतः। प्रथमस्य अङ्घ्रिः प्रथमाङ्घ्रिः। प्रथमाङ्घ्रिवत् कृता यतिर्यस्य क्रियाविशेषणस्य तत्प्रथमाङ्घ्रिकृतयतिः यथा भवति। एवमपरं पादत्रयं पूर्वसदृशमिह तन्त्रे तद्वृत्तमार्यैः प्रवर्धमानं नामोक्तम्। यथा--

पादेन स्वयमुन्नतस्तनीभिरशोकः
प्रमदाभिरभिहतः प्रवर्धमानः।
विकसति कुसुमसमृद्धमनुभवति बकुल-
तरुरपि वरयुवतिमुखासवसिक्तः ॥ (२३१)

२३२. अस्मिन्नेव तृतीयपादके तजराः स्युः
प्रथमे च विरतिरार्षभं ब्रुवन्ति ।
तच्छुद्धविराट्पुरःस्थितं
त्रितयमपरमपि पूर्वसमं स्यात् ॥

छन्दोवृत्तिः

(२३१) यदि तृतीये पादे द्वौ नौ सगणः द्वौ नगणौ सगणश्चेद्भवति, अपरं पादत्रयं पूर्वसदृशं उपस्थितप्रचुपितसमं, तत् वृत्तं वर्धमानं नाम । उदाहरणं सूत्रमेव ॥ (२३१)

पञ्जिका

(२३१) नश्च नश्च नौ, सश्च नश्च सनौ । किंभूतौ । नसयुक्तौ । नश्च सश्च नसौ ताभ्यां युक्तौ सहितौ । अथ अनन्तरम् । तृतीयके पादे नगणद्वयं सगणनगणौ नगण-सगणौ च स्याताम् । इह अस्मिन् वृत्ते खलु निश्चयेन त्रितयमपरमपि अन्यपादत्रयमपि पूर्वसदृशं उपस्थितप्रचुपिततुल्यं भवति । इत्येवं यथोक्तलक्षणे सति प्रततमतिभिः प्रतता विस्तृता मतिर्बुद्धिर्येषां ते प्रततमतयः । तैः सुधीभिः प्रवर्धमानं नाम वृत्तं गदितं कीर्तितम् । इदं किंविशिष्टम् । प्रथमाऽध्यिकृतयतिः पूर्ववत् प्रथमपादे कृता यतिर्यस्य तथोक्तम् । तद्यथा—

म स ज भ ग ग
ऽ ऽ ऽ । । ऽ । ऽ । ऽ । । ऽ ऽ
आराध्येति भवन्तमाश्रयैकसमृद्ध्या
स न ज र ग
। । ऽ । । । । ऽ । ऽ । ऽ ऽ
कुशलं यदमलमस्ति वर्धमानम् ।
न न स न न स
। । । । । । । ऽ । । । । । । । ऽ
तत इदमखिलमुदञ्चतु भवनमुपरुद–
न न न ज य
। । । । । । । । । ऽ । । ऽ ऽ
न्त्वदभिमतमतिविविधवृत्तिविशेषः ॥ (२३१)

सुकविहृदयानन्दिनी

(२३२) यस्मिन्नेव उपस्थितप्रचुपिते वृत्ते तृतीये पादे तगणजगणरगणाः भवेयुः, अपरं

पादत्रयमपि पूर्वसमं भवति, तदा शुद्धविराट्पुरःस्थितमार्षभं वदन्ति। शुद्धविराडार्षभमित्यर्थः। यथा—

बिभ्राणा वदनं शशाङ्कबिम्बसमानं
कमलायतनयना कृशाङ्गशोभा।
पीनोच्चपयोधरद्वया
जनयति मुदमधिकतरां वनितेयम् ॥

॥ इत्युपस्थितप्रचुपितप्रकरणम् ॥ (२३२)

छन्दोवृत्तिः

(२३२) यदि तृतीये पादे तजराः शेषं पूर्ववत्, तदा शुद्धविराट्पुरःस्थितमार्षभम्। शुद्धविराडार्षभं नामेत्यर्थः। उदाहरणं सूत्रमेव। इति उपस्थितप्रचुपितप्रकरणं त्रिभिः॥ (२३२)

पञ्जिका

(२३२) तश्च जश्च रश्च तजराः। तृतीयपादके तगणजगणरगणाः यदि स्युः। त्रितयमपरमपि इतरपादत्रयमपि पूर्वसमम् उपस्थितप्रचुपितसदृशं यदि स्यात् तत् तदा आर्षभं ब्रुवन्ति। अदः कीदृशम्। शुद्धविराट्पुरःस्थितम् शुद्धविराडिति शब्दस्याग्रे स्थितम्। शुद्धविराडार्षभं नाम वदन्तीत्यर्थः। अस्मिन्नेव तृतीयचरण एव प्रथमे च आद्याक्षरे तकारे च विरतिर्यतिश्च भवति। यथा—

म स ज भ ग म
ऽ ऽऽ । । ऽ । ऽ । । ऽ ऽ
किं भूयोऽपि भवन् भवन्तमाश्रयमाप्तः

स न ज र ग
। । ऽ । । । । ऽ । ऽ । ऽ ऽ
स्थितिभारमतुलमार्षभं दधानम्।

२३३. **विषमाक्षरपादत्वात्**
पादैरसमञ्जसं धर्मवत् ।
यच्छन्दो नोक्तमत्र
गाथेति तत्सूरिभिः प्रोक्तम् ॥

त ज र
ऽ ऽ । । ऽ । ऽ । ऽ
तच्छुद्धविराड्विशेषभं

न न न ज य
। । । । । । । । ऽ । । ऽ ऽ
ह्यपरविषमशिरसि पदं विनिधत्ते ॥ (२३२)

इत्युपस्थितप्रचुपितप्रकरणम् ॥

तात्पर्यटीका

(२३३) तत् सूरिभिः छन्दःपण्डितैः पिङ्गलनागजयदेवाद्यैः । किंविशिष्टं तत् । दशधर्मवत् । दश धर्मा मादयो गणाः विद्यन्ते यस्मिंस्तद्दशधर्मवत् । भूम्नि वतुः । बहुलं मादिभिर्दशभिर्गणैः व्याप्तमित्यर्थः । पुनः किंविशिष्टम् । असमम् असहितम् । कैः । पादैः । किं तद्भवति । यस्य शास्त्रान्तरे चूर्णिकम्, उत्कलिका, वृत्तगन्धि वा त्रिविधं गद्यमिति प्रसिद्धिः । अथवा पादैरसममिति । इति पूर्वेण लक्षणग्रन्थेन मात्रावृत्तानां वर्णवृत्तानां स्वलक्षणेन पादाः व्याख्याताः । ये पादा व्याख्याताः तैरसहितं यत् । तत्किं भवति इति चेन्मालावृत्तमित्यर्थः । मालावृत्तस्य किं लक्षणं भवतीत्यपेक्षायां कैश्चिदुक्तमिह तत्प्रदर्श्यते । यथा—

षट्त्रिंशदक्षरादूर्ध्वमेकैकाक्षरवर्धितैः ।
षष्टिं यावत् पृथक्पादैर्मालावृत्तमदण्डकम् ॥

तैरेवोक्तम् अभिधानविशेषप्रतिपादनपरं सलक्ष्यलक्षणमिदमस्योदाहरणम् ।
मालावृत्तं जलधिमुनियति मभगुहकनसतनुविकसितकुसुमम् ॥

इदं त्रिविधमपि वृत्तरत्नाकरमते गाथेत्युच्यते । अथवा पादैरसममिति प्राकृतादिषु भाषासु पञ्चपादं सप्तपादं नवपादं वा यत् किंचिदुच्यते मात्रावृत्तं तदस्य मते गाथेत्युच्यते ।

पुनः किंविशिष्टम् । विषमाक्षरपादमिति । विषमाणि विसदृशानि मात्रावृत्तारम्भकाणि वर्णवृत्तारम्भकाणि अक्षराणि गणा येषु ते विषमाक्षराः । विषमाक्षराः पादाः यस्य तत् विषमाक्षरपादम् । यथाह कश्चिदार्यामधिकृत्य--

रगणोऽथ तृतीयांशको गणविन्यासेन दृश्यते यस्याः ।
ललितेति सा प्रकीर्तिता श्रुतिसुखदा च भुवि विबुधजनैः ॥

तथा गीतिमधिकृत्य--

स्याद्गीतिका रिपुच्छन्दः सप्तमको यदा र एव नान्यः ।
इति सैतवादिमुनिभिर्निगद्यते छन्दसि निपुणैर्नितान्तम् ॥

इत्यादि । अथवा विषमाक्षरपादमिति विषमाणि परस्परविसदृशसंख्यानि अक्षराणि वर्णा येषु ते विषमाक्षराः । विषमाक्षराः पादाः यस्य तद्विषमाक्षरपादम् । किं तदिति चेदुच्यते । विषमवृत्तमिव चतुश्चरणं भिन्नजातिसमुत्पन्नं यद्वृत्तं तद् गाथेति । एवं च सति पदचतुरूर्ध्वोद्गतादिष्वतिप्रसङ्गः स्यादिति चेन्न । यच्छन्दो नोक्तमत्रेति विशेषणात् । अस्य च पक्षस्य लक्ष्यलक्षणसंयुतं विषमाक्षरपादमित्यत्र द्वौ व्याख्यापक्षौ । . . . .

॥ इति पञ्चमः विषमवृत्ताध्यायः ॥

सुकविहृदयानन्दिनी

(२३३) विषमाण्यक्षराणि विद्यन्ते येषु ते पादाः तस्मिन् विषमाक्षरपादं, यदेवमेव अष्टौ दश सप्त नवाक्षरं वा, सर्वपादैरसमं त्रिपादं षट्पादं वा दशधर्मवत् । यथा--

दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान् ।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश ॥

इतीयं षट्पदी गाथा । इत्येवमादि यस्मिन् छन्दसि अर्थेनोक्तं प्रयोगेषु दृश्यते तद् गाथेति विद्वद्भिरुक्तम् । मङ्गलगीतगलितकवेल्लितकद्विपदीध्रुवकचञ्चरीपद्धतिकाद्विपथकप्रभृति सर्वमपि गाथासंज्ञमवगन्तव्यम् । छन्दसामानन्त्यात् प्रतिपदमभिधातुमशक्यं तत्र सर्वसंग्राहणीया एका संज्ञा कृतेति ।

गुणवति भवति विषिणमति कोऽपि जनः सुविवेकः
सरसिजपरिमलरसरसिको मधुकर एव वने कः ।

कलयति हंसविलासगतिं स बकः कोऽसि वराकः
नीरक्षीरविवेकविधावस्य कुतः परिपाकः ॥

इति सुल्हणविरचितायां सुकविहृदयानन्दिन्यभिधानायां वृत्तरत्नाकरछन्दोवृत्तौ विषमवृत्ताध्यायः पञ्चमः ॥ (२३३)

छन्दोवृत्तिः

(२३३) विषमाणि अक्षराणि येषु ते पादा यस्मिन् तद्विषमाक्षरपादं यथा सूत्रस्यैव छन्दोऽष्टदशसप्तनवाक्षरपादम । तथा पादैरसमं विसदृशं त्रिपञ्चषडादिपादम् । एतत् स्वयमेवोपदर्शयन्नाह । दशधर्मवत् यथा--

दश धर्मं न जानन्ति धृतराष्ट्र निबोधिता
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश ॥

अत्र त्रिभिः षड्भिर्वा पादैः श्लोकः । इत्येवमादि । अपरं च यदत्र शास्त्रे नोक्तं तत्सर्वं गाथेति पण्डितैः प्रोक्तम् । ज्ञातव्यमिति यावत् ।

इह यद्यपि शेषछन्दांसि गाथेत्येकया संज्ञयाभिहितानि तथापि मुग्धानुरोधेन छन्दश्चूडामणौ कानिचित् प्रकाश्यन्ते । तत्रादौ दोहकप्रकरणम् ।

तत्र व्यत्यये सुमनोरमेत्यादिसूत्राद्विषमे पादे चतुर्दश कला समे द्वादश दोहको भवति । यथा--

पियह पहारिण इक्कणवि सहि दो हया पडंति ।
सन्नद्धउ असवारु भडु अन्नु तुरंगु न भंति ॥

तत्रैवाऽयप्रायोऽपभ्रंशेति प्रायोग्रहणात् संस्कृतेऽपि यथा--

मम तावन्मतमेतदिह किमपि यदस्ति तदस्तु ।
रमणीभ्यो रमणीयतरमन्यत् किमपि न वस्तु ॥

तथा विषमे पादे त्रयोदश समे पादे द्वादश मात्रा उपदोहको भवति । यथा—

महु कंतिण रणि मुक्कउ एक्कुंपहार अमोहु ।
उपदोहक हय चूरिउं संदणु सारेहि जोहु ॥

दोहकव्यत्यये त्वपदोहको भवति । यथा—

इत्थु करिमि भणि कांई पिउ न गणेइ लगी पाइ ।
छंदे विणु हउं मुक्किया अवदोहय जिमु किर ॥

तथा दोहकसमपादान्ते मात्रापञ्चकेऽधिकृते सति चूडालदोहको भवति । यथा—

सुहि अच्छंतह मागुसह विहिवसि कुइ कुग्गाहु चहुट्टइ ।
जिणि जसु नासइ जणु हसइ मणि यरणइ तणि दाहु पयट्टइ ॥

एषु प्रायः पादान्ते लघोरेव गुरुत्वम् । तथा—

दोहकोपदोहकयोः समपादोपान्ते गुरुः कार्योऽवश्यमेवेत्याम्नायः ।

विचित्राश्च दोहकभेदा दृश्यन्ते । यथा—

चूडल्लउ चुन्नी होइस्सइं मुद्धिकवोलि निहित्तु ।
निदट्ठउ सासानलिण बाहसलिले संसित्तउ ॥

तथा—

तं तेत्तिउ बाहोहजलु सिहिणंतरि वि न पत्तु ।
छिमिछिमिवि छिमिवि गंडत्थलिहिं सिमिसिमिवि समत्तु ॥

इत्यादि । ते च वृद्धव्यवहाराज्ज्ञेयाः ।

अथ द्विपदीजातिः । दाचदालदाचदालि कर्पूरो णैः देत्यत्र दकारेण द्विमात्रो गण आकारेण स्वरसंख्यया द्विकसंख्या । एवं सर्वेषु । तेन द्वौ द्विमात्रावेकश्चतुर्मात्रः पुनर्द्वौ द्विमात्रौ एको लघुः द्वौ द्विमात्रौ एकश्चतुर्मात्रः द्वौ द्विमात्रौ लघुत्रयं च । णैरिति व्यञ्जनसंख्यया पञ्चदशभिर्मात्राभिर्यतिरित्येवंविधपादद्वयोपेतः कर्पूरो नाम छन्दो भवति । यथा—

कप्पूरधवल गुणअज्जिणिय आजम्मुवि निवचक्कवइ ।
पइं कित्ति काइं उल्लालि करि घल्लिअ चउसायरपरइ ॥

सोन्त्यलोनः कुङ्कुमः । स एव कर्पूरोऽन्त्येन लघुनोनः कुङ्कुमो भवति । यथा—

घणसारमिल्हि कुंकुमवइहिं अरइ करहि मिगनाहि वि ।
विणु पिययमि इह निप्फलउं मणु रइ करेइ न कत्थवि ॥

एतावुल्लालकौ मागधानाम् । चर्मौक्तिकदाम ठजैः । अष्टौ चतुष्कला गणाः ठजैरिति द्वादशभिः अष्टाभिश्च यतिर्यत्र तन्मौक्तिकदाम भवति । यथा—

संकलबंधसहोयर सोहिर मुत्तिअदामणिवेसमनोहर ।
वम्महनिवि पायड निहिकलसोवम कवणु न मोहइ तरुणिपओहर ॥

अथ चतुष्पदी जातिः । चौपः खण्डम् ।

चतुर्मात्रद्वयं पञ्चमात्रश्चैकः खण्डम् नाम छन्दो भवति । यथा—

नच्चावियचंदणवणो मच्चाविअमहुयरगणो ।
खंडियमाणिणिमाणओ वायइ दाहिण पवणउ ॥

इदमवलम्बक इति च । पीर्मदनावतारः ।

पीरिति पञ्चमात्राश्चत्वारो गणा यत्र स मदनावतारो भवति । यथा—

रोसगुरुगिरिसविसममच्छिमुच्छंतए
पलयजलणंमि सयलंमि गच्छंतए ।
तम्मितम्मंतरइवयणनलिणेरवणे
को खमो होज्ज मयणावयाररक्खणे ॥

पौचौंतो गलितकं यमितेंऽन्हौ । द्वौ पञ्चकलौ द्वौ चतुष्कलौ एकस्त्रिमात्रो गणो गलितकं नाम छन्दो भवति । परमङ्घ्रौ पादे यमिति सति भवति । यथा—

घणपियट्टपियसंकह मुहि सासासिहिं साहिअ
गंडफलगि सहु पाणिहि धवलिम आरुहिय ।

गलियअंसुजलि सुहनयणह विब्भभुल्लुलिय
तुह पियसहि विरहानलि वहुविह लंघलिअ ॥

पचिषा युज्यज ओजे जोलीर्वा वस्तुवदनकम् ।

आदौ एकः षण्मात्रश्चतुर्मात्रत्रयं षण्मात्रश्च वस्तुवदनकं नाम छन्दो भवति । अथ चतुष्कलानां सामान्यप्राप्तावपवादमाह । युजि समेऽजो जगणरहितः चतुर्मात्रः । ओजे तु जगणो लीरिति चत्वारो लघवः । यथा--

कयवयम्मि दुह देहि सव्वंगुच्चोडणु
उन्ह सासु मुहि अधररस अमयरसह विलूडणु ।
असुसित्त थणवत्थु वयण विच्छाहु निहालइं
दुल्लह वल्लह विपुलं तु किमु बहलिउ बालह ॥

षोऽजचः षपौ रासावलयम् । पूर्वमेकः षण्मात्रस्ततो जगणरहितश्चतुर्मात्रः ततः षट्कल-पञ्चकलौ यत्र तद्रासावलयं नाम छन्दो भवति । यथा--

ढक्कपडह पडु पहिरवमहुरासावलउ
बहुबलबलहिअहलवोलाउल सुरनिलओ ।
तुहे तुह आगमणु निअवि निव भयभिभलनयणु
निय वि नियंबिणि चय वि पलायह वेरिअणु ॥

षाचचाद्दो वदनकम् । एकः षण्मात्रश्चतुर्मात्रद्वयं ततो द्विमात्रश्चेत् तदा वदनकं नाम छन्दः । यथा--

अज्ज वि नयण न गिण्हइ तरलिम
अज्ज वि वयण न मेल्हइ भोलिम ।
अज्ज वि थणहरु भरु न पडिच्छइ
त वि मुद्धिहिं दंसणि जग मुब्भइ ॥

षश्चुर्गौ द्वितीयषष्ठौ जो लीर्वा द्विपदी । आदावेकः षण्मात्रश्चुगाविति चतुःकला गुरुश्च द्विपदीनाम छन्दः । अत्राप्यपवादः । द्वितीयषष्ठौ गणौ जोलीर्वेति । पठन्ति च ।

यस्यां गणः षट्कल एव पूर्वं चतुःकलाः पञ्च परे गुरुश्च ।
मध्ये गुरुः सर्वलघुः कदाचित्, द्वितीयषष्ठौ द्विपदीं विदुस्ताम् ॥ इति । उदा०—

मारे वच्च पहिअ निअदइयं परिहरिऊण सव्वहा
इह हि समुच्छरंत कुसुमायरमासमुहंमि अन्नहा ।

परहुअ जुवइगीअ हालाहलविहलं थलियंचित्तओ
चलसि न दुवइअं पि वम्मीसरसरनिउरंबछित्तओ ॥

अथ द्विभङ्गीप्रकरणम् । द्विपद्यंते गीतिर्द्विभङ्गिका । द्वौ भङ्गौ द्विपदीगीतिरूपौ भङ्गौ यस्यां सा इति द्विभङ्गिका । यथा—

घरि घरि धेणु दोहदहिमंथविलोडणघोसघुम्मए
बंभणवेय पठण झुणिबंदिण जयजयसद्दसुम्मए ।
तक्खणु सत्तु कहवि निद्दालसु कामयजणु विबुज्झए
धारणि बंधि अत्थु नारीयणि अविरलु सलिलु मुच्चए ।

सा बहुलकमलपरिमलमिलंतरोलंबरोलरमणीया ।
मंगलनिवहावंझा दिणमुहसंझा नरिंद तुह होउ ॥

अन्यथापि अन्यैरपि छन्दोभिर्द्वैद्वितैर्द्विभङ्गी भवति । तत्र दोहकस्य वस्तुवदनकेन योगे द्विभङ्गिका यथा—

मह मिल्हउ मनजाह तुह कंत वसंतपवेसि
चूउ न बाहह मउरिअउ विरहणि मारणिरेरसि ।

विरहिणिमारणरेसि गुड वि सन्नाहु सुदिढु करि
कि न बाहह उत्थरिउ चूउ अविरलदलडंबरि ।

कंत वसंत पवेसि विरहदुहंघलि घल्लिउ
अहह म जाह अणाह दीण दुम्मइ मइ मिल्लिउ ॥

इयं द्विभंगी कुण्डलिकदोहदः । तत्र गाथायाः मदनावतारेण । यथा—

जम्मंतरेण न विहंडइ उत्तममहिलाहिं जं किअं पिम्मं ।
कालिंदि कण्हविरहे अज्जवि कालं जलं वहइ ॥

वहइ कल्लोलजलभरि उम्माहिया
कण्हसमसरिसु पडिवन्नविव्वाहिया ।
उत्तमो नेहु जो कियउ अबलंतरे
तच्छसो पेम्मसु विहडइ न जम्मंतरे ॥

अयं चूडचन्द्रानतकः । वस्तुवदनकस्य कर्पूरेण यथा—

निक्कंदल किय कच्छ नलिणिवज्जिअ कय सरसरि
निच्चंदण किउ मलउ तुहिणवज्जिउ किउ हिमगिरि ।
निपल्लव किअ करि पयत्तु कंकिल्लिविडवसय
पत्तचत्त कय वालकयलि अकुसुम किय तरुलिय ॥

सिसिरोवयारकिहि परियणिहिं निम्मुत्ताहल कय भुवण ।
तो वि हु न तीइ तव विरहभरि खिसइ दाहू दारूणवियण ॥

कुङ्कुमेन यथा—

गयणुप्परि कि न चडहि कि नरि विक्खिरहि दिसिहि वसु
भुवणत्तयसंतावु हरिहि कि न किरिवि सुहारसु ।
अंधयारु कि न दलहि पयडि उज्जोउ गहिल्लउ
कि न धरिज्जहि देवि सिरह सइ हरि सोहिल्लउ ॥

कि न तणउ होहि रयणायरह होहि कि न सिरिभायरु ।
तुवि चंद नियवि मुहु गोरिअह कुवि न करइ तुह आयरु ॥

रासावलयस्य कर्पूरेण यथा—

परहुअपंचमसवणब्भय मत्तु ण किर
तिभणि भणइ न किंपि मुद्धि कलहंसगिर ।
चंदु न दिक्खण सक्कइ जं सा सव्विवयणि
दप्पणि मुहु न पलोअइ तिभणि मयनयणि ॥

वइरिउ मणि मन्निवि कुसुमसरु खणि सा बहु उत्तसइ ।
उत्थरिउ रूवनिहि कुसुमसर तुह दंसण जं अहिलसइ ॥

कुङ्कुमेन यथा—

जइ अ झलक्कहि नयण दीहनयणिअहि खणु
केअइ कुसुमदलम्मि भसलु विलसइ त जणु ।
जइ तीए मुहि हावि मंदु हासउ चडइ
ता जणु हीरयपउमरायसंचउ झडइ ॥

जइ तीइ महुरमिउभासिणिहिं वयणगुंफ निसुणिज्जइ ।
तावह करिप्पि जणु अमयरसु कण्णपण्णपुडि पिज्जइ ॥

वदनकस्य कर्पूरेण यथा—

किन फुल्लइ पाडल परिमल
महमहेइ कि न माहवि अविरल ।
नवमालिय कि न दलइ पहिल्लिय
कि न उत्थरइ कुसुमभरि महल्लिअ ॥

दीहिअतलायसरतल्लडिहिं कि न पसाहि पउमिणि फुडइ ।
तुवि जाइजायगुणसंभरणझाणु कि न सलहु मणि खुडइ ॥

कुङ्कुमेन यथा—

जइ तुहुं महु करयलु उम्मोडवि
चल्लिअ चीरंचलु अच्छोडवि ।
माणिणि तुवि पसाउ करि सुम्मउ
पइं पइ उत्तावलिअ म गम्मउ ॥

जइ किमइ विसंवह पयजुअलु इहु विहिवसिण विहट्टइ ।
ता तुज्झ मज्झ खीणउ खरउ कि न खामोयरि तुट्टइ ॥

एताश्च वस्तुवदनककर्पूराद्या द्विभङ्गिका षट्पदा इति सार्धछन्दांसीति च सामान्याभिधानेन मागधानां प्रसिद्धाः यदाह—

जइ वत्थुआण हिट्ठे उल्लाला छंदयमि किज्जंति ।
दिवढछंदछप्पयकज्जाइं ताइं कुच्चंति ॥

इत्यादि एवं वस्तुकादीनामप्युपरि दोहकादयो द्विभङ्गप्रामेव द्रष्टव्याः ।
अथ प्रकीर्णप्रकरणम् । खण्डे द्वे गीतिर्द्विपदीखण्डम् ।

खण्डद्वयान्ते गीतिश्चेत् द्विपदीखण्डं नाम छन्दो भवति । यथा रत्नावल्याम्—

कुसुमाउह पियदूययं मउलाविंतो चूययं ।
सिढिलिअमाणग्गहणओ वायइ दाहिणपवणओ ।

विअसिअबउलामेलओ, इच्छिअपिअइममेलओ ।
पंडिवालणअसमत्थओ, तम्मई जुवईसत्थओ ॥

इअ पढमं महुमासो जणस्स हिअयाइं कुणइ मऊआइं ।
पच्छा विंधइ कामो लद्धावसरेहिं कुसुमबाणेहिं ॥

चीर्नीजे जो लीर्वान्तेऽनुप्रासे पद्धतिः । चतुःकलगणचतुष्टयं पादान्तेऽनुप्रासे पद्धतिः । पद्धडिकेयमित्यन्ये । अत्रापवादः । नात्र विषमे स्थाने जगणः । तथा पादान्ते जमणो लीरिति लघुचतुष्टयं वाऽवश्यं कर्तव्यम् । यथा—

उन्निद्दकमदलदीहरच्छु
कंचणकवाडदढवियडवच्छु ।

सुरवइकरिंदकरसरसबाहु
एक्कंगिण अरिबलु धरइ नाहु ॥

क्वचित्संस्कृतेऽपि । यथा धनपालस्य—

नतसुरकिरीटसंघृष्टचरण
जय भवगतिभीतजनैकशरण ।
चपलाक्षशकुनिसंयमनपाश
जय विदितजगत्स्थितिसर्गनाश ॥ इत्यादि

इहाद्ये गणे चत्वारो विकल्पाः । द्वितीये पञ्च । तृतीये चत्वारः । चतुर्थे द्वौ । एवमन्योन्याघाते षष्ट्यधिकं शतम् । प्रतिपादं तेषां सद्भावात् । अन्योन्यताडनया पञ्चषष्टिः कोटयस्त्रिपञ्चाशल्लक्षाः षष्टिः सहस्राणि भेदाः भवन्ति । चीः पद्धडिका नाम छन्दो भवति । यथा—

परगुणगहणु सदोसपयासणु
मिउमहुरक्खरहिअमिअभासणु ।
उवयारिण पडिकिउ वेरियणहं
इअ पद्धडी मणोहर सुयणहं ॥

प्राक्पद्धतौ इह तु अविशेषः इति पृथक् भणनम् । तथा च नन्दिकाव्यम् (ताढचम्) ।

सोलसमत्तउ जहिं पउदीसइ अक्खर गणु न किंपि गवीसइ ।
पायउ पायउ जमगि पसिद्धउ, पद्धडियहि इह छंदु पसिद्धउ ॥

कला ओजे सप्ताद्याः इत्यादिसूत्रात् यस्य विषमपादयोरष्टौ कलाः समयोरेकादश (स) चम्पकशेखरः । यथा—

अलिरवगीई कयचंपयसेहर ।
महसमयसिरी, उय जणमणमणोहर ॥

तथा ओजे नव मात्राः समे दश तदा मलयमारुतो नाम । यथा—

देखवि वेलडी मलयमारुअधुआ ।
सुमरवि गोरडी पंथिअसत्थ मुआ ॥

यथा वा श्रीबप्पभट्टिभणितौ--

तत्ती सीयली मेलावा केहा ।
धण उत्तावली पिअ मंद्दसिणेहा ॥

इत्यादि ।

सद्वृत्तरत्नाकरनामधेय--
शास्त्रस्य वृत्तौ विषमाभिधानः ।
अध्याय एषोऽजनि सोमचन्द्र-
विनिर्मितायामिह पञ्चमश्च ॥ (२३३)

पञ्जिका

(२३३) सूरिभिः प्राज्ञैः तद्वृत्तं गाथेति प्रोक्तम् । नाम्ना गाथेति गदितम् । अत्र छन्दसि इह छन्दःशास्त्रे यन्नोक्तं सामान्यविशेषलक्षणाभ्यां यन्न कथितम् । तत् किंभूतम् । पादैश्चरणैः असमञ्जसम् अयुक्तम् असममिति यावत् । कस्मादित्याकाङ्क्षायामाह । विषमाक्षरपादत्वात् विषमवर्णत्वाच्च । विषमाक्षरपादत्वादितीयं गाथा चतुष्पदी । धर्म इव धर्मवत् । वतिरत्राधारे । अनेन प्रायः पुराणादिषु धर्मशास्त्रेष्वेव तासां गाथानां विषयो न काव्यादाविति प्रतिपादितम् । तथा चोक्तम् । सार्धीति । तत्र सेति गाथा । विषमाक्षरस्योदाहरणं यथा--

युधिष्ठिरो धर्ममयो महाद्रुमः स्कन्दोऽर्जुनो भीमसेनोऽस्यशाखा ।
माद्रीसुतौ पुष्पफले समृद्धे मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च ॥

इदं चतुश्चत्वारिंशदक्षरं त्रिष्टुब्भवति । पञ्चचत्वारिंशदक्षरत्वाद् गाथा जाता । विषमपादस्योदाहरणं यथा--

दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान् ।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च भीतश्च लुब्धः कामी च ते दश ॥

इयमष्टचत्वारिंशदक्षरत्वात् सामान्यलक्षणेन गजगतित्वे सत्यपि पादश्चतुर्थोऽश इत्युक्तविशेषलक्षणराहित्येन षट्पादत्वाद् गाथा । यच्छन्दसि नोक्तमित्यनेन आर्यादयोपि विषमाक्षरत्वेऽपि गाथा न भवन्तीति दर्शितम् ॥

इति श्रीशाक्यमुनेर्भगवतः सर्वज्ञस्य परमोपासकेन
गौडदेशवास्तव्येन श्रीबौद्धागमचक्रवर्तिना
भूसुरेणाचार्येण विरचितायां वृत्तरत्नाकर-
पञ्चिकायां विषमवृत्तविभागप्रतिपादनो
नाम पञ्चमोऽध्यायः ॥

षष्ठोऽध्यायः

प्रत्ययप्रकरणम्

२३४. **प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया ।**
सङ्ख्यानमध्वयोगश्च षडेते प्रत्ययाः स्मृताः ॥

पञ्जिका

(२३४) अथेदानीं षट् प्रत्ययान् वक्तुमुपक्रमते । प्रतीयन्ते ज्ञायन्ते अर्थाः एभिरिति प्रत्ययाः ज्ञानानि । "प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु" इत्यमरः । एते षट् प्रत्ययाः स्मृताः । छन्दोविद्भिरिति शेषः । कतमे षट् । प्रस्तारः, नष्टम्, उद्दिष्टम्, एकद्व्यादिलगक्रिया, सङ्ख्यानम्, अध्वयोगश्चेति । तत्र प्रस्तारप्रत्ययो नाम समस्तवृत्तसङ्ख्याभेदप्रकाशकशिल्पविशेषज्ञानम् । अस्य छन्दसस्तावदेवंविधानि वृत्तानि भवन्ति, इदं छन्दः एतत्सङ्ख्याकवृत्तमिति प्रस्तारेणैव गम्यते । नष्टप्रत्ययो नाम यस्य कस्यचिच्छन्दसो यत्किञ्चिद् द्वितीयं तृतीयं वा वृत्तं नष्टं तस्य प्रस्तारमन्तरेण पुनर्दर्शनज्ञानम् । उद्दिष्टप्रत्ययो नाम यस्यकस्यचिच्छन्दसः किमपि वृत्तं पठित्वा इदं वृत्तं प्रस्तारे कतितममिति केनचित्पृष्टे सति तत्कथनोपायज्ञानम् । एकद्व्यादिलगक्रियाप्रत्ययो नाम अस्मिंश्छन्दसि सर्वगुरूणि वृत्तानि कति, द्विलघूनि कति, त्रिलघूनि वा कतीत्याकाङ्क्षायामियन्तीति ज्ञानम् । सङ्ख्यानप्रत्ययो नाम प्रस्तारं विनापि तत्तच्छन्दसामेतावन्ति वृत्तानीति वृत्तसङ्ख्यापरिज्ञानम् । अध्वयोगप्रत्ययो नाम सर्वेषां छन्दसां प्रस्तारभूमिपरिमाणज्ञानमिति ॥ (२३४)

२३५. **पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः ।**
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम् ॥

२३६. **ऊने दद्याद् गुरूनेव यावत्सर्वलघुर्भवेत् ।**
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः ॥

तात्पर्यटीका

(२३५, २३६) वाक्येन एकाक्षरादिः षड्विंशत्यक्षरं यावदेकैकाक्षरवृद्धया यः पूर्वमुपदिष्टः स इह पादो गृह्यते । किंविशिष्टे पादे । सर्वगुरौ । सर्वमक्षरं गुरु यस्मिंस्तत् सर्वगुरुस्तस्मिन् । पूर्वापेक्षया आद्याद् गुरोरधो लघोर्न्यासे सत्यग्रेतनेभ्यो गुरुभ्योऽधः किं विदध्यादित्यतः आह । कुर्यात् । किम् । शेषं वर्णजातमित्यध्याहारः । कथं कुर्यात् । यथोपरि यथोपरिष्टादस्ति वर्णजातं तथेत्यर्थः । पूरयेद् गुरुभिः शेषमिति वाच्ये यथोपरि इति व्याप्त्यर्थम् । तेनाग्रेतनासु व्यक्तिषु यदोपरिष्टाल्लघवो दृश्यन्ते तदा शेषं लघुरूपमपि कुर्यात् । गुर्वपेक्षया प्रथमाद् गुरोरधो लघौ कृते सति यदि पश्चिमं शून्यं स्यात् तदा किं विदध्यात् इत्याह—

ऊने दद्यात् इति । दद्यात् । कान् । गुरून् । गुरुश्च गुरवश्च एकशेषे ते गुरवः तान् । अयमभिसन्धिः । यदैकेन पादः पूर्यते तदैकं दद्याद्यदा द्वाभ्यां तदा द्वौ यदा बहुभिस्तदा बहूनिति । क्व दद्यात् । ऊने इति पश्चिमे भागे शून्ये इत्यर्थः । अमुं विधिं किं सकृत् कुर्यादित्याह भूय इति पुनः पुनः । अमुमसकृद्विधिं कियदवधिकं कुर्यादित्यपेक्षायामाह– यावद्भवेत् । कः । पादः इति प्रस्तावाद् गृह्यते । किंविशिष्टः । सर्वलघुः । सर्वस्मिन् स्थाने लघुर्यस्मिन् स सर्वलघुरिति । शिष्याणां ज्ञानाक्लेशाय सामर्थ्यलब्धस्यानुवादोऽम् ।

प्रस्तारसूत्रविधृतिः प्रसिद्धा प्रतिदर्शिता ।
सुखज्ञानाय मन्दानां मध्यायां प्रक्रियोच्यते ॥

मध्यां समुद्देशं प्रस्तारयन् पादे सर्वगुरावित्यादौ गुरुत्रयं स्थापयेद्यथा–– ऽऽऽ; आद्याल्लघुं न्यस्य गुरोरध इत्याद्याद् गुरोरधस्तावल्लघुं न्यसेत् । यथा–।; यथोपरि तथा शेषमिति वचनात् तस्मात् परस्तात् गुरुद्वयं क्रियते । यथा–।ऽऽ; भूयः कुर्यादमुं विधिमिति

वचनाद् द्वितीयव्यक्तेर्गुर्वपेक्षया आद्यगुरोरधस्तादाद्याल्लघुं न्यस्य गुरोरधः इति लघुन्यासः। ततः परस्मात् यथोपरि तथा शेषमिति गुरुश्च। यथा— ऽऽऽ; ।ऽऽ; ।ऽ; ऊने दद्याद् गुरूनिति वचनात् तस्मात् पश्चिमे गुरुन्यासो यथा–ऽऽऽ;।ऽऽ;ऽ।ऽ। अनया रीत्या यावत्सर्वलघुर्भवेत् तावत् प्रस्तारः कार्य इति।

अस्योदाहृतये मध्या समग्रा समुदाहृता।
मार्दीस्त्रिकांल्लक्षयता सख्याद् व्यासेऽत्र सूरिणा॥

एको गुरुर्लघुश्चैक इत्यधोऽधो विनिक्षिपेत्।
द्विगुणान् द्विगुणान् पूर्वपूर्वेभ्यः परपङक्तिषु॥

यस्मात् सर्वलघुस्तत्र पङक्तयोऽक्षरसङख्यया।
सुखावबोधसरणिः समुद्ररचनेऽत्र मा॥

अत्र सर्वलघुस्थानं कल्पयेद् व्यक्तिसंख्यया।
अस्य शाल्मलिरित्येके नामधेयं प्रचक्षते॥

अस्योदाहरणं प्रतिष्ठायां यथा— ऽऽऽऽ, ।ऽऽऽ, ऽ।ऽऽ, ।।ऽऽ, ऽऽ।ऽ, ।ऽ।ऽ, ऽ।।ऽ, ।।।ऽ, ऽऽऽ।, ।ऽऽ।, ऽ।ऽ।, ।।ऽ।, ऽऽ।।, ।ऽ।।, ऽ।।।, ।।।।. इत्युक्तादीनां पादप्रस्तारः। अथ मात्रावृत्तानामेकेनैव न्यायेन समुद्रप्रस्तारार्थं परिभाषाबलेन सांप्रदायिकः सर्वप्रस्तारपक्षे अस्य सूत्रस्य यो व्याख्याप्रकारोऽस्ति सोऽपीहोन्मुद्यते। तेनायमन्वयः। दद्यात्। कान्। गुरून्। गुरुश्च गुरू च गुरवश्च ते एकशेषेण गुरवः तान् गुरून् इति सर्वगुरून् गणान्। क्व। ऊने। आद्याल्लघुं न्यस्य गुरोरधः इति कृते यत्पश्चाच्छून्यमवशिष्यते तदूनमिति। किं कृत्वा। न्यस्य संस्थाप्य। कम्। लघुमिति परिभाषोक्तप्रकारेण लघूपलक्षितान् गणानित्यर्थः। क्व न्यस्य। अधः। कस्मात्। गुरोः इति सर्वगुरोर्गणात्। किंविशिष्टात्। आद्यात्। कस्मिन् स्थापिते सति। पादे। समग्रवृत्तं पादोक्ताविति परिभाषाश्रयणात् समग्रवृत्ते। अयमभिसन्धिः। यत त्रिचरणं वृत्तं तत्र तस्मिन् समुद्रेण प्रस्तार्यमाणे सति चरणत्रयं प्रथमं स्थाप्यते। यच्चतुश्चरणवृत्तं तत्र चरणचतुष्टयं, यत् षट्चरणं वृत्तं तत्र चरणषट्कम्। तस्मिन्निति कथंभूते पादे। सर्वगुरौ। सर्वगुरव इति गुरुणा यत्सर्वगुरुस्तस्मिन्निति। ततः किं विदध्यादित्यतः आह। कुर्यात्। किम्। शेषं वृत्तम्। कथम्। यथा अस्ति। क्व। उपरि इति ऊर्ध्वस्थिते प्रस्तारे। कथं कुर्यात्। भूय इति पुनः पुनः। किम्। विधिम्। विधानं विधिः क्रियेत्यर्थः। किंविशिष्टम्।

अमुमिति आद्याल्लघुं न्यस्येत्यारभ्य सर्वलघुचरणोपदेशावधिकम् । किं यावत् कुर्यात् । यावद्भवेत् । कः । पादः । किंविशिष्टः । सर्वलघुः स्वलक्षणाविरोधिना सर्वलघवो यस्मिन् स इत्थंभूतः । प्रस्तारोऽयमित्यादि सुगमम् । इह छन्दोविचितिवेदिग्रहणम् वृत्तद्वयप्रस्तारप्रतिपादनपरत्वायास्येति स्थितम् । यथात्र प्रस्तारो व्याख्यातः तथा आर्याप्रकरणादावुदाहृतम् । अथ प्रस्तारादिसूत्रपरिभाषा--

चतुर्मात्रः पञ्चभेदो मात्रावृत्ते गणः स्मृतः ।
द्विमात्रो द्विविकल्पोऽयं वैतालीयादिजातिषु ॥

एकमात्रो द्विविकल्पो वर्णवृत्ते त्वदण्डके ।
वक्त्राविषु गलावादौ ततो मादिः सनौ विना ॥

प्रस्तारनष्टोद्दिष्टेषु व्यवहारप्रसिद्धये ।
समग्रवृत्तं पादोक्तौ स्वलक्षणनियन्त्रितम् ॥

गुरुप्राप्तां सर्वगुरुर्न्यस्यते स्वो विना गणाः ।
पूर्वकल्पनाः सर्वेऽधोऽधः स्थाप्य यथाक्रमम् ॥

मूलसूत्राविरोधेन सर्वजात्यब्धिसिद्धये ॥

इति प्रस्तारः ॥ (२३५, २३६)

सुकविहृदयानन्दिनी

(२३५, २३६) इदानीमुक्तानां वृत्तानां षट् प्रत्ययानाह । पादे सर्वगुरौ यावतां वर्णानां वृत्तस्य पादस्तावन्त एव गुरवो लिख्यन्ते । यथा चतुरक्षरच्छन्दसि आद्याद् गुरोरधः अधोविभागे लघुं वर्णं न्यस्य स्थापयित्वा तदनन्तरं न्यस्तलघोः सकाशात् शेषेभ्यो वर्णेभ्यः अधः किं स्थाप्यते इत्याह । यथोपरि तथा शेषम् । यद्युपरि गुरुस्तदा अधस्तादपि गुरुः यद्युपरि लघुः तदाः अधस्तादपि लघुः । शेषमुपरि तुल्यम् दीयते इत्यर्थः । तेन लघोरनन्तरं त्रीणि गुरूणि स्थाप्यन्ते भूयः पुनरपि कुर्यादमुं विधिमिति लघुं न्यस्य गुरोरधः यथोपरि तथा शेषमिति । पुनरप्यमुं विधिं कुर्वीत । यदोपरि गुरुर्भवति तदा लघुं न्यस्य गुरोरधः इति विधेरभावात् यः पूर्वदेशात् ऊने दद्यात् गुरूणीति ऊनः प्रदेशः

गुरुभिः पूर्यत इत्यर्थः। एवमनेन क्रमेण तावन्न्यासः कर्तव्यो यावत् सर्वलघुः पादो भवति। प्रस्तार्यते इति प्रस्तारः वर्णानां न्यासविशेषः। एवं चतुरक्षरे पादे षोडश वृत्तानि भवन्ति। तद्यथा प्रस्तारितानीहोदाहरणार्थम्। छन्दांसि विचीयन्तेऽस्यामिति छन्दोविचितिः छन्दःशास्त्रम्॥ (२३५, २३६)

छन्दोवृत्तिः

(२३५, २३६) अथेदानीमुक्तवृत्तानामेव प्रत्ययार्थं प्रस्तारादीनां व्याख्यानावसरः। तत्रादौ सार्धश्लोकेन प्रस्तारमाह।

तत्रायं क्रमः। यत्र पादे यावन्तो वर्णास्तावन्तो गुरवः प्रथमे पादे स्थाप्याः। पादे सर्वगुराविति वचनात् यथा समवृत्तस्य त्र्यक्षरे पादे गुरुत्रयं ऽ ऽ ऽ तत आद्याल्लघुं न्यस्य गुरोरधः इति अस्य पादस्याद्यो यो गुरुः तस्याधो लघुं संस्थाप्य ततो यथोपरि तथा शेषमिति वचनात् यत्रोपरि गुरुः तत्राधस्तादपि गुरुः, यत्रोपरि लघुः तत्राधस्तादपि लघुः स्थाप्यः ततो भूयः कुर्यादमुं विधिं पुनरपि आद्याद् गुरोरधो लघुः स्थाप्यः। यथोपरि तथा शेषमिति वचनात् ततो गुरुः स्थाप्यः ऽ ऽ ऽ / । ऽ ऽ। अत्र च ऊने दद्यात् गुरूण्येव इति लघोः पूर्वतने स्थाने गुरुरेव। यत्र

ऽ ऽ ऽ
यत्र पूर्वमूनं स्थानं तत्र तत्र गुरवो दीयन्ते इति व्यक्त्यपेक्षया बहुवचनं यथा— । ऽ ऽ
ऽ । ऽ

एवं सर्वलघुपदं यावदयं विधिः करणीयः यावत्सर्वलघुर्भवेत् इत्युक्तत्वात्। स्थापना

यथा— ऽ ऽ ऽ / । ऽ ऽ / ऽ । ऽ ‖ । । ऽ / ऽ ऽ। / । ऽ। अनया रीत्या सर्वेषां समवृत्तानां प्रस्तारो ज्ञेयः।

अथ समानां तु अर्धस्य पादकल्पना कार्या। शेषं पूर्ववत्। यदाहुः अर्धसमस्य प्रस्तारः कार्य इति यथा अर्धसमस्य द्व्यक्षरपादद्वयस्य पादकल्पनया सर्वगुरोः ऽ ऽ ऽ ऽ / । ऽ ऽ ऽ ततः पूर्ववदाद्यगुरोरधो लघुः ततो यथोपरीति परतो गुरुत्रयं स्थाप्यम्। भूयः कुर्यादिति द्वितीयपादाद्यगुरोरधो लघुः। पुरतस्तु यथोपरीति गुरुद्वयं ततः ऊने दद्यादिति लघोः पूर्वमूने स्थाने गुरुरेव स्थाप्यः ऽ। ऽ। ऽ। अनया रीत्या सर्वलघुपदं यावत् षोडश भेदा यथा। एष तु प्रथमषष्ठैकादशषोडशसमवृत्तभेदत्वेन प्रस्तुतार्धसमस्य भेदकारित्वाद्वर्जनीयः। यदाहुः प्रस्तुतभेदकारी विकल्पः प्रस्तारः क्रमायातोऽपि वर्जनीयः इति। सङ्ख्यायां तु

गण्यते। ततः शेषा द्वादश शुद्धार्धसमभेदाः। विषमाणां तु प्रस्तारे छन्दसः पादकल्पना कार्या। उक्तं च 'विषमप्रस्तारे तु पादचतुष्टयस्य प्रस्तारः कार्यः' इति। अपरं पूर्ववत्। यथा द्व्यक्षरविषमस्य वृत्तस्य पादकल्पनया सर्वगुरोः पूर्ववदाद्यगुरोरधो लघुः स्थाप्यः। ततो यथोपरीति गुरुसप्तकं स्थाप्यम्। भूयः कुर्यादिति द्वितीयपादाद्यगुरोरधो लघुः परतो यथोपरीति गुरुषट्कम्। ऽ ऽ ऽ ऽ ऽ ऽ। ततः ऊने दद्यादित्यादौ गुरुः ऽ ऽ ऽ ऽ ऽ ऽ ऽ / । ऽ ऽ ऽ ऽ ऽ ऽ स्थाप्यः। अनया रीत्या सर्वलघुपदं यावत् षट्पञ्चाशदधिकं शतद्वयं भेदाः। तेषां मध्यात् पूर्ववत् समार्धसमरूपत्वेन प्रस्तुतप्रस्तारभेदकारित्वात् प्रथमो द्वितीयात् सप्तदशान्त्यभेदं यावद्वर्जनीयास्ते च समुदिताः षोडश।

तद्यथा--

ऽ ऽ ऽ ऽ	ऽ ऽ ऽ ऽ	ऽ ऽ ऽ ।	ऽ ऽ ऽ ।
। ऽ ऽ ऽ	। ऽ ऽ ऽ	। ऽ ऽ ।	। ऽ ऽ ।
ऽ । ऽ ऽ	ऽ । ऽ ऽ	ऽ । ऽ ।	ऽ । ऽ ।
। । ऽ ऽ	। । ऽ ऽ	। । ऽ ।	। । ऽ ।
ऽ ऽ । ऽ	ऽ ऽ । ऽ	ऽ ऽ । ।	ऽ ऽ । ।
। ऽ । ऽ	। ऽ । ऽ	। ऽ । ।	। ऽ । ।
ऽ । । ऽ	ऽ । । ऽ	ऽ । । ।	ऽ । । ।
। । । ऽ	। । । ऽ	। । । ।	। । । ।

अमीषां मध्ये प्रथमषष्ठैकादशषोडशाः समभेदाः, अन्ये त्वर्धसमविषमभेदाः। इत्थं च सर्वेषां समार्धसमविषमछन्दसां प्रस्तारो ज्ञेयः। अथारब्धं समुपसंहरन्नाह।

प्रस्तार्यत इति प्रस्तारः। वृत्तानां विस्तरतो विन्यासः स चायं छन्दोविचितिवेदिभिः छन्दःशास्त्रनिपुणैः समाख्यातः प्रदिष्ट इति यावत्॥ (२३५, २३६)

पञ्चिका

(२३५, २३६) छन्दांसि विचीयन्ते विचार्यन्ते अस्यामनयेति वा छन्दोविचितिः छन्दःशास्त्रम्। तां वेदितुं ज्ञातुं शीलं येषां ते छन्दोविचितिवेदिनः, तैश्छन्दोविचितिवेदिभिराचार्यैः। अयमेष प्रस्तारः समाख्यातः कथितः। प्रस्तरणं प्रस्तारः। भावे घञ्। एतं प्रस्तारं चिकीर्षुः पुरुषः समे भूमितले समुपविश्य प्राङ्मुखश्चेदुत्तरतः समारभ्य दक्षिणान्तं पूर्वोक्तगुरुसंज्ञया रेखया यस्य कस्यापि सर्वगुरणो वृत्तस्य सर्वगुरुपादं पङ्क्त्याकारेण

२३७. नष्टस्य यो भवेदङ्कस्तस्यार्धेऽर्धे समे च लः ।
विषमे चैकमाधाय तस्यार्धेऽर्धे गुरुर्भवेत् ॥

पुरतो विलिखेत् । अस्य लक्षणमाह पादे सर्वगुराविति । सर्वे गुरवो यस्मिन् सः सर्वगुरुः । तस्मिन् सर्वगुरौ पादे लिखिते सति । आद्यात् आदिभूतात् गुरोरधः लघुं न्यस्य पूर्वोक्तलघुसंज्ञां रेखां लिखित्वा यथोपरि तथा शेषमिति उपरि यथा तथाऽधस्तादपि शेषम् अवशिष्टम् गुरुं विन्यसेत् । भूयः कुर्यादमुं विधिमिति भूयः पुनरपि अमुं विधिं इदं विधानं कुर्यात । लघुं न्यस्य गुरोरध इति वचनाद् द्वितीयस्य पङक्तेरप्यादिभूतादगुरुणोऽधस्तात् लघुं विन्यस्य यथोपरि तथा शेषमिति वचनात् शेषं समस्तं गुरुं विन्यसेत । ऊने दद्याद् गुरूणीति ऊने न्यस्तस्य लघोरुत्तरतः शून्यशून्यस्थाने गुरूनेव दद्यात् स्थापयेत् । तृतीयपङक्तौ तु द्वितीयपङक्तिस्थितस्य लघुनोऽधः स्थानमूनं भवति । तत्र गुर्वक्षरं लिखेदित्यर्थः । एवमिति एवमुक्तप्रकारेण पङक्तिशो न्यस्तादाद्यादाद्यादगुरोरधस्ताल्लघ्वक्षरं विन्यस्य यथोपरि तथा शेषमिति वचनादुपरि लघुश्चेल्लघुं गुरुश्चेद् गुरुं च विन्यस्य न्यस्तस्य लघोरुत्तरतः ऊने ऊने स्थाने गुरूनेव विदध्यात् । एवंभूतस्य न्यासस्य कोऽवधिरिति चेदाह यावत्सर्वलघुर्भवेदिति । एवं न्यस्ते न्यस्ते सति यावदन्तः पादः सर्वलघुः स्यात् तावत् प्रस्तारयेदित्यर्थः । सर्वेषां छन्दसामाद्यं वृत्तं सर्वगुरु अन्त्यं वृत्तं सर्वलघु स्यादिति ज्ञेयम् । तद्यथा— मध्यायां छन्दसि । मो नारी । य केसा । रो मृगी । स नदी । हंसी त । शिखी ज । भास भ । न लघु । इत्यष्टावेव वृत्तानि भवन्ति । एवमन्येषामपि सर्वेषां छन्दसां प्रस्तारो वेदितव्यः ॥ (२३५, २३६)

इति प्रस्तारविधिः ॥

तात्पर्यटीका

(२३७) यदानेन पादप्रस्तारपक्षे समुद्रे प्रस्तारिते सति क्वचित् कतिपयव्यक्तिर्विनष्टा स्यात्, समुद्रमनपेक्ष्यैव केवला कथं ज्ञायते इत्यपेक्षायां नष्टव्यक्तिज्ञानोपायप्रदर्शकं सूत्रमाह—

अस्यान्वयः । भवेद् भवितुमर्हति । कः । लः इति लघुः । कस्य । तस्य । तस्येति कस्य । योऽस्ति । कः । अङ्कः नष्टस्य । कस्मिन् सति । अर्धे इति छेदे । क्व । राशौ । कथंभूते । द्वितीयात् सप्तम्यन्ताद् अर्धग्रहणादेवमन्वयः । द्वयोर्मध्ये एकमर्धं

समुज्झ्य एकस्मिन्नेवार्धे भूयः कुर्यादमुं विधिमिति वचनात् एवं पुनः पूनः कुर्वन् व्यक्तिशेषं पूरयेत् । अथ विषमश्चेद्राशिः स्यात् तदा विषमे चैकमाधायेत्येकं ध्रुवकरूपं प्रक्षिप्यार्धे सति गुरुः क्रियते । क्रिया इत्येककर्तृकत्वप्रतिपादनात् व्यवहिर्यते । अत्रापि पूर्ववच्छेषं व्याख्येयमिति । तेन वाक्यार्धद्वयेन किं भवेत् । तद्भवेत् । तदिति किम् । नष्टव्यक्तिस्वरूपमित्यर्थः ।

व्याख्येयं नष्टसूत्रस्य व्याख्यान्तरचिकीर्षुणा ।
कृत्यानुकृत्ये पूर्वेषामन्तरं वा निवेदितुम् ॥

अथेदमेव सूत्रं विशेषलाभायान्यथा व्याख्यायते । यथा । भवेत् । भवितुमर्हति । कः । ल इति लघुः । कस्य । तस्य । तस्येति कस्य । योऽस्ति । कः । अङ्क इति राशिः । कस्य । नष्टस्य । कस्मिन् सति । अर्धे इति छेदे सति । के यदि भवतः । अर्धे इति शकले । किंविशिष्टे । समे इति तुल्यपरिमाणे । चशब्दः शकलवचनस्यार्धशब्दस्य सप्तम्यन्तस्य अग्रेतनवर्णोनयनाय समुच्चयार्थः । तत एवमन्वयः । किं विद्ध्यात् कुर्यात् । कम् । अमुं विधिम् । कथम् । भूयः । क्व । अर्धे इत्येकस्मिन्शकले । यावत् संभवस्तावद्विधिरिति न्यायात् आव्यक्तिस्वरूपलाभात् । अथ द्वितीयार्धं व्याख्यायते । भवेत् । कः । गुरुः । कस्मिन् सति । अर्धे । किंविशिष्टे । विषमे इति परस्परं विसदृशे । न्यूनाधिकपरिमाणे इत्यर्थः । कस्य । तस्य । तस्येति कस्य । यो भवेत् । कः । अङ्कः । कस्य । नष्टस्य । अत्र पूर्वसूत्रादूने इत्यनुषज्यते । ततोऽयमन्वयः । ततः किंविशिष्टे । ऊने । किं कृत्वा । आधाय । कं कम् । एकमिति । शेषपदव्याख्यानं पूर्ववत् । अथैकमात्रे अर्धवर्जिते राशौ स्थिते सत्यानयनं क्रियते तावद् व्यक्तिशेषं कथं विदध्याद् इति चेदुच्यते । तमेकमपहाय यथोपरि तथा शेषमित्यधिकाराद् व्यक्तिशेषं सर्वगुरुव्यक्तिवत् पूरयेदिति स्थितम् । अस्योदाहरणार्थमालापो विरच्यते । यथा उक्तादिषु अष्टम्यां जातौ समुद्रप्रस्तारे अष्टोत्तरशततमी व्यक्तिः कथंचिन्नष्टा सा एकाकिन्येव आनयनप्रकारेण प्रस्तार्य दर्श्यतामित्युक्ते नष्टस्य यो भवेदङ्क इति वाक्यादष्टोत्तरशताङ्को गृह्यते । तस्यार्धे समे च लः इति वचनादर्ध्यमाने अस्मिन् राशौ चतुःपञ्चाशद्द्वयी जाता । छेद्यो राशिः समः इति एको लघुर्लब्धः । स भूमौ स्थाप्यते । स्वीकृतमर्धं चतुःपञ्चाशद्राशिः पुनरर्ध्यते । राशेः समत्वात् पुनर्लघुर्लभ्यते । स्वीकृतमर्धं सप्तविंशतिः । तस्या विषमत्वात् एकमाधाय अष्टाविंशतिं कृत्वा अर्धे कृते सति गुरुर्लभ्यते । इत्याद्यपक्षे । अत्रैव द्वितीयव्याख्यापक्षे विषमेऽर्धे जाते इति गुरुर्लभ्यते । ऊनेऽर्धे एकमाधाय चतुर्दश क्रियन्ते इति विशेषः । एवमन्यत्र । ततः संगृहीतेऽर्धे चतु-

र्दशानामर्धीक्रियते । समत्वाल्लघुर्लभ्यते । संगृहीतेऽर्धे चतुर्दशानामर्धं क्रियते । समत्वाल्लघुर्लभ्यते । संगृहीतेऽर्धे सप्तानां विषमत्वादेकं प्रक्षिप्याष्टौ क्रियन्ते । तदर्धे गुरुर्लभ्यते । द्वितीयपक्षेऽत्र पूर्ववत् । द्वितीयपक्षे एकस्य छेदरहितत्वाद्यथोपरि तथा शेषमिति । ततः संगृहीतेऽर्धे चतुर्णामर्धे कृते समत्वाल्लघुर्लभ्यते । पुनः संगृहीतेऽर्धे द्वयोः समत्वादर्धे लघुर्लभ्यते । एकस्य विषमत्वाद्गुरुरिति । द्वितीयपक्षे एकस्य छेदरहितत्वाद्यथोपरि तथा शेषमिति गुरुरिति । तदित्थं व्यक्तिरूपं लब्धम् । ।।ऽ।ऽ।।ऽ; एवमन्यत्रापि कुर्यादिति पादप्रस्तारे नष्टव्यक्त्यानयनप्रत्ययः ।

अथ मात्रावृत्तानां वर्णवृत्तानां वा समुद्रे एकेनैव न्यायेन नष्टव्यक्तिज्ञानाय संप्रदायादस्य सूत्रस्य व्याख्याविशेष उच्यते । नष्टस्येत्यादि । इह द्वितीये व्याख्याने छेदवचनमर्धग्रहणं जातिस्थानोचितविकल्पसंख्याया भागहारस्योपलक्षणम् । विषमग्रहणं तथा भागहरणे कृते राशिशेषे सति लब्धस्योपलक्षणम् । अथास्यान्वयः । भवेत् । कः । लः इति जातिस्थानोचितप्रस्तारे लघूपलक्षितोऽन्त्यो गणः । कस्मिन् सति । अर्धे इति विकल्पसङ्ख्याया भागहरणे । किंविशिष्टे । समे इति निरवशेषे । क्व भवेत् । कः । अङ्कः इति राशिः । कस्य । नष्टस्य । अथ द्वितीयार्धो व्याख्यायते । भवेत् । कः । गुरुः इति गुरूपलक्षितः गुरुर्गणः । कस्मिन् सति । पूर्ववदर्धे सति । किंविशिष्टे । विषमे इति सशेषे । यदा सशेषः छेदे दृष्टस्तदा लब्धे एकमाधाय पुनः पुनर्गुरुलाभव्यवहारः प्रवर्तयितव्यः आव्यक्तिस्वरूपलाभात् ।

नष्टाङ्कस्यार्धविच्छेदे वर्णवृत्तेषु युक्ततः ।
विकल्पोऽर्हणस्यायमार्यादावुपलक्षकः ।।

तत्रैकमर्धमात्रं यद् भूयो भूयोऽर्धकल्पत्तये ।
हृते विकल्पैर्लब्धं तत् विषमे न्यूनमेव तत् ।।

एकोऽधिके दले शेषं तुलाभावोऽत्र संख्यया ।
शेषस्य तुल्यं गदति गणमेवं मतिर्मम ।।

वृत्तद्वयीमुपक्रम्य कथमेकत्र दर्शयेत् ।
नष्टानयनविज्ञानमिति तत्साध्यमुच्यते ।।

विकल्पहृतनष्टाङ्के संशुद्धेऽन्त्यगणो भवेत् ।
लब्धेऽप्येवं पुनः कुर्याच्छेषे तावतिथस्तदा ।।

सैकं लब्धं विधायैवं भूयो भूयः प्रयोजयेत् ।
आ लाभान्नष्टरूपस्य कृत्स्नस्याखिलजातिषु ॥

अधिके भागहारेऽस्मान्मूलराशिस्तु शेषवत् ।
लब्धाभावे व्यक्तिशेषमाद्यव्यक्तिसमं सृजेत् ॥

अथोभयरूपवृत्तव्यापिनानेन यथा मात्रावृत्तानामपि नष्टरूपकेवलव्यक्तिविज्ञानार्थमालापः प्रतन्यते । तद्यथा । आर्यासमुद्रप्रस्तारे विंशत्युत्तरसहस्रतमी पथ्याव्यक्तिर्नष्टा । सा समुद्रमनपेक्ष्यैव केवलं कथं व्यक्तीभवतीत्युक्ते तन्निदर्शनाय पूर्ववद्विंशत्युत्तरसहस्राङ्को भूमौ स्थाप्यते । तत्र विकल्पहृतनष्टाङ्के इति वचनात् प्रथमगणस्थानविकल्पैश्चतुर्भिर्भक्ते नष्टराशौ लब्धं भूमौ संस्थाप्यते, अग्रेसरगणनय (नाय) । यथा ।
२१५ | निःशेषो राशिर्गतः इति संशुद्धेऽन्त्यगणो भवेत् इति वचनाच्च विकल्पप्रस्तारस्थितोऽन्त्यगणो नलघुर्लब्धः । सः व्यक्तिस्वरूपनिदर्शनाय भूमौ स्थाप्यते । यथा ।।।।; लब्धेऽप्येवं पुनः कुर्यात् इति वचनाद् द्वितीयगणविकल्पैः पञ्चभिर्लब्धं भज्यते । ततो यल्लब्धं तत् स्थाप्यते । यथा ५१ ॥ तत्रापि निःशेषगतत्वाद् अन्त्यो नलघुरेव लब्धः । पूर्ववद्धरायां निधीयते । यथा ।।।।; लब्धेऽप्येवं पुनः कुर्यात् इति तृतीयगणविकल्पैश्चतुर्भिः पूर्ववल्लब्धे भक्ते सति पुनरग्रेतनगणोत्पादनाय लब्धं क्षितौ निक्षिप्यते । यथा १२ ॥ भागहरणे च सत्यत्र त्रितयमवशिष्टं तेन शेषे तावतिथो गणः इति वचनाद्विषमगणस्थानप्रस्तारोचिततृतीयः आदिगुरुः पूर्ववदिलानिलीनः क्रियते । यथा ऽ।।; सशेषत्वान्मूलराशेः तदा सैकं लब्धं विधाय इति वचनाद् द्वादशे एकस्य ध्रुवकरूपस्य निक्षेपात् त्रयोदश । एवं भूयो भूयः प्रयोजयेत् इति वचनाच्चतुर्थगणविकल्पैः पञ्चभिर्विभज्यते । लब्धौ द्वौ । पूर्ववत् स्थाप्येते यथा २ ॥ शेषास्त्रय इति पूर्वसमस्थानतृतीयगणः स्थिरायां स्थितिं लभते । यथा ।ऽ।; सशेषत्वात् पूर्ववल्लब्धं सैकं क्रियते यथा ३ ॥ ततो अग्रेतनगणानयनाय पञ्चमगणविकल्पैश्चतुर्भिर्लब्धस्य भागहारे कल्पयितव्ये इह लब्धाद्भागहारोऽधिकः इति अधिके भागहारे स्यान् मूलराशिस्तु शेषवत् इत्यतिदेशात् स्वस्थानोचिततृतीयगणं वसुमतीमासादयति यथा ऽ।; ततो लब्धस्याभावाद् गणानयनाभाव इत्यग्रे कथं व्यक्तिं पूरयेदित्याकाङ्क्षायामाह लब्धाभावे व्यक्तिशेषमाद्यव्यक्तिसमं सृजेत् इति वचनाच्छेषं सर्वगुरुव्यक्तिवत् पूरयेदिति स्थितम् । तदेवं लब्धरूपं ।।।।, ।।।।, ऽ।।, ।ऽ।, ऽ।।, ऽऽ, ऽऽ, ऽ इति पूर्वार्धो द्वितीयार्धं तु सर्वगुर्वेवेति न विशेषः । एवं वैतालीयवत् मात्रासमकोक्तादिसमुद्देषु नष्टव्यक्त्यानयनार्थं छन्दोविचितिवेदिना व्यवहर्तव्यमिति स्थितम् । इति सर्वव्यापी नष्टव्यक्त्यानयनप्रत्ययः ॥ (२३७)

सुकविहृदयानन्दिनी

(२३७) इदानीं प्रस्तारादनन्तरं नष्टं व्याख्यातुमाह । प्रस्तारे दर्शितानां वृत्तानां मध्ये यद्वृत्तं नष्टं लुप्तं भवति तस्य नष्टस्य यो भवेदङ्कः एकादिसंख्या तस्य अर्धेऽर्धे कृते समे च अङ्के सति लो लघुर्भवति । विषमे एकमाधाय प्रक्षिप्य तस्य अर्धेऽध गुरुर्भवेत् । यथैतस्मिन्नेव छन्दसि पञ्चमं वृत्तं नष्टं तस्य अङ्कः पञ्च । स च अर्धं ततः तन्न प्रयच्छति । यदि सैकः क्रियते तदा षड् भवन्ति । अर्धी क्रियन्ते । अर्धितास्त्रयो भवन्ति । तदार्धे गुरुः प्राप्यते । पुनस्त्रयोऽर्धं न प्रयच्छन्ति सैका जाताश्चत्वारस्तेऽर्धितास्तदर्धे पुनर्लब्धो गुरुः । द्वयोः समत्वात् तदर्धे लघुः प्राप्यते । पुनरेकोऽर्धं न प्रयच्छति । सैको द्विर्जातस्तदर्धे पुनरपि गुरुरेव लभ्यते । नष्टस्योद्धरणं तथा च आद्यौ द्वौ गुरू ताभ्यां पर एको लघुस्ततो गुरुरिति ऽऽ।ऽ; एतत् चतुरक्षरछन्दसि पञ्चमं वृत्तं भवति ।।(२३७)

छन्दोवृत्तिः

(२३७) अस्यैवोपयोगि नष्टमाह—

अत्रायं क्रमः । यदा किंचिद्वृत्तं चतुर्थं पञ्चमं वान्यद्वा नष्टं तदा नष्टस्य समो योऽङ्को भवेत् तस्यार्धे दले कृते ल इति लघुर्लभ्यते । पुनरर्धेऽर्धे लघवो लभ्यन्ते । अथ चेद्विषमाङ्कः स्यात् । तदा एकं निक्षिप्य दले कृते गुरुर्भवेदिति धातूनामनेकार्थत्वाल्लभ्यते । पुनस्तथेति नष्टमानीयते । यथात्रैव त्र्यक्षरछन्दसि पञ्चमं वृत्तं नष्टम् । पञ्चसु विषमत्वादेकं निक्षिप्य जाताः षट् । तदर्धे गुरुः । पुनस्त्रयाणां वैषम्यादेकमाधाय चत्वारस्तदार्धगुरुद्वयोरर्धे एक इति लघुः द्वौ गौ एको लः ईदृशं पञ्चमं वृत्तम् ऽऽ। इति नष्टविधिर्ज्ञेयः ।। (२३७)

पञ्जिका

(२३७) नष्टस्य वृत्तस्य योऽङ्कः चिह्नसङख्या भवेत् तस्याङ्कस्य समे युग्मपक्षे अर्धेऽर्धे अर्धीकृते अर्धीकृते सति लश्च लघुरेव लभ्यते । चेत्यत्रावधारणे । अस्याङ्कस्य विषमे अयुग्मपक्षे एकमाधाय अङ्कमेकमेकं निक्षिप्यं अर्धेऽर्धे अर्धीकृते अर्धीकृते सति गुरुश्च गुरुरेव भवेत् । तद्यथा— मध्यायां छन्दसि चतुर्थं वृत्तं नष्टं विस्मृतं तत्कथमिति केनापि पृष्टे नष्टस्य वृत्तस्य या सङख्या तामर्धीकुर्यात् । तदा चतुर्णामर्धं द्वयं भवति । तस्यार्धेऽर्धे समे च ल इति वचनात् अर्धीकृतं द्वयं पृथक् स्थापयित्वा समस्यार्धीकरणा-

२३८. उद्दिष्टं द्विगुणानङ्कानुपर्याद्यात् समालिखेत् ।
लघुस्थाने तु येऽङ्काः स्युस्तैः सैकैर्मिश्रितैर्भवेत् ॥

ल्लघुं न्यसेत् । पूर्वं स्थापितं द्वयं पुनर्धीकृत्य एकं पुनः पृथक् स्थापयित्वा पुनः समस्यार्धीकृतत्वाल्लघुं न्यसेत् । स्थितस्यैकस्य समत्वादर्धं कर्तुमशक्यतया हस्तादेकं संयोज्य पुनरेवार्धीकृत्य विषमस्यार्धीकृतत्वाद् गुरुं विन्यसेत् । तदा सनदी इति वृत्तं दृष्टम् । अस्य छन्दसः व्यक्षरवृत्तत्वात् पुनरर्धीकरणं न सम्भवति । एवमन्येषामपि छन्दसां यावद्वृत्ताक्षरं तावदेव एवं विदध्यात् ॥

॥ इति नष्टवृत्तविधिः ॥ (२३७)

तात्पर्यटीका

(२३८) अथ पादप्रस्तारपक्षे उक्तादिबन्धिन्यामभीष्टायां व्यक्तौ दृष्टायां स्वजाति-समुद्रे कतिथी व्यक्तिरियमिति पृष्टे कथं नाम एतावतिथीमिति जानीयादित्य-पेक्षायामाह ।

अस्यान्वयः । समालिखेत् । कान् । अङ्कान् । किंविशिष्टान् । द्विगुणान् । इहा-वधिभूतमङ्कमनपेक्ष्य निरूप्यमाणं द्विगुणत्वमेकस्मादारभ्य वेदितव्यम् । तत्र संनिहित-पूर्वपूर्वाङ्कापेक्षया उत्तरोत्तरमङ्कं द्विगुणं द्विगुणं समालिखेत् । क्व समालिखेत् । उपरि ऊर्ध्वम् । कस्मादूर्ध्वम् । आद्यात् । आदावुक्तमाद्यम् । अयमभिप्रायः । आनयनवाक्यस्य प्रमुखे यदुद्दिष्टम् शब्देनाभिहितम् व्यक्तिस्वरूपं तस्मादित्यर्थः । तत्राङ्कानां वर्णानां च यथासंख्यमवगन्तव्यम् । व्यक्तिन्यूनाधिकद्विगुणाङ्ककल्पने प्रमाणाभावात । ततः किं त्यादि-याह । भवेत् । किम् । उद्दिष्टमिति एतावत्संख्याकं प्रस्तारे व्यक्तिस्वरूपमिद-मिति । कैर्भवेत् । तैः । तैरिति कैः । ये सन्ति । ये इति के । अङ्काः । किंविशिष्टाः । लघुस्था । उद्दिष्टव्यक्तौ लघूनामेवोपरि ये सन्ति त एवमुच्यन्ते तैः । किंविशिष्टैः । सैकैः । एकेन ध्रुवकरूपेण सहितैः । पुनः किंविशिष्टैः । मिश्रितैः । एकराशीकृतै-रित्यर्थः । तत्रायमुदाहरणप्रदर्शनायालापः । । ऽ । ऽ । । ऽ; इदं व्यक्तिस्वरूपमनुष्टुभि जातौ कतिथं भवतीत्युक्ते इदमीदृशमेव क्षितौ प्रविरलं ध्रियते । तस्मादुपरि द्विगुणा-नाद्यादुपर्यङ्कान् समालिखेत् इति वचनात् प्रत्यक्षरं क्रमेण एकस्मादारभ्य द्विगुणानङ्कान्

समालिखेद्यथा । । ऽ । ऽ । । । ऽ एवं स्थापिते सति लघुस्था ये तु
१, २, ४, ८, १६, ३२, ६४, १२८
तत्राङ्काः तैः सैकैर्मिश्रितैर्भवेत् इति वचनादेतद्व्यक्तौ लघुस्थितमेकं द्वावष्टौ द्वात्रिंशच्चतुःषष्टिं च संगृह्णीयात् । तत्रैकं ध्रुवकरूपं च क्षिपेत् । एतस्मिन् मिश्रेण जातो राशिः १०८ । अनेनाष्टोत्तरशततमीयं व्यक्तिरिति ब्रूयात् । एवमन्यत्रापि । अनेन विधिना य उपलक्षितो वृत्तद्वयीव्यापकोऽस्त्युद्दिष्टव्यक्त्यानयनप्रकारः स इह व्युत्पादनाय पद्यबन्धेन प्रतिपाद्यते । यथा—

स लघ्वंशाद् विधेः कल्पैः स्वाधःस्थांशविशोधितैः ।
पाश्चात्यानेवमभ्यस्येत् प्रतिलोमं मुहुर्मुहुः ॥

प्रत्येकं साधयेदाद्यमभिव्याप्यांशसंचयम् ।
जातिद्वयेऽप्यन्त्यराशिः स्यादुद्दिष्टं न संशयः ॥

अत्रालापो यथा आर्यासमुद्रप्रस्तारे— ।।।।, ।।।।, ।ऽ।, ऽ।।, ।ऽ।, ऽऽ, ऽ इति पूर्वार्धम् । ऽऽ, ऽऽ. ऽऽ, ऽऽ, ।, ऽऽ, ऽ इत्युत्तरार्धम् । इयं कतिथी व्यक्तिरिति पृष्टे सलघ्वंशाद्विधेः इति वचनात् समुद्रप्रस्तारे सूत्रेण योऽस्त्यन्त्यादिगुरुः पञ्चमो गणस्तस्मादारभ्य विकल्पैः स्वाधःस्थांशविशोधितैः पाश्चात्यानेवमभ्यस्येत् इति वचनात् तस्मिन् सलघौ पञ्चमे गणे ये सन्ति विकल्पाश्चत्वारस्ते स्वाधःस्थांशविशोधिताः क्रियन्ते । ततस्तत्र त्रयोऽवशिष्टा भवन्ति । तैः पाश्चात्यगणस्थिताः पञ्च विकल्पा गुण्यन्ते । तत्र लब्धं यथा १५ । एवं प्रतिलोमं मुहुर्मुहुः प्रत्येकं साधयेदाद्यमभिव्याप्यांशसंचयम् इति वचनात् ते पञ्चदश जगणस्य स्वाधःस्तनांशाभ्यां शोधितास्त्रयोदशावशिष्यन्ते । तैस्त्रयोदशभिः पाश्चात्यादिगुरुगणस्थिताश्चत्वारो गुण्यन्ते । तत्र जाते यथा ५२ । तेषु स्वाधस्तनांशविशोधितेषु जाते यथा ५१ । तैः पाश्चात्यगणस्थिताः पञ्च गुण्यन्ते । तत्र लब्धं यथा २५५ । तत्राधस्तनगणा न सन्तीति विशोधनमपि नास्तीति तैरादिगणस्थिताःचत्वारः गुण्यन्ते । तत्र लब्धं यथा १०२० । तत्रापि विशोधनाभावः । जातिद्वयेऽप्यन्त्यराशिः स्यादुद्दिष्टमसंशयम् इति वचनात् विंशत्युत्तरसहस्रतमीयं व्यक्तिरिति ब्रूयात् । अथ वक्त्राम्बुधौ— ।, ऽऽ।, ।ऽऽ, । प्रथमपादः । ।ऽ।।, ।ऽऽऽ इति द्वितीयः । शेषं द्वयं यथालक्षणं सर्वगुरु । इयं व्यक्तिः कतिथीत्युक्ते प्रस्तारलब्धो द्वितीयपादस्थः सलघुरिह भगणः, तस्मादारभ्य प्रतिलोमं विधिः क्रियते । भगणादधो गणो नास्तीति तत्रस्थाः षट् शुद्धा एव । तैः पाश्चात्यौ द्वौ गुण्येते १२ । इहाप्यधस्थगणो नास्तीति विशोधनाभावः । तैः पाश्चात्यौ

द्वौ गुण्येते जाताः २४ । स्वाधस्तनशुद्धाः २३ । पुनरेकेन गुणितं तदेवेति न विशेषः । तैस्त्रयोविंशत्या षड् गुण्यन्ते जाताः १३८ । अधो विशुद्धाः १३६ । तैर्द्वौ गुण्येते जाताः २७२ । इहाधोविशुद्धिर्नास्ति तेन द्वासप्तत्युत्तरशतद्वयपूरणी वक्त्राम्बुधौ व्यक्तिरियमुद्दिष्टेति ब्रूयात् । एवमन्यत्रापि । इति सर्वव्याप्युद्दिष्टव्यक्त्यानयनप्रत्ययः ॥

(२३८)

सुकविहृदयानन्दिनी

(२३८) अथोद्दिष्टं व्याख्यातुमाह—

केनचिद् वृत्तं प्रस्तार्य कतमदिदमिति संख्यापरिज्ञानार्थमुक्तं यत्तदुद्दिष्टमुच्यते । पूर्वत्र वृत्तं न ज्ञायते लुप्तत्वात् । संख्यापि न ज्ञायते अतः संख्यया नष्टमुद्धियते । अत्र पुनर्वृत्तं ज्ञायते संख्या न ज्ञायतेऽतः संख्यापरिज्ञानार्थमुद्दिष्टमिदमुच्यते । तस्य उद्दिष्ट-वृत्तस्य प्रथमाक्षरादारभ्य उपरि द्विगुणानङ्कान् समालिखेत् । यथा अस्मिन्नेव चतुरक्षरे छन्दसि एकं वृत्तमुद्दिष्टम् । तस्य द्वौ वर्णौ गुरू ततो लघुस्ततोऽपि गुरुः । तत्र उद्दिष्टे वृत्ते लघूनि तिष्ठन्तीति लघुस्था ये पुनरङ्काः चत्वारस्तैश्चतुर्भिः सैकैः पञ्चभिः सहितै-रुद्दिष्टं भवेत् उद्दिष्टसंख्या भवेत् । चतुरक्षरजातौ तत् पञ्चमं वृत्तं भवतीत्यर्थः ॥

(२३८)

छन्दोवृत्तिः

(२३८) उद्दिष्टस्य लघुगुरून् संस्थाप्य तेषामुपरि आद्यात् द्विगुणानिति स्थानद्विगुणा-नङ्कान् लिखेत् । तत्र ये लघुस्थास्तैर्मिश्रैर्मिलितैः सैकैरुद्दिष्टं स्यात् । यथा– अस्मिन्नेव व्यक्षरे प्रस्तारे आदौ द्विगुरुकं अन्ते लघुः ईदृशं वृत्तं दृष्टं तस्य लघुगुरून् लघून् गुरून् प्रस्तार्य प्रथमेऽक्षरे एके एकः, द्वितीये द्विकः, तृतीये चतुष्कः । लघोरन्त्यस्योपरि यश्च-तुष्कः स एकेन मिश्रः । पञ्चमं तद्वृत्तमिति । इत्युद्दिष्टविधिः ॥ (२३८)

पञ्जिका

(२३८) उद्दिष्टं भवेदिति संबन्धः । उद्दिष्टं नाम पृष्टं वृत्तम् । तत् कथम् । उद्दिष्टस्य वृत्तपादस्य आद्यात् प्रथमवर्णाधस्तादेकमङ्कं लिखित्वा उपरि प्रथमाक्षरादूर्ध्वं द्वितीयतृतीयादिभ्योऽक्षरेभ्योऽधस्तात् द्विगुणानङ्कान् क्रमेण द्विरभ्यस्तानङ्कान समालिखेत् विन्यसेत् । अङ्को नामात्र संख्याज्ञापको रेखाविशेषः । स च प्रतिदेशं भिन्नाकृतिः ।

२३९. **वर्णान् वृत्तभवान् सैकानौत्तराधर्यतः स्थितान् ।**
एकादिक्रमशश्चैतान् उपर्युपरि निक्षिपेत् ॥

२४०. **उपान्त्यतो निवर्तेत त्यजन्नेकैकमूर्ध्वतः ।**
उपर्याद्याद् गुरोरेवमेकद्व्यादिलगङ्किया ॥ (युग्मम्)

तेषामङ्कानां मध्ये लघुस्थाने लघुवर्णाधःस्थाने ये त्वङ्काः स्युः तैरङ्कैः सैकैः एकसहितैः मिश्रितैरिति पिण्डीकृतैः सद्भिः उक्तं वृत्तं जायते इत्यर्थः । तद्यथा-- मध्यायां छन्दसि 'रो मृगी' वृत्तं कतितममिति केनचिदुद्दिष्टे सति तदा तद्वृत्तं पाठक्रमेण लिखित्वा रोकारस्याधस्तादङ्कमेकं विलिख्य तमङ्कं द्विगुणीकृत्य मृकारस्याप्यधस्तात् द्वाविति लिखित्वा तमङ्कं पुनर्द्विगुणीकृत्य गीकारस्याधोऽपि चत्वार इति लिखेत् । तदा मृकारस्य लघोः स्थाने द्विसङ्ख्यातो योऽङ्कस्तिष्ठति, एकसहितेन तेनाङ्केन तृतीयं वृत्तमिति ब्रूयात् । एवमन्यत्राप्यवगन्तव्यम् ॥ (२३८)

॥ इत्युद्दिष्टपादसङ्ख्याविधिः ॥

तात्पर्यटीका

(२३९, २४०) उक्तादीनां जातीनां मध्ये नष्टाया जातेः समुद्रप्रस्तारे यथासंभवमेकलघुद्विलघुत्रिलघुप्रभृतयः प्रत्येकं संकलिता व्यक्तयः कथं ज्ञायन्ते इत्यपेक्षायामाह ।

अस्यान्वयः । निक्षिपेत् निदध्यात् । एतानिति कान् । वर्णान् । प्रतिवर्णं स्थितमेकत्वमिह वर्णशब्देनोच्यते । मञ्चाः क्रोशन्तीतिवत् । किंविशिष्टान् वर्णान् । वृत्तभवान् । वृत्ते सन्ति वृत्तभवा वर्णाः । वृत्तमिह वर्णवृत्तेषु प्रस्तारसूत्रोक्तपादो गृह्यते । पुनः किंविशिष्टान् वर्णान् । सैकान् । ध्रुवकरूपेणैकेन संयुक्तान् । पुनः किंविशिष्टान् । स्थितान् । कथम् । औत्तर्याधर्यतः । उत्तरे च अधरे उत्तराधरवर्णाः उत्तराधराणां भावः औत्तराधर्यम् । तेन औत्तराधर्येण औत्तराधर्यतः । सार्वविभक्तिकस्तसिः । कथं निक्षिपेत् । एकादिक्रमशः । एक आदिर्येषां ते एकादयः, एको द्वौ त्रय इत्यादयः । एकादीनां क्रमः एकादिक्रमः । तेन एकादिक्रमेण एकादिक्रमशः । एकार्थात् वीप्सायां शस्तद्धितः । क्व निक्षिपेत् । उपर्युपरि इति उपरिस्थिते

उपरिस्थिते राशौ । ततः किं कुर्यात् । निवर्तेत व्यावर्तेत । कः कर्तेत्यर्थः । कस्मात् । उपान्ततः । अन्तस्य समीपम् उपान्तं तस्मादुपान्ततः । पञ्चम्यास्तसिः । अन्त्याङ्क-समीपादित्यर्थः । किं कुर्वन् । त्यजन् । कम् । एकैकम् । क्व । ऊर्ध्वतः पूर्वेतेतः (?) । का भवेत् । एकद्व्यादिलघुक्रिया भवेत् । एको द्वौ आदौ येषां ते एकद्व्यादयः । ते च ते लघवश्च एकद्व्यादिलघवः । इह लघुशब्देन लघूपलक्षिता व्यक्तयो गृह्यन्ते । तेषां क्रिया समुद्रादयः एकद्व्यादिलघुक्रिया । एकलघुद्विलघुत्रिलघुप्रभृतयः समुदाया जायन्ते यस्मिंस्तल्लघुक्रिया नाम यन्त्रमित्यर्थः । अनेन एकलघुप्रभृतिसमुदायज्ञाने जाते सति प्रत्ययार्थं समुद्रप्रस्तारे कस्माद्व्यक्तिविशेषाच्चरणैकलघुद्विलघुप्रभृतीनां गणनं कर्तव्य-मित्यपेक्षायामाह– आद्यादिति सर्वगुरोर्व्यक्तिविशेषादधोऽधः इत्यर्थः । नन्वनेन यन्त्रेण लघुक्रियाज्ञाने जाते पद्यगुरुक्रियाज्ञानं कथं स्यादित्यपेक्षायामाह–– एवमनेन यन्त्रेण गुरोरपि क्रियेत्यध्याहारः । एवमेकगुरुप्रभृति समुदायज्ञाने सति समुद्रे कस्मादारभ्य गणनं कर्तव्यमित्यपेक्षायां संप्रदायादन्त्यादिति वाच्यम् । कथं चात्र गणनं कुर्यादित्यत्राह– उपरीति उपरिष्टादित्यर्थः ।

यावद्गणेन गणितिसिद्धावादे निरूपणम् ।
यत्राश्रितो ध्वजोऽप्यस्ति तत्रेदमुपयुज्यते ॥

इति सूचयति सूचनार्थमिति स्थितम् । अस्योदाहरणार्थमालापः । गायत्रीपादप्रस्तारे एकलघुद्विलघुप्रभृतयो व्यक्तिसमुदायाः प्रत्येकं कतिप्रमाणाः सर्वे कति सन्तीत्युक्ते वर्णान् वृत्तभवान् सैकानैत्तराधर्यतः स्थितान् इति सूत्रादेकाङ्काः सप्त औत्तराधर्येण स्थापयेद्यथा–– १, १, १, १, १, १, १, । एकादिक्रमशश्चैतानुपर्युपरि निक्षिपेत् इति वचनादाद्यमेकाङ्कं संप्रदायादविलुप्तमेवोपरिस्थिते एकाङ्के निक्षिपेत् ततस्तत्र द्वौ कुर्यात् । तद्वत् तौ द्वावुपरिष्टान्निक्षिपेत् । ततस्तत्र त्रीन् कुर्यात् । तद्वत् त्रीनुपरि निक्षिपेत् तत्र चतुरः कुर्यात् । तद्वत् तानुपरि क्षिपेत् तद्वत् पञ्च कुर्यात् । तद्वत् तानु-परि निक्षिपेत् । तद्वत् षट् कुर्यात् । तत उपान्ततो निवर्तेत त्यजन्नेकैकमूर्ध्वतः इति वचनात् अन्त्यादेकाङ्कादधस्तात् त्यागज्ञानाय तिर्यग् रेषां दद्यात् । तत्र जातं स्वरूपं यथा–– १, २, ३, ४, ५, ६, १ । भूयः कुर्यादमुं विधिमिति वचनात् पुनः पुनरेवं कुर्यात् । तत्र द्वितीयावृत्तौ जातं रूपं यथा–– १, ३, ६, १०, १५, ६, १ । तृतीया-वृत्तौ जातं रूपं यथा–– १, ४, १०, २०, १५, ६, १ । चतुर्थावृत्तौ जातं रूपं यथा–– १, ५, १५, २०, १५, ६, १ । पञ्चमावृत्तौ जातं रूप यथा–– १, ६, १५, २०, १५, ६ १ । अनेनैव कथयेत् गायत्रीप्रस्तारे आद्यात् सर्वगुरोरधस्तात् षडेकलघवो व्यक्तयो

यथास्थानं जायन्ते । पञ्चदश द्विलघवः, विंशतिस्त्रिलघवः, पञ्चदश चतुर्लघवः, षट् पञ्चलघवः एकः षळ्लघुरिति । गुरुक्रियाप्रश्नेऽप्यन्त्याद् व्यक्तिविशेषादरभ्योर्ध्वं षडेकगुरव इत्यादि पूर्ववद्रूपात् । अथ लघुक्रियाज्ञाने लघूपायो मेरुर्दर्श्यते—


सप्तविंशतिकोष्ठादिमेकहान्योत्तरोत्तरम् ।
कोष्ठ . . . र्गभिदा मेरुं द्विकोष्ठान्तं समालिखेत् ॥

एकैकं प्रान्तकोष्ठेषु दद्यात् सर्वासु वीथिषु ।
ऊर्ध्वकोष्ठद्वयाङ्केन पूरयेत्तदधस्तनम् ॥

कपाटसन्धियोगेन बिभृयादग्रपङ्क्तिजान् ।
एवं कृते त्वनायासात् प्रतिपङ्क्ति लघुक्रिया ॥

अधोऽधो मस्तकादुक्ताप्रभृतीनां विनिर्दिशेत् ।
क्रियाज्ञानाय शिष्याणां गायत्र्यादिर्निदिश्यते ॥

इति मेरुप्रस्तारसूत्रम् । मेरुर्यथा—



अभीष्टायां जातावेकलघुव्यक्तीनां प्रतिव्यक्तिस्थानज्ञानाय ध्वजाख्यं प्रस्तार-यन्त्रमुच्यते ।]

लघुक्रियाङ्कामितकोष्ठकराजिसिद्धं (?)
ध्वजं यत्खलु तिर्यगमुष्य मूले (?)।

उद्दिष्टतद्द्विगुणितैः प्रतिपूर्यं कोष्ठा-
नङ्कैः पृथक् पृथगथादिममिश्रितैस्तैः ॥ उपजातिः।

द्व्यङ्कादयोऽब्धिभृहि कोष्ठकपङ्क्तिमेभि-
रन्येन तैः शबलितैस्तदधस्तनस्थाम्।

तस्मात् परादधिकतां यदि याति मिश्रं
श्रोवृत्त्य (?) तत्परतरेण विमिश्रयेत् तत्॥

आपङ्क्तिपर्यवसितैरिति सर्वपङ्क्ती-
रापूर्य लोष्टयुगवालतयोपदेशात्।

विद्येतमेकलघुकादिपदं तदङ्कै-
. . . गात्रजध्वजनिदर्शनमत्र पश्य॥

इत्युद्दिष्टलघुश्रितो ध्वजप्रस्तारः॥ (२३९, २४०)

सुकविहृदयानन्दिनी

(२३९, २४०) एकादिलघुक्रियार्थमाह—

यावन्त एव वृत्तभुवो वर्णास्तावन्त एव सैकानेकसहितान्। यथा चतुरक्षरजातौ चत्वारो ये वर्णास्तान् सैकान् पञ्च औत्तराधर्यतः स्थितान् उपर्यधोभावेन एकादिक्रमेणैव एतान् उपर्युपरि निक्षिपेत् निदध्यात्। उपान्त्यतश्च अन्त्यस्य समीपात् निवर्तेत। व्याद्युद्येत। त्यजन् परिहरन् एकैकमूर्ध्वतः ऊर्ध्वभागादेवमनेन प्रकारेण कस्मादियमेकद्व्यादिलघुक्रिया प्रवर्तत इत्याह। उपर्याद्यादगुरोरिति उपरिस्थितादाद्यादगुरोः। कोऽर्थः। सर्वगुरुवर्णवृत्तसकाशादित्यर्थः। आद्यं किल सर्वगुर्वक्षरमेकं वृत्तं परिकल्प्यते। एतच्च प्रस्तारे दर्शितम् यथा पादे सर्वगुरावाद्याल्लघुं न्यस्येति। तेन तस्मादध इयमेकद्व्यादिलघुक्रिया प्रवर्तते। तत्र पञ्चसु वर्णेषु उत्तराधरीयभावेन स्थापितेषु अधःस्थित एकस्तदुपरिस्थे निक्षिप्यते। स च तथैव तिष्ठति त्यजन्नेकैकमूर्ध्वतः इति वीप्सावशादेकदैव स्थितिमन्तरेण निक्षिप्तत्वात् पुनर्निक्षेपाभावात् एकैकत्यागश्च

न सम्भवति । तस्मात् स्वरूपेण स्थित एव उपरि क्षिप्यते । ततो द्वितीये स्थाने द्वौ वर्णौ भवतः तौ च तृतीये निक्षिप्येते । तत्र त्रयो भवन्ति, तच्चयथा ते चतुर्थे निक्षिप्यन्ते । तत्र चत्वारो भवन्ति । उपान्त्यतो निवर्तेत त्यजन्नेकैकमूर्ध्वतः । उपरितनमेकं स्थानं त्यज्यते तत्र निक्षिप्यते इत्यर्थः । वीप्सा अत एव अधोभागात् पुनर्निक्षेपक्रिया प्रवर्तते तेन अधःस्थित एव एको द्वितीयस्थाने निक्षिप्यते । तत्र त्रयो भवन्ति ते च तृतीये निक्षिप्यन्ते तत्र षड् भवन्ति । उपर्येकं त्यजन्निवर्तेत । पुनरेको द्वितीये निक्षिप्यते तत्र चत्वारो भवन्ति । ततोऽप्येकं उपरि त्यजन्निवर्तेत । आद्यमेकं वृत्तं सर्वगुरु । तदेकद्व्यादिलघुक्रिया प्रवर्तते । तदेकलघूनि चत्वारि, द्विलघूनि षट्, त्रिलघूनि चत्वारि, एकं सर्वलघु । एषा लघुक्रिया सलघुपर्यन्तप्रस्तारे प्रतीयते । अस्यास्तु एषैव क्रमः पञ्चाक्षरादिवृत्तेष्वपि ॥ (२३९, २४०)

छन्दोवृत्तिः

(२३९, २४०) अथ सवकादिषु लघुक्रियापरिज्ञानार्थं श्लोकद्वयमाह ।

वर्णान् वृत्तभवानिति । यावन्तो वृत्ते वर्णास्तावन्तः सैकान् एकसहितान् । उत्तराधर्यतः स्थितान् एकैकान् उपरि उपरि स्थितान् कृत्वेत्यध्याहार्यं । तत एतान् एकादिक्रमेण उपर्युपरि क्षिपेत् । उपान्त्यतो निवर्तेत परमुपान्त्यात् निवर्तेत । तथा एकैकमूर्ध्वतः त्यजेत् मुञ्चेत् । पुनः पुनरेवं कृते य उपरि आद्योऽङ्कः तस्मात्सर्वगुरोरपराङ्कतुल्या एकद्व्यादिलघूनां क्रिया करणमित्यर्थः । यथा चतुरक्षरे छन्दसि पञ्चैककाः उपर्युपरि न्यस्यन्ते । ततोऽधस्तनो द्वितीये क्षिप्यते, द्वितीयोऽपि तृतीये, तृतीयोऽपि चतुर्थे । उपान्त्यतो निवर्तेत इति वर्जनादन्त्यो वर्ज्यते । पुनरधस्तनो द्वितीये क्षिप्यते, द्वितीयोऽपि तृतीये । त्यजेदेकैकमूर्ध्वत इत्युक्तात् पुनः पुनर्यथाऽन्त्योऽन्त्यो मुच्यते । पुनरधस्तनो द्वितीये क्षिप्यते । तत्र जातं प्रथममेकं सर्वगुरुर्यथा ऽऽऽऽ । चत्वारि एकलघूनि, षट् द्विलघूनि, चत्वारि त्रिलघूनि, एकं सर्वलघु छन्दः । इयमेव एकद्व्यादिलघुक्रिया । षष्ठैकादशषोडशसमवृत्तहान्या द्व्यक्षरार्धसमस्य यथा अत्र चत्वार्येकलघूनि चत्वारि त्रिलघूनि छन्दांसि, एवमन्येष्वप्यर्धसमेषु ज्ञेयम् । तथा अष्टाक्षरजातेरेकद्व्यादि-

४

लघुक्रिया यथा ४ अत्र सङ्ख्याकथनं पूर्ववत् । एषैव एकद्व्यादिलघुक्रिया षोडशसु पूर्व-

४

वत् पातितेषु द्व्यक्षरविषमस्य भवति । यथा स्थापना । अत्रापि सङ्ख्याकथनं पूर्ववत् ज्ञेयम् । एवमन्येष्वपि विषमेषु भवति ॥ (२३९ २४०)

पञ्चिका

(२३९, २४०) इह वृत्तशब्दश्छन्दोवाचकः । वृत्ते छन्दसि भवान् जातान् वृत्तभवान् वर्णान् । किंभूतान् । सैकान् वृत्तसङ्ख्याक्षरादधिकेनैकेन सहितान् । पुनः किंभूतान् । औत्तराधर्यतः स्थितान् । उत्तरश्चाधरश्च उत्तराधरौ तयोर्भावः औत्तराधर्यम् । औत्तराधर्येण शङ्क्वाकारेण स्थितान् कृत्वेत्यध्याहार्यम् । स्थापितानेतांश्च वर्णानिति एकादिक्रमशः एकद्व्यादिक्रमेण उपर्युपरि ऊर्ध्वमूर्ध्वम् निक्षिपेत् योजयेत् । अत्र वर्णशब्दो वृत्तसङ्ख्यासङ्केतज्ञापकरेखाविशेषः ।

ऊर्ध्वतः उपान्तादुपान्तादुपरि एकैकम् एकमेकमङ्कम् त्यजन् परिहरन् उपान्त्यतः अधस्तादन्त्यस्य समीपात् निवर्तेत विरमेत । अन्त्यस्य समीपमुपान्त्यमित्यव्ययीभावः । गुरोरिति मर्यादायां पञ्चमी । उपरि ऊर्ध्वम् आद्यात् प्रथमात् गुरोः सर्वगुरुपादादारभ्य एकद्व्यादिलगक्रिया स्यादित्यध्याहार्यम् । एवमिति एवमुक्तप्रकारेण । अधस्तादन्त्याल्लघोः सर्वलघुपादादारभ्य । एकद्व्यादिलगक्रिया । एकलघु, द्विलघु, त्रिलघु; एकगुरु, द्विगुरु, त्रिगुर्वादि सङ्ख्या भवेदिति शेषः । तद्यथा सुप्रतिष्ठायां छन्दसि । अस्य छन्दसः पञ्चवर्णत्वादेतान् पञ्चवर्णान् एकसहितान् कृत्वा षडङ्कान् एकमेकं विधाय उपर्यधोभावेन शङ्क्वाकारेण विलिखेत् । तत्राद्यमधःस्थितमङ्कं द्वितीयेऽङ्के योजयेत् । तद्द्वयं तृतीयेऽङ्के योजयेत् । तत्त्रयं चतुर्थेऽङ्के योजयेत् । तच्चतुष्टयं पञ्चमेऽङ्के योजयेत् । तस्मात्पञ्चमादुपान्त्यान्निवृत्य पुनराद्यमङ्कं द्वितीयेऽङ्के निक्षिप्य त्रयं पश्येत् । तत्त्रयं तृतीयेऽङ्के निक्षिप्य षट्कं पश्येत् । तत्षट्कं चतुर्थेऽङ्के निक्षिप्य दशकं पश्येत् । तस्माच्चतुर्थादुपान्त्यान्निवृत्य पुनराद्यमङ्कं तृतीयेऽङ्के सङ्कलय्य चतुष्कं पश्येत् । तच्चतुष्कं षट्केऽङ्के सङ्कलय्य दशकं पश्येत् । तस्मात्तृतीयादुपान्त्यान्निवृत्य पुनराद्यमङ्कं चतुष्केऽङ्के संयोज्य पञ्चममङ्कं पश्येत् । तस्माद्द्वितीयादप्युपान्त्यान्निवृत्य राशिं पुनर्न वर्धयेत् । ततः स्थापितरूपं तावदेकं, पञ्चकं, दशकं, पुनर्दशकं, पञ्चकमेकमिति संभूय द्वात्रिंशत् । ततः उपरिष्टादारभ्य गुरुवृत्तानि । तथाधस्तादारभ्य लघुवृत्तानि च गणयेत् । तत्रोपरिष्टादारभ्य गुरुवृत्तगणना यथा,-- पञ्चगुरु वृत्तमेकम् । चतुर्गुरूणि वृत्तानि पञ्च । त्रिगुरूणि वृत्तानि दश । द्विगुरूणि वृत्तानि दश । एकगुरूणि वृत्तानि पञ्च । अधस्तादारभ्य लघुवृत्तगणना यथा,-- पञ्चलघु वृत्तमेकम् । चतुर्लघूनि वृत्तानि पञ्च । त्रिलघूनि वृत्तानि दश । द्विलघूनि वृत्तानि दश । एकलघूनि वृत्तानि पञ्चेति । एवं छन्दसि सर्वत्र उन्नेयम् ॥ इत्येकद्व्यादिगुरुलघुसङ्ख्याविधिः ॥ (२३९, २४०)

२४१. लगक्रियाङ्कसन्दोहे भवेत् सङ्ख्याविमिश्रिते ।
उद्दिष्टाङ्कसमाहारः सैको वा जनयेदिमाम् ॥

तात्पर्यटीका

(२४१) अथ वृर्णवृत्तेष्वभीष्टजाते: प्रस्तारव्यक्तिसंख्याज्ञानायोपायं सूचयन्नाह ।

लघुक्रिया० इत्येक: उपाय: । उद्दिष्टा० इति संख्यानयने पाठप्रस्तारपक्षे द्वितीय: उपाय: । सूत्रद्वयं सुगमम् । इह संख्यानयने प्रकारद्वयदर्शनमित: पूर्वेषां प्रत्ययानां स्थालीपुलाकन्यायेन प्राय: प्रकारद्वयमस्तीति ज्ञापनार्थम् । तथैवास्माभि: पूर्वग्रन्थे व्याख्यातमिति स्थितम् । अथ संख्यानयने सर्वव्यापी प्रकार: पद्येन प्रतिपाद्यते । यथा—

उत्तरोत्तरघातेन चरमांशगतोच्चिति: ।
विकल्पानां जातिसंख्या जायते सर्वजातिषु ॥

अनेनैव प्रकारेण मात्रावृत्तेषु व्यक्तिसंख्यानयनमुपदर्शितमेवेति इह नोदाहृ्यते ॥ (२४१)

सुकविहृदयानन्दिनी

(२४१) लघुक्रियायां येऽङ्कास्तेषां सन्दोहस्तस्मिन् विमिश्रिते पिण्डीकृते संख्या भवेदियम् । तावद्वारणं स्यात् । यथा एकश्चत्वार: षट् चत्वार एकमेषामेकीकृत्य वै षोडश भवन्ति चतुरक्षरजातौ प्रस्तार्यमाणायां षोडशवृत्तानि भवन्तीत्यर्थ: । स च प्रस्तार: पूर्वमेव व्याख्यात: । पक्षान्तरमाह । उद्दिष्टस्य वृत्तस्योपरि ये अङ्का: द्विगुणास्तेषां समाहार: सैको वा अथ वा जनयेदुत्पादयेदिमां संख्याम् । यथा चतुरक्षरजातौ द्विगुणा येऽङ्कास्ते उपर्यारोप्तितास्तेषां समाहार: पञ्चदश भवन्ति । सैका: षोडशेति ॥ (२४१)

छन्दोवृत्ति:

(२४१) लघुक्रिया० । लघुक्रियाङ्कानां सन्दोहे विमिश्रिते मिलिते सति संख्या भवेत् । यथा— अस्मिन्नेव चतुरक्षरे छन्दसि एकं चत्वारि षट् चत्वारि एकमित्येषां मिलिते

षोडश वृत्तानि भवन्ति । एवं अर्धसमेषु विषमेषु ज्ञेयम् । अथ प्रकारान्तरेण समवृत्तानां संख्यामाह-- उद्दिष्टांक० इति । अथवा इमां संख्यामुद्दिष्टेषु ये अङ्कास्तेषां समाहारः सैको जनयेदुत्पादयेत् । तद्यथा । त्र्यक्षरछन्दसि उद्दिष्टाङ्काः एकं द्वे चत्वारीत्येषां समाहारे सप्त, ते सैका इति अष्टौ वृत्तानि स्युः । अथ चेत् युगपदनेकजातिगतां संख्यां पृच्छति तदा विवक्षितपर्यन्तजातिभेदाः द्विगुणाद्विहीनादयः विवक्षितजातिपर्यन्ताः सर्वभेदाः उत्कृतिपर्यन्ता भेदाः षट् कोट्यः एकसप्ततिलक्षाणि अष्टौ सहस्राणि अष्टौ शतानि चतुःषष्ट्यधिकानि इति । एतावतो द्विगुणिताः द्विहीनाः सर्वजातिभेदाः । त्रयोदश कोट्यो द्वाचत्वारिंशल्लक्षाः सप्तदशसहस्राः सप्तशतानि षड्विंशत्यधिकानि स्युः । यथा वा गायत्र्यां चतुःषष्टिर्भेदाः द्विगुणा द्विहीना गायत्रीपर्यन्ताः षड्विंशत्यधिकं शतमुक्तादिभेदा भवन्ति । यदाह--

विवक्षिता तज्जातेस्तु भेदा द्विगुणितास्तत- ।
द्विहीनाः सर्वसंख्यायां ते स्युरुक्ता द्विजातिजाः ॥ (२४१)

पञ्चिका

(२४१) लश्च गश्च लगाः लघुगुरवः । तेषां क्रिया । अनन्तरोदीरितायां लगक्रियायाये ऽङ्काः संख्याः सङ्केतवाचकरेखाविशेषाः तेषां सन्दोहः समूहः लगक्रियाङ्कसन्दोहः । तस्मिन् लगक्रियाङ्कसन्दोहे विमिश्रिते पिण्डीकृते सति सङ्ख्या भवेत् वृत्तगणना जायते । तद्यथा-- सुप्रतिष्ठायां छन्दसि लगक्रियाङ्केषु कृतेषु सत्सु आद्ये स्थाने तावदङ्क एकः । द्वितीये स्थाने पञ्च । तृतीये स्थाने दश । चतुर्थे स्थाने च दश । पञ्चमे स्थाने पञ्च । षष्ठे स्थाने एकः । एते अङ्काः संभूय द्वात्रिंशद्वृत्तान्यप्येतावन्ति भवन्ति । एवमन्यत्रापि यावन्तोऽङ्कास्तावन्त एव वृत्तसङ्ख्या बोद्धव्याः । उद्दिष्टाङ्कसमाहार इति उद्दिष्टस्य वृत्तस्य अङ्काः तेषां समाहारः समूहः । किंभूतः । सैकः, एकेन सह वर्तत इति सैकः । सैक उद्दिष्टाङ्कसमाहारो वा इमां वृत्तसङ्ख्यां जनयेदुत्पादयेत् । वाशब्दोऽत्र पक्षान्तरे अथ वेत्यर्थः । तद्यथा-- मध्यायामुद्दिष्टाङ्कविधाने आद्ये स्थाने तावदेकोऽङ्कः । द्वितीये स्थाने द्वौ । तृतीये स्थाने चत्वारः । एते सहैकेन संभूयाष्टौ भवन्ति । वृत्तान्यप्येतावन्तीत्युभयथा दर्शितं सूत्रकृता । द्वयमपि प्रकारान्तरं ब्रूमहे । तद्यथा-- मध्यायां छन्दसि त्रिवर्णत्वात्तांस्त्रिवर्णान् पङ्क्त्याकारेण स्थापयित्वा तत्र प्रथमवर्णस्याधस्तादेकमङ्कं विलिखेत् । तमेकं द्विगुणीकृत्य द्वितीयस्याधस्ताद्द्वौ विलिखेत् । तौ द्वौ द्विगुणीकृत्य तृतीयस्याधस्ताच्चतुरो अङ्कान् विलिखेत् । ततस्तानन्तर्भूतांश्चतुरोऽङ्कान् पुनर्द्विगुणीकृत्य मध्यायामष्टौ वृत्तानीति वृत्तसंख्यां कथयेदिति । एवमन्यत्रापि ॥

॥ इति वृत्तसङ्ख्याविधिः ॥ (२४१)

२४२. **सङ्ख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तितः ।**
वृत्तस्याङ्गुलिकी व्याप्तिरधः कुर्यात्तथाङ्गुलिम् ॥

तात्पर्यटीका

(२४२) अभीष्टा जातिः प्रस्तार्यमाणा कियदायामे कियद्विस्तारे च क्षेत्रे संमातीत्यपेक्षायां तज्ज्ञानाय सूत्रयन्नाह ।

अयमर्थः । जातेर्या व्यक्तिसंख्या संभवति सा द्विगुणीकृता सती एकहीना यावती भवति तावदङ्गुलायामवति क्षेत्रे ऊर्ध्वस्थिता संमाति । वर्णसंख्या द्विगुणा एकन्यूना सती यावदवशिष्यते तावदङ्गुलिविस्तारे क्षेत्रे तिर्यक् संमातीति विजानीयात् । यद्यङ्गुलायामविस्तारः पृथक् पृथग् गुरवो लघवश्च ध्रियन्ते तिर्यगूर्ध्वं वान्तरमङ्गुलप्रमाणं च कुर्यादिति अध्वज्ञानोपायः ।

इति षट्प्रत्ययी नूनमस्माभिरुपवर्णिता ।
संप्रदायमुपाश्रित्य विद्वद्भिः सा विचार्यताम् ॥

प्रस्तारो नष्टमुद्दिष्टमित्यादिना उपसंहारः ॥ (२४२)

सुकविहृदयानन्दिनी

(२४२) अध्वार्थमाह--

चतुरक्षरजातौ या षोडशसंख्या सा द्विगुणा द्वात्रिंशत् एकोना एकरहिता सती एकत्रिंशत् सद्भिः पण्डितैरध्वा मार्गः प्रकीर्तितः । कथम् । वृत्तस्याङ्गुलिकीं अङ्गुलप्रमाणां व्याप्तिं कुर्यात् । तथा अधोऽन्तराले अङ्गुलं कुर्यात् प्रकल्पयेत् । एवमेकत्रिंशदङ्गुलायां भुवि चतुरक्षरं छन्दः प्रस्तार्यते ॥ (२४२)

छन्दोवृत्तिः

(२४२) अथाध्वयोगः । संख्यैव द्विगुणिता एकेन ऊना अध्वा भूमिमानं भवति । यथा त्र्यक्षरछन्दसि अष्टौ प्रस्तारः, ते द्विगुणिताः षोडश. ततः एकोनाः पञ्चदश । ततः पञ्चदशाङ्गुलायां भुवि त्र्यक्षरं छन्दः प्रस्तार्यते । वृत्तस्यादि एकमङ्गुलं वृत्तेन व्याप्तं

कुर्यात् तथा एकं चान्तराले इति अध्वमानम् । इह च प्रस्तारसंख्ययोरेवोपयोगो नष्टादयस्तु त्रयश्चित्रमात्रां अध्वयोगस्तु पुरुषेच्छानुविधायित्वेनानियतो न च क्षेत्रनियमे किमपि फलमस्तीति निरुपयोगः परं पूर्वाचार्यक्रमोऽयं निर्दिष्टः ॥ (२४२)

पञ्जिका

(२४२) सद्भिः पण्डितैः सङ्ख्यैव अनन्तरोक्तं सङ्ख्याप्रमाणमेव अध्वा प्रकीर्तितः कथितः । अध्वा नाम छन्दःसरणिः । वृत्तप्रस्तारभूमिरिति यावत् । किंविशिष्टा सङ्ख्या । द्विगुणा, द्वौ गुणौ यस्याः सा द्विगुणा । द्विगुणीकृतेत्यर्थः । पुनः किंविशिष्टा । एकोना, एकेन रूपेण ऊना एकाङ्कवर्जिता । व्यापनं व्याप्तिः, वृत्तस्य पद्यपादस्य व्याप्तिरङ्गुलिकी स्यादिति शेषः । अङ्गुलं परिमाणं यस्या. सा अङ्गुलिकी । तथा तेन प्रकारेण अधः वृत्तस्याधस्तात् अङ्गुलिम् अङ्गुलप्रमाणं कुर्यात् । इहाङ्गुलशब्देन मध्यमाङ्गुलिमध्यपर्वणा दैर्घान्ततः वा कथ्यते । गुरूणां लघूनां वा लिखितवृत्तस्थितानामन्तरमप्यङ्गुलप्रमाणमेव प्रत्येतव्यम् । तत्तच्छन्दसां प्रस्तारसम्भवानि वृत्तानि कियति भूमिभागे तिष्ठन्तीति चेदुच्यते । यस्य कस्यचिच्छन्दसो यावती वृत्तसङ्ख्या तावतीमेव सङ्ख्यां द्विगुणीकृत्य पुनस्तत एकमङ्कं परित्यज्य तावतीभिरङ्गुलिभिः परिमिते भूमिभागे लिखन्त इति वक्तव्यम् । तद्यथा— मध्यायां छन्दसि तावदष्टौ वृत्तानि भवन्ति । तानि द्विगुणीकृत्य तेभ्योऽङ्कमेकं परित्यज्य पञ्चदश पश्येत् । तदा विस्तारस्तत्र पञ्चदशाङ्गुलिपरिमिते भूमितले तान्यष्टौ वृत्तानि । तेषां वृत्तानामन्तराङ्गुलानि च सप्त तिष्ठन्ति । आयामतस्तु पुनरक्षरसङ्ख्यया वक्तव्यम् । यथा— मध्यायां छन्दसि द्वादशाक्षराणि वृत्तानि तेष्वेकं वृत्तं द्विगुणीकृत्य तस्मादेकस्मिन्नक्षरे परित्यक्ते सति त्रयोविंशतिरक्षराणि भवन्ति । तावदङ्गुलिपरिमिते भूमितले तत्तद्वृत्तं तिष्ठतीति व्यवहरेत् । एवं सर्वत्रापि छन्दसि समुन्नेयम् ॥ (२४२)

॥ इति प्रस्तारभूमिमानविधिः ॥

इति श्रीशाक्यमुनेर्भगवतः सर्वज्ञस्य परमोपासकेन गौड-
देशवास्तव्येन श्रीबौद्धागमचक्रवर्तिना भूसुरेणाचार्येण
विरचितायां वृत्तरत्नाकरपञ्जिकायां षट्प्रत्यय-
विभागप्रतिपादनो नाम षष्ठोऽध्यायः ॥

२४३. वंशेऽभूत् कश्यपस्य प्रकटगुणगणः शैवसिद्धान्तवेत्ता
विप्रः पव्वेकनामा विमलतरमतिर्वेदशास्त्रार्थबोधी ।
केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्त.
श्छन्दस्तेनाभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यम् ॥

इति वृत्तरत्नाकराख्ये छन्दसि प्रस्तारादिकथनं नाम षष्ठोऽध्यायः ॥

समाप्तश्चायं ग्रन्थः ॥

तात्पर्यटीका

(२४३) सुगमम् ॥

जय जय गणनाथ प्रार्थये त्वामजस्रं
हर दुरितसमूहं छन्दसां ज्ञानदानात् ।
त्वदमलपदप्रपाप्रान्तभृत्कान्तिवारि-
व्यतिकरपरिधौतो मोहपङ्कोऽप्यपेयात् ॥

जितेन्द्रनीलद्युति तन्ममास्तु मुखं मुरारेः शुभदं सदैव ।
रमामुखाम्भोरुहबिम्बितं यद् भृङ्गभ्रमं सन्ततमातनोति ॥

आसीदिहाङ्गिरसवंशसरोजसूर्यः
श्रीसात्यमुग्रियमुनिः प्रथितः पृथिव्याम् ।
गौडेषु वृद्धवलभीस्थिररम्यमूर्तिः
ब्रह्मान्वयोऽर्क इव कस्य न सुप्रसिद्धः ॥

वाक् स्वस्त्यध्ययने श्रुतिः श्रुतिसदाध्याने श्रयत्यच्युतं
चेतश्चारुविचारमध्वरविधौ बुद्धिः शरीरं तपः ।
यस्मिन् जातवतां स्वतस्तदुदिताः सन्त्यागता दक्षिणां
गोदास्नानविधि (धेः) क्व यात्यधुरथो (ते) वासमेलापुरे ॥

तद्वंशभूषणमणिर्ननु नायकोऽभूत्
तस्माद् गदाधरसुधीः सुधियामधीशः ।
तस्याऽऽगजो हरिरिव द्विजवर्यनन्द्यः
(श्रीश्रीपति) र्निगममानसराजहंसः ॥

तस्य सूनुः सदाचारसम्पन्नः सज्जनाग्रणीः ।
सारङ्गसूरिनामाभून्माध्यन्दिनविभूषणम् ॥

सत्साहित्यमहोदधिर्निरवधिर्वेदग्ध्यदुग्धाम्बुधिः
श्रीमाध्यन्दिनधर्मदुर्धरधुरोद्धारैकधुर्यस्ततः ।
सूनुर्विष्णुपदाम्बुजार्चनरतः श्रीराघवार्योऽभवत्
सूरिर्भूरियशाः प्रशान्तबलवत्पुत्रैषणादित्रयः ॥

अस्त्येतस्य जगत्प्रशस्यचरितः कारुण्यपुण्यार्णवः
तारुण्यादिमदान् गदानिव सदा यो मन्यते दुःखदान् ।
सौजन्यावसतिस्त्रिविक्रम इति प्रज्ञादिजन्मक्षितिर्-
ब्रह्मण्येकमतिः कृतातिथिजनप्रीतिश्चिरायुः सुतः ॥

यः कातन्त्रविचित्रसूत्ररचनापाथोधिमन्थाचलः
श्रीमद्दुर्गमदुर्गवृत्तितटिनीकल्लोलनक्रो महान् ।
छन्दःकन्दलपालनप्रविलसद्गीर्वारिदो वारिदो-
ऽलङ्कारार्णवकुम्भसम्भवमुनिः काव्याब्धिचन्द्रोदयः ॥

सारस्वतव्याकरणस्य सूत्रे रम्या बृहद्वृत्तिरकारि येन ।
श्रीवृत्तरत्नाकरसूत्रटीका विनिर्मिता तेन चिराय नन्द्यात् ॥

इति श्रीरघुसूरिसूनुश्रीत्रिविक्रमसूरिविरचितायां वृत्तरत्नाकर-
छन्दःसूत्रतात्पर्यटीकायां षष्ठोऽध्यायः समाप्तः ॥ (२४३)

सुकविहृदयानन्दिनी

(२४३) अधुना पुनरपि कविरन्वयपूर्वकं पित्रा सह आत्मानं निर्दिशति। वंशेऽन्वये अभूत् जातः कस्यपस्य, कस्यं सोमं पिबतीति कस्यपः। कस्यशब्देन यद्यपि सुराऽभि-

धीयते तथाप्यत्र सोममृच्यते । सुरापानस्य ब्राह्मणे निषिद्धत्वात् । अन्वयार्थेन ऋतुयायित्वमुक्तं स्यात् । शिवस्यैते शैवाः ये सिद्धान्तास्तेषां वेत्ता । विद् विचारणे इत्येतस्य रूपं, न पुनर्विद् ज्ञाने; तस्य सिद्धत्वात् । यो हि विचारयति सोऽवश्यं वेत्ति । न ह्यविदितं विचारयितुं शक्नोति । विशेषेण प्रतिपूरयति स्वर्गापवर्गादिकानीति विप्रः । विमलतरमतिः । क्व । शैवशास्त्रावबोधे । केदारनामा तस्य पुत्रः । शिवः शान्तः । शान्तो देवताविशेषस्तस्य चरणयुगं तस्याराधनं तत्रैकाग्र्यं च तन्निष्ठं चित्तं यस्य सः । तथा तेन केदारेण प्रकर्षेण रमणीयं छन्दो वृत्तरत्नाकराख्यम् ॥

इति पण्डितश्रीसुल्हणविरचितायां छन्दोवृत्तौ षट्प्रत्ययाध्यायः षष्ठः ।

शुभं भवतु ॥ (२४३)

छन्दोवृत्तिः

(२४३) अथेदानीं निर्व्यूढप्रतिज्ञाभारः शास्त्रकारः स्वयमेवान्वयजनकात्मनामभिधानपूर्वं प्रतिज्ञानिर्वाहमाह । काश्यपस्य महर्षेर्वंशेऽनुक्रमे पब्बेकनामा विप्रो द्विजोत्तमोऽभूत् । कीदृशः स इत्याह । प्रकटगुणगणः पटुतमगुणग्रामः । पुनः कथंभूतः । शैवसिद्धान्तवेत्ता । शिवो देवता येषां ते शैवास्तेषां सिद्धान्तान् वेत्तीति जानातीति शैवसिद्धान्तवेत्ता । पुनः कीदृशः । विमलतरमतिः निर्मलतमबुद्धिः । क्व । वेदतत्त्वावबोधे । वेदाश्चत्वारस्तेषां तत्त्वार्थबोधः सम्यगर्थपरिज्ञानं तत्र । अमुना विशेषणद्वयेन तस्य शाङ्करवैदिकशास्त्रसमुदायनेतृत्वमुक्तम् । तस्य पब्बेकस्य सूनुस्तनूजः केदारनामा तत्कालापेक्षयाऽस्तीत्यध्याहार्यम् । कीदृशः सः । शिवपादार्चने रतः शिवचरणयुगाराधनैकाग्रचित्तः हरचरणयुगलसेवात्यन्तव्यग्रचित्तः । तेन केदारेण छन्द इत्यत्रापि छन्दःशास्त्रं प्रविरचितम् चक्रे । किंनाम । वृत्तरत्नाकर इत्याख्या नाम यस्य तत्तथा । कीदृक् । अभिरामं प्रत्येकं लक्ष्यलक्षणयोरभिधानात् सर्वजनमनोहारीति प्रतिज्ञानिर्वाहः ।

सद्वृत्तरत्नाकरनामधेयशास्त्रस्य वृत्तावधिकार एषः ।
प्रस्तारनष्टादिकवर्णनोऽत्र सोमोदितायामजनिष्ट षष्ठः ॥

वादिश्रीदेवसूरेर्गणगणनविधौ बिभ्रतः शारदायाः
नाम प्रत्यक्षपूर्वं सुजयपदभृतो मङ्गलाह्वस्य सूरेः ॥

पादद्वन्द्वारविन्दे बुधमधुपहिते भृङ्गभृङ्गिं दधानो
वृत्तिं सोमाभिरामामकृत कृतिमतां वृत्तरत्नाकरस्य ॥

अन्यच्च ।

प्रमादादौत्सुक्यात्क्वचिदनवबोधेन यदि वा
ममैतस्यां वृत्तौ सहृदयजनाः कोमलमतेः ।
अवद्यं चेत्किंचिद्भवति भवतामञ्जलिरयम्
प्रसादं कृत्वा तत्प्रगुणमतिभिः शोध्यमखिलम् ॥

यावच्चन्द्रशशच्छलेन विलसद्दीपप्रदीपाञ्चिते
रम्ये नु क्षिपमन्तरिक्षफलके बद्धोत्सवं खेलति ।
तारासारदुरोदरेण निखिलं दिक्कामिनीमण्डनं
जीयात्तावदियं मनोहरपदा वृत्तिः प्रसादाद् सताम् ॥

श्रीविक्रमनृपकाले नन्दकरकृपीटयोनिभूसंख्ये (१३२९)
समजनिरजोत्सवदिने वृत्तिरियं मुग्धबोधकरी ।
सर्वाग्रं ग्रन्थाङ्के रुद्रमितशतानि नवतियुक्तानि
अत्रानुष्टुब्गणनायोगाज्जातानि किंचिदधिकानि ॥

इति श्रीपण्डितसोमचन्द्रकृता वृत्तरत्नाकरछन्दोवृत्तिः संपूर्णा समभूत् ॥ (२४३)

पञ्चिका

(२४३) श्रीमद्राहुलपादतस्त्रिपिटकाचार्याद्गुरोर्निर्मलं
बौद्धं शास्त्रमधीत्य यस्तु शरणं रत्नत्रयं शिश्रिये ।
यो बौद्धागमचक्रवर्तिपदवीं लङ्केश्वराल्लब्धवान्
स श्रीमानिह सर्वशास्त्रनिपुणो व्याख्यामिमां व्यातनोत् ॥

विप्रो विद्वान् विनयभवनो बन्धुभूतः सतां यः
सुब्रह्माणो निपुणगणकग्रामणीः स्कन्दभक्तः ।
तस्यास्माभिर्बहुगुणवतः प्रार्थनाभिः कृतेयम्
छन्दोविद्याभ्युदयजननी पञ्चिका सन्मुदेऽस्तु ॥

भारद्वाजकुलोद्भवाभिजननी देवीति नाम्नी सती
श्रीकात्यायनवंशजो गणपतिर्धीमान् पिता मे प्रभुः ।

सोदर्यौ तु हलायुधश्च गुणिनावाङ्गीरसश्चानुजौ
ग्रामो मे विरवाटिकोऽथ विबुधानन्दो मुकुन्दाश्रमः ॥

तर्कव्याकरणश्रुतिस्मृतिमहाकाव्यागमालङ्कृति-
च्छन्दोज्योतिषनाटकार्थकथनाचार्यः सदग्रेसरः ।

आर्यः पण्डितवर्यनन्दनगुणस्त्यागी कवीन्द्रः क्षमी
श्रीबौद्धागमचक्रवर्तिधरणीदेवः समुज्जृम्भते ॥

श्रीमत्सौगतवत्सरे नवनिधिद्वारेन्दुसङ्ख्ये तिथौ
द्वादश्यां शशिवासरे श्रवणभे माघस्य पक्षे परे ।

लङ्कायां जयवर्धनाख्यनगरे विद्वद्व्रजालङ्कृते
स्थित्वेमामपि पञ्चिकामकरवं भूत्यै कवित्वैषिणाम् ॥

वसन्तु सन्तः सुकृतैकभाजनम्
मुदं मदीयां प्रसमीक्ष्य सत्कृतिम् ।

भवन्त्वसन्तोऽपि हसन्त एव मा-
मनारतं ते सुखिनो गुणद्विषः ॥

व्यासक्तास्तं राकाहिमकरकोटिरुचिं ये सन्तः
शरणं यान्त्यवलोकितनाथं ते खलु भुवि शुभवन्तः ।

अश्रुतशास्त्रव्याख्याकरणे प्रसरति सुमतिस्तेषां
किं च मनोहरता सहस्रकृते विजये च परेषाम् ॥

नाथतोऽहमवलोकितेश्वरात् संचरन् समधिगम्य वाग्मिताम् ।
अग्रणीरभवमित्युदारया सम्पदा सममिति प्रकीर्तितम् ॥

इति वृत्तरत्नाकरपञ्चिका समाप्ता ॥ (२४३)

परिशिष्टानि

वृत्तरत्नाकरसूत्रसूची

अ. सं.	अ	पृ. सं.
१३	अङ्घ्रयो यस्य चत्वार:	३५
११६	अनन्तरोदीरितलक्ष्म	१५८
११	अब्धिभूतरसादीनां	२२
१४८	अब्ध्यङ्गैः स्यात्	१९०
४१	अयुग्भवा चारुहासिनी	८८
२१७	अयुजि ननरला	२६५
२१८	अयुजि नयुग	२६६
५७	अष्टाभ्योऽथ	११०
६२	अष्टावर्धे गा:	१२३
२१२	असमे सजौ सगुरु	२६१
२३२	अस्मिन्नेव तृतीय	२९०
४०	अस्य युग्मरचिता	८५
	आ	
२१४	आख्यानिकी तौ जगुरू	२६३
२७	आद्यं दलं समस्तं	५९
३५	आपातलिका कथितेयं	७६
१६	आरभ्यैकाक्षरात्	३८
३०	आर्याद्वितीयकेऽर्धे	६५
३२	आर्यापूर्वार्धं यदि	६८
२९	आर्याप्रथमदलोक्तं	६३
३१	आर्याशकलद्वितयं	६७

अ. सं.		पृ. सं.
	इ	
१५३	इति वद तामरसं	१९४
११७	इत्थं किलान्यास्वपि	१६४
४९	इत्थमन्या रश्चतुर्थात्	१००
२१	इत्युक्ताश्छन्दसां	४१
१६६	इन्दुवदना भजसनैः	२०५
१३४	इह तोटकमम्बुधि	१७९
१४९	इह नवमालिनी	१९१
	उ	
१८	उक्तात्युक्ता तथा	४१
१६४	उक्ता वसन्ततिलका	२०४
३७	उदीच्यवृत्तिः	८०
२३८	उद्दिष्टं द्विगुणात्	३१६
१३०	उपस्थितमिदं ज्सौ	१७६
२४०	उपान्त्यतो निवर्तेत	३१९
११५	उपेन्द्रवज्रा जतजा:	१५७
२६	उभयार्धयो:	५७
	ऊ	
२३६	ऊने दद्याद् गुरून्	३०६
	ए	
२०७	एवमेकोनसहस्राक्षर	२५६

अ. सं.		पृ. सं.
	ओ	
४४	ओजयोर्जेन वारिधेः	९३
२११	ओजे तपरौ जरौ	२६०
	क	
१८७	कथितमिह ननौ	२२६
१७५	कामक्रीडा छन्दो	२१४
८८	कुमारललिता ज्सौ ग्	१३९
२०१	क्रौञ्चपदा भ्मौ	२३९
	ग	
६५	गौ स्त्री	१२८
६४	ग् श्रीः	१२७
	च	
१५६	चतुर्ग्रहैरिह	१९७
१३१	चन्द्रवर्त्म गदितं	१७७
४५	चपलावक्त्रमयुजोः	९४
२२८	चरणत्रयं भजति	२८५
	ज	
२१५	जतौ जगौ गो	२६४
१३२	जतौ तु वंशस्थम्	१७८
१५२	जरौ जरौ वदन्ति	१९४
१७९	जसौ जसयला	२१८
५४	जो न्लावथाम्बुधेः	१०७
७१	ज्म लासिनी	१३१
१०६	ज्ञेया मत्ता मभसग	१५३
१११	ज्ञेया सप्ताश्वषड्भिः	२२९
८	ज्ञेयाः सर्वान्तिमध्यादि	१४
	त	
१७	तदूर्ध्वं चण्डवृष्टयादि	३९
५५	तद्युगलाद् वानवासिका	१०८
१५४	तुरगरसयतिः	१९५
३६	तृतीययुग् दक्षिणान्तिका	७८
३	तेनेदं क्रियते	१
५१	तोऽब्धेस्तत्	१०२
१११	त्जौ जो गुरुणा	१५५
११२	त्जौ ज्गौ गुरुणा	१५६
१४३	त्यौ त्यौ मणिमाला	१८६
७९	त्यौ स्तस्तनुमध्या	१३४
६३	त्रिगुणनवलघु	१२४
१९	त्रिष्टुप् च जगती	४१
२४	त्रिष्वंशकेषु पादो दलयोः	५२
१०८	त्रिसगा अपि मेघ	१५४
१९२	त्री रजौ गलौ	२३०
११०	त्वरितगतिस्तु	१५५
८६	त्सौ चेद् वसुमती	१३७
	द	
१८०	दिङ्मुनि वंशपत्र	२१९
११९	दोधकवृत्तमिदं	१६७
१३५	द्रुतविलम्बितमाह	१८०
५२	द्विकगुणितवसु	१०५
२२५	द्विगुरुयुत	२७८
१६७	द्विः सप्तच्छिद	२०६
१६८	द्विहतहयलघु	२०७

अ. सं.		पृ. सं.
	ध	
१४४	धीरैरभाणि ललिता	१८७
२०	धृतिश्चातिधृतिः ।	४१
	न	
११८	नजजलगैर्गदिता	१६६
१७७	नजभजरैः सदा	२१६
१५९	ननतरगुरुभिः	१९९
१६३	ननभनलगिति	२०३
१४६	ननभरसहिता	१८९
१७१	ननमययुतेयं	२१०
१२७	ननरलगुरुभिः	१७४
१६२	ननरसलघुभैः	२०२
१२६	ननसगगुरु	१७३
१३८	नयसहितौ न्यौ	१८२
२२९	नयुगं सकार	२८६
१०७	नरजगैर्भवेन्	१५४
२१	नष्टस्य यो भवेत्	२३७
९५	नागरकं भरौ लगौ	१४४
९६	नाराचिका तरौ लगौ	१४४
५०	नोऽम्बुधेश्चेत्	१०१
२३१	नौ पादेऽथ	२८९
	प	
१२३	पञ्चरसैः स्त्री	१७१
१४७	पञ्चाश्वैश्छिन्ना	१८९
३४	पर्यन्ते यौ तथैव	७५
१०	पादादाविह वर्णस्य	१८
२३५	पादे सर्वगुरावाद्यात	३०६
४	पिङ्गलादिभिराचार्यैः	८
३८	पूर्वेण युतो	८१
२०६	प्रचितकसमभिधो	२५४
२०५	प्रतिचरणविवृद्धरेफाः	२४५
२२६	प्रथममधिवसति	२८०
२२४	प्रथममितरचरण	२७६
२२३	प्रथममुदितवृत्ते	२७४
१४	प्रथमाङ्घ्रिसमो	३६
९८	प्रमाणिका जरौ लगौ	१४६
१४५	प्रमिताक्षरा सजससैः	१८८
१३७	प्रमुदितवदना	१८१
२३४	प्रस्तारो नष्टम्	३०५
२८	प्राक्प्रतिपादितमर्धं	६१
	ब	
५६	बाणाष्टनवसु	१०९
	भ	
२०९	भत्रयमोजगतम्	२५८
१५१	भवति नजावथ	१९३
१७२	भवति नजौ भजौ	२११
३०	भादगुरुकावथ	७६
१०१	भुजगशिशुभृता नौ मः	१४९
१४०	भुजङ्गप्रयातं	१८४
१४२	भुवि भवेन्नभजरैः	१८५
२००	भूतमुनीनैः	२३८
४८	भेनाब्धितो भाद् विपुला	९८
१९९	भैरथ सप्तभिः	२३७
९१	भौ ग्गिति चित्रपदा	१४१

अ. सं.		पृ. सं.
१९५	भौ भभभाश्च	२३३
७५	भ्गौ गिति पङ्क्तिः	१३२
७२	भ्गौ सुमुखी	१३१
१०५	भ्मौ सगयुक्तौ	१५२
१७६	भ्त्रिनगैः स्वरात्	२१५
१९६	भ्रौ नरना	२३४
	म	
१९८	मत्ताक्रीडा मौ	२३६
८९	मधुमती नभगाः	१३९
१८२	मन्दाक्रान्ता जलधि	२२१
७८	मन्दा तलगैः	१३४
११३	मः सो जो गुरु	१५६
९३	माणवकं भात्तलगाः	१४२
५३	मात्रासमकं नवमो	१०६
८४	मालिनी मभ्याम्	१३६
२२२	मुखपादोऽष्टभिः	२७१
१८४	मुनिगुहकार्णवैः	२२३
६६	मो नारी	१२९
२०३	मो नाः षट् सगगिति	२४२
९२	मो मो गो गो विद्युन्माला	१४२
१२९	मौक्तिकमाला यदि	१७६
८१	मौ सावित्रीमाहुः	१३५
७५	म्गौ गिति पङ्क्तिः	१३२
६९	म्गौ चेत् कन्या	१३०
१६१	म्तौ न्सौ गावक्ष	२०१
९४	म्नौ गौ हंसरुतम्	१४३
१५५	म्नौ ज्रौ गः त्रिदश	१९६
१०३	म्नौ य्गौ चेति	१५०
१२२	म्भौ न्लौ गः	१७०
६	म्यरस्तजभ्नगैः	१०
१९४	म्रभ्नैर्यानां त्रयेण	२३२
१७४	म्रौ म्यौ यान्तौ	२१३
८२	म्रौ यस्याः सा	१३६
८७	म्सौ गः स्यात्	१३८
१०२	म्सौ ज्गौ शुद्धविराट्	१५०
२३०	म्सौ ज्भौ गौ	२८७
८३	म्सौ प्रोक्तं मुकुलम्	१३६
	य	
६८	य केसा	१३०
७०	यगौ व्रीडा	१३१
५८	यदतीतकृतविविध	१११
३९	यदा समावोजयुग्मकौ	८३
१८३	यदि भवतो नजौ	२२२
१९७	यदिह नजौ भजौ	२३५
२०४	यदिह नयुगलं	२४३
१६०	यमौ रौ विख्याता	२००
१५	यस्य पादचतुष्केऽपि	३७
४६	यस्यां लः सप्तमो युग्मे	९५
१२	युक्समं विषमं चायुक्	३४
४३	युजोर्जेन सरिद्भूर्तुः	९२
	र	
१०९	रश्च सौ सगुरु	१५५
१८१	रसयुगहयैः	२२०
१८८	रसर्त्वश्वैः	२२७
१७८	रसैं रुद्रैश्छिन्ना	२१७

अ. सं.		पृ. सं.
१३९	रसैर्जसजसा	१८३
१००	रान्नसाविह हलमुखी	१४८
१२४	रो नराविह रथोद्धता	१७२
६७	रो मृगी	१२९
१४१	रैश्चतुर्भिर्युता	१८४
७६	गौ गिति प्रीतिः	१३३
७४	गौ समृद्धिः	१३२
१०४	जौ रगौ मयूरसारिणी	१५१
९७	जौ समानिका गलौ	१४५
१८६	सौ जजौ भरमंयुतौ	२२६
	ल	
२२	लक्ष्मैतत् सप्तगणाः	४४
२४१	लगक्रियाङ्कसन्दोहे	२३५
	व	
२४३	वंशेऽभूत् कश्यपस्य	३२९
४२	वक्त्रं नाद्यान्नसौ	९१
२१९	वदन्त्यपरवक्त्राख्यं	२६७
२३९	वर्णान् वृत्तभवान्	३१९
१३६	वसुयुगविरतिः	१८१
१७०	वसुहयययतिरिह	२१०
२०२	वस्वीशाश्वच्छेदोपेतं	२४०
१२१	वातोर्मीयं गदिता	१६९
९९	वितानमाभ्यां यदन्यत्	१४६
६१	विनिमयविहित	१२१
२३३	विषमाक्षरपादत्वात्	२९२
२०८	विषमे यदि सौ	२५७
२२१	विषमे ससजाः	२७०
५९	वृत्तस्य ला विना	११७
२	वेदार्थशैवशास्त्रज्ञः	१
१५७	वेदै रन्ध्रै र्मौ	१९८
	श	
८०	शशिवदना न्यौ	१३५
१२०	शालिन्युक्ता म्तौ	१६८
६०	शिखिगुणितदश	११९
१२८	श्येनिका रजौ	१७५
	ष	
५	षडध्यायनिबद्धस्य	९
३३	षड् विषमेऽष्टौ समे	७१
२३	षष्ठे द्वितीयलात्	४५
	स	
२४२	सङ्ख्यैव द्विगुणैकोना	३२७
१९३	सजजा भरौ	२३२
१७३	सजना नयौ शरदश	२१२
२२७	सजमादिमे	२८३
१५८	सजसा जगौ	१९९
७७	सती जगौ गः	१३३
१९०	सभरा नम्ल्गिति	२२९

अ. सं.		पृ. सं.	अ. सं.		पृ. सं.
८५	सयुगं रमणी	१३७	७३	सुमतिः स्गौ	१३२
२१०	सयुगात् सगुरू	२५९	१८९	सूर्याश्वैर्मसजास्त	२२८
२१६	सयुगात् सलघू	२६५	४७	सैतवस्याखिलेष्वपि	९७
९०	सरगा हंसमाला	१४०	२२०	स्यादयुग्मके रजौ रजौ	२६८
७	सर्वगुर्मो मुखान्तलौ	११	११४	स्यादिन्द्रवज्रा यदि	१५७
२५	संलङ्घ्य गणत्रयमादिमं	५५	१३३	स्यादिन्द्रवंशा	१७८
२१३	ससजा विषमे यदा	२६२	१८५	स्याद् भूतत्वैश्वैः	२२४
९	सानुस्वारो विसर्गान्तो	१५	१६९	स्रगिति भवति	२०९
१६५	सिंहोद्धतेयमुदिता	२०४	१५०	स्वरशरविरतिः	१९२
१	सुखसन्तानसिद्धर्थं	१	१२५	स्वागतेति रनभात्	१७२

वर्णवृत्तानि

समचतुष्पदी

अ. सं	गणाः	वृत्तनाम	पृ. सं.
		१ उक्ता	
६४	ग	श्रीः	१२७
		२ अत्युक्ता	
६५	गग	स्त्री	१२८
		३ मध्या	
६६	म	नारी	१२९
६८	य	केसा (केशा)	१३०
६७	र	मृगी	१२९
		४ प्रतिष्ठा	
७१	जग	लासिनी	१३१
७२	भग	सुमुखी	१३१
६९	मग	कन्या	१३०
७०	यग	व्रीडा	१३१
७४	रग	समृद्धिः	१३२
७३	सग	सुमतिः	१३२
		५ सुप्रतिष्ठा	
७७	जगग	सती	१३३
७८	तलग	मन्दा	१३४
७५	भगग	पङक्तिः	१३२
७६	रगग	प्रीतिः	१३३

अ. सं.	गणाः	वृत्तनाम	पृ. सं.
		६ गायत्री	
७९	तय	तनुमध्या	१३४
८६	तस	वसुमती	१३७
८०	नय	शशिवदना	१३५
८१	मम	सावित्री	१३५
८२	मर	नदी	१३६
८६	मस	मुकुलम्	१३६
८४	रम	मालिनी	१३६
८५	सस	रमणी	१३७
		७ उष्णिक्	
८८	जसग	कुमारललिता	१३९
८९	ननग	मधुमती	१३९
८९	नभग	मधुमती	१३९
८७	मसग	मदलेखा	१३८
९०	सरग	हंसमाला	१४०
		८ अनुष्टुभ्	
९९	जतगग रसलल	वितानम्	१४६
९८	जरलग	प्रमाणिका	१४६
९६	तरलग	नाराचिका	१४४
९३	भतलग	माणवकम्	१४२
९१	भभगग	चित्रपदा	१४१
९५	भरलग	नागरकम्	१४४
९४	मनगग	हंसरुतम्	१४३
९३	ममगग	विद्युन्माला	१४२
९७	रजगल	समानिका	१४५
		९ बृहती	
१०१	ननम	भुजगशिशुभृता	१४९
१००	रनस	हलमुखी	१४८

अ. सं.	गणाः	वृत्तनाम	पृ. सं.
		१० पङ्क्तिः	
१११	तजजग	उपस्थिता	१५५
११०	नजनग	त्वरितगतिः	१५५
१०७	नरजग	मनोरमा	१५४
१०५	भभसग	रुक्मवती	१५२
१०३	मनयग	पणवनाम	१५०
१०६	मभसग	मत्ता	१५३
१०२	मसजग	शुद्धविराट्	१५०
१०४	रजरग	मयूरसारिणी	१५१
१०९	रससग	मणिरागः	१५५
१०८	ससंसग	मेघवितानम्	१५४
		११ त्रिष्टुभ्	
११५	जतजगग	उपेन्द्रवज्रा	१५७
१३०	जसतगग	उपस्थितम्	१७६
११२	तजजगग	उपस्थिता	१५६
११४	ततजगग	इन्द्रवज्रा	१५७
११८	नजजलग	सुमुखा	१६६
१२७	ननरलग	भद्रिका सुभद्रिका चन्द्रिका	१७४
१२६	ननसगग	वृन्ता पृथ्वी	१७३
१२९	भतनगग (५.६)	मौक्तिकमाला	१७६
१२३	भतनगग (५.६)	श्रीः स्त्री	१७१
११९	भभभगग	दोधकम्	१६७
१२०	मततगग (४.७)	शालिनी	१६८
१२१	मभतगग (४.७)	वातोर्मी	१६९
१२२	मभनलग (४.७)	भ्रमरविलसितम्	१७०
११३	मसजगग	एकरूपम्	१५६

अ. सं.	गणाः	वृत्तनाम	पृ. सं.
१२८	रजरलग	श्येनिका वैनिका	१७५
१२५	रनभगग (४.७)	स्वागता	१७२
१२४	रनरलग (५.६)	रथोद्धता	१६२
११६	इन्द्रवज्रोपेन्द्रवज्रामिश्रणेन	उपजातिः	१५८

१२ जगती

१३२	जतजर (५.७)	वंशस्थम्	१७८
१५२	जरजर	पञ्चचामरम्	१९४
१३९	जसजस (६.६)	जलोद्धतगतिः	१८३
१३३	ततजर	इन्द्रवंशा	१७८
१४४	तभजर	ललिता	१८७
१४३	तयतय (६.६)	मणिमाला	१८६
१५३	नजजय	तामरसम्	१९४
१५१	नजजर (७.५)	मालती	१९३
१४९	नजभय (७.५)	ननमालिनी	१९१
१४६	ननभर (७.५)	उज्ज्वला	१८९
१३६	ननमय (८.४)	पुटः	१८१
१३७	ननरर	प्रमुदितवदना	१८१
१५०	ननरर (७.५)	प्रभा	१९२
१४२	नभजर	प्रियम्वदा	१८५
१३५	नभभर	द्रुतविलम्बितम्	१८०
१३८	नयनय	कुसुमविचित्रा	१८२
१४८	मभसम (४.८)	जलधरमाला	१९०
१४७	ममयय (५.७)	वैश्वदेवी	१८९
१४०	यययय	भुजंगप्रयातम्	१८४
१३१	रनभस	चन्द्रवर्त्म	१७७
१४१	रररर	स्रग्विणी	१८४
१४५	सजसस	प्रमिताक्षरा	१८८
१३४	सससस	तोटकम्	१७९

अ. सं.	गणाः	वृत्तनाम	पृ. सं.
	१३ अतिजगती		
१५६	जभसजग (४.९)	रुचिरा	१९७
१५४	नननतग (७.६)	क्षमा	१९५
१५९	ननतरग (७.६)	चन्द्रिका	१९९
१५७	मतयसग (४.९)	मत्तमयूरम्	१९८
१५५	मनजरग (३.१०)	प्रहर्षिणी	१९६
१६०	यमररग	चञ्चरीकावली	२००
१५८	सजसजग (८.५)	मञ्जुभाषिणी	१९९
	१४ शक्वरी		
१६४, १६५	तभजजगग (८.६)	वसन्ततिलका, सिंहोद्धता	२०४
१६३	ननभनलग (७.७)	प्रहरणकलिता, प्रहरणकलिका	२०३
१६२	ननरसलग (७.७)	अपराजिता	२०२
१६६	भजसनगग (५.९)	इन्दुवदना	२०५
१६१	मतनसगग (५.९)	असम्बाधा	२०१
१६७	मसमभगग (७.७)	अलोला	२०६
	१५ अतिशक्वरी		
१७२	नजभजर	प्रभद्रकम्	२११
१६८	नननस	शशिकला	२०७
१६९	नननस (६.९)	स्रक्	२०९
१७०	नननस (८.७)	मणिगणनिकरः, मणिगणकिरणः	२१०
१७१	ननमयय (८.७)	मालिनी	२१०
१७५	मममम	कामक्रीडा	२१४
१७४	मरमयय (७.८)	चन्द्रलेखा	२१३
१७३	सजननय (५.१०)	अतिरेखा	२१२
	१६ अष्टिः		
१७७	नजभजतग नजभजरग	वाणिनी	२१७
१७६	भरननग (७.९)	ऋषभगजविलसितम्	२१५

अ. सं.	गणाः	वृत्तनाम	पृ. सं.
	१७ अत्यष्टिः		
१७९	जसजसयलग (८.९)	पृथ्वी	२१८
१८३	नजभजजलग (७.१०)	नर्कुटकम्	२२२
१८४	नजभजजलग (७.६.४)	कोकिलम्	२२३
१८१	नसभरसलग (६.४.७)	हरिणी	२२०
१८०	भरनभनलग (१०.७)	वंशपत्रपतितं	२१९
१८२	मभनततगग (४.६.७)	मन्दाक्रान्ता	२२१
१७८	यमनसभलग (६.११)	शिखरिणी	२१७
	१८ धृतिः		
१८७	ननररररर (१३.५)	सिंहविक्रीडितम्, निशा	२२६
१८५	मतनयययय (५.६.७)	कुसुमितलतावेल्लिता	२२४
१८६	रसजजभर (८.५.५)	हरनर्तकम्	२२६
	१९ अतिधृतिः		
१८८	यमनसररग (६.६.७)	मेघविस्फूर्जिता	२२७
१८९	मसजसततग (१२.७)	शार्दूलविक्रीडितम	२२८
	२० कृतिः		
१९१	मरभनयभलग (७.७.६)	सुवदना	२२९
१९२	रजरजरजगल (१०.१०)	वृत्तम्	२३०
१९३	सजजभरसलग (१०.१०)	प्रमदाननम्	२३२
१९०	सभरनमयलग (१३.७)	मत्तेभविक्रीडितम्	२२९
	२१ प्रकृतिः		
१९५	भभभभभभर (९.१२)	मत्तविलासिनी	२३३
१९४	मरभनयययय (७.७.७)	स्रग्धरा	२३२

अ. सं.	गणाः	वृत्तनाम	पृ. सं.
		२२ आकृतिः	
१९६	भरनरनरनग (१०.१२)	प्रभद्रकम्	२३४
		२३ विकृतिः	
१९७	नजभजभजभलग (११.१२)	अश्वललितम्	२३५
१९९	भभभभभभभगग (१२.११)	मयूरगतिः	२३७
१९८	ममतनननननलग (८.५.१०)	मत्ताक्रीडा	२३६
		२४ सङ्कृतिः	
२००	भतनसभभनय (५७.१२)	तन्वी	२३८
		२५ अतिकृतिः	
२०१	भमसभनननननग (५.५.८.७)	क्रौञ्चपदा	२३९
		२६ उत्कृतिः	
२०३	मनननननननसगग (९.६.६.५)	अपवाहम्	२४१
२०२	ममतननननरसलग (८.११.७)	भुजङ्गविजृम्भितम्	२४०
		२७ दण्डकः	
२०४	ननररररररर	चण्डवृष्टिप्रयातः	२४३
२०५	नयुगं अष्टौ राः	अर्णदण्डकः	२४५
	नयुगं नव राः	अर्णवदण्डकः	
	नयुगं दश राः	व्यालदण्डकः	
	नयुगं एकादश राः	जीमूतदण्डकः	
	नयुगं द्वादश राः	लीलाकरदण्डकः	
	नयुगं त्रयोदश राः	उद्दामदण्डकः	
	नयुगं चतुर्दश राः	शङ्खदण्डकः	
२०६	ननयययययय	प्रचितकः	२५४

अर्धसमचतुष्पदी

अ सं.	गणाः	वर्णसंख्या	वृत्तनाम	पृ. सं.
२११	तजरग, मसजगग	(१०.११)	भद्रविराट्	२६०
२१२	सजसग, भरनगग	(१०.११)	केतुमती	२६१
२१३	ससजग, सभरलग	(१०.११)	ललिता	२६२
२१४	ततजगग, जतजगग	(११.११)	आख्यानिकी	२६३
२ ५	जतजगग, ततजगग	(११.११)	विपरीताख्यानिकी	२६४
२०८	सससलग, भभभगग	(११.११)	उपचित्रम्	२५७
२१७	ननरलग, नजजर	(११.१२)	अपरवक्त्रम्	२६५
२०९	भभभगग, नजजय	(११.१२)	द्रुतमध्या	२५८
२१६	सससलग, नभभर	(११.१२)	हरिणप्लुता	२६५
२१८	ननरय, नजजरग	(१२.१३)	पुष्पिताग्रा	२६५
२२०	रजरज, जरजरग	(१२.१३)	यवमती	२६८

विषमवृत्तानि

अ. सं.	वर्णसंख्या, गणाः	वृत्तनाम	पृ. सं.
२२२	(८.१२.१६.२०) पदचतुरूर्ध्वम्		२७१
२२३	(६ल गग; १०ल गग; १४ल गग; १८ल गग)	आपीडः	२७४
२२४	(१० ल गग; ६ ल गग; १४ ल गग १८ ल गग)	कलिका	२७६
२२५	(१० ल गग; १४ ल गग; ६ ल गग; १८ ल गग)	लवली	२७८
२२६	(१० ल गग; १४ ल गग; १८ ल गग; ६ ल गग)	अमृतधारा	२८०
२२७	(सजसल, नसजग, भनजलग, सजसजग)	उद्गता	२८३
२२८	(सजसल, नसजग, रनभग, सजसजग)	सौरभकम्	२८५
२२९	(सजसल, नसजग, ननसस, सजसजग)	ललितम्	२८६
२३०	(मसजभगग, सनजरग, ननस, नननजय)	उपस्थितप्रचुपितम्	२८७
२३१	(मसजभगग, सनजरग, ननसननस, नननजय)	प्रवर्धमानम्	२८९
२३२	(मसजभगग, सनजरग, तजर, नननजय)	शुद्धविराडार्षभम्	२९०

वृत्तनामसूची

अ. सं.		पृ. सं.
	अ	
५२	अचलधृतिः	१०५
६३	अतिरुचिरा	१२४
१७३	अतिरेखा	२१२
६२	अनङ्गक्रीडा	१२३
२१७	अपरवक्त्र	२६५
१६२	अपराजिता	२०२
४०	अपरान्तिका	८५
२०३	अपवाह	२४२
२२६	अमृतधारा	२८०
२०५	अर्ण	२४५
२०५	अर्णव	२४५
१६७	अलोला	२०६
१९७	अश्वललित	२३५
१६१	असंबाधा	२०१
	आ	
२१४	आख्यानिकी	२६३
३५	आपातलिका	७६
२२३	आपीड	२७४
२२, २३	आर्या	४४, ४५
३२	आर्यागीति	६८
	इ	
१६६	इन्दुवदना	२०५
१३३	इन्द्रवंशा	१७८
११४	इन्द्रवज्रा	१५७
	उ	
१४६	उज्ज्वला	१८९
३७	उदीच्यवृत्ति	८०
२२७	उद्गता	२८३
३१	उद्गीति	६७
२०५	उद्दाम	२४५
३०	उपगीति	६५
२०८	उपचित्र	२५७
५७	उपचित्रा	११०
११६, ११७	उपजाति	१५८, १६४
१३०	उपस्थित	१७६
२३०	उपस्थितप्रचुपित	२८७
१११	उपस्थिता	१५५
११२	उपस्थिता	१५६
११५	उपेन्द्रवज्रा	१५७
	ऋ	
१७६	ऋषभगजविलसित	२१५
	ए	
११३	एकरूप	१५६
१७३	एला	२१२
	औ	
३४	औपच्छन्दसिक	७५
	क	
६९	कन्या	१३०
२२४	कलिका	२७६
१७५	कामक्रीडा	२१४
१७५	कामलतिका	२१४
८८	कुमारललिता	१३९
१३८	कुसुमविचित्रा	१८२
१८५	कुसुमितलतावेल्लिता	२२४
२१२	केतुमती	२६१
६८	केसा	१३०
१८४	कोकिलक	२२३
२०१	क्रौञ्चपदा	२३९
१५४	क्षमा	१९५

अ सं.		पृ. सं.
	ख	
६१	खञ्जा	१२१
	ग	
२३३	गाथा	२९२
२९	गीति	६३
	च	
१६०	चञ्चरीकावली	२००
२०४	चण्डवृष्टिप्रयात	२४३
१७४	चन्द्रलेखा	२१३
१३१	चन्द्रवर्त्म	१७७
१५९	चन्द्रिका	१९९
२६	चपला	५७
४५	चपलावक्त्र	९४
४१	चारुहासिनी	८८
५६	चित्र	१०९
९१	चित्रपदा	१४१
	ज	
२८	जघनचपला	६१
१४८	जलधरमाला	१९०
१३९	जलोद्धतगति	१८३
२०५	जीमूत	२४५
	त	
७९	तनुमध्या	१३४
२००	तन्वी	२३८
५१	तविपुला	१०२
१५३	तामरस	१९४
१३४	तोटक	१७९
११०	त्वरितगति	१५५
	द	
३६	दक्षिणान्तिका	७८
११९	दोधक	१६७

अ. सं.		पृ. सं.
२०९	द्रुतमध्या	२५८
१३५	द्रुतविलम्बित	१८०
	न	
८२	नदी	१३६
१८३	नर्कुटक	२२२
१४९	नवमालिनी	१९१
५०	नविपुला	१०१
९५	नागरक	१४४
९६	नाराचिका	१४४
६६	नारी	१२९
	प	
७५	पङ्क्ति	१३२
१५२	पञ्चचामर	१९४
१०३	पणव	१५०
२४	पथ्या	५२
४३	पथ्यावक्त्र	९२
२२२	पदचतुरूर्ध्व	२७१
५८	पादाकुलक	१११
१३६	पुट	१८१
२१८	पुष्पिताग्रा	२६६
१२६	पृथ्वी	१७३
१७९	पृथ्वी	२१८
२०६	प्रचितक	२५४
१७८	प्रभद्रक	२११
१९६	प्रभद्रकम्	२३४
१५०	प्रभा	१९२
१९३	प्रमदानन	२३२
९८	प्रमाणिका	१४६
१४५	प्रमिताक्षरा	१८८
१३७	प्रमुदितवदना	१८१

अ सं.		पृ. सं.
२३१	प्रवर्धमान	२८९
३९	प्रवृत्तक	८३
१६३	प्रहरणकलिता	२०३
१५५	प्रहर्षिणी	१९६
३८	प्राच्यवृत्ति	८१
१४२	प्रियंवदा	१८५
७६	प्रीति	१३३
	भ	
२११	भद्रविराट्	२६०
१२७	भद्रिका	१७४
४८	भविपुला	९८
१४०	भुजङ्गप्रयात	१८४
२०२	भुजङ्गविजृम्भित	२४०
१०१	भुजगशिशुभृता	१४९
१२२	भ्रमरविलसित	१७०
	म	
१५८	मञ्जुभाषिणी	१९९
१७०	मणिगणनिकर	२१०
१४३	मणिमाला	१८६
१०९	मणिराग	१५५
१५७	मत्तमयूर	१९८
१९५	मत्तविलासिनी	२३३
१०६	मत्ता	१५३
१९८	मत्ताक्रीडा	२३६
१९०	मत्तेभविक्रीडित	२२९
८७	मदलेखा	१३८
८९	मधुमती	१३९
१०७	मनोरमा	१५४
८७	मन्दा	१३४
१८२	मन्दाक्रान्ता	२२१
१९९	मयूरगति	२३७
१०४	मयूरसारिणी	१५१
९३	माणवक	१४२
५३	मात्रासमक	१०६
१५१	मालती	१९३
२२१	मालभारिणी	२७०
८४	मालिनी	१३६
१७१	मालिनी	२१०
८३	मुकुल	१३६
२७	मुखचपला	५९
६७	मृगी	१२९
१०८	मेघवितान	१५४
१८८	मेघविस्फूर्जिता	२२७
१२९	मौक्तिकमाला	१७६
	य	
२२०	यवमती	२६८
४६, ४७	युग्मविपुला	९५, ९७
	र	
१२४	रथोद्धता	१७२
८५	रमणी	१३७
४९	रविपुला	१००
१०५	रुक्मवती	१५२
१५६	रुचिरा	१९७
	ल	
२२९	ललित	२८६
१४४	ललिता	१८७
२१३	ललिता	२६२
२२५	लवली	२७८

अ. सं.		पृ. सं.
७१	लासिनी	१३१
२०५	लीलाकर	२४५
	व	
१८०	वंशपत्रपतित	२१९
१३२	वंशस्थ	१७८
४२	वक्त्र	९१
१६४	वसन्ततिलका	२०४
८६	वसुमती	१३७
१७७	वाणिनी	२१६
१२१	वातोर्मी	१६९
५५	वानवासिका	१०८
९९	वितान	१४६
९२	विद्युन्माला	१४२
४४	विपरीतपथ्यावक्त्र	९३
२१५	विपरीताख्यानिकी	२६४
२५	विपुला	५५
५४	विश्लोक	१०७
१९२	वृत्त	२३०
१२६	वृन्ता	१७३
२१०	वेगवती	२५९
३३	वैतालीय	७१
१४७	वैश्वदेवी	१८९
२०५	व्याल	२४५
७०	व्रीडा	१३१
	श	
२०५	शङ्ख	२४५
१६८	शशिकला	२०७
८०	शशिवदना	१३५
१८९	शार्दूलविक्रीडित	२२८
१२०	शालिनी	१६८
१७८	शिखरिणी	२१७

अ. सं.		पृ. सं.
६०	शिखा	११९
१०२	शुद्धविराट्	१५०
२३२	शुद्धविराडार्षभ	२९०
१२८	श्येनिका	१७५
६४	श्री	१२७
१२३	श्री	१७१
	स	
७७	सती	१३३
९७	समानिका	१४५
७४	समृद्धि	१३२
८१	सावित्री	१३५
१८७	सिंहविक्रीडित	२२६
१६५	सिंहोद्धता	२०४
७३	सुमति	१३२
७२	सुमुखी	१३१
११८	सुमुखी	१६६
१९१	सुवदना	२२९
२२८	सौरभक	२८५
६५	स्त्री	१२८
१२३	स्त्री	१७१
१६९	स्रक्	२०९
१९४	स्रग्धरा	२३२
१४१	स्रग्विणी	१८४
१२५	स्वागता	१७२
	ह	
९०	हंसमाला	१४०
९४	हंसरुत	१४३
१८६	हरनर्तक	२२६
२१६	हरिणप्लुता	२६५
१८१	हरिणी	२२०
१००	हलमुखी	१४८

OUR PUBLICATIONS

A. GENERAL SERIES

JNANACATURVIMSI	1.25
PANDITARAJA KAVYA SANGRAHA	6.00
RGARTHASARA	2.50
SAMSKRTA KAVI JIVITAM	3.50
KSEMENDRA LAGHU KAVYA SANGRAHA	15.00
NARAKASURA VIJAYA VYAYOGA	1.50
SITARAMA VIHARA KAVYA	4.00
DANODDYOTA	6.50
CATALOGUE OF SANSKRIT MANUSCRIPTS IN OSMANIA UNIVERSITY	30.00
ARYASAPTASATI	8.00
VIKRAMORVASIYAM	8.00
DANODDYOTA Part II	8.50
„ „ Part III.	12.50
GITA GOVINDA	14.00
KASIKA Part I.	25.00

B. POPULAR SERIES

STORIES FROM KATHASARITSAGARA Part I.	2.00
„ „ „ Part II.	5.00
GEMS FROM SANSKRIT LITERATURE	1.50

SANSKRIT ACADEMY
OSMANIA UNIVERSITY,
HYDERABAD-7